कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 8042 विषय महाभारत
नाव. द्रोणपर्व (महाभारत) MSS.
लेखक/लिपीकार शंकरपंडित
पृष्ठ 228 काळ — पूर्ण/~~अपूर्ण~~

द्रे लक्ष्मीदत्त पु [illegible] तस्य राज्ञा दत्तं ॥

द्रोणपर्वेदं पुस्तकं ७

द्रो॰प॰
१

श्रीगणेशाय नमः॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमं। देवीं सरस्वतीं चैव ततो जयमुदीरयेत्॥ ॥जनमेजय उवाच॥ ॥
तमप्रतिमसत्त्वौजोबलवीर्यपराक्रमं। हतं देवव्रतं श्रुत्वा पांचाल्येन शिखंडिना॥ धृतराष्ट्रस्ततो राजा शोकव्याकुलचेतनः। कि
मचेष्टत विप्रर्षे हते पितरि वीर्यवान्। तस्य पुत्रो हि भगवन्भीष्मद्रोणमुखै रथैः। पराजित्य महेष्वासान्पांडवान्राज्यमिच्छति।
तस्मिन्हते भगवति केतौ सर्वधनुष्मतां। यदचेष्टत कौरव्यस्तन्मे ब्रूहि द्विजोत्तम॥ ॥वैशंपा॰॥ ॥निहतं पितरं श्रुत्वा
धृतराष्ट्रो नराधिपः। लेभे न शांतिं कौरव्यश्चिंताशोकपरायणः। तस्य चिंतयतो दुःखमनिशं पार्थिवस्य तं। आजगाम वि
शुद्धात्मा पुनर्गावल्गणिस्तदा। शिबिरात्संजयः प्राप्तो निशि नागाह्वयं पुरं। आंबिकेयो महाराज धृतराष्ट्रोन्वपृच्छत। श्रु
त्वा भीष्मस्य निधनमप्रहृष्टमना भृशं। पुत्राणां क्षयमाकांक्षन्विललाप सुदुःखितः॥ ॥धृतराष्ट्रः॥ ॥निपात्य तु महा
त्मानं भीष्मं भीमपराक्रमं। किमकुर्वन्परं तात कुरवः कालनोदिताः। भीष्मे च निहते शूरे सुदुर्धर्षे महौजसि। किं नु
स्वित्कुरवोकार्षुर्निमग्नाः शोकसागरे। तदुदीर्णं महासैन्यं त्रैलोक्यस्यापि संजय। भयमुत्पादयेत्तीव्रं पांडवानां महात्म
नां। देवव्रते तु निहते कुरूणामृषभे तदा। यदकार्षुर्नृपतयस्तन्ममाचक्ष्व संजय॥ ॥संजयः॥ ॥शृणु राजन्नेकमना वचनं
ब्रुवतो मम। यत्ते पुत्रास्तदाकार्षुर्हते देवव्रते मृधे। निहते तु तदा भीष्मे राजन्सत्यपराक्रमे। शयनं कल्पयामास भीष्मायामितते

राम
१

जसे। सोपधानं नरव्याघ्रं शरैः सन्नतपर्वभिः॥ विधाय रक्षां भीष्माय समाभाष्य परस्परं। पुनर्युद्धाय निर्जग्मुः क्षत्रियाः कालनो
दिताः॥ ततस्तूर्यनिनादैश्च भेरीणां च महास्वनैः॥ तावकानामनीकानि परेषां चैव निर्ययुः। व्यावृत्तेहनि राजेंद्र पतिते जाह्नवीसुते।
अमर्षवशमापन्नाः कालोपहतचेतसः॥ अनादृत्य वचः पथ्यं गांगेयस्य महात्मनः॥ निर्ययुर्भरतश्रेष्ठ शस्त्राण्यादाय सर्वशः॥ मोहा
त्तव सपुत्रस्य वधाच्छांतनवस्य च। कौरव्यास्तेन नाहूताः सर्वराजभिरन्विताः॥ अजावय इवागोपा वने श्वापदसंकुले। भृशमुद्वि
ग्नमनसो हीना देवव्रतेन ते। पतिते भरतश्रेष्ठे बभूव कुरुवाहिनी। द्यौरिवापेतनक्षत्रा हीनं खमिव वायुना। विपन्नसस्येव मही वागि
वासंस्कृता यथा। आसुरीव यथा सेना निगृहीते यथा बलौ। विधवेव वरारोहा शुष्कतोयेव निम्नगा। वृकैरिव वने रुद्धा पृषती हत
यूथपा। शार्दूलहतसिंहेव महती गिरिकंदरा। भारती भरतश्रेष्ठ पतिते जाह्नवीसुते। तिर्यग्वातहता रुग्णा नौरिवासीन्महार्णवे। ब
लिभिः पांडवैर्वीरैर्लब्धलक्षैर्भृशार्दिता। सा तदासीद्भृशं सेना व्याकुलाश्वरथद्विपा। विपन्नभूयिष्ठनरा कृपणा त्रस्तमानसा। त
स्यां तत्र नृपतयः सैनिकाश्च पृथग्विधाः। पाताल इव मज्जंतो हीना देवव्रतेन ते। कर्णं हि कुरवोकार्षुः स वै देवव्रतोपमं। सर्वशस्त्र
भृतां श्रेष्ठं रोचमानमिवातिथिं। बंधुमापद्गतस्येव तमेवोपागमन्मनः। चुक्रुशुः कर्ण कर्णेति तत्र भारत पार्थिवाः। राधेयं हितमस्मा
कं सूतपुत्रं तनुत्यजं। स हि नायुध्यत तदा दशाहानि महायशाः। सामात्यबंधुः कर्णो वै तमाह्वयत मा चिरं। भीष्मेण हि महाबाहो

द्रो०प०
२

सर्वक्षत्रस्य पश्यतः। रथेषु गण्यमानेषु बलविक्रमशालिषु। संख्यातोर्द्धरथः कर्णो द्विगुणः सन्नरर्षभः। रथातिरथसंख्यायां योयेपिः
शूरसंमतः। पितृवत्त्रवदेवेशानपियो योद्धुमुत्सहेत्। स तु तेनैव कोपेन राजन् गांगेयमुक्तवान्। त्वयि जीवति कौरव्य नाहं योत्स्ये क
थंचन। त्वया तु पांडवेयेषु निहतेषु महामृधे। दुर्योधनमनुज्ञाप्य वनं यास्यामि कौरव। पांडवैर्वा हते भीष्म त्वयि दुर्योधनस्य तु। हं
तास्म्येकरथेनैव कृत्स्नान्यान्मन्यसे रथान्। एवमुक्त्वा महाराज दशाहानि महायशाः। नायुध्यत ततः कर्णः पुत्रस्य तव संमते। भीष्मः
समरविक्रांतः पांडवेयस्य पार्थिव। जघान समरे योधानसंख्येयपराक्रमः। तस्मिंस्तु समरे शूरे सत्यसंधे महौजसि। त्वत्सुताः कर्ण
मस्मार्षुस्तर्तुकामा इवाप्लवं। तावकास्तव पुत्राश्च सहिताः सर्वराजभिः। हा कर्ण इति चाक्रंदन्कालोयमिति चाब्रुवन्। जामदग्न्याभ्यनुज्ञा
तमस्त्रेऽदुर्वारपौरुषं। अगमन्नो मनः कर्णं बंधुमात्ययं महाहवे। स हि शक्तो महाराज त्रातुमस्मान्महाभयात्। देवानिव यथा विष्णुः
स्त्रायते महतो भयात्।। ।।वैशं०।। ।। तथा कर्णं युधि वरं कीर्तयंतं पुनः पुनः। आशीविषवदुच्छ्वसन् धृतराष्ट्रोऽब्रवीदिदं।। ।।धृतराष्ट्रः।।
यत्तद्वैकर्तनं कर्णमगमद्वो मनस्तदा। अथ पश्यत राधेयं सूतपुत्रं तनुत्यजं। अपि तन्न मृषाकार्षीद्युधि सत्यपराक्रमः। संभ्रांतानां
तदार्तानां त्रस्तानां त्राणमिच्छतां। अपि सैन्यं वरयांचक्रे धनुर्धरवरस्तु युधि। यत्तदाहिः निहते भीष्मे कौरवाणामथाहवे। ततत्वंडर
स्यामास परेषामावहद्भयं। कृतवान्मम पुत्राणां जयाशां सफलामिति।। ।।इति श्रीमहाभारते द्रोणपर्वणि।।१।। संजय उवाच।।

राम
२

हतेभीष्मेमाधिरथिर्विदित्वाभिन्नांनावमिवात्यगाधेकुरूणां। सोदर्यवद्व्यसनात्सूतपुत्रःसंतारयिष्यंस्तवपुत्रस्यसेनां। श्रुत्वातु
कर्णःपुरुषेंद्रमच्युतंभीष्मंनिपातितंशांतनवंमहारथं। अथोपयात्तूर्णममित्रकर्षणोधनुर्द्धराणांप्रवरस्तदानृप। हतेतुभीष्मे
रथसत्तमेपरैर्निमज्जतींनावमिवार्णवेकुरून्। पितेवपुत्रांस्त्वरितोभ्ययात्ततःसंतारयिष्यंस्तवपुत्रसेनां॥ ॥कर्णः॥
यस्मिन्धृतिर्बुद्धिपराक्रमौजःसत्यंदमोवीरगुणाश्चसर्वे। अस्त्राणिदिव्यानिचसंनतिर्ह्रीःप्रियाचवागनपायिनीभी
ष्मे। ब्रह्मद्विषघ्नेसततंकृतज्ञेसनातनंचंद्रमसीवलक्ष्मीः। सचेत्प्रशांतःपरवीरहंतामन्येहतानेवहिसर्वयोधान्। ने
हध्रुवंकिंचनजातुविद्यतेलोकेह्यस्मिन्कर्मणोनित्ययोगात्। सूर्योदयेकोहिविमुक्तसंशयोयुद्धंप्रकुर्वीतमहाव्रतेहते।
वसुप्रभावेवसुवीर्यसंभवेगतेवसून्नेववसुंधराधिपे। वसूनिपुत्रांश्चवसुंधरांतथाकुरूंश्चशोचध्वमिमांचवाहिनीं॥ ॥
॥ ॥संजयः॥ ॥महाप्रभावेवरदेनिपातितेलोकेश्वरेशांतनवेमहौजसि। पराजितेषुभरतेषुदुर्मनाःकर्णोभृशंचाश्रु
तदाप्रवर्तयन्। इदंतुराधेयवचोनिशम्यसूताश्चराजंस्तवसैनिकाश्च। परस्परंचुक्रुशुरार्तविक्लवंतदाश्रुनेत्रैर्मुमुचु
र्हिशब्दवत्। प्रवर्तमानेतुपुनर्महाहवेप्रभिद्यमानासुचमूषुपार्थिवैः। अथाब्रवीद्धर्षकरंवचस्तदारथर्षभान्सर्व
महारथर्षभः। जगत्यनित्येसततंप्रधावतिविचिंतयन्नास्थिरमद्यलक्षये। भवत्सुतिष्ठत्स्विहपातितोरणेगिरि

प्रकाशः कुरुपुंगवः कथं। निपातितेशांतनवे महारथे दिवाकरे भूतलमास्थिते यथा। न पार्थिवाः सोढुमलं धनंजयं गिरि
प्रवोढारमिवानिलं द्रुमाः। हतप्रधानं त्विदमार्त्तरूपं परैर्हतोत्साहमनाथमद्य वै। मया कुरूणां परिपाल्यमाहवे ब
लं यथा तेन महात्मना तथा। समाहितं चात्मनि भारमीदृशं जगत्तथा नित्यमिदं तु लक्षये। निपातितं चाहवशौंडमाह
वे कथं न कुर्यान्निरुमीदृशो भयं। अहं तु तान्कुरुवृषभानजिह्मगैः प्रवेशयन्यमसदनं चरन्रणे। यशः परं जगति विभा
व्य वर्त्तितापरैर्हतो भुवि शयिताथवा पुनः। युधिष्ठिरो जगति च सत्यसंधवान्वृकोदरो गजशततुल्यविक्रमः। तथार्जु
नस्त्रिदशवरात्मजोयुवा न तद्बलं सृंजयमिहामरैरपि। यमौ रणे यत्र यमोपमौ बले ससात्यकिर्यत्र च देवकीसुतः। न
तद्बलं कापुरुषोभ्युपेयिवान्निवर्त्तते मृत्युमुखान्न चासकृत्। तपोभ्युदीर्णं तपसैव बाध्यते बलं बलेनैव तथा मन
स्विभिः। मनश्च मे शत्रुनिवारणे ध्रुवं स्वरक्षणे वाचलवद्व्यवस्थितं। एवं चैषां बाधमानः प्रभावं गत्वैवाहं ताञ्जयाम्यद्य सू
त। मित्रद्रोहो मर्षणीयो न मेयं भग्ने सैन्ये यः समेयात्स मित्रं। कर्त्तास्म्येतत्सत्पुरुषार्यकर्म त्यक्त्वा प्राणाननुयास्यामि भीष्मं।
सर्वान्संख्ये शत्रुसंघान्हनिष्ये हतस्तैर्वा वीरलोकं प्रपत्स्ये। संप्राकुष्टे रुदितस्त्रीकुमारे पराहते पौरुषे धार्त्तराष्ट्रे। मया
कृत्यमिति जानामि सूत तस्माद्राज्ञस्त्वद्य शत्रून्विजेष्ये। कुरून्रक्षन्पांडुपुत्रान्जिघांसन्त्यक्त्वा प्राणान्घोररूपे रणे

स्मिन्। सर्वान्संख्येशत्रुसंघान्निहत्यदास्याम्यहंधार्त्तराष्ट्रायराज्यं। निबध्यतांमेकवचंविचित्रंहैमंशुभ्रंमणिरत्नावभासि। शिरस्त्राणंचार्क
समानभासंधनुःशरांश्चाग्निविषाहिकल्पान्। उपासंगान्षोडशायोजयंतुधनूंषिदिव्यानितथाहरंतु। असीश्चशक्तीश्चगदाश्चगुर्वीःशंखं
चजांबूनदचित्रनालं। इमांरौक्मीनागकक्षींविचित्रांध्वजंचित्रंदिव्यमिंदीवराभं। श्लक्ष्णैर्वस्त्रैर्विप्रमृज्यानयंतुचित्रांमालांचात्रबद्धांसलाजां। अ
श्वानग्र्यान्पांडुराभ्रप्रकाशान्पुष्टान्स्नातान्मंत्रपूताभिरद्भिः। तप्तैर्भांडैःकांचनैरभ्युपेतान्शीघ्रान्शीघ्रंसूतपुत्रानयस्व। रथंचाग्र्यंहेममालावन
द्धंरत्नैश्चित्रंसूर्यचंद्रप्रकाशैः। द्रव्यैर्युक्तंसंप्रहारोपपन्नैर्वाहैर्युक्तंतूर्णमावर्तयस्व। चित्राणिचापानिचवेगवंतिज्याश्चोत्तमाःसन्नहनोपपन्नाः।
तूणांश्चपूर्णान्महतःशराणामासाद्यगात्रावरणानिचैव। प्रायात्रिकंचानयताशुसर्वंदध्नापूर्णंवीरकांस्यंचहैमं। आनीयमालामवबध्यचांगेप्रवा
दयंत्वाशुजयायभेरीः। प्रयाहिसूताशुयतःकिरीटीवृकोदरोधर्मसुतोयमौच। तान्वाहनिष्यामिसमेत्यसंख्येभीष्मायगच्छामिहतोद्विषद्भिः। यस्मिन्रा
जासत्यधृतिर्युधिष्ठिरःसमास्थितोभीमसेनार्जुनौच। वासुदेवःसात्यकिःसृंजयाश्चमन्येबलंतदजय्यंमहीपैः। तंचेन्मृत्युःसर्वहराभिरक्षतिस
दाप्रमत्तःसमरेकिरीटिनं। तथापिहंतास्मिसमेत्यसंख्येयास्यामिवाभीष्मपथायमाय। नत्वेवाहंनगमिष्यामितेषांमध्येशूराणांतत्रचाहंब्रवीमि।
मित्रद्रुहोदुर्बलभक्तयोयेपापात्मानोनममैतेसहायाः॥ ॥संजयउ०॥ ॥समृद्धिमंतंरथमुत्तमंदृढंसकूबरंहेमपरिष्कृतंशुभं। पताकिनं
वातजवैर्हयोत्तमैर्युक्तंसमास्थायययौजयायसः। संपूज्यमानःकुरुभिर्महात्मारथर्षभोदेवगणैर्यथेंद्रः। ययौतदायोधनमुग्रधन्वायत्राव
सानंभरतर्षभस्य। वरूथिनामहतासध्वजेनसुवर्णमुक्तामणिरत्नमालिना। सदश्वयुक्तेनरथेनकर्णोमेघस्वनेनार्कइवामितौजाः। हुता
शनाभःसहुताशनप्रभैःशुभःशुभैर्वैस्वरथेधनुर्धरः। स्थितोरराजाधिरथिर्महारथःस्वयंविमानेसुरराडिवस्थितः॥ ॥इतिद्रोणपर्वणि॥
॥२॥संजयउवाच॥ ॥शरतल्पेमहात्मानंशयानममितौजसं। महावातसमूहेनसमुद्रमिवशोषितं। दिव्यैरस्त्रैर्महेष्वासंपातितंसव्य

साचिना। जयाशातवृपुत्राणांसंभग्नाशर्मवर्मच। अपाराणामिवद्वीपमगाधेगाधमिछतां। स्रोतसायामुनेनेवशरौघेणपरि
प्लुतं। महेंद्रेणेवमैनाकमसह्यंभुविपातितं। नभश्च्युतमिवादित्यंपतितंधरणीतले। शतक्रतुमिवाचिंत्यंपुरावृत्रेणनिर्जितं।
मोहनंसर्वसैन्यस्ययुधिभीष्मस्यघातनं। ककुदंसर्वसैन्यानांलक्ष्मसर्वधनुष्मतां। धनंजयशरव्याप्तंपितरंतेमहाव्र
तं। तंवीरशायनेवीरंशयानंपुरुषर्षभं। भीष्ममाधिरथिर्दृष्ट्वाभरतानांमहाद्युतिः। अवतीर्यरथादार्त्तोबाष्पव्याकु
लिताक्षरं। अभिवाद्यांजलिंबध्वावंदमानोभ्यभाषत। कर्णोहमस्मिभद्रंतेवदमामभिभारत। पुण्ययाक्षेमया
वाचाचक्षुषाचावलोकय। ननूनंसुकृतस्येहफलंकश्चित्समश्नुते। यत्रधर्मपरोवृद्धःशेतेभुविभवानिह। को
शसंचयनेमंत्रेव्यूहप्रहरणेषुच। नाथमन्यंनपश्यामिकुरूणांकुरुपुंगव। बुध्याविशुद्धयायुक्तोयःकुरूंस्ता
रयेद्भयात्। योधांस्त्वेबहुधाहत्वापितृलोकंगमिष्यसि। अद्यप्रभृतिसंक्रुद्धाव्याघ्राइवमृगक्षयं। पांडवाभर
तश्रेष्ठकरिष्यंतिकुरुक्षयं। अद्यगांडीवघोषस्यवीर्यज्ञाःसव्यसाचिनः। कुरवःसंत्रसिष्यंतिवज्रपाणेरिवासु
राः। अद्यगांडीवमुक्तानामशनीनामिवस्वनः। त्रासयिष्यतिबाणानांकुरूनन्यांश्चपार्थिवान्। समि
द्धोग्निर्यथावीरमहाज्वालोद्रुमान्दहेत्। धार्त्तराष्ट्रान्प्रधक्ष्यंतितथाबाणाःकिरीटिनः। येनयेनप्रसरतोवाय्वग्नीसहि

तोवने।तेनतेनचदहंतोभूरिगुल्मतृणद्रुमान्।यादृशोग्निःसमिद्धोहितादृक्पार्थोनसंशयः।यथावायुर्नरव्याघ्रतथाहलसोनसं
शयः।नदतःपांचजन्यस्यरसतोगांडिवस्यच।श्रुत्वासर्वाणिसैन्यानिचासंयास्यंतिभारत।कपिध्वजस्यचोत्पातेरथस्याभिचक
र्षण।शब्दंसहिष्यंतित्वांतेवीरपार्थिवाः।कोह्यर्जुनंरणेयोद्धुंत्वदन्यःपार्थिवोर्हति।यस्यदिव्यानिकर्माणिप्रवदंतिमनीषि
णः।अमानुषैश्चसंग्रामःप्राप्तःकेनचधीमता।तस्माद्दैवैश्चसंग्रामेतोदुःशापमहतात्मभिः।कोन्यःशक्तोरणेजेतुंशर्वंयोनाजितःसुरैः।
जितोयेनरणेरामोभवतावीर्यशालिना।क्षत्रियांतकरोरामोदेवदानवपूजितः।तमद्याहंपांडवंयुद्धेशोढमनृष्यमाणोभवतस्तुशि
ष्टः।आशीविषंदृष्टिहनंसुघोरमिवायुपुरस्स्यधनंजयंवा॥ ॥इतिद्रोणपर्वणि॥२॥ संजयउवाच॥ ॥तस्यलालप्यतःश्रुत्वावृ
द्धःकुरुपितामहः।देशकालोचितंवाक्यमब्रवीत्प्रीतमानसः।समुद्रइवसिंधूनांज्योतिषामिवभास्करः।सत्यस्यचयथासंतोबीजा
नामिवचोर्वरा।पर्जन्यइवभूतानांप्रतिष्ठासुहृदांभव।बांधवास्त्वानुजीवंतुसहस्राक्षमिवामराः।मानहाभवशत्रूणांमित्राणां
नंदवर्धनः।कौरवाणांभवगतिर्यथाविष्णुर्दिवौकसां।स्वबाहुबलवीर्येणधार्तराष्ट्रप्रियैषिणा।कर्णराजपुरंगत्वाकांबोजानिह
तास्त्वया।हिमवद्दुर्गनिलयाःकिरातारणकर्कशाः।दुर्योधनस्यवशगाःकृताःकर्णत्वयापुरा।उत्कलामेकलाःपौंड्राःकलिंगांध्रा
श्चसंयुगे।निषादाश्चत्रिगर्ताश्चबाह्लीकाश्चजितास्त्वया।तत्रतत्रचसंग्रामेदुर्योधनहितैषिणा।बहवश्चहतावीरत्वयाकर्ण
मितौजसा।यथादुर्योधनस्तातसज्ञातिकुलबांधवः।तथात्वमपिसर्वेषांकौरवाणांगतिर्भव।शिवेनाभिवदामित्वांगच्छयुध्यस्वशत्रु

द्रो॰प॰
५

त्रुभिः। अनुरागाधिकुरूणां रव्येशास्य दुर्योधने जयं। भवान्योच समोस्माकं यथा दुर्योधनस्तथा। नवापि धर्मतः सर्वे यथा तस्य वयं तथा। यो
नात्संबंधकाल्लोके विशिष्टं संगतं सतां। सद्भिः सह रतं श्रेष्ठं वदंति मनीषिणः। स सत्यसंगरो भूत्वा ममेदमिति निश्चितं। कुरूणां पालय
बलं यथा दुर्योधनस्तथा। इति श्रुत्वा वचः सोथ चरणावभिवाद्य च। ययौ वैकर्तनिः कर्णस्तूर्णमायोधनं प्रति। सोभिवीक्ष्य नरौघाणां स्थ
नमप्रतिमं महत्। व्यूढप्रहरणोरस्कं सैन्यं तत्समबृंहयत्। हर्षिताः कौरवाः सर्वे दुर्योधनपुरोगमाः। तथायांतं महाबाहुं सर्वानीकपु
रस्कृतं। कर्णं दृष्ट्वा महात्मानं युद्धाय समवस्थितं। क्ष्वेडितास्फोटितरवैः सिंहनादरवैरपि। धनुःशब्दैश्च विविधैः कुरवः समपूजयन्॥
॥ ॥इति महाभारते द्रोणपर्वणि॥४॥ संजय उवाच॥ ॥रथस्थं पुरुषव्याघ्रं दृष्ट्वा कर्णमवस्थितं। हृष्टो दुर्योधनो राजा इदं वचनमब्रवीत्।
सनाथमिदमत्यर्थं भवता पालितं बलं। मन्ये किंतु समर्थं यद्धितं तत्संप्रधार्यतां॥ कर्ण उवाच॥ ॥ब्रूहि त्वं पुरुषव्याघ्र त्वं हि प्राज्ञतमो नृप।
यथा चार्थपतिः कृत्यं पश्यते न तथेतरः। ते स्म सर्वे तव वचः श्रोतुकामा नरेश्वर। नान्याय्यं हि तव वाक्यं ब्रूयादिति मतिर्मम॥ दुर्योधन।
भीष्मः सेनापतिश्चासीद्वयसा विक्रमेण च। श्रुतेन चोपपन्नः स सर्वयोधगणैर्वृतः। तेनातियशसा कर्ण घ्नता शत्रुगणान्मम। सुयुद्धे
न दशाहानि पालितानि महात्मना। तस्मिन्न सुकरं कर्म घातिवाह्यास्थिते दिवं। कं तु सेनाप्रणेतारं मन्यसे तदनंतरं। न हि नेनायकं से
ना मुहूर्तमपि तिष्ठति। आहवेष्वाहवश्रेष्ठ नेतृहीनेव नौर्जले। यथा ह्यकर्णधारा नौ रथो वा सारथिर्यथा। द्रवेद्यथेष्टं तद्वत्स्या
दृते सेनापतिं बलं। अदेशिको यथा सार्थः सर्वान्दोषान्समर्पति। अनायका तथा सेना सर्वान्दोषान्समार्छति। समयान्वीक्ष्य सर्वे

राम
५

षुमामकेषुमहात्मसु।पश्यध्वंसेनापतिंयुक्तमनुशांतनवादिह।यंहिसेनाप्रणेतारंभवान्वक्ष्यतिसंयुगे।तंवयंसहिताः
सर्वेकरिष्यामोनसंशयः॥ ॥कर्णउ॥ ॥सर्वएवमहात्मानइमेपुरुषसत्तम।सेनापतित्वमर्हंतिनात्रकार्यविचारणा।कु
लसंहननज्ञानैर्बलविक्रमबुद्धिभिः।युक्ताःश्रुतज्ञाधीमंतआहवेष्वनिवर्तिनः।युगपन्नतुतेशक्याःकर्तुंसर्वेपुरःसराः।
एकएवतुकर्तव्योयस्मिन्वैशेषिकागुणाः।अन्योन्यस्पर्द्धिनांह्येषांयद्येकंयंकरिष्यसि।शेषाविमनसोव्यक्तंनयोत्स्यंतिहिता
स्तव।अयंचसर्वयोधानामाचार्यःस्थविरोगुरुः।युक्तःसेनापतिःकर्तुंद्रोणःशस्त्रभृतांवरः।कोहितिष्ठतिदुर्द्धर्षेद्रोणेश
स्त्रभृतांवरे।सेनापतिःस्यादन्योस्माच्छुक्रांगिरसदर्शनात्।नचसोप्यस्तितेयोधःसर्वराजसुभारत।द्रोणंयःसमरेयांत
मनुयास्यतिसंयुगे।एषसेनाप्रणेतॄणामेषशस्त्रभृतामपि।एषबुद्धिमतांचैवश्रेष्ठोराजन्गुरुस्तव।एवंदुर्योधनाचार्य
माशुसेनापतिंकुरु।जिगीषंतोसुरान्संख्येकार्तिकेयमिवामराः॥ ॥संजयउ॥ ॥कर्णस्यवचनंश्रुत्वाराजादुर्योधन
स्तदा।सेनामध्यगतंद्रोणमिदंवचनमब्रवीत्॥ ॥दुर्योधनः॥ ॥वर्णश्रैष्ठ्यात्कुलोत्पत्त्याश्रुतेनवयसाधिया।वीर्या
द्दाक्ष्यादधृष्यत्वादर्थज्ञानान्नयाज्जयात्।तपसाचकृतज्ञत्वाद्वृद्धःसर्वगुणैरपि।युक्तोभवत्समोगोप्ताराज्ञामन्योनवि
द्यते।सभवान्पातुनःसर्वान्देवानिवशतक्रतुः।भवन्नेत्राःपरान्जेतुमिच्छामोद्विजसत्तम।रुद्राणामिवकापालीवसूना
मिवपावकः।कुबेरइवयक्षाणांमरुतामिववासवः।वसिष्ठइवविप्राणांतेजसामिवभास्करः।पितॄणामिवधर्मेन्द्रोयाद

सामिवचांबुराट्। नक्षत्राणामिवशशीदितिजानामिवोशनाः। श्रेष्ठः सेनाप्रणेतॄणांसनः सेनापतिर्भव। अक्षौहिण्योदशैका
चवशगाः संतुतेनघ। ताभिः शत्रून्प्रतिव्यूह्यजहींद्रोदानवानिव। प्रयातुनोभवानग्रेदेवानामिवपावकिः। अनुयास्याम
हेत्वाजौसौरभेयाइवर्षभं। उग्रधन्वामहेष्वासोदिव्यंविस्फारयन्धनुः। अग्रेभवंतंदृष्ट्वानार्जुनः प्रहरिष्यति। ध्रुवंयु
धिष्ठिरंसंख्येसानुबंधंसबांधवं। जेष्यामिपुरुषव्याघ्रभवान्सेनापतिर्यदि॥ ॥संजयउ॥ ॥एवमुक्तेततोद्रोणंजये
त्येवनराधिपाः। सिंहनादेनमहताहर्षयंतस्तवात्मजं। सैनिकाश्चमुदायुक्तावर्द्धयंतिद्विजोत्तमं। दुर्योधनंपुरस्कृत्यप्रा
र्थयंतिमहद्यशः॥ ॥इतिद्रोणपर्वणिद्रोणाभिषेकः॥५॥द्रोणउ॥ ॥वेदंषडंगंवेदाहमर्थविद्यांचमानवीं। त्रैयंब
कमथेष्वस्त्रंशस्त्राणिविविधानिच। येचाप्युक्तामयिगुणाभवद्भिर्जयकांक्षिभिः। चिकीर्षुस्तानहंकृत्स्नान्योधयिष्या
मिपांडवान्। पार्षतंतुरणेराजन्नहंनिष्येकथंचन। सहिसृष्टोवधार्थायममैवपुरुषर्षभः। योधयिष्यामिसैन्यानिना
शयन्सर्वसोमकान्। नचमांपांडवायुद्धेयोधयिष्यंतिहर्षिताः॥ ॥संजयउ॥ ॥सएवमभ्यनुज्ञातश्चक्रेसेनापतिंततः।
द्रोणंतवसुतोराजन्विधिदृष्टेनकर्मणा। अथाभिषिषिचुर्द्रोणंदुर्योधनमुखान्नृपाः। सेनापत्येयथास्कंदंपुराशक्रमु
खाः सुराः। अभिषिक्तस्ततोद्रोणोरराजातिभृशंतदा। अभिषिक्तः पुरास्कंदोयथाचस्कंरसत्तमैः। ततोवादित्रघोषेणशं
खानांचमहास्वनैः। प्रादुरासीत्कृतेद्रोणेहर्षः सेनापतौतदा। ततः पुण्याहघोषेणस्वस्तिवादस्वनेनच। संस्तवैर्गीतशब्दैश्च

श्रस्तूतमागधवंदिनां।जयशब्दैर्द्विजाग्र्याणांस्कंभगानशिनैस्तथा।सत्कृत्यविधिनाद्रोणंमेनिरेपांडवान्जितान्॥ ॥इति
द्रोणपर्वणि॥५॥ संजय उ॥ ॥सेनापत्यंतुसंप्राप्यभारद्वाजोमहारथः।युयुत्सुर्व्यूह्यसैन्यानिप्रायात्तवसुतैःसह।सैंधवश्च
कलिंगश्चविकर्णश्चतवात्मजः।दक्षिणंपार्श्वमास्थायसमतिष्ठंतदंशिताः।प्रपक्षःशकुनिस्तेषांप्रवरैर्हयसादिभिः।ययौगां
धारकैःसार्द्धंविमलप्रासयोधिभिः।कृपश्चकृतवर्माचचित्रसेनोविविंशतिः।दुःशासनमुखायत्ताःसव्यंपक्षमपालयन्।
तेषांप्रपक्षाःकांबोजाःसुदक्षिणपुरःसराः।ययुरश्वैर्महावेगैःशकाश्चयवनैःसह।मद्रास्त्रिगर्ताःसांबष्ठाःप्रतीच्योदीच्यमालवाः।
शिबयःशूरसेनाश्चशूद्राश्चमलदैःसह।सौवीराःकितवाःप्राच्यादाक्षिणात्याश्चसर्वशः।तवात्मजंपुरस्कृत्यसूतपुत्रस्यपृष्ठतः।
हर्षयंतःस्वसैन्यानिप्रायात्तवसुतैःसह।प्रवरःसर्वयोधानांबलेषुबलमादधत्।ययौवैकर्तनिःकर्णःप्रमुखेसर्वधन्विनां।तस्य
दीप्तोमहाकायःस्वान्यनीकानिहर्षयन्।हस्तिकक्षोमहाकेतुर्बभौसूर्यसमद्युतिः।नभीष्मव्यसनंकश्चित्दृष्ट्वाकर्णममन्यत।वि
शोकाश्चाभवन्सर्वेराजानःकुरुभिःसह।हृष्टाश्चबहवोयोधास्तत्राजल्पंतसंगताः।नहिकर्णंरणेदृष्ट्वायुधिस्थास्यंतिपांडवाः।कर्णो
हिसमरेशक्तोजेतुंदेवान्सवासवान्।किमुपांडुसुतान्युद्धेहीनवीर्यपराक्रमान्।भीष्मेणतुरणेपार्थाःपालिताबाहुशालिना।तां
स्तुकर्णःशरैस्तीक्ष्णैर्नाशयिष्यतिसंयुगे।एवंब्रुवंतस्तेन्योन्यंहृष्टरूपाविशांपते।राधेयंपूजयंतश्चप्रशंसंतश्चनिर्ययुः।अ
स्माकंशाकटव्यूहोद्रोणेनविहितोभवत्।परेषांक्रौंचएवासीत्व्यूहोराजन्महात्मनां।प्रीयमाणेनविहितोधर्मराजेनभारत।व्यू
हप्रमुखतस्तेषांतस्थतुःपुरुषर्षभौ।वानरध्वजमुच्छ्रित्यविष्वक्सेनधनंजयौ।ककुदंसर्वसैन्यानांधामसर्वधनुष्मतां।आदित्य

द्रो॰ प॰
७

पथगःकेतुःपार्थस्यामिततेजसः।दीपयामासतत्सैन्यंपांडवस्यमहात्मनः।यथाप्रज्वलितःसूर्योयुगांतेवैवसुंधरां।दीप्यन्ह
श्येतहितथाकेतुःसर्वत्रधीमतः।योधानामर्जुनःश्रेष्ठोगांडीवंधनुषांवरं।वासुदेवश्चभूतानांचक्राणांचसुदर्शनं।चत्वार्ये
तानितेजांसिवहन्श्वेतहयोरथः।परेषामग्रतस्तस्थौकालचक्रमिवोद्यतं।एवंतौसुमहात्मानौबलसेन्याग्रगावुभौ।ताव
कानांमुखेकर्णःपरेषांचधनंजयः।ततोजाताभिसंरंभौपरस्परवधैषिणौ।अवेक्षेतांतदान्योन्यंसमरेकर्णपांडवौ।ततःप्र
यातिसहसाभारद्वाजेमहारथे।आर्त्तनादेनघोरेणवसुधासमकंपत।ततस्तुमुलमाकाशमावृणोत्सदिवाकरं।वातोद्धूतंरज
स्तीव्रंकौशेयनिकरोपमं।ववर्षद्यौरनभ्रापिमांसास्थिरुधिराण्युत।गृध्राःश्येनाबकाःकंकावायसाश्चसहस्रशः।उपर्युप
रिसेनांतेतदापर्यपतन्नृप।गोमायवश्चप्राक्रोशन्भयदान्दारुणान्रवान्।अकार्षुरपसव्यंचबहुशःपृतनांतव।विश्वादिषं
तोमांसानिपिपासंतश्चशोणितं।अपतद्दीप्यमानाचसनिर्घातासकंपना।उल्काज्वलंतीसंग्रामेपुच्छेनावृत्यसर्वशः।परिवेषो
महांश्चापिसविद्युत्स्तनयित्नुमान्।भास्करस्याभवद्राजन्प्रयातेवाहिनीपतौ।एतेचान्येचबहवःप्रादुरासन्सुदारुणाः।उत्पा
तायुधिवीराणांजीवितक्षयकारिणः।ततःप्रववृतेयुद्धंपरस्परवधैषिणां।कुरुपांडवसैन्यानांशब्देनापूरयन्जगत्।तेत्वन्यो
न्यंसुसंरब्धाःपांडवाःकौरवैःसह।अभ्यघ्नन्निशितैःशस्त्रैर्जयगृद्धाःप्रहारिणः।सपांडवानांमहतींमहेष्वासोमहाद्युतिः।
वेगेनाभ्यद्रवत्सेनांकिरन्शरशतैःशितैः।द्रोणमभ्युद्यतंदृष्ट्वापांडवाःसहसृंजयैः।प्रत्यगृह्णंस्तदाराजन्शरवर्षैःपृथक्पृ

राम
७

थक। विक्षोभ्यमाणाद्रोणेनभिद्यमानामहाचमूः। व्यशीर्यतसपांचालावातेनेवबलाहकाः। बहूनीहविकुर्वाणोदिव्यान्यस्त्राणिसंयु
गे। अपीडयत्क्षणेनेवद्रोणः पांडवसृंजयान्। तेवध्यमानाद्रोणेनवासवेनेवदानवाः। पांचालाः समकंपंतधृष्टद्युम्नपुरोगमाः। ततो
दिव्यास्त्रविच्छूरोयाज्ञसेनिर्महारथः। अभिनच्छरवर्षेणद्रोणानीकमनेकधा। द्रोणस्यशरवर्षेणशरवर्षाणिपार्षतः। सन्निवार्य
ततः सर्वान्कुरूनप्यवधीद्बली। संयम्यतुततोद्रोणः समवस्थाप्यचाहवे। स्वमनीकंमहेष्वासः पार्षतंसमुपाद्रवत्। सबाणव
र्षंसुमहदसृजत्पार्षतंप्रति। मघवासमभिक्रुद्धः सहसादानवेष्विव। तेकंप्यमानाद्रोणेनबाणैः पांडवसृंजयाः। पुनः पुनरभज्यं
तसिंहेनेवेतरेमृगाः। तथापर्यचरद्द्रोणः पांडवानांबलंबली। अलातचक्रवद्राजन्स्तदद्भुतमिवाभवत्। खचरनगरकल्पंक
ल्पितंशास्त्रदृष्ट्याचलदनिलपताकंह्लादितंवल्गिताश्वं। स्फटिकविमलकेतुंत्रासनंशात्रवाणांरथवरमधिरूढः संजहारारि
सेनां॥ ॥इतिमहाभारतेद्रोणपर्वणि॥७॥ संजयउ॥ ॥तथाद्रोणमभिघ्नंतंसाश्वसूतरथद्विपान्। व्यथिताः पांडवादृष्ट्वा
नचैनंपर्यवारयन्। ततोयुधिष्ठिरोराजाधृष्टद्युम्नधनंजयो। अब्रवीत्सर्वतोयत्तैः कुंभयोनिर्निवार्यतां। तत्रैनमर्जुनश्चैवपा
र्षतश्चसहानुगः। प्रत्यगृह्णात्ततः सर्वेसमापेतुर्महारथाः। कैकेयाभीमसेनश्चसौभद्रोथघटोत्कचः। युधिष्ठिरोयमौमत्स्या
द्रुपदस्यात्मजास्तथा। द्रौपदेयाश्चसंहृष्टाधृष्टकेतुः ससात्यकिः। चेकितानश्चसंक्रुद्धोयुयुत्सुश्चमहारथः। येचान्येपार्थिवा
राजन्पांडवस्यानुयायिनः। कुलवीर्यानुरूपाणिचक्रुः कर्माण्यनेकशः। संरक्ष्यमाणांतांदृष्ट्वापांडवैर्वाहिनींरणे। व्यावृत्य

चक्षुषीकोपाद्भारद्वाजोन्ववैक्षत। सतीव्रंकोपमास्थायरथेसमरदुर्जयः। व्यधमत्पांडवानीकमभ्राणीवसदागतिः। रथानश्वान्न
रान्नागानभिधावन्नितस्ततः। चचारोन्मत्तवद्द्रोणोवृद्धोपितरुणोयथा। तस्यशोणितदिग्धांगाः शोणास्तेवातरंहसः। आ
जानेयाहयाराजन्नविश्रांताध्रुवंययुः। तमंतकमिवक्रुद्धमापतंतंयतव्रतं। दृष्ट्वासंप्राद्रवन्योधाः पांडवस्यततस्ततः। तेषांप्र
द्रवतांभीमः पुनरावर्ततामपि। पश्यतांतिष्ठतांचासीच्छब्दः परमदारुणः। शूराणांहर्षजननोभीरूणांभयवर्द्धनः। द्यावापृथिव्योर्वि
वरंपूरयामाससर्वतः। ततः पुनरपिद्रोणोनामविश्रावयन्युधि। अकरोद्रौद्रमात्मानंकिरन्शरशतैः परान्। सतथातिधनीके
षुपांडुपुत्रस्यमारिष। कालवच्चचरद्रोणोयुवेवस्थविरोबली। उत्कृत्यचशिरांस्युग्रोबाहूनपिसभूषणान्। कृत्वाशून्यान्र
थोपस्थानुदक्रोशन्महारवान्। तस्यहर्षप्रणादेनबाणवेगेनवाविभो। प्राकंपंतरणेयोधागावः शीतार्दिताइव। द्रोणस्यरथघो
षेणमौर्वीनिष्पेषणेनच। धनुःशब्देनचाकाशेशब्दः समभवन्महान्। यथास्यधनुषोबाणानिश्चरंतः सहस्रशः। व्याप्यसर्वा
दिशः पेतुर्नगाश्वरथपत्तिषु। तंकार्मुकमहावेगमस्त्रज्वलितपावकं। द्रोणमासादयांचक्रुः पांचालाः पांडवैःसह। तान्सकुंजर
पत्यश्वान्प्राहिणोद्यमसादनं। चक्रेचिरेणचद्रोणोमहींशोणितकर्दमां। तन्वतापरमास्त्राणिशरान्संततमस्यता। द्रोणेनविहि
तंदिक्षुशरजालमदृश्यत। पदातिस्यंदनाश्वेषुरथेष्वपिचसर्वशः। तस्यविद्युदिवाभ्रेषुचरन्केतुरदृश्यत। सकेकयानांप्रवरांश्चपं
चपंचालराजंचशरैःप्रमथ्य। युधिष्ठिरानीकमदीनसत्वोद्रोणोभ्ययात्कार्मुकबाणपाणिः। तंभीमसेनश्चधनंजयश्चशिनेश्च

नप्ताद्रुपदात्मजश्च। शैब्यात्मजः काशिपतिः शिबिश्चद्रुस्वानदंतो व्यकिरन् शरौघैः। तेषामथ द्रोणधनुर्विमुक्ताः पतत्रिणः कांचन
चित्रपुंखाः। भित्वा शरीराणि गजाश्वयूनां जग्मुर्महीं शोणितदिग्धवाजाः। सा योधसंघैश्च रथैश्च भूमिः शरैर्विभिन्नैर्गजवाजिभि
श्च। प्रच्छाद्यमाना पतितैर्बभूव समावृता द्यौरिव कालमेघैः। शैनेयभीमार्जुनवाहिनीशं सौभद्रपांचालसकाशिराजं। अन्यांश्च वीरां
न्समरे समृद्धान्द्रोणः सुतानां तव भूतिकामः। एतानि चान्यानि च कौरवेंद्र कर्माणि कृत्वा समरे महात्मा। प्रताप्य लोकानिव बाल
सूर्यो द्रोणो गतः स्वर्गमितो हि राजन्। एवं रुक्मरथः शूरो हत्वा शतसहस्रशः। पांडवानां रणे योधान्पार्षतेन निपातितः। अ
क्षौहिणीमभ्यधिकां शूराणामनिवर्तिनां। निहत्य पश्चाद्धृतिमानगच्छत्परमां गतिं। पांडवैः सह पांचालैरशिवैः क्रूरकर्मभिः। ह
तो रुक्मरथो राजन्कृत्वा कर्म सुदुष्करं। ततो निनादो भूतानामाकाशे समजायत। सैन्यानां च ततो राजन्नाचार्ये निहते युधि। द्यां
धरां खं दिशो वापि प्रदिशश्चानुनादयन्। अहो धिगिति भूतानां शब्दः समभवद्भृशं। देवताः पितरश्चैव पूर्वे ये चास्य बांधवाः। द
दृशुर्निहतं तं च भारद्वाजं महारथं। पांडवास्तु जयं लब्ध्वा सिंहनादान्प्रचक्रिरे। सिंहनादेन महता समकंपत मेदिनी॥ ॥इति
द्रोणपर्वणि॥ ८॥ धृतराष्ट्र उ॥ ॥किं कुर्वाणं रणे द्रोणं जघ्नुः पांडवसृंजयाः। तथा निपुणमस्त्रेषु सर्वशस्त्रभृतामपि। रथभं
गो बभूवास्य धनुर्वाशीर्यतास्यतः। प्रमत्तो वा भवद्द्रोणः ततो मृत्युमुपेयिवान्। कथं नु पार्षतस्तात शत्रुभिर्दुःप्रधर्षणं। किरंतमि
षुसंघातान्रुक्मपुंखाननेकशः। क्षिप्रहस्तं द्विजश्रेष्ठं कृतिनं चित्रयोधिनं। दूरेषुपातिनं दांतमस्त्रयुद्धेषु पारगं। पांचालपुत्रो

न्यवधीद्दिव्यास्त्रधरमच्युतं।कुर्वाणंदारुणंकर्मरणेयत्तंमहारथं।व्यक्तंहिदैवंबलवत्पौरुषादितिमेमतिः।यद्द्रोणोनिहतःशू
रःपार्षतेनमहात्मना।अस्त्रंचतुर्विधंवीरेयस्मिन्नासीत्प्रतिष्ठितं।तमिष्वस्त्रधराचार्यंद्रोणंशंससिमेहतं।श्रुत्वाहतंरु
क्मरथंवैयाघ्रपरिवारितं।जातरूपपरिष्कारंनाद्यशोकमुपाददे।ननूनंपरदुःखेनम्रियतेकोपिसंजय।यच्चद्रोणमहंश्रु
त्वाहतंजीवामिमंदधीः।दैवमेवपरंमन्येनन्वनर्थंहिपौरुषं।यच्चद्रोणंहतंश्रुत्वाहतोजीवामिमंदभाक्।अश्मसारम
यंनूनंहृदयंसुदृढंमम।यच्छ्रुत्वानिहतंद्रोणंशतधानविदीर्यते।ब्राह्मेदैवेतथेष्वस्त्रेयमुपासन्गुणार्थिनः।ब्राह्मणारा
जपुत्राश्चसकथंमृत्युनाहृतः।शोषणंसागरस्येवमेरोरिवविसर्पणं।पतनंभास्करस्येवनमृष्येद्रोणपातनं।दृप्तानांप्र
तिषेद्धासीद्धार्मिकाणांचरक्षिता।योहासीत्कृपणस्यार्थेप्राणानपिपरंतपः।मंदानांममपुत्राणांजययात्रायस्यविक्रमे।
बृहस्पत्युशनस्तुल्योबुध्यासनिहतःकथं।तेचशोणाबृहंतोश्वाश्छन्नाजालैर्हिरण्मयैः।रथेवातजवायुक्ताःसर्वशस्त्रातिगार
णे।बलिनोघोषिणोदांताःसैंधवाःसाधुवाहिनः।दृढाःसंग्राममध्येषुकच्चिदासन्नविह्वलाः।करिणांबृंहतांयुद्धेशंखदुं
दुभिनिस्वने।ज्याक्षेपशरवर्षाणांशस्त्राणांचसहिष्णवः।आशंसंतःपराञ्जेतुंजितश्वासाजितव्यथाः।हयाःपराजिताःशीघ्राः
भारद्वाजरथोद्वहाः।तेस्मरुक्मरथेयुक्तानरवीरसमाहिताः।कथंनाभ्यतरंस्तातपांडवानामनीकिनीं।जातरूपपरिष्कारमास्था
यरथमुत्तमं।भारद्वाजःकिमकरोच्छूरःसंक्रंदनोयुधि।विद्यांयस्योपजीवंतिसर्वलोकेधनुर्धराः।ससत्यसंधोभगवान्द्रोणःकिमक

रोद्युधि।दिविशक्रमिवश्रेष्ठंमहामात्रंधनुर्भृतां।केनुतंरौद्रकर्माणंयुद्धेप्रत्युदियूरथाः।नत्तुरुक्मरथंदृष्ट्वाप्रद्रवंतिस्मपांडवाः।
दिव्यमस्त्रंविकुर्वाणंरणेतस्मिन्महाबलं।उताहोसर्वसैन्येनधर्मराजःसहानुजः।पांचाल्यप्रग्रहोद्रोणंसर्वतःसमवारयत्।नूनं
मावारयत्पार्थोरथिनोन्यानजिह्मगैः।ततोद्रोणंसमारोहत्पार्षतःपापकर्मकृत्।नत्वहंपरिपश्यामिवधेकंचनशुष्मिणः।धृष्ट
द्युम्नादृतेरौद्रात्पाल्यमानात्किरीटिना।तैर्वृतःसर्वतःशूरैःपांचाल्यापसदस्ततः।कैकेयैश्चेदिकारूषैर्मत्स्यैरन्यैश्चभूमिपैः।
व्याकुलीकृतमाचार्यंपिपीलैरुरगंयथा।कर्मण्यसुकरेसक्तंजघानेतिमतिर्मम।योधीत्यचतुरोवेदान्सांगानाख्यानपंचमा
न्।ब्राह्मणानांप्रतिष्ठासीत्स्रोतसामिवसागरः।क्षत्रंचब्रह्मचैवेहयोभ्यतिष्ठत्परंतपः।सकथंब्राह्मणोवृद्धःशस्त्रेणवधमाप्त
वान्।अमर्षणोमर्षितवान्क्लिश्यमानःसदामया।अनर्हमाणःकौंतेयान्कर्मणस्तस्यतत्फलं।यस्यकर्मानुजीवंतिलोकेसर्वध
नुर्भृतः।ससत्यसंधःसुकृतीश्रीकामैर्निहतःकथं।दिविशक्रइवश्रेष्ठोमहासत्वोमहाबलः।सकथंनिहतःपार्थैःक्षुद्रमत्स्यैर्यथा
तिमिः।क्षिप्रहस्तश्चबलवान्दृढधन्वारिमर्दनः।नयस्यविजयाकांक्षीविषयंप्राप्यजीवति।यंद्वौनजहतःशब्दौजीवमानंकदा
चन।ब्राह्मंचवेदकामानांज्याघोषश्चधनुष्मतां।अदीनंपुरुषव्याघ्रंह्रीमंतमपराजितं।नाहंमृष्येहतंद्रोणंसिंहद्विरदविक्रमं।
कथंसंजयदुर्धर्षमनाधृष्ययशोबलं।पश्यतांपुरुषेंद्राणांसमरेपार्षतोवधीत्।केपुरस्तादयुध्यंतरक्षंतोद्रोणमंतिकात्।
केतुपश्चादवर्तंतगच्छंतोदुर्गमांगतिं।केरक्षन्दक्षिणंचक्रंसव्यंकेचमहात्मनः।पुरस्तात्केचवीरस्ययुध्यमानस्यसंयुगे।केच

तस्मिंस्तानुंत्यक्त्वाप्रतीपंमृत्युमाव्रजन्।द्रोणस्यसमरेवीराःकेकुर्वंतपरांगतिं।कच्चिन्नैनंभयान्मंदाःक्षत्रियाव्यजहन्रणे।रक्षितारस्ततः
शून्येकच्चित्तैर्नहतःपरैः।नसपृष्ठमरेत्रासाद्रणेशौर्य्यात्प्रदर्शयेत्।परामप्यापदंप्राप्यसकथंनिहतःपरैः।एतदार्येणकर्त्तव्यं
कृत्स्नात्स्वापत्सुसंजय।पराक्रमेद्यथाशक्त्यातच्चतस्मिन्प्रतिष्ठितं।मुह्यतेमेमनस्तातकथातावन्निवर्त्यतां।भूयस्तुलब्धसंज्ञस्त्वा
परिपृछामिसंजय॥ ॥इतिद्रोणपर्वणि॥८॥वैशंपा॥ ॥एतत्पृष्ट्वासूतपुत्रंहृच्छोकेनार्दितोभृशं।जयेनिराशःपुत्राणांधृत
राष्ट्रोपतत्क्षितौ।तंविसंज्ञंनिपतितंसिषिचुःपरिचारिकाः।जलेनात्यर्थशीतेनवीजंत्यःपुण्यगंधिना।पतितंचैनमालोक्यसमंताद्भर
तस्त्रियः।परिवव्रुर्महाराजंस्पृशंश्चैवपाणिभिः।उत्थाप्यचैनंशनकैराजानंपृथिवीतलात्।आसनंप्रापयामासुर्बाष्पकंठ्योवरांगनाः।
आसनंप्राप्यराजातुमू×म×र्छयाभिपरिप्लुतः।निश्चेष्टोतिष्ठत्तदावीज्यमानःसमंततः।सलब्ध्वाशनकैःसंज्ञांवेपमानोमहीपतिः।
पुनर्गावल्गणिंसूतंपर्यपृछद्यथातथं॥ ॥धृतराष्ट्रः॥ ॥यःसउद्यन्निवादित्योज्योतिषांप्रणुदंस्तमः।अजातशत्रुमायांतंकस्तंद्रोणाद
वारयत्।प्रभिन्नमिवमातंगंयथाहृष्टंतरस्विनं।प्रसन्नवदनंदृष्ट्वाप्रतिद्विरदगामिनं।वासितासंगमेयद्वदजय्यंप्रतियूथपैः।निजघान
रणेवीरान्वीरःपुरुषसत्तमः।योह्येकोहिमहावीर्योनिर्दहेद्घोरचक्षुषा।कृत्स्नंदुर्योधनबलंधृतिमान्सत्यसंगरः।चक्षुर्हणंजयेसक्त
मिष्वासधरमच्युतं।दांतंबहुमतंलोकेकेशूराःपर्यवारयन्।केदुःप्रधर्षंराजानमिष्वासधरमच्युतं।समासेदुर्नरव्याघ्रंकौंतेयंतत्रमा
मकाः।तरसैवाभिपद्याथयोवैद्रोणमुपाद्रवत्।यःकरोतिमहत्कर्मशत्रूणांवैमहाबलः।महाकायोमहोत्साहोनागायुतसमोबले।

तंत्तीमसेनमायांतंकेवीराः पर्य्यवारयन्। यदायाज्ज्ञलदग्ररथोरथः परमवीर्यवान्। पर्ज्जन्यइवबीभत्सुस्तुमुलामशनीमिव। विसृज
न्शरजालानिवर्षाणिमघवानिव। अवस्फूर्ज्जन्दिशः सर्वास्तिलनेमिस्वनेनच। चापविद्युत्प्रभोघोरोरथगुल्मबलाहकः। सनेमि
घोषस्तनितः शरशब्दातिबंधुरः। रोषनिर्ज्जितजीमूतोमनोभिप्रायशीघ्रगः। मर्मातिगोबाणधरस्तुमुलः शोणितोदकः। सप्लाव
यन्दिशः सर्वामानवैरास्तरन्महीं। भीमनिस्वनितोरौद्रोदुर्योधनपुरोगमान्। युद्धेभ्यषिंचद्विजयोगार्द्धपत्रैः शिलाशितैः। गां
डीवंधारयन्धीमान्कीदृशंवामनस्तदा। इषुसंबाधमाकाशंकुर्वन्कपिवरध्वजः। यदायात्कथमासीत्तुतदापार्थस्यमीक्षतां। कच्चिद्गांडी
वशब्देननप्रणश्यतवैबलं। यद्वः सभैरवंकुर्वन्अर्जुनोभृशमभ्ययात्। कच्चिन्नापान्नुदत्प्राणा निषुभिर्वोधनंजयः। वातोवेगादि
वाविध्यन्मेघांश्शरगणैर्नृपान्। कोहिगांडीवधन्वानंनैरणोसाढुंनरोर्हति। यमुपश्रुत्यसेनाग्रेजनः सर्वोविदीर्यते। यत्सेनाः स
मकंपंतयद्वीरानस्पृशद्भयं। केतत्रनाजहुर्द्रोणंकेक्षुद्राप्राद्रवन्भयात्। केवात्तत्रतनूस्त्यक्त्वाप्रतीपंमृत्युमाव्रजन्। अमानुषा
णांजेतारंयुद्धेष्वपिधनंजयं। नचवेगंसिताश्वस्यविसहिष्यंतिमामकाः। गांडीवस्यचनिर्घोषंप्रावृट्जलदनिस्वनं। विष्वक्सेनो
यस्ययंतायस्ययोद्धाधनंजयः। अशक्यः सरथोजेतुंमन्येदेवासुरैरपि। सुकुमारोयुवाशूरोदर्शनीयश्चपांडवः। मेधावीनिपुणो
धीमान्युधिसत्यपराक्रमः। आरावंविपुलंकुर्वन्व्यथयन्सर्वसैनिकान्। आयांतंनकुलंद्रोणंकेशूराः पर्यवारयन्। आशीविषइव
क्रुद्धः सहदेवोयदाभ्ययात्। कदनंकरिष्यन्शत्रूणांजेतासुदुर्जयोयुधि। आर्यव्रतममोघेषुंह्रीमंतमपराजितं। सहदेवंतमा

यांतं के शूराः पर्यवारयन्। यस्तु सौवीरराजस्य प्रमथ्य महतीं चमूं। आददे महिषीं भोजां काम्यां सर्वांगसुंदरीं। सत्यं धृतिश्च शौर्यं च ब्रह्मचर्यं च केवलं। सर्वाणि युयुधानेस्मिन्नित्यानि पुरुषर्षभे। बलिनं सत्यकर्माणमदीनमपराजितं। वासुदेवसमं युद्धे वासुदेवादनंतरं। धनंजयोपदेशेन श्रेष्ठमिष्वस्त्रकर्मणि। पार्थेन सममस्त्रेषु कस्तं द्रोणादवारयत्। वृष्णीनां प्रवरं वीरं शूरं सर्वधनुष्मतां। रामेण सममस्त्रेषु यशसा विक्रमेण च। सत्यं धृतिर्मतिः शौर्यं ब्रह्म चास्त्रमनुत्तमं। सात्वते तानि सर्वाणि त्रैलोक्यमिव केशवे। तमेवं गुणसंपन्नं दुर्वारमपि दैवतैः। समासाद्य महेष्वासं के शूराः पर्यवारयन्। पांचालेषूत्तमं वीरमुत्तमाभिजनप्रियं। नित्यमुत्तमकर्माणमुत्तमौजसमाहवे। युक्तं धनंजयहिते ममानर्थाय चोत्थितं। यमवैश्रवणादित्यमहेंद्रवरुणोपमं। महारथं समाज्ञातं द्रोणायोद्यतमाहवे। त्यजंतं तुमुले प्राणान्के शूराः समवारयन्। एकोपसृत्य चेदिभ्यः पांडवान्यः समाश्रितः। धृष्टकेतुं समायांतं द्रोणं कस्तं न्यवारयत्। योवधीत्केतुमान्वीरो राजपुत्रं दुरासदं। अपरांतगिरिद्वारे द्रोणात्कस्तं न्यवारयत्। स्त्रीपुंसयोर्नरव्याघ्रः सर्वदगुणिनो गुणान्। शिखंडिनं याज्ञसेनिमम्लानमनसं युधि। देवव्रतस्य समरे हेतुं मृत्योर्महात्मनः। द्रोणायाभिमुखं यांतं के वीराः पर्यवारयन्। वृष्णीनां प्रवरं वीरं वरं सर्वधनुष्मतां। यस्मिन्नभ्यधिका वीरे गुणाः सर्वे धनंजयात्। यस्मिन्नस्त्राणि सत्यं च ब्रह्मचर्यं च सर्वदा। वासुदेवसमं वीर्ये धनंजयसमं बले। तेजसादित्यसदृशं बृहस्पतिसमं मतौ। अभिमन्युं महात्मानं व्यात्ताननमिवांतकं। द्रोणायाभिमुखं यांतं के शूराः समवारयन्। तरुणस्तरुणप्रज्ञः सौभद्रः परवीरहा। यदाभ्यधावद्द्रोणं तदासीद्वो मनः

कथंद्रौपदेयान्नरव्याघ्राःसमुद्रमिवसिंधवः।यद्द्रोणमाद्रवन्तंसंख्येकेशूरास्तान्यवारयन्।येतेद्वादशवर्षाणिक्रीडामुत्सृज्यबालकाः।अ
स्त्रार्थमवसन्भीष्मेबिभ्रंतोव्रतमुत्तमं।क्षत्रंजयःक्षत्रदेवःक्षत्रवर्माचमानदः।धृष्टद्युम्नात्मजावीराःकेतान्द्रोणादवारयन्।शतानिद्वि
ष्टंयंयुद्धेसममन्यतसृंजयः।चेकितानंमहेष्वासंकस्तंद्रोणादवारयत्।वार्द्धक्षेमिःकलिंगानांयःकन्यामाहरद्युधि।अनाधृष्टिरदी
नात्माकस्तंद्रोणादवारयत्।भ्रातरःपंचकैकेयाधार्मिकाःसत्यविक्रमाः।इंद्रगोपकसंकाशारक्तवर्मायुधध्वजाः।मातृष्वसुःसुता
वीराःपांडवानांजयार्थिनः।तान्द्रोणंहंतुमायातान्केवीराःपर्यवारयन्।यंयोधयंतोराजानोनाजयन्वारणावते।षण्मासानपिसं
रब्धाजिघांसंतोयुधांपतिं।धनुष्मतांवरंशूरंसत्यसंधंमहाबलं।द्रोणात्कस्तंनरव्याघ्रंयुयुत्सुंपर्यवारयत्।यःपुत्रःकाशिराजस्यवा
राणस्यांमहारथं।समरेस्त्रीषुगृध्यंतंभल्लेनापाहरद्रथात्।धृष्टद्युम्नंमहेष्वासंपार्थानांमंत्रधारिणं।युक्तंदुर्योधनानर्थेसृष्टंद्रोणवधा
यच।निर्दहंतंरणेयोधान्दारयंतंचसर्वशः।द्रोणाभिमुखमायांतंकेशूराःपर्यवारयन्।उत्संगइवसंवृद्धंद्रुपदस्यास्त्रवित्तमं।शिखं
डिनंशरसंगुप्तंकेचद्रोणादवारयन्।यइमांपृथिवींकृत्स्नांचर्मवत्समवेष्टयत्।महतारथघोषेणमुख्यारिघ्नोमहारथः।दशाश्वमेधाना
जह्रेस्वन्नपानाप्तदक्षिणान्।निरर्गलान्सर्वमेधान्पुत्रवत्पालयन्प्रजाः।गंगास्रोतसियावंत्यःशिकताश्चपथरोषतः।तावतीर्गादिदौवीर
उशीनरसुतोध्वरे।नपूर्वेनापरेचक्रुरिदंकेचनमानवाः।इतीदंचुक्रुशुर्देवाःकृतेकर्मणिदुःकरे।पश्यामस्त्रिषुलोकेषुनतंसंस्थास्नुचा
रिषु।जातंवापिजनिष्यंतंद्वितीयंचापिसांप्रतं।अन्यमौशीनराच्छैब्याद्धुरोवोढारमित्युत।गतिंयस्यनयास्यंतिमानुषालोकवासिनः।
तस्यनप्तारमायांतंशैब्यंकःसमवारयत्।द्रोणायाभिमुखंयांतंव्यात्ताननमिवांतकं।विराटस्यरथानीकंमत्स्यस्यामित्रघातिनः।प्रेप्सं

द्रो०प०
१२

तंसमरेद्रोणंकेवीराः पर्यवारयन्।सघोटकोदराज्जातोमहाबलपराक्रमः।मायावीराक्षसोवीरोयस्मान्मममहद्भयं।पार्थानांजयकामंतंपुत्रा
णांममकंटकं।घटोत्कचंमहात्मानंकस्तंद्रोणादवारयत्।एतेचान्येचबहवोयेषामर्थायसंजय।त्यक्तारःसंयुगेप्राणान्किंतेषामजितंयुधि।
येषांचपुरुषव्याघ्रःशार्ङ्गधन्वाव्यपाश्रयः।हितार्थश्चापिपार्थानांकथंतेषांपराजयः।लोकानांगुरुरत्यर्थंलोकनाथःसनातनः।नारायणो
रणेनाथोदिव्योदिव्यात्मवान्प्रभुः।यस्यदिव्यानिकर्माणिप्रवदंतिमनीषिणः।तान्यहंकीर्त्तयिष्यामिभक्त्याधैर्यार्थमात्मनः॥ ॥इतिद्रोण
पर्वणि॥१०॥धृतराष्ट्र॥ ॥शृणुदिव्यानिकर्माणिवासुदेवस्यसंजय।कृतवान्यानिगोविंदोयथानान्यःपुमान्क्वचित्।संवर्द्धतागोपकुलेबाले
नैवमहात्मना।विख्यापितंबलंबाह्वोस्त्रिषुलोकेषुसंजय।उच्चैःश्रवस्तुल्यबलंवायुवेगसमंजवे।जघानहयराजंतंयमुनावनवासिनं।दानवं
घोरकर्माणंगवांमृत्युमिवोत्थितं।वृषरूपधरंबाल्येभुजाभ्यांनिजघानह।प्रलंबंनरकंजंभंपीठंचापिमहासुरं।मुरुंचांतकसंकाशमवधी
त्पुष्करेक्षणः।तथाकंसोमहातेजाजरासंधेनपालितः।विक्रमेणैवकृष्णेनसगणःपातितोरणे।सुनामारणविक्रांतःसमग्राक्षौहिणीपतिः।
भोजराजस्यमध्यस्थोभ्राताकंसस्यवीर्यवान्।बलदेवद्वितीयेनकृष्णेनामित्रघातिना।तरस्वीसमरेदग्धःससैन्यःशूरसेनराट्।दुर्वासानाम
विप्रर्षिःतथापरमकोपनः।आराधितःसदारेणसचास्मैप्रददौवरान्।तथागांधारराजस्यसुतांवीरःस्वयंवरे।निर्जित्यपृथिवीपालान्नावह
त्पुष्करेक्षणः।अमृष्यमाणाराजानोयस्यजात्याहयाइव।रथेवैवाहिकेयुक्ताःप्रतोदेनकृतव्रणाः।जरासंधंमहाबाहुमुपायेनजनार्दनः।प
रेणघातयामाससमग्राक्षौहिणीपतिं।चेदिराजंचविक्रांतंराजसेनापतिंबली।अर्घ्येविवदमानंचजघानपशुवत्तदा।सौभंदैत्यपुरंखस्थं
शाल्वगुप्तंदुरासदं।समुद्रकुक्षौविक्रम्यपातयामासमाधवः।अंगान्वंगान्कलिंगांश्चमागधान्काशिकोशलान्।वात्स्यगार्ग्यकरूषांश्च
पौंड्रांश्चाप्यजयद्रणे।आवंत्यान्दाक्षिणात्यांश्चपार्वत्तीयान्दशेरकान्।काश्मीरकानौरसिकान्पिशाचांश्चसमुद्गलान्।कांबोजान्

राम
१२

वाटधानांश्च चोलान्पांड्यांश्च संजय। त्रिगर्त्तान्मालवांश्चैव दरदांश्च सुदुर्ज्जयान्। नानादिग्भ्यश्च संप्राप्तान्व्रशांश्चै
वशकांस्तथा। जित्तवान्पुंडरीकाक्षो यवनं च सहानुगं। अविक्रियमकरावासं यादोगणनिषेवितं। जिगाय वरुणं संख्ये
सलिलांतर्गतं पुरा। युधि पंचजनं हत्वा पातालतलवासिनं। पांचजन्यं हृषीकेशो दिव्यं शंखमवाप्तवान्। खांड
वे पार्थसहित स्तोषयित्वा हुताशनं। आग्नेयमस्त्रं दुर्द्धर्षं चक्रं लेभे महाबलः। वैनतेयं समारुह्य त्रासयित्वाम
रावतीं। महेंद्रभवनाद्वीरः पारिजातमुपानयत्। तच्च मर्षितवान्शक्रो जानंस्तस्य पराक्रमं। राज्ञां चाप्य
जितं किंचित्कृष्णेनेह न शुश्रुम। यच्च तन्महदाश्चर्यं सभायां मम संजय। हतवान्पुंडरीकाक्षः कस्तदन्य इहा
र्हति। यच्च भक्त्या प्रसन्नोहमद्राक्षं कृष्णमीश्वरं। तन्मे सुविदितं सर्वं प्रत्यक्षमिव चागमात्। नांतो विक्रमयु
क्तस्य बुध्या युक्तस्य वा पुनः। कर्मणां शक्यते गंतुं हृषीकेशस्य संजय। तथा गदश्च सांबश्च प्रद्युम्नोथ विदू
रथः। अगावहोनिरुद्धश्च चारुदेष्णः ससारणः। उल्मुको निशठश्चैव झिल्ली बभ्रुश्च वीर्यवान्। पृथुश्च वि
पृथुश्चैव समीको थारिमेजयः। एते न्ये बलवंतश्च वृष्णिवीराः प्रहारिणः। कथंचित्पांडवानीकं श्रयेयुः स

मरेस्थिताः। आहूता वृष्णिवीरेण केशवेन महात्मना। ततः संशयितं सर्वं भवेदिति मतिर्मम। नागायुतबलो वीरः
कैलासशिखरोपमः। वनमाली हली रामस्तत्र यत्र जनार्दनः। यमाहुः सर्वपितरं वासुदेवं द्विजातयः। अपि वा
ह्येष पांडूनां योत्स्यते थर्थयि संजय। स यदा र्थयिसन्नत्येत् पांडवार्थयि संजय। न तदा प्रतिसंयोद्धा भविता तत्र
कश्चन। यदि स्म कुरवः सर्वे जयेयुर्नाम पांडवान्। वार्ष्णेयोऽर्थयिते षां वैगृह्णीयाच्छस्त्रमुत्तमं। ततः सर्वान्निरव्या
घ्राहत्वा नरपतीन्रणे। कौरवांश्च महाबाहुः कुंत्यै दद्यात्स माधवः॥ यस्य यंता हृषीकेशो यायस्य योद्धा धनंजयः।
रथस्य तस्य कः संख्ये प्रत्यनीको भवेद्रथः। न केनचिदुपायेन कुरूणां दृश्यते जयः। तस्मान्मे सर्वमाचक्ष्व यथा युद्ध
मवर्तत। अर्जुनः केशवस्यात्मा कृष्णोप्यात्मा किरीटिनः। अर्जुने विजयो नित्यं कृष्णे कीर्तिश्च शाश्वती। सर्वेष्वपि
च लोकेषु बीभत्सुरपराजितः। प्राधान्येनैव भूयिष्ठमभेयाः केशवे गुणाः। मोहाद्दुर्योधनः कृष्णं यो न वेत्तीह केश
वं। मोहितो दैवयोगेन मृत्युपाशपुरस्कृतः। न वेद कृष्णं दाशार्हं अर्जुनं चैव पांडवं। पूर्वदेवौ महात्मानौ नरनाराय
णावुभौ। एकात्मानौ द्विधाभूतौ दृश्येते मानवैर्भुवि। मनसापि हि दुर्धर्षौ सेनामेतां यशस्विनौ। नाशयेतामिह

ध्रुवंतौमाखुषतांचनेष्टतः। युगस्येवविपर्यासोलोकानामिवमोहनं। भीष्मस्यचवधस्तातद्रोणस्यचमहात्मनः। नह्येवब्रह्मचर्येण
नवेदाध्ययनेनच। नक्रियाभिर्नचास्त्रेणमृत्योःकश्चिन्निवार्यते। लोकसंभावितौवीरौकृतास्त्रौयुद्धदुर्मदौ। भीष्मद्रोणौहतौश्रु
त्वाकिंनुजीवामिसंजय। यांतांश्रियमसूयामःपुरादृष्ट्वायुधिष्ठिरे। अद्यतामनुजानीमोभीष्मद्रोणवधेनहि। मत्कृतेचाप्यनु
प्राप्तःकुरूणामेषसंक्षयः। पक्कानांहिवधेसूतवज्रायंतेतृणान्युत। अनंतमिदमैश्वर्यंलोकेप्राप्तोयुधिष्ठिरः। यस्यकोपा
न्महात्मानौभीष्मद्रोणौनिपातितौ। प्राप्तःप्रकृतितोधर्मोनधर्मोभीमकान्प्रति। क्रूरःसर्वविनाशायकालोसौनातिवर्तते।
अन्यथाचिंतिताह्यर्थानरैस्तातमनस्विभिः। अन्यथैवप्रपद्यंतेदैवादितिमतिर्मम। तस्मादपरिहार्येर्थेसंप्राप्तेकृच्छ्रउत्तमे।
अपारणीयेदुश्चिंत्येयथाभूतंप्रचक्ष्वमे॥ ॥इतिमहाभारतेद्रोणपर्वणि॥११॥ संजयउवाच॥ ॥हंततेकथयिष्यामि
सर्वंप्रत्यक्षदर्शिवान्। यथासैन्यपतद्द्रोणःसूदितःपांडुसृंजयैः। सेनापतित्वंसंप्राप्यभारद्वाजोमहारथः। मध्येसर्वस्यसै
न्यस्यपुत्रंतेवाक्यमब्रवीत्। यत्कौरवाणामृषभादापगेयादनंतरं। सेनापत्येनयद्राजन्मामद्यकृतवानसि। सदृशंकर्मण
स्तस्यफलंप्राप्नुहिभारत। करोमिकामंकंतेद्यप्रवृणीष्वयमिच्छसि। ततोदुर्योधनोराजाकर्णदुःशासनादिभिः। तमथोवाच
दुर्धर्षमाचार्यंजयतांवरं। ददासिचेद्वरंमह्यंजीवग्राहंयुधिष्ठिरं। गृहीत्वारथिनांश्रेष्ठंमत्समीपमिहानय। ततःकुरूणामा
चार्यःश्रुत्वापुत्रस्यतेवचः। सेनांप्रहर्षयन्सर्वामिदंवचनमब्रवीत्। धन्यःकुंतीसुतोराजन्यस्यग्रहणमिच्छसि। न

वधार्थंस्फुर्द्धर्षवरमद्यप्रयाचसे। किमर्थंचनरव्याघ्रनवधंतस्यकांक्षसे। नाशंससिक्रियामेतांमत्तोदुर्योधनध्रुवं।
अहोस्विद्धर्मराजस्यद्वेष्टातस्यनविद्यते। यदिच्छसित्वंजीवंतंकुलंरक्षसिचात्मनः। अथवाभरतश्रेष्ठनिर्जित्ययुधि
पांडवान्। राज्यंसंप्रतिदत्वाचसौभ्रात्रंकर्तुमिच्छसि। धन्यःकुंतीसुतोराजासुजातंतस्यधीमतः। अजातशत्रुता
सत्यात्तस्ययत्स्निह्यतेभवान्। द्रोणेनचैवमुक्तस्यतवपुत्रस्यभारत। सहसानिःसृतोभावोयोस्यनित्यंहृदिस्थि
तः। नाकारोगूहितुंशक्योबृहस्पतिसमैरपि। तस्मात्तवसुतोराजन्प्रहृष्टोवाक्यमब्रवीत्। वधेकुंतीसुतस्या
जौनाचार्यविजयोमम। हतेयुधिष्ठिरेपार्थोहन्यात्सर्वान्हिनोध्रुवं। नचशक्यारणेसर्वेनिहंतुममरैरपि।
यएवतेषांशेषःस्यात्सएवास्माननशेषयेत्। सत्यप्रतिज्ञेत्वानीतेपुनर्द्यूतेननिर्जिते। पुनर्यास्यंत्यरण्यायपांड
स्तमनुव्रताः। सोयंममजयोव्यक्तंदीर्घकालंभविष्यति। अतोनवधमिच्छामिधर्मराजस्यकर्हिचित्। तस्यजिह्मम
भिप्रायंज्ञात्वाद्रोणोर्थतत्ववित्। तंवरंसांतरंतस्मैददौसंचिंत्यबुद्धिमान्॥ ॥द्रोणउवाच॥ ॥नचेद्युधिष्ठिरंवी
रःपालयत्यर्जुनोयुधि। मन्यध्वंपांडवश्रेष्ठमानीतंवशमात्मनः। नहिशक्योरणेपार्थःसेंद्रैर्देवासुरैरपि।

प्रस्कंधात्तु मतस्मात्तनैतदामर्षयाम्यहं। असंशयं समछिंद्यो मत्तर्वध्यास्य कर्मणि। ततरुणः स्कलतैर्युक्तः एकायनगतस्त्विह। अस्त्राणां शास्त्रे रुत्सात्
भूयः स समवाप्तवान्। अमर्षितश्चते राजंस्ततो नामर्षयाम्यहं। सचापक्रम्य तां तावधेनोपाये न शक्ष्यते। अपनीते ततः पार्थे धर्मराजो जितस्त्व
या। ग्रहणे हि जयस्तस्य न वधे पुरुषर्षभ। एतेन चाप्युपायेन ग्रहणं समुपेष्यति। अहं गृहीत्वा राजानं सत्यधर्मपरायणं। आनयिष्यामि ते राज
न्वशमद्य न संशयः। यदि स्थास्यति संग्रामे मुहूर्तमपि मेग्रतः। अपनीते नरव्याघ्रे कुंतीपुत्रे धनंजये। फाल्गुनस्य समीपे तु न हि शक्यो युधिष्ठि
रः। ग्रहीतुं समरे राजन्सेंद्रैरपि सुरासुरैः॥ ॥संजय उ०॥ ॥सांतरे तु प्रतिज्ञाते राज्ञो द्रोणेन निग्रहे। ग्रहीतं तममन्यंत तव पुत्राः स्वबालिशाः।
पांडवेयेषु सापेक्षं द्रोणं जानाति ते सुतः। ततः प्रतिज्ञास्थैर्यार्थं स मंत्रो बहुलीकृतः। ततो दुर्योधनेनापि ग्रहणं पांडवस्य तत्। सैन्यस्थानेषु सर्वेषु
स्वघोषितमरिंदम॥ ॥इति द्रोणपर्वणि॥ अ॥ संजय उवाच॥ ॥सांतरे तु प्रतिज्ञाते राज्ञो द्रोणेन निग्रहे। ततस्ते सैनिकाः श्रुत्वा तं युधिष्ठिरनिग्र
हं। सिंहनादरवांश्चक्रुर्बाणशंखरवैः सह। तत्तु सर्वं यथान्यायं धर्मराजेन भारत। आप्तैराशु परिज्ञातं भारद्वाजचिकीर्षितं। ततः सर्वान्समानाय्य
भ्रातॄनन्यांश्च सर्वशः। अब्रवीद्धर्मराजस्तु धनंजयमिदं वचः। श्रुतं ते पुरुषव्याघ्र द्रोणस्याद्य चिकीर्षितं। यथा तन्न भवेत्सत्यं तथा नीतिर्विधी
यतां। सांतरं हि प्रतिज्ञातं द्रोणेनामित्रकर्षण। तच्चांतरं महेष्वास त्वयि तेन समाहितं। स त्वमद्य महाबाहो युध्यस्व द्रोणमंतरे। यथा दुर्योधनः का
मं नेमं द्रोणाद्वाप्नुयात्॥ ॥अर्जुन उवाच॥ ॥यथा मे न वधः कार्य आचार्यस्य कदाचन। तथा तव परित्यागो न मे राजंश्चिकीर्षितः। अप्येवं
पांडव प्राणानुत्सृजेयमहं युधि। प्रतीपो नाहमा[illegible]भवेयं वै कथंचन। त्वां निगृह्याहवे राज्यं धार्तराष्ट्रो यमिच्छति। न स तं जीवलोकेस्मिन्कामं

द्रो॰प॰
१५

शास्ता कथंचन। अपतेद्यौः सनक्षत्रा पृथिवी शकली भवेत्। न त्वां द्रोणो निगृह्णीयाज्जीवमाने मयि ध्रुवं। यदि तस्य रणे साह्यं कुरुते वज्रभृत्स्व
यं। विबुधैर्वा सहितो दैवैर्न त्वां प्राप्स्यत्यसौ मृधे। मयि जीवति राजेंद्र न भयं कर्तुमर्हसि। द्रोणादस्त्रभृतां श्रेष्ठात्सर्वशस्त्रभृतामपि। अन्यच्च श्रू
यां राजेंद्र प्रतिज्ञां मम नित्यदा। न स्मराम्यनृतां वाचं न स्मरामि पराजयं। न स्मरामि प्रतिश्रुत्य किंचिदप्यनृतं कृतं॥ ॥संजय उवाच॥ ततः
शंखाश्च भेर्यश्च मृदंगाश्चानकैः सह। प्रवाद्यंत महाराज पांडवानां निवेशने। सिंहनादश्च संजज्ञे पांडवानां महात्मनां। धनुर्ज्यातलशब्दश्च
गगनस्पृक्सुभैरवः। श्रुत्वा शंखस्य निर्घोषं पांडवस्य महौजसः। त्वदीयेष्वप्यनीकेषु वादित्राण्यभिजघ्निरे। ततो व्यूढान्यनीकानि तव
तेषां च संयुगे। भारत। शनैरुपेयुरन्योन्यं योत्स्यमानानि संयुगे। ततः प्रववृते युद्धं तुमुलं लोमहर्षणं। पांडवानां कुरूणां च द्रोणपांचा
ल्ययोरपि। यतमानाः प्रयत्नेन द्रोणानीकविशातने। न शेकुः सृंजया युद्धे तद्धि द्रोणेन पालितं। तथैव तव पुत्रस्य रथोदाराः प्रहारि
णः। न शेकुः पांडवीं सेनां पाल्यमानां किरीटिना। चास्तां ते स्तिमिते सेने रक्ष्यमाणे परस्परं। संप्रसुप्ते यथा नक्तं वनराज्यौ सुपुष्पिते। त
तो रुक्मरथो राजन्नर्केणेव विराजता। वरूथिना विनिष्पत्य व्यचरत्तत नामुखे। तमुद्यंतं रथेनैकमाशुकारिणमाहवे। अनेकमिव संत्रा
सान्मेनिरे पांडुसृंजयाः। तेन मुक्ताः शरा घोरा विचेरुः सर्वतो दिशं। त्रासयंतो महाराज पांडवेयस्य वाहिनीं। मध्यंदिनमनुप्राप्तो गभ
स्तिशतसंवृतः। यथा दृश्येत घर्मांशुस्तथा द्रोणो प्यदृश्यत। न चैनं पांडवेयानां कश्चिच्छक्नोति भारत। वीक्षितुं समरे क्रुद्धं महेंद्रमिव दान
वाः। मोहयित्वा ततः सैन्यं भारद्वाजः प्रतापवान्। धृष्टद्युम्नबलं तूर्णं व्यधमन्निशितैः शरैः। स दिशः सर्वतो रुध्वा संवृत्य खमजिह्मगैः।

राम
१५

पार्षतोयत्र तत्रैवमम्रुदे पांडुवाहिनीं॥ ॥इति द्रोणपर्वणि॥श्री॥ संजय उवाच॥ ॥ततः स पांडवानीके जनयन्सुमहद्भयं। व्यचरत्पृतनां द्रोणो
दहन्कक्षमिवानलः। निर्दहंतमनीकानि साक्षादग्निमिवोत्थितं। दृष्ट्वा रुक्मरथं क्रुद्धं समकंपंत सृंजयाः। प्रततं त्वस्यतः संख्ये धनुषोस्या
शुकारिणः। ज्याघोषः शुश्रुवेत्यर्थं विस्फूर्जितमिवाशनेः। रथिनः सादिनश्चैव नागानश्वान्पदातिनः। रौद्रा हस्तवता मुक्ताः समर्दंति स्म साय
काः। नानद्यमानः पर्जन्यः प्रवृद्धः शुचिसंक्षये। अश्मवर्षमिवावर्षत्परेषामावहद्भयं। विचरन्स तदा राजन्सेनां संक्षोभयन्प्रभुः। वर्धया
मास संत्रासं शात्रवाणाममानुषं। तस्य विद्युदिवाभ्रेषु चापं हेमपरिष्कृतं। भ्रमद्रथांबुदे चास्मिन्दृश्यते स्म पुनः पुनः। स वीरः सत्यवान्प्राज्ञो
धर्मनित्यः सदा पुनः। युगांतकाले संक्रुद्धो रौद्रां प्रावर्तयन्नदीं। अमर्षवेगप्रभवां क्रव्यादगणसंकुलां। बलौघैः सर्वतः पूर्णां वीरवृक्षा
पहारिणीं। शोणितोदां रथावर्तां हस्त्यश्वकृतरोधसं। कवचोपलसंयुक्तां मांसपंकसमाकुलां। मेदोमज्जास्थिसिकतामुष्णीषचयफेनिलां।
संग्रामजलदापूर्णां प्रासमत्स्यसमाकुलां। नरनागाश्वकलिलां शरवेगौघवाहिनीं। शरीरदारुसंघट्टां रथकच्छपसंकुलां। उत्तमांगोप
लतटां निस्त्रिंशझषसंकुलां। रथनागह्रदोपेतां नानाभरणभूषितां। महारथशतावर्तां भूमिरेणूर्मिमालिनीं। महावीर्यवतां संख्ये
सुतरां भीरुदुस्तरां। शरीरशतसंबाधां गृध्रकंकनिषेवितां। महारथसहस्राणि नयंतीं यमसादनं। शूलव्यालसमाकीर्णां प्राणिराजि
निषेवितां। छिन्नछत्रमहाहंसां मुकुटांडजसेवितां। चक्रकूर्मां गदानक्रां शरक्षुद्रझषाकुलां। बलगृध्रसृगालानां घोरसंघैर्निषेवितां।
निहतां प्राणिनः संख्ये द्रोणेन बलिना रणे। वहंतीं पितृलोकाय शतशो राजसत्तम। शरीरशतसंबाधां केशशैवलशाद्वलां। नदीम्

वर्तयद्राजन्भीरूणांभयवर्द्धिनी। तंजयंतमनीकानि तानि तानि महारथं। सर्वतोभ्यद्रवद्द्रोणं युधिष्ठिरपुरोगमाः। तानापतन्तः शूरांस्ताव
कान्दृढविक्रमाः। सर्वतः प्रत्यगृह्णंत तदभूद्रोमहर्षणं। शतमायस्तु शकुनिः सहदेवं समाद्रवत्। सनियंतृध्वजरथं विव्याध निशितैः
शरैः। तस्य माद्रीसुतः केतुं धनुः सूतं हयानपि। नातिक्रुद्धः शरैश्छित्वा षष्ट्या। विव्याध सौबलं। सौबलस्तु गदां गृह्य प्रचस्कंद रथोत्तमात्।
सतस्य गदया राजन्रथात्सूतमपातयत्। ततस्तौ विरथौ राजन्गदाहस्तौ महाबलौ। चिक्रीडतू रणे शूरौ सशृंगाविव पर्वतौ। द्रोणः पंचा
लराजानं विध्वा दशभिराशुगैः। बहुभिस्तेन चाभ्यस्तस्तं विव्याध ततो धिकैः। विविंशतिं भीमसेनो विंशत्या निशितैः शरैः। विध्वा नाकंप
यद्वीरस्तदद्भुतमिवाभवत्। विविंशतिस्तु सहसा व्यश्वकेतुशरासनं। भीमं चक्रे महाराज ततः सैन्यान्यपूजयन्। सतन्नममृषे वीरः शत्रो
र्विक्रममाहवे। ततोस्य गदया दांतान्हयान्सर्वनिपातयत्। हताश्वात्स रथाद्राजन्गृह्य चर्म महाबलः। अभ्ययाद्भीमसेनं तु मत्तो मत्तमि
व द्विपं। शल्यस्तु नकुलं वीरः स्वस्रीयं प्रियमात्मनः। विव्याध प्रहसन्बाणैर्लालयन्कोपयन्निव। तस्याश्वानातपत्रं च ध्वजं सूतमथो धनुः।
निपात्य नकुलः शल्यं शंखं दध्मौ प्रतापवान्। धृष्टकेतुः कृपेनास्तान्छित्वा बहुविधाञ्छरान्। कृपं विव्याध सप्तत्या लक्ष्म चास्याहरत्त्रिभिः।
तं कृपः शरवर्षेण महता समवारयत्। निवार्य च रणे विप्रो धृष्टकेतुमयोधयत्। सात्यकिः कृतवर्माणं नाराचेन स्तनांतरे। विध्वा विव्या
ध सप्तत्या पुनरन्यैः स्मयन्निव। तं भोजः सप्तसप्तत्या पुनरन्यैः स्मयन्निव। तं भोजः सप्तसप्तत्या विध्वाष्टभिर्निशितैः शरैः। नाकंपयत शैनेयं
शीघ्रो वायुरिवाचलं। सभापतिः सुशर्माणं भृशं मर्मस्वताडयत्। सचापितं तोमरेण जत्रुदेशेभ्यताडयत्। वैकर्त्तनं तु समरे विराटः प्रत्यवा

रयत्।सहमत्स्यैर्महावीर्यैस्तदद्भुतमिवाभवत्।तत्पौरुषभभूत्तात्रसूतपुत्रस्यदारुणं।यत्सैन्यंवारयामासशरैःसन्नतपर्वभिः।द्रुपद
स्तुस्वयंराजाभगदत्तेनसंगतः।तयोर्युद्धंमहाराजचित्ररूपमिवाभवत्।भगदत्तस्तुराजानंद्रुपदंनतपर्वभिः।संनियंतृध्वजरथंवि
व्याधपुरुषर्षभ।द्रुपदस्तुततःक्रुद्धोभगदत्तंमहारथं।आजघानोरसिक्षिप्रंशरेणानतपर्वणा।युद्धंयुद्धवरौलोकेसौमदत्तिशि
खंडिनौ।भूतानांत्रासजननंचक्रातेस्त्रविशारदौ।भूरिश्रवारणेराजन्याज्ञसेनिंमहारथं।महतासायकौघेनछादयामासवी
र्यवान्।शिखंडीतुततःक्रुद्धःसौमदत्तिंविशांपते।नवत्यासायकानांतुकंपयामासभारत।राक्षसौरौद्रकर्माणौहैडिंबालंबुषावुभौ।
चक्रातेत्यद्भुतंयुद्धंपरस्परजयैषिणौ।मायाशतसृजौदृप्तौमायाभिरितरेतरं।अंतर्हितौचेरतुस्तौभृशंविस्मयकारिणौ।चेकिता
नोनुविंदेनयुयुधेचातिभैरवं।यथादेवासुरेयुद्धेबलशक्रौमहाबलौ।लक्ष्मणःक्षत्रदेवेनविमर्द्दमकरोद्भृशं।यथाविष्णुःपुराराज
न्हिरण्याक्षेणसंयुगे।ततःप्रचलिताश्वेनविधिवत्कल्पितेनच।रथेनाभ्यपतद्राजन्सौभद्रंपौरवोनदन्।ततोभियायत्वरितो
युद्धाकांक्षीमहाबलः।तेनचक्रेमहद्युद्धमभिमन्युररिंदमः।पौरवस्त्वथसौभद्रंशरव्रातैरवाकिरत्।तस्यार्जुनिर्ध्वजंछत्रंधनुश्चो
र्व्यामपातयत्।सौभद्रःपौरवंत्वन्यैर्विध्वासप्तभिराशुगैः।पंचभिस्तस्यविव्याधहयान्सूतंचसायकैः।ततःप्रहर्षयन्सेनांसिंह
वद्व्यनदन्मुहुः।समादत्तार्जुनिस्तूर्णंपौरवांतकरंशरं।तंतुसंधित्तमाज्ञायसायकंघोरदर्शनं।द्वाभ्यांशराभ्यांहार्दिक्यश्चिच्छेद
सशरंधनुः।तदुत्सृज्यधनुश्छिन्नंसौभद्रःपरवीरहा।उद्बबर्हसितंखड्गमाददानःशरावरं।सतेनानेकतारेणचर्मणाकृतहस्त

वत्। भ्रांतासिनाचरन्मार्गान्दर्शयन्वीर्यमात्मनः। भ्रामितं पुनरुद्भ्रांतमाधूतं पुनरुत्थितं। चर्मनिस्त्रिंशयो राजन्निर्विशेषमदृश्य
त। स पौरवरथस्येषामाप्लुत्य सहसा नदत्। पौरवं रथमास्थाय केशपक्षे परामृशत्। जघानास्य पदा सूतं असिनापातयद्ध्वजं।
विक्षोभ्यांभोनिधिं तार्क्ष्यस्तं नागमिव चाक्षिपत्। तमागलितकेशांतं ददृशुः सर्वपार्थिवाः। उक्षाणमिव सिंहेन पात्यमानमचे
तसं। तमार्जुनिवशं प्राप्तं कृष्यमाणमनाथवत्। पौरवं पतितं दृष्ट्वा नामृष्यत जयद्रथः। स बर्हिणं महाराज किंकिणीशतजाल
वत्। चर्म चादाय खड्गं च नदन्पर्यपतद्रथात्। ततः सैंधवमालोक्य कार्ष्णिरुत्सृज्य पौरवं। उत्पपात रथात्तूर्णं श्येनवन्निपपात च।
प्रासपट्टिशनिस्त्रिंशानरातिभिः संप्रचोदितान्। चिच्छेद चासिना कार्ष्णिश्चर्मणा संरुरोध च। स दर्शयित्वा सैन्यानां स्वबा
हुबलमात्मनः। तमुद्यम्य महाखड्गं चर्म चाप्य पुनर्बली। वृद्धक्षत्रस्य दायादं पितुरत्यंतवैरिणं। ससाराभिमुखः शूरः शार्दू
लइव कुंजरं। तौ परस्परमासाद्य खड्गदंतनखायुधौ। हृष्टवत्संप्रजह्राते व्याघ्रकेसरिणाविव। संपातेष्वभिघातेषु निपातेष्व
सिचर्मणोः। न तयोरंतरं कश्चिद्ददर्श नरसिंहयोः। अवक्षेपोसिनिर्ह्रादः शस्त्रांतरनिदर्शनं। बाह्यांतरनिपातश्च निर्विशे
षमदृश्यत। बाह्यमाभ्यंतरं चैव चरंतौ मार्गमुत्तमं। ददृशाते महात्मानौ सपक्षाविव पर्वतौ। ततो विक्षिपतः खड्गं सौभद्रस्य यश
स्विनः। शरावरणपक्षांते प्रजहार जयद्रथः। रुक्मपक्षांतरे सक्तस्तस्मिंश्चर्मणि भास्वरे। सिंधुराजबलोद्धूतः सोभज्यत महा
नसिः। भग्नमाज्ञाय निस्त्रिंशमवप्लुत्य पदानि षट्। अदृश्यत निमेषेण स्वरथं पुनरास्थितः। तं कार्ष्णिं समरान्मुक्तमास्थितं रथ

मुत्तमं। सहिताः सर्वराजानः परिवव्रुः समंततः। ततश्चर्मखड्गं च समुत्क्षिप्य महाबले। ननादार्जुनदायादः प्रेक्षमाणो जयद्रथं।
सिंधुराजं परित्यज्य सौभद्रः परवीरहा। तापयामास तत्सैन्यं भुवनं भास्करो यथा। तस्य सर्वायसीं शक्तिं शल्यः कनकभूषणां। चिक्षेप
समरे घोरां दीप्तामग्निशिखामिव। तामवप्लुत्य जग्राह विकोशं चाकरोदसिं। वैनतेयो यथा कार्ष्णिः पतंतमुरगोत्तमं। तस्य लाघव
माज्ञाय सत्वं चामिततेजसः। सहिताः सर्वराजानः सिंहनादमथानदन्। ततस्तामेव शल्यस्य सौभद्रः परवीरहा। मुमोच भुज
वीर्येण वैडूर्यविकृताजिरां। सा तस्य रथमासाद्य निर्मुक्तभुजगोपमा। जघान सूतं शल्यस्य रथाच्चैनमपातयत्। ततो विराटद्रुपदौ
धृष्टकेतुर्युधिष्ठिरः। सात्यकिः कैकया भीमो धृष्टद्युम्नशिखंडिनौ। यमौ च द्रौपदेयाश्च साधु साध्विति चुक्रुशुः। बाणशब्दाश्च
विविधाः सिंहनादाश्च पुष्कलाः। प्रादुरासन्हर्षयंतः सौभद्रमपलायिनं। तं नामृष्यंत पुत्रास्ते शत्रोर्विजयलक्षणं। अथैनं सहसा
सर्वे समंतान्निशितैः शरैः। अभ्याकिरन्महाराज जलदा इव पर्वतं। तेषां च प्रियमन्विच्छन्सूतस्य च पराभवं। आर्शायनिरमि
त्रघ्नः क्रुद्धः सौभद्रमभ्ययात्॥ ॥इति द्रोणपर्वणि प्रथमदिनयुद्धे॥१४॥ धृतराष्ट्र उ०॥ ॥बहूनि सुविचित्राणि द्वंद्वयुद्धानि
संजय। त्वयोक्तानि निशम्याहं स्पृहयामि सचक्षुषां। आश्चर्यभूतं लोकेषु कथयिष्यंति मानवाः। कुरूणां पांडवानां च युद्धं देवा
सुरोपमं। न हि मे तृप्तिरस्तीह शृण्वतो युद्धमुत्तमं। तस्मादार्तायनेर्युद्धं सौभद्रस्य च शंस मे॥ ॥संजय उ०॥ ॥सादितं प्रेक्ष्य
यंतारं शल्यः सर्वायसीं गदां। समुत्क्षिप्य नदन्क्रुद्धः प्रचस्कंद रथोत्तमात्। तं दीप्तामिव कालाग्निं दंडहस्तमिवांतकं। जवेनाभ्य

द्रो०प०
१८

पत्तद्भीमःप्रगृह्यमहतींगदां।सोभद्रोप्यशनिप्रख्यांप्रगृह्यमहतींगदां।एह्येहीत्यब्रवीछल्यंयत्नाद्भीमेनवारितः।वारयित्वातुसो
भद्रंभीमसेनःप्रतापवान्।शल्यमासाद्यसमरेतस्थौगिरिरिवाचलः।तथैवमद्रराजोपिभीमंदृष्ट्वामहाबलः।ससाराभिमुख
स्तूर्णंशार्दूलइवकुंजरं।ततस्तूर्यनिनादाश्चशंखानांचसहस्रशः।सिंहनादाश्चसंजज्ञुर्भेरीणांचमहास्वनाः।पश्यतांशत
शोह्यासीदन्योन्यमभिधावतां।पांडवानांकुरूणांचसाधुसाध्वितिनिःस्वनः।नहिमद्राधिपादन्यःसर्वराजसुभारत।सोढु
मुत्सहतेवेगंभीमसेनस्यसंयुगे।तथामद्राधिपस्यापिगदावेगंमहात्मनः।सोढुमुत्सहतेलोकेयुधिकोन्योवृकोदरात्।पट्टैर्जां
बूनदैर्बद्धाबभूवजनहर्षणी।प्रजज्वालतदाविद्धाभीमेनमहतीगदा।तथैवचरतोमार्गान्मंडलानिचसर्वशः।महाविद्युत्प्र
तीकाशाशल्यस्यशुशुभेगदा।तौवृषाविवनर्दंतौमंडलानिविचेरतुः।आवर्जितगदाशृंगावुभौशल्यवृकोदरौ।मंडलावर्त
मार्गेषुगदाविहरणेषुच।निर्विशेषमभूद्युद्धंतयोःपुरुषसिंहयोः।ताडिताभीमसेनेनशल्यस्यमहतीगदा।साग्निज्वाला
महारौद्रातदातूर्णमशीर्यत।तथैवभीमसेनस्यद्विषताभिहतागदा।वर्षाप्रदोषेखद्योतैर्वृतोवृक्षइवाबभौ।गदाक्षिप्तातु
समरेमद्रराजेनभारत।व्योमदीपयमानासासस्तृजेपावकंमुहुः।तथैवभीमसेनेनद्विषतेप्रेषितागदा।तापयामासतत्सैन्यं
महोल्कापततीयथा।तेगदेगदिनांश्रेष्ठेसमासाद्यपरस्परं।श्वसंत्यौनागकन्येवससृजातेविभावसुं।नखैरिवमहाव्याघ्रौ
दंतैरिवमहागजौ।तौविचेरतुरासाद्यगदाग्राभ्यांपरस्परं।ततोगदाग्राभिहतौक्षणेनरुधिरोक्षितौ।ददृशातेमहात्मानौ

राम
१८

किंशुकाविव पुष्पितौ। शुशुभाते दिशः सर्वास्तयोः पुरुषसिंहयोः। गदाभिघातसंह्रादः शक्राशनिरवोपमः। गदया मद्रराजेन सव्य
दक्षिणमाहतः। नाकंपत तदा भीमो भिद्यमान इवाचलः। तथा भीमगदावेगैस्ताड्यमानो महाबलः। धैर्यान्मद्राधिपस्तस्थौ वज्रैर्गिरि
रिवाहतः। आपेततुर्महावेगौ समुच्छ्रितगदावुभौ। पुनरंतरमार्गस्थौ मंडलानि विचेरतुः। अथाप्लुत्य पदान्यष्टौ सन्निपत्य गजाविव।
सहसा लोहदंडाभ्यामन्योन्यमभिजघ्नतुः। तौ परस्परवेगाच्च गदाभ्यां च भृशाहतौ। युगपत्पेततुर्वीरौ क्षिताविंद्रध्वजाविव। ततो विह्व
कमानं तं निश्वसंतं पुनः पुनः। शल्यमभ्यपतत्तूर्णं कृतवर्मा महारथः। दृष्ट्वा चैनं महाराज गदयाभिनिपीडितं। विचेष्टंतं यथा नागं
मूर्छयाभिः परिप्लुतं। ततः स्वरथमारोप्य मद्राणामधिपं रणे। अपोवाह रथात्तूर्णं कृतवर्मा महारथः। क्षीबवद्विह्वलो वीरो निमे
षात्पुनरुत्थितः। भीमोपि सुमहाबाहुर्गदापाणिरदृश्यत। ततो मद्राधिपं दृष्ट्वा तव पुत्राः पराङ्मुखं। सनागपत्यश्वरथाः समकंप
त मारिष। ते पांडवैरर्द्यमानास्तावकाजितकाशिभिः। भीता दिशोन्वपद्यंत वातनुन्ना घना इव। निर्जित्य धार्तराष्ट्रांस्तु पांडवेया महा
रथाः। व्यरोचंत रणे राजन्दीप्यमाना इवाग्नयः। सिंहनादान्भृशं चक्रुः शंखान्दध्मुश्च हर्षिताः। भेरीश्च वादयामासुर्मृदंगांश्चानकैः
सह॥ ॥इति द्रोणपर्वणि॥१५॥ संजय उ॥ ॥तद्बलं सुमहद्दीर्णं त्वदीयं प्रेक्ष्य वीर्यवान्। दधारैको रणे राजन्वृषसेनोस्त्रमायया।
शरा दश दिशो मुक्ता वृषसेनेन संयुगे। विचेरुस्ते विनिर्भिद्य नरवाजिरथद्विपान्। तस्य दीप्ता महाबाणा विनिश्चेरुः सहस्रशः।
भानोरिव महाराज घर्मकाले मरीचयः। तेनार्दिता महाराज रथिनः सादिनस्तथा। निपेतुरुर्व्यां सहसा वातभग्ना इव द्रुमाः। हयौघां
श्च रथौघांश्च गजौघांश्च महारथः। अपातयद्रणे राजन् शतशोथ सहस्रशः। दृष्ट्वा तमेकं समरे विचरंतमभीतवत्। सहिताः सर्व

द्रो०प०
१९

राजानः परिवव्रुः समंततः। नाकुलिस्तु शतानीको वृषसेनं समभ्ययात्। विव्याध चैनं दशभिर्नाराचैर्मर्मभेदिभिः। तस्य कर्णात्मजश्चापं
छित्वा केतुमपातयत्। तं भ्रातरं परीप्संतो द्रौपदेयाः समभ्ययुः। कर्णात्मजं शरव्रातैरदृश्यं चक्रुरंजसा। तान्नदंतोभ्यधावंत द्रोणपुत्रमुखा
रथाः। छादयंतो महाराज द्रौपदेयान्महारथान्। शरैर्नानाविधैस्तूर्णं पर्वतान्जलदा इव। तान्पांडवाः प्रत्यगृह्णंस्त्वरिताः पुत्रगृद्धिनः।
पांचालाः केकया मत्स्याः सृंजयाश्चोद्यतायुधाः। तद्युद्धमभवद्घोरं सुमहल्लोमहर्षणं। त्वदीयैः पांडुपुत्राणां देवानामिव दानवैः। एवं
युयुधिरे वीराः संरब्धाः कुरुपांडवाः। परस्परमुदीक्षंतः परस्परकृतागसः। तेषां ददृशिरे कोपाद्वपूंष्यमिततेजसां। युयुत्सूनामि
वाकाशे पतत्रिवरभोगिनां। भीमकर्णकृपद्रोणद्रौणिपार्षतसात्यकैः। बभासे स रणोद्देशः कालसूर्य इवोदितः। तदासीत्तुमुलं यु
द्धं निघ्नतामितरेतरं। महाबलानां बलिभिर्दानवानां यथा सुरैः। ततो युधिष्ठिरानीकमुद्धूतार्णवनिस्वनं। त्वदीयमवधीत्सैन्यं
संप्रद्रुतमहारथं। तत्प्रभग्नं बलं दृष्ट्वा शत्रुभिर्भृशमर्दितं। अलं द्रुतेन वः शूरा इति द्रोणोभ्यभाषत। ततः शोणहयः क्रुद्धः चतुर्दं
त इव द्विपः। प्रविश्य पांडवानीकं युधिष्ठिरमुपाद्रवत्। तमविध्यच्छितैर्बाणैः कंकपत्रैर्युधिष्ठिरः। तस्य द्रोणो धनुश्छित्वा तं द्रु
तं समुपाद्रवत्। चक्ररक्षः कुमारस्तु पांचालानां यशस्करः। दधार द्रोणमायांतं वेलेव सरितांपतिं। द्रोणं निवारितं दृष्ट्वा कुमारे
ण द्विजर्षभं। सिंहनादरवो ह्यासीत्साधु साध्विति भाषितं। कुमारस्तु ततो द्रोणं सायकेन महाहवे। विव्याधोरसि संक्रुद्धः सिंहव
च्चानदन्मुहुः। संवार्य च रणे द्रोणं कुमारस्तु महाबलः। शरैरनेकसाहस्रैः कृतहस्तो जितक्लमः। तं शूरमार्यव्रतिनं मंत्रास्त्रेषु कृत
श्रमं। चक्ररक्षः परामृद्नात्कुमारो द्विजपुंगवं। समध्यं प्राप्य सैन्यानां सर्वाः प्रविचरन् दिशः। तव सैन्यस्य गोप्तासीद्भारद्वाजो

राम
१९

द्विजर्षभः । शिखंडिनं द्वादशभिर्विंशत्या चोत्तमौजसं । नकुलं पंचभिर्विद्ध्वा सहदेवं च सप्तभिः । युधिष्ठिरं द्वादशभिर्द्रौपदेयांस्त्रिभि
स्त्रिभिः । सात्यकिं पंचभिर्भित्वा मत्स्यं च दशभिः शरैः । व्यक्षोभयद्रणे योधान्यथामुख्यमभिद्रवत् । अभ्यवर्त्तत संप्रेप्सुः कुंतीपुत्रं युधि
ष्ठिरं । युगंधरस्ततो राजन्भारद्वाजं महारथं । वारयामास संक्रुद्धं वातोद्धूतमिवार्णवं । युधिष्ठिरं स विद्ध्वा तु शरैः सन्नतपर्वभिः । यु
गंधरं तु भल्लेन रथनीडादपातयत् । ततो विराटद्रुपदौ कैकयाः सात्यकिः शिबिः । व्याघ्रदत्तश्च पांचाल्यः सिंहसेनश्च वीर्यवान् । ए
ते चान्ये च बहवः परीप्संतो युधिष्ठिरं । आवव्रुस्तस्य पंथानं किरंतः सायकान्बहून् । व्याघ्रदत्तस्तु पांचाल्यो द्रोणं विव्याध मार्ग
णैः । पंचाशता शितै राजंस्तत उच्चुक्रुशुर्जनाः । त्वरितं सिंहसेनस्तु द्रोणं विद्ध्वा महारथं । प्राहसत्सहसा हृष्टस्त्रासयन्वै महारथान् ।
ततो विस्फार्य नयने धनुर्ज्यामवमृज्य च । तलशब्दं महत्कृत्वा द्रोणस्तं समुपाद्रवत् । ततस्तु सिंहसेनस्य शिरः कायात्सकुंडलं । व्या
घ्रदत्तस्य चाक्रम्य भल्लाभ्यामाहरद्बली । तान्प्रमृज्य शरव्रातैः पांडवानां महारथान् । युधिष्ठिररथाभ्याशे तस्थौ मृत्युरिवांतकः । त
तोऽभवन्महाशब्दो राजन्यौधिष्ठिरे बले । हतो राजेति योधानां समीपस्थे यतव्रते । अब्रुवन्सैनिकास्तत्र दृष्ट्वा द्रोणस्य विक्रमं । अ
द्य राजा धार्त्तराष्ट्रः कृतार्थो वै भविष्यति । अस्मिन्मुहूर्ते द्रोणस्तु पांडवं गृह्य हर्षितः । आगमिष्यति नो नूनं धार्त्तराष्ट्रस्य संयुगे । एवं
संजल्पतां तेषां तावकानां महारथः । आयाज्जवेन कौंतेयो रथघोषेण नादयन् । माभैषीरिति संवार्य शरैर्द्रोणमवारयत् । शोणि
तोदां रथावर्त्तां कृत्वा विशसनेन नदीं । शूरास्थिचयसंकीर्णां प्रेतकूलापहारिणीं । तां शरौघमहाफेनां प्रासमत्स्यसमाकुलां । नदीमु
त्तीर्य वेगेन कुरून्विद्राव्य पांडवः । ततः किरीटी सहसा द्रोणानीकमुपाद्रवत् । छादयन्निषुजालेन महता मोहयन्निव । शीघ्र

मभ्यस्यतोबाणान्संदधानस्यचानिशं। नांतरंददृशेकश्चित्कौंतेयस्ययशस्विनः। नदिशोनांतरिक्षंचनद्यौर्नैवचमेदिनी। अदृश्यंत
महाराजबाणभूताइवाभवन्। नादृश्यतत्तदाराजंस्तत्रकिंचनसंयुगे। बाणांधकारेमहतिकृतेगांडीवधन्वना। सूर्येचास्तमनुप्र
प्तेतमसाचाभिसंवृते। नाज्ञायतत्तदाशत्रुर्नसुहृन्नचकश्चन। ततोवहारंचक्रुस्तेद्रोणदुर्योधनादयः। तान्विदित्वापुनस्त्रस्तान
युद्धमनसः परान्। स्वान्यनीकानिबीभत्सुः शनकैरवहारयत्। ततोभितुष्टुवुः पार्थप्रहृष्टाः पांडुसृंजयाः। पांचालाश्चमनोज्ञा
भिर्वाग्भिः सूर्यमिवर्षयः। एवंस्वशिबिरंप्राया जित्वाशत्रून्धनंजयः। पृष्ठतः सर्वसैन्यानांमुदितोवैसकेशवः। ससारत्नकल
र्कसुवर्णरूप्यैर्वज्रप्रवाळस्फटिकैश्चमुख्यैः। चित्ररथेपांडुसुतोवभासेनक्षत्रचित्रेवियतीवचंद्रः॥ ॥इतिद्रोणपर्वणिप्र
थमदिनयुद्धं॥१६॥ संजयउ॥ ॥तेसेनेशिबिरंगत्वान्यविशतांविशांपते। यथाभागंयथान्यायंयथागुल्मंचसर्वशः। कृत्वा
वहारंसैन्यानांद्रोणः परमदुर्मनाः। दुर्योधनमभिप्रेक्ष्यसव्रीडमिदमब्रवीत्। उक्तमेतन्मयापूर्वंनतिष्ठतिधनंजये। शक्योग्रही
तुंसंग्रामेदेवैरपियुधिष्ठिरः। इतितद्वः प्रयततांकृतंपार्थेनसंयुगे। माविशंकीर्वचोमह्यमजेयौकृष्णपांडवौ। अपनीतेतु
योगेनकेनचित्श्वेतवाहने। ततएष्यतिनेराजन्वशमेषयुधिष्ठिरः। कश्चिदाहूयतंसंख्येदेशामन्यंप्रकर्षतु। तमजित्वानकौंतेयो
निवर्तेतकथंचन। एतस्मिन्नंतरेशून्येधर्मराजमहंनृप। ग्रहिष्यामिचमूंभित्वाधृष्टद्युम्नस्यपश्यतः। अर्जुनेनविहीनस्तु
यदिनोत्सृजेतरणं। मामुपायांतमालोक्यगृहीतंविद्धिपांडवं। एवंतेहंमहाराजधर्मपुत्रंयुधिष्ठिरं। समानेष्यामिसगणंवशं
मद्यनसंशयः। यदितिष्ठतिसंग्रामेमुहूर्तमपिपांडवः। अथापयातिसंग्रामाद्विजयात्तद्विशिष्यते॥ ॥संजयउ०॥ ॥

द्रोणस्यतद्वचःश्रुत्वात्रिगर्ताधिपतिस्तदा।भ्रातृभिःसहितोराजन्निदंवचनमब्रवीत्।वयंविनिकृताराजन्सदागांडीवधन्वना।अ
नागःस्वपिचागस्तत्कृतमस्मासुतेनवै।तेवयंस्मरमाणास्तान्विनिकारान्पृथग्विधान्।क्रोधाग्निनादह्यमानानशेमहिस
दानिशि।सनोदिष्ट्यास्त्रसंपन्नश्चक्षुर्विषयमागतः।कर्तारस्मवयंकर्मयच्चिकीर्षामहृद्गतं।भवतश्चप्रियंयत्स्यादस्माकंचयं
शस्करं।वयमेनंहनिष्यामोनिकृष्यायोधनाद्बहिः।अद्यास्त्वनर्जुनाभूमिरत्रिगर्ताथवापुनः।सत्यंतेप्रति[illegible]जानीमोनैत
न्मिथ्याभविष्यति।एवंसत्यरथश्चोक्त्वासत्यवर्मचभारत।सत्यव्रतश्चसत्येषुःसत्यकर्मतथैवच।सहिताभ्रातरःपंचरथानाम
युतेनच।न्यवर्तंतमहाराजकृत्वाशपथमाहवे।मालवास्तुंडिकेराश्चरथानामयुतैस्त्रिभिः।सुशर्माचनरव्याघ्रस्त्रिगर्तःप्रस्थ
लाधिपः।मावेल्लकैर्ललित्थैश्चसहितोमद्रकैरपि।रथानामयुतेनैवसोगमद्भ्रातृभिःसह।नानाजनपदेभ्यश्चरथानामयुते
नच।समुत्थितविशिष्टानांशपथार्थमुपागमन्।ततोज्वलनमानर्च्यहुत्वासर्वेपृथक्पृथक्।जगृहुःकुशचीराणिचित्राणि
कवचानिच।तेचबद्धतनुत्राणाघृताक्ताःकुशचीरिणः।मौर्वीमेखलिनोवीराःसहस्रशतदक्षिणाः।यज्वानःपुत्रिणोलोक्याः
कृतकृत्यास्तनुत्यजः।योक्ष्यमाणास्तदात्मानंयशसाविजयेनच।ब्रह्मचर्यश्रुतिमुखैःक्रतुभिश्चाप्तदक्षिणैः।प्राप्यलोकान्
सुयुद्धेनक्षिप्रमेवयियासवः।ब्राह्मणांस्तर्पयित्वाचनिष्कान्दत्वापृथक्पृथक्।गाश्चवासांसिचपुनःसमाभाष्यपरस्परं।
प्रज्वाल्यकृष्णवर्त्मानमुपगम्यरणव्रतं।तस्मिन्नग्नौतदाचक्रुःप्रतिज्ञांदृढनिश्चयाः।शृण्वतांसर्वभूतानामुच्चैर्वचोबभाषि

रे। सर्वे धनंजयवधे प्रतिज्ञां चापि चक्रिरे। ये वै लोकाश्चाव्रतिनां ये चैव ब्रह्मघातिनां। मद्यपस्य च ये लोका गुरुदारगतस्य च। ब्रह्मस्व
हारिणश्चैव राजपिंडापहारिणः। शरणागतं च त्यजतो याचमानं तथा घ्नतः। अगारदाहिनां चैव ये च गां निघ्नतामपि। अपकारिणां
च ये लोका ये च ब्रह्मद्विषामपि। स्वभार्यामृतुकालेषु मोहाद्वै नागच्छतां। श्राद्धमैथुनिकानां च ये चाप्यात्मापहारिणां। न्यासाप
हारिणां ये च श्रुतं नाशयतां च ये। क्लीबेन युध्यमानानां ये च नीचानुसारिणां। नास्तिकानां च ये लोका येग्निमातृपितृत्यजां।
तानाप्नुयामहं लोकान्ये च पापकृतामपि। यद्यहत्वा वयं युद्धे निवर्तेम धनंजयं। तेन चाभ्यर्दितास्त्रासाद्भवेम हि पराङ्मुखाः।
यदि त्वसुकरं लोके कर्म कुर्याम संयुगे। इष्टान्लोकान्प्राप्नुयामो वयमद्य न संशयः। एवमुक्त्वा तदा राजंस्तेभ्यवर्तंत संयुगे।
आव्हयंतोर्जुनं वीराः पितृजुष्टां दिशं प्रति। आहूतस्तैर्नरव्याघ्रः पार्थः परपुरंजयः। धर्मराजमिदं वाक्यमपदांतरमब्रवीत्।
आहूतो न निवर्तेयमिति मे व्रतमाहितं। संसप्तकाश्च मां राजन्नाव्हयंते महाहवे। एष च भ्रातृभिः सार्धं सुशर्मा व्हयते रणे।
वधाय सगणस्यास्य मामनुज्ञातुमर्हसि। नैतच्छक्नोमि संसोढुं माक्षानं पुरुषर्षभ। सत्यं ते प्रतिजानामि हतान्विद्धि परान्यु
धि॥ ॥युधिष्ठिर उ॥ ॥श्रुतं ते तत्त्वतस्तात यद्द्रोणस्य चिकीर्षितं। यथा तदनृतं तस्य भवेत्तत्त्वं समाचर। द्रोणो हि बलवा
न्शूरः कृतास्त्रश्च जितश्रमः। प्रतिज्ञातं च तेनैतद्ग्रहणं मे महारथ॥ ॥अर्जुन उ॥ ॥अयं वै सत्यजिद्राजन्नद्य त्वां रक्षिता
युधि। ध्रियमाणे च पांचाल्ये नाचार्यः काममाप्स्यति। हते तु पुरुषव्याघ्रे रणे सत्यजिति प्रभो। सर्वैरपि समेतैर्वा न स्थातव्यं क

धंचन॥ ॥संजयउ॥ ॥अनुज्ञातस्ततोराज्ञा परिधक्तश्च फाल्गुनः। प्रेम्णा दृष्टश्च बहुधा घात्रीषश्चास्य योजिताः। विधायैवं
ततः पार्थस्त्रिगर्तान्प्रत्ययाद्बली। क्षुधितः क्षुद्विघातार्थं सिंहो मृगगणानिव। ततो दौर्योधनं सैन्यं मुदापरमया युतं। ऋतेर्जुनं
भद्रांकृद्धं धर्मराजस्य निग्रहे। ततोन्योन्येन तसेने समाजग्मतुरोजसा। गंगासरय्वौ वेगेन प्रावृषी वोल्बणोदके॥ ॥इति
द्रोणपर्वणि॥१६॥ संजयउ॥ ॥ततः संसप्तका राजन्समे देशे व्यवस्थिताः। व्यूह्यानीकं रथैरेव चंद्रस्यार्द्धमुदा युताः। ते किरीटि
नमायांतं दृष्ट्वा हर्षेण मारिष। उदक्रोशन्नरव्याघ्राः शब्देन महता तदा। स शब्दः प्रदिशः सर्वा दिशः खं च समावृणोत्। आ
वृतत्वाच्च लोकस्य नासीत्तत्र प्रतिस्वनः। सोतीव संप्रहृष्टांस्तानुपलभ्य धनंजयः। किंचिदभ्युत्स्मयन्कृष्णमिदं वचनमब्रवीत्। पश्यैतान्
देवकीमातर्मुमूर्षूनद्य संयुगे। भ्रातॄंस्त्रैगर्तकानेवं रोदितव्ये प्रहर्षितान्। अथवा हर्षकालोयं त्रैगर्तानामसंशयं। कुनरैर्दुरवापा
न्हि लोकान्प्राप्स्यंत्यनुत्तमान्। एवमुक्त्वा महाबाहुर्हृषीकेशं ततोर्जुनः। आससाद रणे व्यूढां त्रिगर्तानामनीकिनीं। स देवदत्तमादा
य शंखं हेमपरिष्कृतं। दध्मौ वेगेन महता घोषेणापूरयन् दिशः। तेन शब्देन वित्रस्ता संसप्तकवरूथिनी। निश्चेष्टावस्थिता संख्ये यत्र
सारमयी यथा। वाहास्तेषां विवृत्ताक्षाः स्तब्धकर्णशिरोधराः। विष्टब्धचरणा मूत्रं रुधिरं च प्रसुस्रुवुः। उपलभ्य ततः संज्ञामवस्थाप्य
च वाहिनीं। युगपत्पांडुपुत्राय चिक्षिपुः कंकपत्रिणः। तान्यर्जुनः सहस्राणि दशपंचैव माशुगैः। अनागतान्येव शरैश्चिच्छेदाशुप
राक्रमी। ततोर्जुनं सितैर्बाणैर्दशभिर्दशभिः पुनः। प्रत्यविध्यंस्ततः पार्थस्तानविध्यत्त्रिभिस्त्रिभिः। एकैकस्तु ततः पार्थं राजन्निव्या

द्रो०प०
२२

धपंचभिः। सचतान्प्रतिविव्याधद्वाभ्यांद्वाभ्यांपराक्रमी। भूयएवतुसंक्रुद्धास्त्वर्जुनंसहकेशवं। आपूरयन्शरैस्तीक्ष्णैस्तडागमिववृष्टि
भिः। ततः शरसहस्राणिप्रापतन्नर्जुनंप्रति। भ्रमराणामिवव्राताः फुल्लद्रुमगणंवने। ततः सुबाहुस्त्रिंशद्भिरद्रिसारमयैर्दृढैः। आ
विध्यदिषुभिर्गाढं किरीटेसव्यसाचिनं। तैः किरीटी किरीटस्थैर्हेमपुंखैरजिह्मगैः। शातकुंभइवापीडोबभौसूर्यइवोत्थितः। हस्ता
वापंसुबाहोस्तुभल्लेनयुधिपांडवः। चिच्छेदतं चैवपुनः शरवर्षैरवाकिरत्। ततः सुशर्मादशभिः सुरथस्तुकिरीटिनं। सुधर्मासु
धनुश्चैवसुबाहुश्चसमार्पयन्। तांस्तुसर्वान्पृथक्बाणैर्वानरप्रवरध्वजः। प्रत्यविध्यत्ध्वजांश्चैषां भल्लैश्चिच्छेदकांचनान्। सुध
न्वनोधनुश्छित्वाहयांश्चास्यवधीच्छरैः। अथास्यसशिरस्त्राणं शिरः कायादपातयत्। तस्मिन्निपतितेवीरेत्रस्तास्तस्यपदानुगाः।
व्यद्रवंतभयाद्भीतायत्रदौर्योधनंबलं। ततोजघानसंक्रुद्धोवासविस्तांमहाचमूं। शरजालैरविछिन्नैस्तमः सूर्यइवांशुभिः। ततोभ
ग्नेबलेतस्मिन्विप्रलीनेसमंततः। सव्यसाचिनिसंक्रुद्धेत्रैगर्तान्भयमाविशत्। तेवध्यमानाः पार्थेनशरैः सन्नतपर्वभिः। अमु
ह्यंस्तत्रतत्रैवत्रस्तामृगगणाइव। ततस्त्रिगर्तराट्क्रुद्धस्तानुवाचमहारथान्। अलंद्रुतेनवः शूराः नभयंकर्तुमर्हथ। कृत्वाथशप
थान्घोरान्सर्वसैन्यस्यपश्यतः। गत्वादौर्योधनंसैन्यंकिंवैवक्ष्यथमुख्यशः। नावहास्याः कथंलोकेकर्मणातेनसंयुगे। भवेम
सहिताः सर्वेनिवर्तध्वंयथाबलं। एवमुक्तास्तुतेराजन्ननुक्रोशान्मुहुर्मुहुः। शंखांश्चदध्मिरेवीराहर्षयंतः परस्परं। ततस्तेसन्यव
र्तंतसंसप्तकगणाः पुनः। नारायणाश्चगोपालामृत्युंकृत्वानिवर्तनं॥ ॥इतिमहाभारतेद्रोणपर्वणि॥१७॥ संजयउवाच॥ ॥

राम
२२

दृष्ट्वा तु सन्निवृत्तांस्तान्संसप्तकगणान्पुनः। वासुदेवं महात्मानमर्जुनः समभाषत। चोदयाश्वान्हृषीकेश संसप्तकगणान्प्रति।
नैते हास्यंति संग्राममजीवंत इति मे मतिः। पश्य मेस्त्रबलं घोरं बाह्वोरिष्वसनस्य च। अद्यैतान्पातयिष्यामि क्रुद्धो रुद्रः पशूनिव।
ततः कृष्णः स्मितं कृत्वा प्रतिनंद्य शिवेन तं। प्रावेशयत दुर्द्धर्षो यत्र यत्रैच्छदर्जुनः। स रथो भ्राजते त्यर्थमुह्यमानो रणे तदा। उ
ह्यमान इवाकाशे विमानं पांडुरैर्हयैः। मंडलानि ततश्चक्रे गतप्रत्यागतानि च। यथा शक्ररथो राजन्युद्धे देवासुरे पुरा। अथ
नारायणाः क्रुद्धाः विविधायुधपाणयः। छादयंतः शरव्रातैः परिवव्रुर्धनंजयं। अदृश्यं च मुहूर्तेन चक्रुस्ते भरतर्षभ। कृष्णे
न सहितं युद्धे कुंतीपुत्रं धनंजयं। क्रुद्धस्तु फाल्गुनः संख्ये द्विगुणीकृतविक्रमः। गांडीवं धनुरामृज्य तूर्णं जग्राह संयुगे। ब
ध्वा च भ्रुकुटीं मध्ये वक्त्रे क्रोधस्य प्रतिलक्षणं। देवदत्तं महाशंखं पूरयामास पांडवः। अथास्त्रमरिसंघघ्नं त्वाष्ट्रमभ्यस्य
दर्जुनः। ततो रूपसहस्त्राणि प्रादुरासन्पृथक्पृथक्। आत्मनः प्रतिरूपैस्तैर्नानारूपैर्विमोहिताः। अन्योन्यमर्जुनं मत्वा
स्वमात्मानं च जघ्निरे। अयमर्जुनोयं गोविंद इमौ पांडवयादवौ। इति ब्रुवाणाः संमूढा जघ्नुरन्योन्यमाहवे। मोहिताः प
रमास्त्रेण क्षयं जग्मुः परस्परं। अशोभंत रणे योधाः पुष्पिता इव किंशुकाः। ततः शरसहस्त्राणि तैर्विमुक्तानि भस्मसात्
कृत्वा तदस्त्रं तान्वीराननयद्यमसादनं। अथ प्रहस्य बीभत्सुर्ललित्थान्मालवानपि। मावेल्लकांस्त्रिगर्तांश्च यौधेयां
श्चार्दयच्छरैः। ते हन्यमाना वीरेण क्षत्रियाः कालचोदिताः। व्यसृजन्शरजालानि पार्थे नानाविधानि च। न ध्वजो नार्जुन
स्तत्र न रथो न च केशवः। प्रत्यदृश्यंत घोरेण शरवर्षेण संवृताः। ततस्ते लब्धलक्षत्वादन्योन्यमभिचुक्रुशुः। हतो दृ

द्रो०प०
२३

छादितिप्रीतावासांस्यादुधुवुस्तदा।भेरीमृदंगशङ्खाश्च दध्मुर्विंशाः सहस्रशः।सिंहनादरवांश्चोग्रांश्चक्रिरे तत्र मानद।ततः प्रसित्वि
देहस्थः खिन्नश्चार्जुनमब्रवीत्।कासि पार्थ न पश्येत्वां कच्चिज्जीवसि शत्रुहन्।तस्य तद्भाषितं श्रुत्वा त्वरमाणो धनंजयः।वायव्यास्त्रे
णातैरस्तां शरवृष्टिमपाहरत्।ततः संसप्तकव्रातान्साश्वद्विपरथायुधान्।उवाह भगवान्वायुः शुष्कपर्णचयानिव।उह्यमानास्त
ते राजन्बभ्रुः शोभंत वायुना।उड्डीनाः पक्षिणः काले वृक्षेभ्य इव मारिष।तांस्तथा व्याकुलीकृत्य त्वरमाणो धनंजयः।जघान निशि
तैर्बाणैः सहस्राणि शतानि च।शिरांसि भल्लैरहरद्बाहूनपि च सायुधान्।हस्तिहस्तोपमांश्चोरूंश्छरैरुर्व्यामपातयत्।पृष्ठच्छिन्ना
न्विचरणान्बाहुपार्श्वेक्षणाकुलान्।नानांगावयवैर्हीनांश्चकारारीन्धनंजयः।गंधर्वनगराकारान्विधिवत्कल्पितान्रथान्।
शरैर्विशकलीकुर्वन्चक्रे व्यश्वरथद्विपान्।मुंडतालवनानीव तत्र तत्र चकाशिरे।छिन्नारथध्वजव्राताः केचित्तत्र क्वचित्क्वचित्।
सोत्तरायुधिनो नागाः सपताकांकुशाध्वजाः।पेतुः शक्राशनिहता द्रुमवंत इवाचलाः।चामरापीडकवचाः स्रस्तांत्रनयनासवः।सा
रोहास्तुरगाः पेतुः पार्थबाणहता भुक्षितौ।विप्रविद्धासिनखराः छिन्नवर्मर्ष्टिशक्तयः।पत्तयश्छिन्नवर्माणः कृपणाः शेरते हताः।
निहतैर्हन्यमानैश्च पतद्भिः पतितैरपि।भ्रमद्भिर्निष्टनद्भिश्च क्रूरमायोधनं बभौ।रजश्च सुमहज्जातं शांतं रुधिरवृष्टिभिः।मही
चाप्यभवद्दुर्गा कबंधशतसंकुला।तद्बभौ रौद्रबीभत्सं बीभत्सोर्यानमाहवे।आक्रीडमिव रुद्रस्य घ्नतः कालात्यये पशून्।ते वं
ध्यमानाः पार्थेन व्याकुलाश्वरथद्विपाः।तमेवाभिमुखाः क्षीणाः शक्रस्यातिथितां गताः।सा भूमिर्भरतश्रेष्ठ निहतैस्तैर्महारथैः।

राम
२३

आस्तीर्णासंबभौसवज्रेत्तीभूतैः समंततः। एतस्मिन्नंतरेचैवप्रमत्तेसव्यसाचिनि। व्यूढानीकस्ततोद्रोणोयुधिष्ठिरमुपाद्रवत्। तं
प्रत्यगृह्णंस्त्वरिताव्यूढानीकाः प्रहारिणः। युधिष्ठिरंपरीप्संतस्तदासीत्परमंमहत्॥ ॥इतिद्रोणपर्वणि॥१९॥ संजयउ०॥ ॥परिणा
म्यनिशांतंतुभारद्वाजोमहारथः। उक्त्वासुबहुराजेंद्रवचनंवैसुयोधनं। विधाययोगंपार्थेनसंसप्तकगणैःसह। निष्क्रांतेचततदा
पार्थेसंसप्तकवधंप्रति। व्यूढानीकस्ततोद्रोणःपांडवानांमहाचमूं। अभ्ययाद्भरतश्रेष्ठधर्मराजजिघृक्षया। व्यूहंदृष्ट्वासपर्णंतु
भारद्वाजेनतंतदा। व्यूहेनमंडलार्द्धेनप्रत्यव्यूहद्युधिष्ठिरः। मुखंत्वासीत्सुपर्णस्यभारद्वाजोमहारथः। शिरोदुर्योधनोराजासोदरैः
सानुगैर्वृतः। चक्षुषीकृतवर्मासीद्गौतमश्चास्यतांवरः। भूतशर्माक्षेमशर्माकरकाक्षश्चवीर्यवान्। कलिंगाःसिंहलाःप्राच्याःशूराभी
रादशेरकाः। शकायवनकांबोजास्तथाहंसपथाश्चये। ग्रीवायांशूरसेनाश्चदरदामद्रकेकयाः। गजाश्वरथपत्त्यौघास्तस्थुःपरमदंशिताः।
भूरिश्रवास्तथाशल्यःसोमदत्तश्चबाल्हिकः। अक्षौहिण्यावृतावीरादक्षिणंपार्श्वमास्थिताः। विंदानुविंदावावंत्यौकांबोजश्च
सुदक्षिणः। वामपार्श्वंसमाश्रित्यद्रोणपुत्राग्रतःस्थिताः। पृष्ठेकलिंगाःसांबष्ठामागधाःपौंड्रमद्रकाः। गांधाराःशकुनाःप्रा
च्याःपार्वतीयावसातयः। पुच्छेवैकर्तनःकर्णःसपुत्रज्ञातिबांधवः। महत्यासेनयातस्थौनानाजनपदोत्थया। जयद्रथोभीमर
थःसंयातिरथभोजपः। भूमिंजयोवृषःक्राथोनैषधश्चमहाबलः। वृताबलेनमहताब्रह्मलोकपरिष्कृताः। व्यूहस्योरसितेराजन्
स्थितायुद्धविशारदाः। द्रोणेनविहितोव्यूहःपदात्यश्वरथद्विपैः। वातोद्धूतार्णवाकारःप्रनृत्यइवलक्ष्यते। तस्यपक्षप्रपक्षेभ्योनिः

पतंतियुयुत्सवः। सविद्युत्स्तनितामेघाः सर्वदिग्भ्यइवोत्थिताः। तस्यप्राग्ज्योतिषामध्येविधिवत्कल्पितंगजं। आस्थितःशुशुभेराजन्नंशुमानुदयेयथा। माल्यदामवतोराजन्श्वेतच्छत्रेणधार्यतः। कृत्तिकायोगयुक्तेनपौर्णमास्यामिवेंदुना। नीलांजनचयप्रख्योमदांधोद्विरदोबभौ। अतिवृष्टोमहामेघैर्यथास्यात्पर्वतोमहान्। नानानृपतिभिर्वीरैर्विविधायुधभूषणैः। समन्वितः पार्वतीयैःशक्रोदेवगणैरिव। ततोयुधिष्ठिरःप्रेक्ष्यव्यूहंतमतिमानुषं। अजय्यमरिभिःसंख्येपार्षतंवाक्यमब्रवीत्। ब्राह्मणस्यवशंनाहमियामद्ययथाप्रभो। पारावतसवर्णाश्वतथानीतिर्विधीयतां॥ ॥धृष्टद्युम्नउ०॥ ॥द्रोणस्ययतमानस्यवशंनैष्यसिसुव्रत। अहमावारयिष्यामिद्रोणमद्यसहानुगं। मयिजीवतिकौरव्यनोद्वेगंकर्तुमर्हसि। नहिशक्तोरणेद्रोणोविजेतुंमांकथंचन॥ ॥संजयउ०॥ ॥एवमुक्त्वाकिरन्बाणान्द्रुपदस्यसुतोबली। पारावतसवर्णाश्वःस्वयंद्रोणमुपाद्रवत्। अनिष्टदर्शनंदृष्ट्वाधृष्टद्युम्नमवस्थितं। क्षणेनैवाभवद्द्रोणोनातिहृष्टमनाइव। तंतुसंप्रेक्ष्यपुत्रस्तेदुर्मुखःशत्रुकर्षणः। प्रियंचिकीर्षुर्द्रोणस्यधृष्टद्युम्नमवारयत्। ससंप्रहारस्तुमुलःसुघोरःसमपद्यत। पार्षतस्यचशूरस्यदुर्मुखस्यचभारत। पार्षतःशरजालेनक्षिप्रंप्रच्छाद्यदुर्मुखं। भारद्वाजंशरौघेणमहतासमवारयत्। द्रोणमावारितंदृष्ट्वाभृशायस्तस्तवात्मजः। नानालिंगैःशरव्रातैःपार्षतंसममोहयत्। तयोर्विसक्तयोःसंख्येपांचाल्यकुरुमुख्ययोः। द्रोणोयुधिष्ठिरसैन्यंबहुधाव्यधमच्छरैः। अनिलेनयथाभ्राणिविच्छिन्नानिसमंततः। तथापार्थस्यसैन्यानिविच्छिन्नानिक्वचित्क्वचित्। मुहूर्तमिवतद्युद्धमा

सीन्मस्मरदर्शनं। ततस्तन्मत्तवद्राजन्निर्मर्यादमवर्त्तत। नैव स्वे न परे राजन्नाज्ञायंत परस्परं। अनुमानेन संज्ञाभिर्युद्धं तत्समवर्त्त
त। चूडामणिषु निष्केषु भूषणेष्वपि वर्मसु। तेषामादित्यवर्णाभा रश्मयः प्रचकाशिरे। तत्प्रकीर्णपताकानां रथवारणवाजिनां। ब
लाकाशबला भांति ददृशे यूथमाहवे। नरा नरवरान् राजन्नभ्युदीयुर्हयान् हयाः। रथांश्च रथिनो जघ्नुर्वारणान्वरवारणाः। समु
च्छ्रितपताकानां गजानां परमद्विपैः। क्षणेन तुमुलो घोरः संग्रामः समपद्यत। तेषां संसक्तगात्राणां कर्षतामितरेतरं। दंतसंघात
संघर्षात्सधूमोग्निरजायत। विप्रकीर्णपताकास्ते विषाणजनिताग्नयः। बभूवुः खं समासाद्य सविद्युत इवांबुदाः। विक्षिपद्भिर्न
दद्भिश्च निपतद्भिश्च वारणैः। संबभूव मही कीर्णा मेघैर्द्यौरिव शारदी। तेषामाहन्यमानानां बाणतोमरवृष्टिभिः। वारणानां
रवो जज्ञे मेघानामिव संप्लवे। तोमराभिहताः केचिद्बाणैश्च परमद्विपाः। वित्रेसुः सर्वनागानां शब्दमेवापरे व्रजन्। विषाणाभि
हताश्चापि केचित्तत्र गजा गजैः। चक्रुरार्त्तस्वनं तत्र घोरमुत्पातजलदा इव। प्रतीपाः क्रियमाणाश्च वारणा वरवारणैः। उन्मथ्य पु
नराजघ्नुः प्रेरिताः परमांकुशैः। महामात्रैर्महामात्रास्ताडिताः शरतोमरैः। गजेभ्यः पृथिवीं जग्मुर्मुक्तप्रहरणांकुशाः। निर्मनुष्या
श्च मातंगा विनदंतस्ततस्ततः। छिन्नाभ्राणीव संपेतुः संप्रविश्य परस्परं। हतान्परिवहंतश्च पतितान्पतितायुधान्। दिशो जग्मु
र्महानागाः केचिदेकचरा इव। ताडितास्ताड्यमानाश्च तोमरर्ष्टिपरश्वधैः। पेतुरार्त्तस्वनं कृत्वा तदा विशसने गजाः। तेषां शैलोप
मैः कायैर्निपतद्भिः समंततः। आहता सहसा भूमिश्चकंपे च ननाद च। सादितैः सगजारोहैः सपताकैः समंततः। मातंगैः शुशु

भेभूमिर्विकीर्णैरिव पर्वतैः। गजस्थाश्च महामात्रा निर्भिन्नहृदया रणे। रथिभिः पातिता भल्लैर्विकीर्णांकुशतोमराः। क्रौंचवद्विनदंतोन्ये नाराचा
भिहता गजाः। परान्स्वांश्चापि निघ्नंतः परिपेतुर्दिशो दश। गजाश्वरथयोधानां शरीरौघसमावृता। बभूव पृथिवी राजन्मांससंशोणितक
र्दमा। प्रमथ्य च विषाणाग्रैः समुत्क्षिप्ताश्च वारणैः। सचक्राश्च विचक्राश्च रथैरेव महारथाः। रथाश्च रथिभिर्हीना निर्मनुष्याश्च वाजिनः।
हतारोहाश्च मातंगा दिशो जग्मुर्भयातुराः। जघानात्र पिता पुत्रं पुत्रश्च पितरं तथा। इत्यासीत्तुमुलं युद्धं न प्रज्ञायत किंचन। आगुल्फेभ्यो
वसीदंते नरा लोहितकर्दमैः। दीप्यमानैः परिक्षिप्ता दावैरिव महाद्रुमाः। शोणितैः सिच्यमानानि वस्त्राणि कवचानि च। छत्राणि च
पताकाश्च सर्वं रक्तमदृश्यत। हयौघाश्च रथौघाश्च नरौघाश्च निपातिताः। संक्षुण्णाः पुनरावृत्य बहुधा रथनेमिभिः। सगजौघम
हावेगः परासुनरशैवलः। रथौघतुमुलावर्तः प्रबभौ सैन्यसागरः। तं वाहनमहानौभिर्योधा जयधनैषिणः। अवगाह्यावमज्
ज्जंतो नैव मोहं प्रचक्रिरे। शरवर्षाभिवृष्टेषु योधेष्वंचितलक्ष्मसु। न तेषु चित्रतां लेभे कश्चिदाहतलक्षणः। वर्तमाने तथा युद्धे घो
ररूपे भयंकरे। मोहयित्वा परान्द्रोणो युधिष्ठिरमुपाद्रवत्॥ ॥ इति द्रोणपर्वणि॥ २०॥ संजय उ०॥ ॥ ततो युधिष्ठिरो द्रोणं
दृष्ट्वांतिकमुपागतं। महता शरवर्षेण प्रत्यगृह्णादभीतवत्। ततो हलहलाशब्द आसीद्यौधिष्ठिरे बले। जिघृक्षति महासिंहे गजा
नामिव यूथपे। दृष्ट्वा द्रोणं ततः शूरः सत्यजित्सत्यविक्रमः। युधिष्ठिरमभिप्रेप्सुराचार्यं समुपाद्रवत्। तत आचार्यपांचाल्यौ युयु
धाते महाबलौ। विक्षोभयेतां तत्सैन्यमिंद्रवैरोचनाविव। ततो द्रोणं महेष्वासः सत्यजित्सत्यविक्रमः। अविध्यन्निशिताग्रेण प
रमास्त्रं विदर्शयन्। तथास्य सारथेः पंच शरान्सर्पविषोपमान्। अमुंचदंतकप्रख्यान्संमुमोहास्य सारथिः। अथास्य सहसा

विव्याध ध्वजं दशभिराशुगैः। दशभिर्दशभिः क्रुद्ध उभौ च पार्ष्णिसारथी। मंडलं तु समावृत्य विचरन्पृतनामुखे। ध्वजं चिछेद चक्रुद्धो
द्रोणस्यामित्रकर्षणः। द्रोणस्तत्तु समालोक्य चरितं तस्य संयुगे। मनसा चिंतयामास प्राप्तकालमरिंदमः। ततः सत्यजितं तीक्ष्णैर्दश
भिर्मर्मभेदिभिः। अविध्यच्छीघ्रमाचार्यः छित्वास्य सशरं धनुः। सशीघ्रतरमादाय धनुरन्यत्प्रतापवान्। द्रोणमभ्यहनद्राजंस्त्रिंश
ता कंकपत्रिभिः। दृष्ट्वा सत्यजिता द्रोणं ग्रस्यमानमिवाहवे। वृकः शरशतैस्तीक्ष्णैः पांचाल्यो द्रोणमार्दयत्। संछाद्यमानं समरे द्रो
णं दृष्ट्वा महारथं। चुक्रुशुः पांडवा राजन्वस्त्राणि दुधुवुश्च ह। वृकस्तु परमक्रुद्धो द्रोणं षष्ट्या स्तनांतरे। विव्याध बलवान्राजंस्तदद्भु
तमिवाभवत्। द्रोणस्तु शरवर्षेण छाद्यमानो महारथः। वेगं चक्रे महावेगः क्रोधादुद्धृत्य चक्षुषी। ततः सत्यजितश्चापं छित्वा द्रोणो
वृकस्य च। षड्भिः ससूतं सहयं शरैर्द्रोणोवधीद्वृकं। अथान्यद्धनुरादाय सत्यजिद्वेगवत्तरं। साश्वं ससूतं विशिखैर्द्रोणं विव्याध स
ध्वजं। स तन्न ममृषे द्रोणः पांचाल्येनार्दितो मृधे। ततस्तस्य विनाशाय सत्वरं विसृजच्छरान्। हयान्ध्वजान्धनुर्मुष्टिमुभौ च पार्ष्णिसा
रथी। अवाकिरत्ततो द्रोणः शरवर्षैः सहस्रशः। तथा संछिद्यमानेषु कार्मुकेषु पुनः पुनः। पांचाल्यः परमास्त्रज्ञः शोणाश्वं समयोध
यत्। स सत्यजितमालक्ष्य तथोदीर्णं महाहवे। अर्धचंद्रेण चिछेद शिरस्तस्य महात्मनः। तस्मिन्हते महामात्रे पांचालानां महार
थे। अपायाज्जवनैरश्वैर्द्रोणात्त्रस्तो युधिष्ठिरः। पांचालाः केकया मत्स्याश्चेदिकारूषकोशलाः। युधिष्ठिरमभीप्संतो हृष्टा द्रोणमुपा
द्रवन्। ततो युधिष्ठिरं प्रेप्सुराचार्यः शत्रुपूगहा। व्यधमत्तान्यनीकानि तूलराशिमिवानिलः। निर्दहंतमनीकानि तानि तानि पुनः
पुनः। द्रोणं मत्स्यादवरजः शतानीकोभ्यवर्तत। सूर्यरश्मिप्रतीकाशैः कर्मारपरिमार्जितैः। षड्भिः ससूतं सहयं द्रोणं विद्ध्वानद

दद्भुतं। क्रूरायकर्मणेयुक्तंचिकीर्षुःकर्मदुष्करं। अवाकिरच्छरशतैर्भारद्वाजंमहारथं। तस्यनानदतोद्रोणःशिरःकायात्सकुंडलं। क्षु
रेणापाहरत्तूर्णंततोमत्स्याःप्रदुद्रुवुः। मत्स्यान्जित्वाजयच्चेदीन्करूषान्केकयानपि। पांचालान्सृंजयान्पांडून्भारद्वाजःपुनःपु
नः। तंदहंतमनीकानिक्रुद्धमग्निंयथावनं। दृष्ट्वारुक्मरथंवीरंसमकंपंतसृंजयाः। उत्तमंह्याददानस्यधनुरस्याशुकारिणः। ज्या
घोषोनिघ्नतोमित्रान्दिक्षुसर्वासुशुश्रुवे। नागानश्वान्पदातींश्चरथिनोगजसादिनः। रौद्राहस्तवतामुक्ताःप्रमथ्नंतिस्मसायकाः।
नानद्यमानःपर्जन्योमिश्रवातोहिमात्यये। अश्ममवर्षमिवावर्षन्परेषांभयमादधत्। सर्वादिशःसमचरन्सैन्यंविक्षोभयन्निव।
बलीशूरोमहेष्वासोमित्राणामभयंकरः। तस्यविद्युदिवाभ्रेषुचापंहेमपरिष्कृतं। दिक्षुसर्वासुपश्यामोद्रोणस्यामिततेजसः। शोभ
मानंध्वजेचास्यवेदीमद्राक्ष्मभारत। हिमवच्छिखराकारांचरतःसंयुगेभृशं। द्रोणस्तुपांडवानीकेचकारकदनंमहत्। यथादैत्यगणेवि
ष्णुःसुरासुरनमस्कृतः। सशूरःसत्यवाक्प्राज्ञोबलवान्सत्यविक्रमः। महानुभावःकल्पांतेरौद्रींभीरुविभीषणीं। कवचोर्मिध्वजावर्त्तां
मर्त्यकूलापहारिणीं। गजवाजिमहाग्राहामसिमीनांदुरासदां। वीरास्थिशर्करांरौद्रांभेरीमुरजकच्छपां। चर्मवर्मप्लवांघोरांकेशशैवल
शाड्वलां। शरौघिणींधनुःस्रोतांबाहुपन्नगसंकुलां। रणभूमिवहांतीव्रांकुरुसृंजयवाहिनीं। मनुष्यशीर्षपाषाणांशक्तिमीनांगदोडुपां।
उष्णीषफेनवसनांविकीर्णांत्रसरीसृपां। वीरापहारिणीमुग्रांमांसशोणितकर्दमां। हस्तिग्राहांकेतुवृक्षांक्षत्रियाणांनिमज्जनीं।
क्रूरांशरीरसंघट्टांसादिनक्रांदुरत्ययां। द्रोणःप्रावर्त्तयत्तत्रनदीमंतकगामिनीं। क्रव्यादगणसंजुष्टांश्वसृगालगणायुतां। निषे
वितांमहारौद्रैःपिशिताशैःसमंततः। तंदहंतमनीकानिरथोदारंकृतांतवत्। सर्वतोभ्यद्रवन्द्रोणंकुंतीपुत्रपुरोगमाः। तेद्रोणंस

हिताः शूराः सर्वतः प्रत्यवारयन्। गभस्तिभिरिवादित्यं तपंतं भुवनं यथा। तंतु शूरं महेष्वासं तावका अभ्युद्यतायुधाः। राजानो राजपुत्राश्च समंतात्प
र्यवारयन्। शिखंडी तु ततो द्रोणं पंचभिर्नतपर्वभिः। क्षत्रधर्मा च विंशत्या वसुदानश्च पंचभिः। उत्तमौजास्त्रिभिर्बाणैः क्षत्रदेवश्च सप्तभिः। सा
त्यकिश्च शतेनाजौ युधामन्युस्तथाष्टभिः। युधिष्ठिरो द्वादशभिर्द्रोणं विव्याध सायकैः। धृष्टद्युम्नश्च दशभिश्चेकितानस्त्रिभिः शरैः। ततो द्रोणः
सत्यसंधः प्रभिन्न इव कुंजरः। अभ्यतीत्य रथानीकं दृढसेनमपातयत्। ततो राजानमासाद्य प्रहरंतमभीतवत्। अविध्यन्नवभिः क्षेमं स हतः
प्रापतद्रथात्। स मध्यं प्राप्य सैन्यानां सर्वाः प्रविचरन्दिशः। त्राता ह्यभवदन्येषां न त्रातव्यः कथंचन। शिखंडिनं द्वादशभिर्विंशत्या चोत्तमौजसं।
वसुदानं च भल्लेन प्रेषयद्यमसादनं। अशीत्या क्षत्रवर्माणं षड्विंशत्या सुदक्षिणं। क्षत्रदेवं तु भल्लेन रथनीडादपातयत्। युधामन्युं चतुःषष्ट्या
त्रिंशता चैव सात्यकिं। विध्वा रुक्मरथस्तूर्णं युधिष्ठिरमुपाद्रवत्। ततो युधिष्ठिरः क्षिप्रं कुतो राजसत्तम। अपायाज्जवनैरश्वैः पांचाल्यो द्रो
णमभ्ययात्। तं द्रोणः सधनुष्कं तु साश्वयंतारमाक्षिणोत्। स हतः प्रापतद्भूमौ रथाज्ज्योतिरिवांबरात्। तस्मिन्हते राजपुत्रे पांचालानां यशस्क
रे। हत द्रोणं हत द्रोणमित्यासीन्निःस्वनो महान्। तांस्तथा भृशसंरब्धान्पांचालान्मत्स्यकेकयान्। संजयान्पांडवांश्चैव द्रोणो व्यक्षोभयद्बली।
सात्यकिं चेकितानं च धृष्टद्युम्नशिखंडिनौ। वार्धक्षेमिं चैत्रसेनिं सेनाबिंदुं सुवर्चसं। एतांश्चान्यांश्च सुबहून्नानाजनपदेश्वरान्। सर्वान्
द्रोणो जयद्युद्धे कुरुभिः परिवारितः। तावकाश्च महाराज जयं लब्ध्वा महाहवे। पांडवेयान्रणे जघ्नुर्द्रवमाणान्समंततः। ते दानवा इवेंद्रेण व
ध्यमाना महात्मना। पांचालाः केकया मत्स्याः समकंपंत भारत॥ ॥द्रोणपर्वणि॥२१॥ धृतराष्ट्र उ०॥ ॥भारद्वाजेन भग्नेषु पांडवेषु महा
मृधे। पांचालेषु च सर्वेषु कश्चिदन्योन्यवर्तत। आर्यां युद्धे मतिं कृत्वा क्षत्रियाणां यशस्करीं। असेवितां कापुरुषैः सेवितां पुरुषर्षभैः। स

हिवीरोन्नतः शूरो यो भग्नेषु निवर्त्तते। अहो नासीत्पुमान्कश्चिद्दृष्ट्वा द्रोणं व्यवस्थितं। जृंभमाणमिव व्याघ्रं प्रभिन्नमिव कुंजरं। त्यजंत माहवे प्रा
णान्सन्नद्धं चित्रयोधिनं। महेष्वासं नरव्याघ्रं द्विषतां भयवर्द्धनं। कृतज्ञं सत्यनिरतं दुर्योधनहितैषिणं। भारद्वाजं तथानीके दृष्ट्वा शूरमवस्थितं।
के शूराः संन्यवर्त्तंत तन्ममाचक्ष्व संजय॥ ॥संजय उ०॥ ॥तान्दृष्ट्वा चलितान्संख्ये प्रणुन्नान्द्रोणसायकैः। पांचालान्पांडवान्मत्स्यान्सृंजयांश्चे
दिकेकयान्। द्रोणचापविमुक्तेन शरौघेणाशुहारिणा। सिंधोरिव महौघेन ह्रियमाणान्यथाप्लवान्। कौरवाः सिंहनादेन नानावाद्यस्वनेन च।
रथद्विपनरांश्चैव सर्वतः समवारयन्। तान्पश्यन्सैन्यमध्यस्थो राजा स्वजनसंवृतः। दुर्योधनोब्रवीत्कर्णं प्रहृष्टः प्रहसन्निव॥ ॥दुर्योधन उ०॥
पश्य राधेय पांचालान्प्रणुन्नान्द्रोणसायकैः। सिंहेनेव मृगान्वन्यांस्त्रासितान्दृढधन्वना। नैते जातु पुनर्युद्धमीहेयुरिति मे मतिः। यथा तु भग्ना
द्रोणेन वातेनेव महाद्रुमाः। अर्द्यमानाः शरैरेते रुक्मपुंखैर्महात्मना। पथा नैकेन गच्छंति घूर्णमानास्ततस्ततः। संनिरुद्धाश्च कौरव्यैर्द्रोणेन च म
हात्मना। एते न्ये मंडलीभूताः पावकेनेव कुंजराः। भ्रमरैरिव चाविष्टा द्रोणस्य निशितैः शरैः। अन्योन्यं समलीयंत पलायनपरायणाः। एष भीमो
महाक्रोधी हीनः पांडवसंजयैः। मदीयैरावृतो योधैः कर्ण नंदयतीव मां। व्यक्तं द्रोणमयं लोकमद्य पश्यति दुर्मतिः। निराशो जीवितान्नूनमद्य रा
ज्याच्च पांडवः॥ ॥कर्ण उ०॥ ॥नैष जातु महाबाहुर्जीवन्नाहवमुत्सृजेत्। न चेमान्पुरुषव्याघ्र सिंहनादान्सहिष्यति। न चापि पांडवा युद्धे भज्येर
न्निति मे मतिः। शूराश्च बलवंतश्च कृतास्त्रा युद्धदुर्मदाः। विषाग्निद्यूतसंक्लेशान्वनवासं च पांडवाः। स्मरमाणा न हास्यंति संग्राममिति मे मतिः।
निकृतो हि महाबाहुरमितौजा वृकोदरः। वरान्वरान्हि कौंतेयो रथोदारान्हनिष्यति। असिना धनुषा चात्र्या हयैर्नागैर्नरै रथैः। आयसेन च दं
डेन व्रातान्व्रातान्हनिष्यति। तमेनमनुवर्त्तंति सात्यकिप्रमुखा रथाः। पांचालाः केकया मत्स्याः पांडवाश्च विशेषतः। शूराश्च बलवंतश्च विक्रांताश्च
महारथाः। विनिघ्नंतश्च भीमेन संरब्धेनाभिचोदिताः। ते द्रोणमभिवर्त्तंति सर्वतः कुरुपुंगवाः। वृकोदरं परीप्संतः सूर्यमभ्रगणा इव। एकायन

दोत्कचायपौलस्त्यंधनुर्दिव्यंभयानकं।रौद्रमाग्नेयकौबेर्यंयाम्यंगिरिशमेवच।पंचानांद्रौपदेयानांधनूरत्नानिभारत।रौद्रंधनु
र्वरश्रेष्ठंलेभेयंरौहिणीसुतः।तंतुष्टःप्रददौरामःसौभद्रायमहात्मने।एतेचान्येचबहवोध्वजाहेमविभूषिताः।तत्रादृश्यंतशूराणां
द्विषतांशोकवर्द्धनाः।तदभूद्ध्वजसंबाधमकापुरुषसेवितं।द्रोणानीकंमहाराजपटेचित्रमिवार्पितं।शुश्रुवुर्नामगोत्राणिवीराणां
संयुगेतदा।द्रोणमाद्रवतांराजन्स्वयंवरइवाहवे॥ ॥इतिमहाभारतेद्रोणपर्वणि॥२२॥धृतराष्ट्रउ०॥ ॥व्यथयेयुरिमेसेनां
देवानामपिसंजय।आहवेयेन्यवर्त्तंतवृकोदरमुखान्नृपाः।संप्रयुक्तःकिलैवायंदिष्टैर्भवतिपूरुषः।तस्मिन्नेवचसर्वार्थाःप्रदृ
श्यंतेपृथग्विधाः।दीर्घंविप्रोषितःकालमरण्येजटिलोजिनी।अज्ञातश्चैवलोकस्यविजहारयुधिष्ठिरः।सएवमहतींसेनां
समावर्त्तयदाहवे।किमन्यद्दैवसंयोगान्ममपुत्रस्यचाभवत्।युक्तएवहिभाग्येनध्रुवमुत्पद्यतेनरः।सतथाकृष्यतेतेननय
थास्वयमिच्छति।द्यूतव्यसनमासाद्यक्लेशितोहियुधिष्ठिरः।सपुनर्भागधेयेनसहायानुपलब्धवान्।अर्द्धमेकेकयाल
ब्धाःकाशिकाकोशलाश्चये।चेदयश्चापरेवंगामामेवसमुपाश्रिताः।पृथिवीभूयसीतातममपार्थस्यनोतथा।इतिमाम
ब्रवीत्सूतमंदोदुर्योधनःपुरा।तस्यसेनासमूहस्यमध्येद्रोणःसुरक्षितः।निहतःपार्षतेनाजौकिमन्यद्भागधेयतः।
मध्येराज्ञांमहाबाहुंसदायुद्धाभिनंदिनं।सर्वास्त्रपारगंद्रोणंकथंमृत्युरुपेयिवान्।समनुप्राप्तकृच्छ्रोहंमोहं==

श्रेष्ठंहयश्रेष्ठाः सर्वतः पृष्ठतोन्वयुः। वर्णेकिंश्चावचैरन्यैः सदश्वानां प्रभद्रकाः। सन्यवर्त्तंत युद्धाय बहवो देवरूपिणः। तेयत्ता भीमसे
नेन सहिताः कांचनध्वजाः। प्रत्यदृश्यंत राजेंद्र सेंद्रा इव दिवौकसः। अभ्यरोचत तान्सर्वान्धृष्टद्युम्न समागतान्। सर्वाण्यपतिच
सैन्यानि भारद्वाजो व्यरोचत। अतीव शुशुभे तस्य ध्वजः कृष्णाजिनोत्तरः। कमंडलुर्महाराज जातरूपमयः शुभः। ध्वजं तु भीमसे
नस्य वैडूर्यमणिलोचनं। भ्राजमानं महासिंहं राजतं दृष्टवानहं। ध्वजं तु कुरुराजस्य पांडवस्य महौजसः। दृष्टवानस्मि सौवर्णं
सोमं ग्रहगणान्वितं। मृदंगौ चात्र विपुलौ दिव्यौ नंदोपनंदकौ। यंत्रेणाहन्यमानौ च सुस्वनौ हर्षवर्द्धनौ। सरभं पृष्ठसौवर्णं
नकुलस्य महाध्वजं। अपश्याम रथेस्मुग्रं भीषयानमवस्थितं। हंसस्तु राजतः श्रीमान् ध्वजे घंटापताकवान्। सहदेवस्य दु
र्द्धर्षो द्विषतां शोकवर्द्धनः। पंचानां द्रौपदेयानां प्रतिमा ध्वजभूषणं। धर्ममारुतशक्राणामश्विनोश्च महात्मनोः। अभिमन्योः
कुमारस्य शार्ङ्गः पक्षी हिरण्मयः। रथे ध्वजवरो राजंस्तप्तचामीकरोज्वलः। घटोत्कचस्य राजेंद्र ध्वजे गृध्रो व्यरोचत। अश्वा
श्च कामगास्तस्य रावणस्य पुरा यथा। माहेंद्रं च धनुर्दिव्यं धर्मराजे युधिष्ठिरे। वायव्यं भीमसेनस्य धनुर्दिव्यमभून्नृप। त्रै
लोक्यरक्षणार्थाय ब्रह्मणा सृष्टमायुधं। तद्दिव्यमजरं चैव फाल्गुनार्थाय वै धनुः। वैष्णवं नकुलायाथ सहदेवाय चाश्विजं। क

हंतोभ्यादांता जांबूनदस्रजः। युद्धे सत्यधृतिं क्षेमिमवहन्यांशावः शुभाः। एकवर्णेन सर्वेण ध्वजेन कवचेन च। अश्वैश्च धनुषा चैव शुक्लैः शु
क्लान्यवर्त्तत। समुद्रसेनपुत्रंतु सामुद्रा रुद्रतेजसं। अश्वाः शशांकसदृशाश्चंद्रसेनमुदावहन्। नीलोत्पलसवर्णास्तु तपनीयविभूषिताः।
शैब्यं चित्ररथं संख्ये चित्रमाल्यावहन्हयाः। कलापपुष्पवर्णास्तु श्वेतलोहितराजयः। रथसेनं हयश्रेष्ठाः समूहुर्युद्धदुर्मदं। येतुस
र्वमनुष्येभ्यः प्राहुः शूरतरं नृपं। तं पटच्चरहंतारं शुकवर्णा वहन्हयाः। चित्रायुधं चित्रमाल्यं चित्रवर्मायुधध्वजं। ऊहुः किंशुकपुष्पा
णां समवर्णा हयोत्तमाः। एकवर्णेन सर्वेण ध्वजेन कवचेन च। धनुषा रथवाहैश्च नीलैर्नीलोभ्यवर्त्तत। नानारूपै रत्नचित्रैर्वरूथ
ध्वजकार्मुकैः। वाजिध्वजपताकाभिश्चित्रैश्चित्रोभ्यवर्त्तत। येतु पुष्करपर्णस्य तुल्यवर्णा हयोत्तमाः। तेरोचमानस्य सुतं हेमवर्णमु
दावहन्। योधाश्च भद्रकाराश्च शरदंडानुदंडयः। श्वेतांडाः कुक्कुटांडाभा दंडमेकं हयावहन्। केशवेन हतो संख्ये पिता यस्य नराधिपः। भि
न्नेकपाटे पांड्यानां विद्रुतेषु च बंधुषु। भीष्मादवाप्य चास्त्राणि द्रोणाद्रामात्कृपात्तथा। अस्त्रैः समत्वं संप्राप्य रुक्मिकर्णार्जुनाच्यु
तैः। इयेष द्वारकां हंतुं कृत्स्नां जेतुं च मेदिनीं। निवारितस्ततः प्राज्ञैः सुहृद्भिर्हितकाम्यया। वैरानुबंधमुत्सृज्य स्वराज्यमनुशास्ति
यः। स सागरध्वजः पांड्यश्चंद्ररश्मिनिभैर्हयैः। वैडूर्यजालसंछिन्नैर्वीर्यद्रविणमाश्रितः। दिव्यं विस्फारयंश्चापं द्रोणमभ्यद्रवद्बली।
आटरूषकवर्णाभा हयाः पांड्यानुयायिनां। अवहन्रथमुख्यानामयुतानि चतुर्दश। नानावर्णेन रूपेण नानाकृतिमुखा हयाः।
रथचक्रध्वजं वीरं घटोत्कचमुदावहन्। भरतानां समेतानामुत्सृज्य कोमतानि यः। गतो युधिष्ठिरं भक्त्या त्यक्त्वा सर्वमभीप्सितं। लो
हिताक्षं महाबाहुं बृहंतं तमरट्टजाः। महासत्वा महाकायाः सौवर्णस्यंदने स्थितं। सुवर्णवर्णा धर्मिष्ठमनीकस्थं युधिष्ठिरं। राज

स्रुवर्णमालिनः क्षांताः श्रेणिमंतमुदावहन् । रुक्ममालाधराः शूरा हेमपृष्ठाः स्वलंकृताः । काशिराजं नरश्रेष्ठं श्लाघनीयमुदावहन् । अस्त्रा
णां च धनुर्वेदे ब्राह्मे वेदे च पारगं । तं सत्यधृतिमायांतमरुणाः समुपावहन् । यः स पांचालसेनानी द्रोणमंशमकल्पयत् । पारावतसवर्णास्तं धृ
ष्टद्युम्नमुदावहन् । तमन्वयात्सत्यधृतिः सौचित्तिर्युद्धदुर्मदः । श्रेणिमान्वसुदानश्च पुत्रः काश्यस्य वा विभुः । युक्तैः परमकांबोजैर्जवनैर्हे
ममालिभिः । भीषयंतो द्विषत्सैन्यं यमवैश्रवणोपमाः । प्रभद्रकास्तु कांबोजाः षट्सहस्राण्युदायुधाः । नानावर्णैर्हयैः श्रेष्ठैर्हेमवर्णरथध्व
जाः । शरव्रातैर्विधुन्वंतः शत्रून्विततकार्मुकाः । समानमृत्यवो भूत्वा धृष्टद्युम्नं समन्वयुः । बभ्रुकौशेयवर्णास्तु सुवर्णवरमालिनः । अ
ग्लानमनसश्चेकितानं हयोत्तमाः । इंद्रायुधसवर्णैस्तु कुंतिभोजो हयोत्तमैः । आयात्सदश्वैः पुरुजिन्मातुलः सव्यसाचिनः । अंतरिक्ष
सवर्णास्तु तारकाचित्रिता इव । राजानं रोचमानं ते हयाः संख्ये समावहन् । कर्बुराः शितिपादास्तु स्वर्णजालपरिच्छदाः । जारासंधिं हय
श्रेष्ठाः सहदेवमुदावहन् । ये तु पुष्करनालस्य समवर्णा हयोत्तमाः । जवे श्येनसमाश्चित्राः सुदामानमुदावहन् । शशलोहितवर्णास्तु
पांडुरोद्गतराजयः । पांचाल्यं गोपतेः पुत्रं सिंहसेनमुदावहन् । पांचालानां नरव्याघ्रो यः ख्यातो जनमेजयः । तस्य सर्षपपुष्पाणां तुल्य
वर्णा हयोत्तमाः । माषवर्णाश्च जवना बृहंतो हेममालिनः । दधिपृष्ठाश्चित्रमुखाः पांचाल्यमवहन्द्रुतं । शूराश्च भद्रकाश्चैव शरकांडनिभा
हयाः । पद्मकिंजल्कवर्णाभा दंडधारमुदावहन् । रासभारुणवर्णाभाः पृष्ठतो मूषिकप्रभाः । वल्गंत इव संयत्ता व्याघ्रदत्तमुदावहन् । हर
यः कालकाश्चित्राश्चित्रमाल्यविभूषिताः । सुधन्वानं नरव्याघ्रं पांचाल्यं समुदावहन् । इंद्राशनिसमस्पर्शा इंद्रगोपकसन्निभाः । काये चित्रां
तराश्चित्राश्चित्रायुधमुदावहन् । बिभ्रतो हेममालास्तु चक्रवाकोदरा हयाः । कोशलाधिपतेः पुत्रं सुक्षत्रं वाजिनो वहन् । शबलास्तु बृ

मुदावहन्। इंद्रगोपकवर्णैश्च भ्रातरः पंच कैकयाः। जातरूपसमाभासाः सर्वे लोहितकध्वजाः। ते हेममालिनः शूराः सर्वयुद्धविशारदाः। वर्षंत
इव जीमूताः प्रत्यदृश्यंत दंशिताः। आमपात्रनिकाशास्तु पांचाल्यममितौजसं। दत्तास्तुंबरुणा दिव्याः शिखंडिनमुदावहन्। तथा द्वादशसा
हस्राः पंचालानां महारथाः। तेषां तु षट्सहस्राणि ये शिखंडिनमन्वयुः। पुत्रं तु शिशुपालस्य नरसिंहस्य मारिष। आक्रीडंतो वहंति स्म सारंग
शबलाहयाः। धृष्टकेतुस्तु चेदीनामृषभोतिबलोदितः। कांबोजैः शबलैरश्वैरभ्यवर्त्तत दुर्जयः। बृहत्क्षत्रं तु कैकेयं सुकुमारं हयोत्तमाः। प
लालधूमसंकाशाः सैंधवाः शीघ्रमावहन्। मल्लिकाक्षाः पद्मवर्णा बाह्लिजाताः स्वलंकृताः। शूरं शिखंडिनः पुत्रं क्षत्रदेवमुदावहन्। रुक्म
भांडप्रतिच्छन्नाः कौशेयसदृशा हयाः। क्षमावंतो वहन्संख्ये सेनाबिंदुमरिंदमं। युवानमवहन्युद्धे क्रौंचवर्णा हयोत्तमाः। काश्यस्याभिभु
वः पुत्रं सुकुमारं महारथं। श्वेतास्तु प्रतिविंध्यं तं कृष्णग्रीवा मनोजवाः। यंतुः प्रेष्यकरा राजन्राजपुत्रमुदावहन्। सुतसोमं तु यः सौम्यं पा
र्थः पुत्रमजीजनत्। माषपुष्पसवर्णास्तमवहन्वाजिनो रणे। सहस्रसोमप्रतिमो बभूव पुरे कुरूणामुदयेंदुनाम्नि। तस्मिन्जातः सोमसंक्रं
दमध्ये यस्मात्तस्मात्सुतसोमोभवत्सः। नाकुलिं तु शतानीकं शालपुष्पनिभा हयाः। आदित्यतरुणप्रख्याः श्लाघनीयमुदावहन्। कांच
नापिहितैर्योक्त्रैर्मयूरग्रीवसंनिभाः। द्रौपदेयं नरव्याघ्रं श्रुतकर्माणमावहन्। श्रुतकीर्तिं श्रुतनिधिं द्रौपदेयं हयोत्तमाः। ऊहुः पार्थस
मं युद्धे चाषपत्रनिभा हयाः। यमाहुरध्यर्द्धगुणं कृष्णात्पार्थाच्च संयुगे। अभिमन्युं पिशंगास्तं कुमारमवहन्रणे। एकस्तु धार्त्तराष्ट्रेभ्यः
पांडवान्यः समाश्रितः। तं बृहंतो महाकाया युयुत्सुमवहन्रणे। पलालकांडवर्णास्तु वार्द्धक्षेमिं तरस्विनं। ऊहुः सुतुमुले युद्धे हया हृष्टाः
स्वलंकृताः। कुमारं शितिपादास्तु रुक्मपत्रैरुरश्छदैः। सौचित्तिमवहन्युद्धे यंतुः प्रेष्यकरा हयाः। रुक्मपृष्ठावकीर्णास्तु कौशेयसदृशा हयाः।

गतान्यत्तेपीडयेयुर्यतव्रतं। अरक्ष्यमाणंशार्दूलाभायथादीपंमुमूर्षवः। असंत्रायं कृतास्त्राश्चपर्याप्ताश्चापिवारणे। अतिभारमहंमन्येभारद्वाजस
माहितं। शीघ्रमन्वगमिष्यामोयत्रद्रोणोव्यवस्थितः। काकाइवमहानागंमावहन्युर्यतव्रतं॥ ॥संजयउ०॥ ॥राधेयस्यवचःश्रुत्वाराजादु
र्योधनस्ततः। भ्रातृभिःसहितोराजन्प्रायाद्द्रोणरथंप्रति। तत्रारावोमहानासीदेकंद्रोणंजिघांसतां। पांडवानांनिवृत्तानांनानावर्णैर्हयोत्तमैः
॥ ॥इतिद्रोणपर्वणि॥२२॥ धृतराष्ट्रउ०॥ ॥सर्वेषामेवमेब्रूहिरथचिह्नानिसंजय। येद्रोणमभ्यवर्तंतक्रुद्धाभीमपुरोगमाः॥ ॥संजयउ०॥
ऋक्षवर्णैर्हयैर्दृष्ट्वाव्यायच्छंतंवृकोदरं। रजताश्वस्ततःशूरःशैनेयःसन्यवर्तत। सारंगाश्वोयुधामन्युःस्वयंप्रत्वरयन्हयान्। पर्यवर्तत दु
र्धर्षःक्रुद्धोद्रोणरथंप्रति। पारावतसवर्णैस्तुहेमभांडैर्महाजवैः। पांचालराजस्यसुतोधृष्टद्युम्नोनिवर्तत। पितरंतुपरिप्रेप्सुःक्षत्रधर्मायतव्र
तः। सिद्धिंचास्यपरांकांक्षन्शोणाश्वःसन्यवर्तत। पद्मपत्रनिभांश्चाश्वान्मल्लिकाक्षानलंकृतान्। शैखंडिःक्षत्रदेवस्तुस्वयंप्रत्वरयन्ययौ। दर्श
नीयास्तुकांबोजाःशुकपत्रपरिच्छदाः। वहंतोनकुलंशीघ्रंतावकानभिदुद्रुवुः। कृष्णास्तुमेघसंकाशाअवहंस्तूत्तमौजसं। दुर्धर्षायाभिसंधाय
क्रुद्धायुद्धायभारत। तथातित्तिरिकल्माषाहयावातसमाजवे। अवहंस्तुमुलेयुद्धेसहदेवमुदायुधं। दंतवर्णास्तुराजानंकालवालायुधिष्ठिरं।
भीमवेगानरव्याघ्रमवहन्वातरंहसः। हेमोत्तमप्रतिच्छन्नैर्हयैर्वातसमैर्जवे। अभ्यवर्तंतसैन्यानिसर्वाण्येवयुधिष्ठिरं। राज्ञस्त्वनंतरोराजापां
चाल्योद्रुपदोभवत्। जातरूपमयच्छत्रःसर्वैस्तैरभिरक्षितः। ललामैर्हरिभिर्युक्तःसर्वशब्दक्षमैर्युधि। राज्ञांमध्येमहेष्वासःशांतभीरभ्यवर्तत।
तंविराटोन्वयाच्छीघ्रंसहसर्वैर्महारथैः। केकयाश्चशिखंडीचधृष्टकेतुस्तथैवच। स्वैःस्वैःसैन्यैःपरिवृतामत्स्यराजानमन्वयुः। तंतुपाटलिपु
ष्पाणांसमवर्णाहयोत्तमाः। वहमानाव्यराजंतमत्स्यस्यामित्रघातिनः। हरिद्रासमवर्णास्तुजवनाहेममालिनः। पुत्रंविराटराजस्यसत्वरंस

परममागतः। भीष्मद्रोणौ हतौ श्रुत्वा नाहं जीवितुमुत्सहे। यन्मां क्षत्ताब्रवीत्तात प्रपश्यन्पुत्रगृद्धिनं। दुर्योधनेन तत्सर्वं प्राप्तं सूत मया सह। नृशंसं तु परं न
स्यात्त्यक्त्वा दुर्योधनं यदि। पुत्रशेषं चिकीर्षेयं कृत्स्नं न मरणं व्रजेत्। यो हि धर्मं परित्यज्य भवत्यर्थपरो नरः। सोस्माच्च हीयते लोकात्क्षुद्रभावं च गच्छति।
अद्य चाप्यस्य राष्ट्रस्य हतोत्साहस्य संजय। अवशेषं न पश्यामि ककुदे मर्दिते सति। कथं स्यादवशेषो हि धुर्ययोरभ्यतीतयोः। यौ नित्यमुपजीवामः क्ष-
मिणौ पुरुषर्षभौ। व्यक्तमेव च मे शंस यथा युद्धमवर्तत। केयुध्यन्के व्यपाकर्षन्के क्षुद्राः प्राद्रवन्भयात्। धनंजयं च मे शंस यद्यच्चक्रे रथर्षभः। तस्माद्भ-
यं नो भूयिष्ठं भ्रातृव्याच्च वृकोदरात्। यथासीच्च निवृत्तेषु पांडवेयेषु संजय। मम सैन्यावशेषस्य सन्निपातः सुदारुणः। कथं च वो मनस्तात निवृत्तेषु भ-
वत्सु दा। मामकानां च ये शूराः के कांस्तत्र न्यवारयन्॥ ॥ इति महाभारते द्रोणपर्वणि ॥ [illegible] ॥ संजय उवाच॥ महद्भैरवमासीन्नः संनिवृत्तेषु पांडवे। दृ-
ष्ट्वा द्रोणं छाद्यमानं तैर्भास्करमिवांबुदैः। तैश्चोद्धूतं रजस्तीव्रमवचक्रे चमूं तव। ततो हतममंस्याम द्रोणं दृष्टिपथे हते। तांस्तु शूरान्महेष्वासान्क्रूरं कर्म
चिकीर्षतः। दृष्ट्वा दुर्योधनस्तूर्णं स्वसैन्यं समचूचुदत्। यथाशक्ति यथोत्साहं यथासत्त्वं नराधिपाः। वारयध्वं यथायोगं पांडवानामनीकिनीं। ततो दुर्मर्ष-
णो भीममभ्यगच्छत्सुतस्तव। आराद्दृष्ट्वा किरन्बाणैर्जिघृक्षुस्तस्य जीवितं। तं बाणैरवतस्तार क्रुद्धो मृत्युरिवाहवे। तं च भीमोतुदद्बाणैस्तदासीत्तुमुलं म-
हत्। तमीश्वरसमादिष्टाः प्राज्ञाः शूराः प्रहारिणः। राज्यं मृत्युभयं त्यक्त्वा प्रत्यतिष्ठन्परान्युधि। कृतवर्मा शिनेः पौत्रं द्रोणं प्रेप्सुं विशांपते। पर्यवारयदा-
यांतं शूरः समरशोभिनं। तं शैनेयः शरव्रातैः क्रुद्धः क्रुद्धमवारयत्। कृतवर्मा च शैनेयं मत्तो मत्तमिव द्विपं। सैंधवः क्षत्रधर्माणमायांतं निशितैः शरैः।
उग्रधन्वा महेष्वासं यत्नाद्द्रोणादवारयत्। क्षत्रधर्मा सिंधुपतेश्छित्वा केतनकार्मुके। नाराचैर्दशभिः क्रुद्धः सर्वमर्मस्वताडयत्। अथान्यद्धनुरादाय
सैंधवः कृतहस्तवत्। विव्याध क्षत्रधर्माणं रणे सर्वायसैः शरैः। युयुत्सुं पांडवार्थाय यतमानं महारथं। सुबाहुर्भ्रातरं शूरं यत्नाद्द्रोणादवारयत्। सुबा-
होः सधनुषो बाणावस्यतः परिघोपमौ। युयुत्सुः शितपीताभ्यां क्षुराभ्यामच्छिनद्भुजौ। राजानं पांडवश्रेष्ठं धर्मात्मानं युधिष्ठिरं। वेलेव सागरं क्षुब्धं मद्र-
राट् समवारयत्। तं धर्मराजो बहुभिर्मर्मभिद्भिरवाकिरत्। मद्रेशस्तं चतुःषष्ट्या शरैर्विद्ध्वानदद्भृशं। तस्य नानदतः केतुमुच्चकर्त च कार्मुकं। क्षुराभ्यां पां-

डवोऽन्ये च सत्तम त्वक्षुकुरुष्वर्जुनाः । तथैव राजा बाल्हीको राजानं द्रुपदं शरैः । आद्रवंतं सहानीकः सहानीकं न्यवारयत् । तत्क्षुद्रमभवद्घोरं वृद्धयोः सहसेनयोः ।
यथा महायूथपयोर्द्विपयोः संप्रभिन्नयोः । विंदानुविंदावावंत्यौ विराटं मत्स्यमार्छतां । सहसैन्यौ सहानीकं यथेंद्राग्नी पुरा बलिं । तदुत्पिंजलकं युद्धमास
द्देवासुरोपमं । मत्स्यानां केकयैः सार्द्धमभीताश्वरथद्विपं । नाकुलिं तु शतानीकं भूतकर्मा सभापतिः । अस्यंतमिषुजालानि यांतं द्रोणादवारयत् । ततो न
कुलदायादस्त्रिभिर्भल्लैः सुसंशितैः । चक्रे विबाहुशिरसं भूतकर्माणमाहवे । सुतसोमं तु विक्रांतमापतंतं शरौघिणं । द्रोणायाभिमुखं यांतं विविंश
तिरवारयत् । सुतसोमस्तु संक्रुद्धः सपितृव्यमजिह्मगैः । विविंशतिं शरैर्विद्ध्वा नाभ्यवर्तत दंशितः । अथ भीमरथः शाल्वमाशुगैरायसैः शितैः । षड्भिः साश्वा
स्वनियंतारमनयद्यमसादनं । श्रुतकर्माणमायांतं मयूरसदृशैर्हयैः । चित्रसेनिर्महाराज तव पौत्रो न्यवारयत् । तौ पौत्रौ तव दुर्द्धर्षौ परस्परवधैषिणौ ।
पितॄणामर्थसिध्यर्थं चक्रतुर्युद्धमुत्तमं । तिष्ठंतमग्रतो दृष्ट्वा प्रतिविंध्यं महाहवे । द्रौणिर्मानं पितुः कुर्वन्मार्गणैः समवारयत् । तं क्रुद्धः प्रतिविव्याध प्रतिविं
ध्यः शितैः शरैः । सिंहलांगूललक्ष्माणं पितुरर्थे व्यवस्थितं । प्रवपन्निव बीजानि बीजकाले नरर्षभ । द्रौणायनिर्द्रौपदेयाः शरवर्षैरवाकिरत् । आर्जुनिं श्रु
तकीर्तिं तु द्रौपदेयं महारथं । द्रोणायाभिमुखं यांतं दौःशासनिरवारयत् । तस्य कृष्णसमः कार्ष्णिस्त्रिभिर्भल्लैः सुसंशितैः । धनुर्ध्वजं च सूतं च छित्वा द्रोणां
तिकं ययौ । यस्तु शूरतमो राजन्नुभयोः सेनयोर्मतः । तं पटच्चरहंतारं लक्ष्मणः समवारयत् । स लक्ष्मणस्येषुसनं छित्वा लक्ष्म च भारत । लक्ष्मणे शरजालानि
विसृजन्बह्वशोभत । विकर्णस्तु महाप्राज्ञो याज्ञसेनिं शिखंडिनं । पर्यवारयदायांतं युवानं समरे युवा । ततस्तमिषुजालेन याज्ञसेनिः समावृणोत् । विधू
य तद्बाणजालं बभौ तव सुतो बली । अंगदोऽभिमुखं वीरमुत्तमौजसमाहवे । द्रोणायाभिमुखं यांतं शरौघेणान्यवारयत् । स संप्रहारस्तुमुलस्तयोः पुरुषसिं
हयोः । सैनिकानां च सर्वेषां तयोश्च प्रीतिवर्द्धनः । दुर्मुखस्तु महेष्वासो वीरं पुरुजितं बली । द्रोणायाभिमुखं यांतं वत्सदंतैरवारयत् । स दुर्मुखं भ्रुवोर्मध्ये नारा
चेनाभ्यताडयत् । तस्य तद्विबभौ वक्त्रं सनालमिव पंकजं । कर्णस्तु केकयान्भ्रातॄन्पंच लोहितकध्वजान् । द्रोणायाभिमुखं यातः शरवर्षैरवारयत् । ते चैनं भृश
संतप्ताः शरवर्षैरवाकिरन् । स च तांश्छादयामास शरजालैः पुनः पुनः । नैव कर्णो न ते पंच ददृशुर्बाणसंवृताः । साश्वसूतध्वजरथाः परस्परशराचिताः । पुत्रा

स्तोदुर्जयश्चैवजयश्चविजयश्चहा नीलकाश्यजयत्सेनोस्त्रयस्त्रीन्प्रत्यवारयन्। तद्युद्धमभवद्घोरंकोणपप्रीतिवर्द्धनं। सिंहव्या
घ्रतरक्षूणांयथर्क्षमहिषर्षभैः। क्षेमधूर्त्तिर्बृहंतौतु भ्रातरौसात्वतंयुधि। द्रोणायाभिमुखंयांतंशरैस्तीक्ष्णैश्चतक्षतुः। त
योस्तस्यचतद्युद्धमत्यद्भुतमिवाभवत्। सिंहस्यद्विपमुख्याभ्यांप्रभिन्नाभ्यांयथावने। राजानंतुतथांबष्ठमेकंयुद्धाभि
नंदिनं। चेदिराजः शरानस्यन्क्रुद्धोद्रोणादवारयत्। ततोंबष्ठोस्थिभेदिन्यानिरभिद्यच्छलाकया। सत्यस्कोसशरंचापं
रथाङ्गमिमुपागमत्। वार्द्धक्षेमिंतुवार्ष्णेयंकृपः शारद्वतः शरैः। अक्षुद्रः क्षुद्रकैर्बाणैः प्रत्यवारयत्। युध्यं
तौकृपवार्ष्णेयौयेपश्यंश्चित्रयोधिनौ। तेयुद्धासक्तमनसोनान्यांबुबुधिरेक्रियां। सोमदत्तिरुरुक्रराजानंमणिमंत
मतंद्रितं। पर्य्यवारयदायांतंयशोद्रोणस्यवर्द्धयन्। ससोमदत्तिस्त्वरितस्तस्येष्वसनकेतने। पुनः पताकांसूतंचछ
त्रंचापातयद्रथात्। अथायुत्यरथात्तूर्णंयूपकेतुरमित्रहा। साश्वसूतध्वजरथंतंचकर्त्तवरासिना। रथंचान्यंसमा
स्थायधनुरादायचापरं। स्वयंयच्छन्हयान्राजन्व्यधमत्पांडवीचमूं। पांड्यमिंद्रमिवायांतमसुरान्प्रतिदुर्ज्जयं। समर्थः सायकौ
घैर्वृषसेनोन्यवारयत्। गदापरिघनिस्त्रिंशपट्टिशायोधनस्तवैः। कडंगरैर्भुशुंडीभिः प्रासतोमरसायकैः। मुसलैर्मुद्ग
रैश्चक्रैर्भिंडिपालपरस्वधैः। पांशुवाताग्निसलिलैर्भस्मलोष्ठतृणद्रुमैः। आरुजन्प्ररुजन्भंजन्निघ्नन्विद्रावयन्क्षिपन्। से

नांबिभीषयन्नायाद्द्रोणप्रेप्सुर्घटोत्कचः। तंतुनानाप्रहरणैर्नानायुद्धविशेषणैः। राक्षसंराक्षसः क्रुद्धः समाजघ्नेऽलंबुषः। तयोस्त
द्भवद्युद्धंरक्षोग्रामणिमुख्ययोः। तादृग्यादृक्पुरावृत्तंशंबरामरराजयोः। एवंद्वंद्वशतान्यासन्रथवारणवाजिनां। पदातीनांचभद्रंते
तवतेषांचसंकुले। नैतादृशोदृष्टपूर्वः संग्रामोनैवचश्रुतः। द्रोणस्याभावभावेतुप्रसक्तानांयथाभवत्। इदंघोरमिदंचित्रमिदंरौद्र
मितिप्रभो। तत्रयुद्धान्यदृश्यंतप्रततानिबहूनिच॥ ॥इतिद्रोणपर्वणि॥२५॥ धृतराष्ट्रउ०॥ ॥तेष्वेवंसन्निवृत्तेषुप्रत्युद्यातेषु
भागशः। कथंयुयुधिरेपार्थामामकाश्चतरस्विनः। किमर्जुनश्चाप्यकरोत्संसप्तकबलंप्रति। संसप्तकावापार्थस्यकिमकुर्वंतसंज
य॥ ॥संजयउ०॥ ॥तथातेषुनिवृत्तेषुप्रत्युद्यातेषुभागशः। स्वयमभ्यद्रवद्भीमंनागानीकेनतेसुतः। सनागइवनागेनगो
वृषेणेवगोवृषः। समाहूतः स्वयंराज्ञानागानीकमुपाद्रवत्। सयुद्धकुशलः पार्थोबाहुवीर्येणचान्वितः। अभिनत्कुंजरानीक
मचिरेणैवमारिष। तेगजागिरिसंकाशाः क्षरंतः सर्वतोमदं। भीमसेनस्यनाराचैर्विमुखाविमदीकृताः। विधमेदभ्रजालानि
यथावायुः समुद्धतः। व्यधमत्तान्यनीकानितथैवपवनात्मजः। सतेषुविसृजन्बाणान्भीमोनागेष्वशोभत। भुवनेष्विवसर्वेषु
गभस्तीनुदितोरविः। तेभीमबाणाभिहताः संस्यूताविबभुर्गजाः। गभस्तिभिरिवार्कस्यव्योम्निनानाबलाहकाः। तथागजाना
कदनंकुर्वाणमनिलात्मजं। क्रुद्धोदुर्योधनोभ्येत्यप्रत्यविध्यच्छितैःशरैः। ततःक्षणेनक्षितिपंक्षतजप्रतिमेक्षणः। क्षयंनिनीषुर्नि

श्रितेभश्मोविव्याधपत्रिभिः। सत्वरार्पितसर्वांगः क्रुद्धोविव्याधपांडवं। नाराचैरर्करश्म्याभैर्भीमसेनंस्मयन्निव। तस्यनागं
मणिमयंरत्नचित्रध्वजेस्थितं। भल्लाभ्यांकार्मुकंचैवक्षिप्रंचिच्छेदपांडवः। दुर्योधनंपीड्यमानंदृष्ट्वाभीमेनमारिष। त्वक्षोभयिषुर
भ्यागाद्गोमातंगमास्थितः। तमापतंतंनागेंद्रमंबुदप्रतिमस्वनं। कुंभांतरेभीमसेनोनाराचेनार्दयद्दृढं। तस्यकायंविनिर्भि
द्यन्यमज्जद्धरणीतले। ततःपपातद्विरदोवज्राहतइवाचलः। तस्यावर्जितनागस्यम्लेंच्छस्याधःपतिष्यतः। शिरश्चिच्छेदभल्ले
नक्षिप्रकारीवृकोदरः। तस्मिन्निपतितेवीरेसंप्राद्रवतसाचभूः। संभ्रांताश्वद्विपरथापदातीन्प्रमृद्नती। तेष्वनीकेषुभग्नेषुवि
द्रवत्सुसमंततः। प्राग्ज्योतिषस्ततोभीमंकुंजरेणसमाद्रवत्। येननागेनमघवानजयद्दैत्यदानवान्। तेनान्वयेननागेनभी
मसेनमुपाद्रवत्। सनागप्रवरोभीमंसहसासमुपाद्रवत्। चरणाभ्यामथोद्वाभ्यांसंहतेनकरेणच। व्यावृत्तनयनःक्रुद्धःप्रम
थन्निवपांडवं। वृकोदररथंसाश्वमविशेषमचूर्णयत्। पद्भ्यांभीमोप्यथोधावंस्तस्यगात्रेष्वलीयत। जानन्नंजलिकावेधंनाप
क्रामतपांडवः। गात्राभ्यंतरगोभूत्वाकरेणाताडयन्मुहुः। लालयामासतंनागंवधकांक्षिणमव्ययं। कुलालचक्रवन्नागस्तदा
तूर्णमथाभ्रमत्। नागायुतबलःश्रीमान्कालयानोवृकोदरं। भीमोपिनिःक्रम्यततःसुप्रतीकाग्रतोभवत्। भीमंकरेणावनम्य
जानुभ्यामभ्यताडयत्। ग्रीवायांवेष्टयित्वैनंसगजोहंतुमैहत। करवेष्टंभीमसेनोभ्रमंदत्वाव्यमोचयत्। पुनर्गात्राणिनागस्य
प्रविवेशावृकोदरः। यावत्प्रतिगजायातंस्वबलस्थमवैक्षत। भीमोपिनागगात्रेभ्योविनिःसृत्यापयाज्जवात्। ततःसर्वस्यसे

द्रो०पं०
३२

न्यस्यनादः समभवन्महान्। अहोधिग्निहतोभीमः कुंजरेणेतिमारिष। तेननागेनसंत्रस्तापांडवानामनीकिनी। सहसाभ्यद्र
वद्राजन्यत्रतस्थौवृकोदरः। ततोयुधिष्ठिरोराजाहतंमत्वावृकोदरं। भगदत्तंसपांचाल्यः सर्वतः समवारयत्। तंरथैरथिनांश्रेष्ठाः
परिवार्यपरंतपाः। अवाकिरन्शरैस्तीक्ष्णैः शतशोथसहस्रशः। सविघातंपृषत्कानामंकुशेनसमाचरन्। गजेनपांडुपं
चालान्व्यधमत्पर्वतीश्वरः। तदद्भुतमपश्याम भगदत्तस्यसंयुगे। तथावृद्धस्यचरितंकुंजरेणविशांपते। ततोराजादशार्णा
नांप्राग्ज्योतिषमुपाद्रवत्। तिर्यग्यातेननागेनसमदेनाशुगामिना। तयोर्युद्धंसमभवन्नागयोर्भीमरूपयोः। सपक्षयोः
पर्वतयोर्यथासद्रुमयोः पुरा। प्राग्ज्योतिषपतेर्नागः संनिवृत्यापसृत्यच। पार्श्वेदशार्णाधिपतेर्भित्वानागमपातयत्। तो
मरैः सूर्यरश्म्याभैर्भगदत्तोथसप्तभिः। जघानद्विरदस्थंतंशत्रुंप्रचलितासनं। उपसृत्यतुराजानंभगदत्तंयुधिष्ठिरः। रथानी
केनमहतासर्वतः पर्यवारयत्। सकुंजरस्थोरथिभिः शुशुभेसर्वतोवृतः। पर्वतेवनमध्यस्थोज्वलन्निवहुताशनः। मंडलंस
र्वतः श्लिष्टंरथिनामुग्रधन्विनां। किरतांबाणवर्षाणिसनागः पर्यवर्त्तत। ततः प्राग्ज्योतिषोराजापरिगृह्यमहागजं। प्रेषया
माससहसायुयुधानरथंप्रति। शिनेः पौत्रस्यतुरथंपरिगृह्यमहाद्विपः। अभिचिक्षेपवेगेनयुयुधानस्त्वपाक्रमत्। बृहं
तः सैंधवानश्वान्समुत्थाप्याथसारथिः। तस्थौसात्यकिमासाद्यसंप्लुतस्तंरथंप्रति। सतुलब्ध्वांतरंनागस्त्वरितोरथमंड
लात्। निःश्चक्रामततः सर्वान्परिचिक्षेपपार्थिवान्। तेत्वाशुगतिनातेनत्रास्यमानानरर्षभाः। तमेकंद्विरदंसंख्येमेनिरे

राम
३२

शतशोद्विपान्।तेगजस्थेनकाल्यंतेभगदत्तेनपांडवाः।ऐरावतस्थेनयथादेवराजेनदानवाः।तेषांप्रद्रवतांभीमःपांचालाना
मितस्ततः।गजवाजिकृतःशब्दःसुमहान्समजायत।भगदत्तेनसमरेकाल्यमानेषुपांडुषु।प्राग्ज्योतिषमभिक्रुद्धःपुनर्भीमः
समभ्ययात्।तस्याभिद्रवतोवाहान्हस्तमुक्तेनवारिणा।सिक्त्वाव्यत्रासयन्नागस्तेपार्थमहरंस्ततः।ततस्तमभ्ययात्तूर्णं
रुचिपर्वाकृतीसुतः।समभ्यंघ्नरवर्षेणरथस्थोंतकसन्निभः।ततःसरुचिपर्वाणंशरेणानतपर्वणा।सुपर्वापर्वतपतिर्नि
न्येवैवस्वतक्षयं।तस्मिन्निपातितेवीरेसौभद्रोद्रौपदीसुताः।चेकितानोधृष्टकेतुर्युयुत्सुश्चार्दयन्द्विपं।तएनंशरधारा
भिर्धाराभिरिवतोयदाः।सिषिचुर्भैरवान्नादान्विनदंतोजिघांसवः।ततःपार्ष्ण्यंकुशांगुष्ठैःकृतिनाचोदितोद्विपः।प्रसा
रितकरःप्रायात्स्तब्धकर्णेक्षणोद्रुतं।सोधिष्ठायपदावाहान्युयुत्सोःसूतमारुजत्।युयुत्सुस्तुरथाद्राजन्नपाक्रामत्त्वरा
न्वितः।ततःपांडवयोधास्तेनागराजंशरैर्द्रुतं।सिषिचुर्भैरवान्नादान्विनदंतोजिघांसवः।पुत्रस्तुतवसंभ्रांतःसौभद्र
स्याप्लुतोरथं।सकुंजरस्थोविसृजन्निषूनरिषुपार्थिवः।बभौरश्मीनिवादित्योभुवनेषुसमुत्सृजन्।तमार्जुनिर्द्वादशभि
भिर्युयुत्सुर्दशभिःशरैः।त्रिभिस्त्रिभिर्द्रौपदेयाधृष्टकेतुश्चविव्यधुः।सोतियत्नार्पितैर्बाणैराचितोद्विरदोबभौ।संस्यू
तइवसूर्यस्यरश्मिभिर्जलदोमहान्।नियंतुःशिल्पयत्नाभ्यांप्रेरितोरिशरार्दितः।परिचिक्षेपतांनागःसरिपूंसव्यदक्षि
णं।गोपालइवदंडेनयथापशुगणान्वने।आवेष्टयततांसेनांभगदत्तस्तथामुहुः।क्षिप्रंसेनाभिपन्नानांवायसानामिवस्वनः।बभू

वपांडवेयानां भृत्रां विद्रवतां स्वनः। सनागराजः प्रवरांकुशाहतः पुरा सपक्षोऽद्रिवरो यथा नृप। भयं तदा रिपुषु समादधद्भृशं वणिग्जनानां
क्षुभितो यथार्णवः। ततो ध्वनिर्द्विरदरथाश्वपार्थिवैर्भयाद्द्रवद्भिर्जनितोऽतिभैरवः। क्षितिं वियद्द्यां विदिशो दिशस्तथा समावृणोत्पार्थि
वसंयुगे ततः। सतेन नागप्रवरेण पार्थिवो भृशं जगाहे द्विषतामनीकिनीं। पुरा सुगुप्तां विबुधैरिवाहवे विरोचनो देववरूथिनीमिव।
भृशं ववौ ज्वलनसमो महाभुजः समावृणोन्मुहुरपि चैव सैनिकान्। तमेकनागं गणशो यथा गजाः समंततो द्रुतमथ मेनिरे जनाः।
॥ ॥ इति द्रोणपर्वणि भगदत्तयुद्धे ॥२६॥ संजय उ० ॥ ॥ यन्मां पार्थस्य संग्रामे कर्माणि परिपृच्छसि। तच्छृणुष्व महाबाहो पार्थो यदकरोद्रणे। र
जोदृष्ट्वा समुद्भूतं श्रुत्वा च गजनिःस्वनं। भगदत्ते विकुर्वाणे कौंतेयः कृष्णमब्रवीत्। यथा प्राग्ज्योतिषो राजा गजेन मधुसूदन। त्वरमाणो
भिनिष्क्रांतो ध्रुवं तस्यैष निस्वनः। इंद्रादनवरः संख्ये गजयान विशारदः। प्रथमो गजयोधानां पृथिव्यामिति मे मतिः। स चापि द्विरदश्रे
ष्ठः सदाप्रतिगजो युधि। सर्वशस्त्रातिगः संख्ये कृतकर्मा जितक्लमः। सहः शस्त्रनिपातानामग्निस्पर्शस्य चानघ। स पांडवबलं सर्वम
द्यैको नाशयिष्यति। न चावाभ्यामृतेऽन्योऽस्ति शक्तस्तं प्रतिबाधितुं। त्वरमाणस्ततो याहि यतः प्राग्ज्योतिषाधिपः। दृप्तं संख्ये द्विपबलाद्वय
सा चापि विस्मितं। अथैनं प्रेषयिष्यामि बलहंतुः प्रियातिथिं। वचनादथ कृष्णस्तु प्रययौ सव्यसाचिनः। दीर्यते भगदत्तेन यत्र पांडववा
हिनी। तं प्रयांतं ततः पश्चादाह्वयंतो महारथाः। संसप्तकाः समारोहन्सहस्राणि चतुर्दश। दशैव तु सहस्राणि त्रिगर्तानां महारथाः। चत्वा
रि च सहस्राणि वासुदेवस्य चानुगाः। दार्यमाणां चमूं दृष्ट्वा भगदत्तेन मारिष। आहूयमानस्य च तैरभवद्धृदयं द्विधा। किन्नु श्रेयस्करं कर्म
भवेदद्येति चिंतयन्। इह वा विनिवर्तेयं गच्छेयं वा युधिष्ठिरं। तस्य बुध्या विचार्यैवमर्जुनस्य कुरूद्वह। स संन्यवर्तत सहसा कपिप्रव

रकेतनः। एकोरथः रथसहस्राणि निहंतुं वासवीरणे। याहि दुर्योधनस्यासीत्प्रीतिः कर्णस्य चोभयोः। अर्जुनस्य वधोपाये तेन दध्म भग्नं समस्तं क
ल्पयत्। सतु दोलायमानोभूद्द्वैधीभावेन पांडवः। वधे नृणां नरव्याघ्राणामकरोत्तां मृषां तदा। ततः शतसहस्राणि शराणां नतपर्वणां। असृज
न्नर्जुने राजन्नक्षं समकं महारथाः। नैव कुंतीसुतः पार्थो नैव कश्चिज्जनार्दनः। न हयान रथो राजन्दृश्यंते स्म शरैश्चिताः। तदा मोहमनुप्राप्तः
सदेवो वेजनार्दनः। ततस्तान्प्रायशः पार्थो ब्रह्मास्त्रेण निजघ्निवान्। शतशः शाः पाणयः छिन्नाः सेषुज्यातलकार्मुकाः। केतवो वाजिनः सूता
रथिनश्चापतन्क्षितौ। द्रुमाचलाग्रांबुधरैः समकायाः स्वकल्पिताः। हतारोहाः क्षितौ पेतुर्द्विपाः पार्थशराहताः। विप्रविद्धकुथा नागाः छि
न्नभांडाः परासवः। सारोहाः स्फुरणे पेतुर्मथिता मार्गणैर्भृशं। सद्ध्विशालासिनखराः समुद्गरपरश्वधाः। विछिन्ना बाहवः पेतुर्नृणां भल्लैः कि
रीटिना। बालादित्यांबुजेंदूनां तुल्यरूपाणि मारिष। संछिन्नान्यर्जुनशरैः शिरांस्युर्व्यां प्रपेदिरे। अज्वालालंकृता सेनापत्रिभिः प्राणिभोजनैः।
नानारूपैस्तदामित्रान्क्रुद्धे निघ्नति फाल्गुने। क्षोभयंतं तदा सेनां द्विरदो नलिनीमिव। धनंजयं भूतगणाः साधु साध्वित्यपूजयन्। दृष्ट्वा तत्कर्म
पार्थस्य वासवस्येव माधवः। विस्मयं परमं गत्वा प्रांजलिस्तमुवाच ह। कर्मैतत्पार्थ शक्रेण यमेन धनदेन च। दुष्करं समरे यत्ते कृतमद्येति मे मतिः।
युगपच्चैव संग्रामे शतशोथ सहस्रशः। पतितास्त्वमे दृष्टाः संसप्तकमहारथाः। संसप्तकान्हतो हत्वा भूयिष्ठं ये व्यवस्थिताः। भगदत्ताय याहीति
कृष्णं पार्थोभ्यनोदयत्॥ ॥इति द्रोणपर्वणि॥२७॥ संजय उवाच॥ यियासतस्ततः कृष्णः पार्थस्याश्वान्मनोजवान्। संप्रैषीद्धेमसंछन्नान्द्रोणानी
कायं प्रति त्वरन्। तं प्रयांतं कुरुश्रेष्ठं स्वांस्त्रातुं द्रोणतापितान्। सुशर्मा भ्रातृभिः सार्द्धं युद्धार्थी पृष्ठतोन्वयात्। ततः श्वेतहयः कृष्णमब्रवीदजि
तंजयः। एष मां भ्रातृभिः सार्द्धं सुशर्मा ह्वयतेच्युत। दीर्यते चोत्तरेणैव तत्सैन्यं मधुसूदन। द्वैधीभूतं मनो मे घ कृतं संसप्तकैरिदं। किं नु संसप्त
कान्हन्मि स्वान्नरक्षाम्यहितार्दितान्। इति मे त्वं मतं वेत्सि तत्र किं सुकृतं भवेत्। एवमुक्तस्तु दाशार्हः स्यंदनं प्रत्यनोदयत्। येन त्रिगर्ताधिपतिः
पांडवं समुपाह्वयत्। ततोर्जुनः सुशर्माणं विद्ध्वा सप्तभिराशुगैः। ध्वजं धनुश्चास्य तथा क्षुराभ्यां समकृंतत। त्रिगर्ताधिपतेश्चापि भ्रातरं षड्भि

राशुगैः। साश्वं ससूतं त्वरितः पार्थः प्रैषीद्यमक्षयं। ततो भुजगसंकाशांस्त्रीशर्मा शक्तिमायसीं। चिक्षेप फल्गुनमादित्य वासुदेवाय तोमरं। शक्तिं त्रिभिः
शरैश्छित्वा तोमरं त्रिभिरर्जुनः। स्कन्दामाणि शरव्रातैर्मोहिषी तान्यवर्त्तयत्। तं वासवमिवायांतं भूरिवर्षं शरौघिणं। राजंस्तावकसैन्यानां नोग्रः क-
श्चिद्वारयत्। ततो धनंजयो बाणैः सर्वानेव महारथान्। आयाद्विनिघ्नन्कौरव्यान्दहन्कक्षमिवानलः। तस्य वेगमसह्यं तं कुंतीपुत्रस्य धीमतः।
नाशक्नुवंस्ते संसोढुं स्पर्शमग्नेरिव प्रजाः। संवेष्टयन्ननीकानि शरवर्षेण पांडवः। सुपर्णपातवद्राजन्नायात्प्राग्ज्योतिषं प्रति। यत्तदा नामयज्जि-
ष्णुर्भरतानामपापिनां। धनुः क्षेमकरं संख्ये द्विषतामश्रुवर्द्धनं। तदेव तव पुत्रस्य राजन्दुर्द्यूतदेविनः। कृतं क्षत्रविनाशाय धनुरायच्छदर्जुनः। तथा
विक्षोभ्यमाणा सा पार्थेन तव वाहिनी। व्यशीर्यत महाराज नौरिवासाद्य पर्वतं। ततो दशसहस्राणि न्यवर्त्तंत धनुष्मतां। मतिं कृत्वा रणे शूरा वा राज
यपराजये। व्यपेतहृदयत्रासा आपद्धर्मातिगा रथीः। आर्छत्पार्थो गुरुं भारं सर्वभारसहो युधि। यथा नल्वनं क्रुद्धः प्रभिन्नः षष्टिहायनः। मृद्नीया-
न्महाद्विपस्तद्वत्पार्थो मृद्नाच्चमूं तव। तस्मिन्प्रमथिते सैन्ये भगदत्तो नराधिपः। तेन नागेन सहसा धनंजयमुपाद्रवत्। तं रथेन नरव्याघ्रः प्रत्यगृह्णाद्धनंजयः।
स सन्निपातस्तुमुलो बभूव रथनागयोः। कल्पिताभ्यां यथाशास्त्रं रथेन च गजेन च। संग्रामे चेरतुर्वीरौ भगदत्तधनंजयौ। ततो जीमूतसंकाशान्नागा-
दिंद्र इव प्रभुः। अभ्यवर्षच्छरौघेण भगदत्तो धनंजयं। स चापि शरवर्षं तच्छरवर्षेण वासविः। अप्राप्तमेव चिच्छेद भगदत्तस्य वीर्यवान्। ततः प्राग्ज्योतिषो
राजा शरवर्षं निवार्य तत्। शरैर्जघ्ने महाबाहुं पार्थं कृष्णं च मारिष। ततस्तु शरजालेन महताभ्यवकीर्य तौ। चोदयामास तं नागं वधायाच्युतपार्थयोः।
तमापतंतं द्विरदं दृष्ट्वा क्रुद्धमिवांतकं। चक्रेऽपसव्यं त्वरितः स्यंदनेन जनार्दनः। तं प्राप्तमपि नेयेष परावृत्तं महाद्विपं। सारोहं मृत्युसात्कर्तुं स्मरन्धर्मं
धनंजयः। स तु नागो द्विपरथान्हयांश्चारुज्य मारिष। प्राहिणोन्मृत्युलोकाय ततः क्रुद्धो धनंजयः॥ ॥इति महाभारते द्रोणपर्वणि॥ २८॥ धृतराष्ट्रः॥
तथा क्रुद्धः किमकरोद्भगदत्तस्य पांडवः। प्राग्ज्योतिषो वा पार्थस्य तन्मे शंस यथातथं॥ ॥संजयः॥ ॥प्राग्ज्योतिषेण संसक्तावुभौ दाशार्हपांडवौ। मृ-
त्योर्दंष्ट्रांतिकं प्राप्तौ सर्वभूतानि मेनिरे। तथा तु शरवर्षाणि पातयत्यनिशं प्रभो। गजस्कंधान्महाराज कृष्णयोः स्यंदनस्थयोः। अथ कार्ष्णायसैः

वर्णैः पूर्णकार्मुकनिःसृतैः। अवध्यद्देवकीपुत्रं हेमपुंखैः शिलाशितैः। अग्निस्पर्शसमाकीर्णा भगदत्तेन नोदिताः। निर्भिद्य देवकीपुत्रं क्षि-
तिं जग्मुः सुवाससः। तस्य पार्थो धनुश्छित्वा परिवारं निहत्य च। लालयन्निव राजानं भगदत्तमयोधयत्। सोर्करश्मिनिभांस्तीक्ष्णांस्तोम-
रान्वै चतुर्दश। प्रेरयन्सव्यसाची तु द्विधैकैकमथाछिनत्। ततो नागस्य तद्वर्म व्यधमत्पाकशासनिः। शरजालेन महता तद्व्यशीर्यत भूतले।
शीर्णवर्मा स तु गजः शरैः सुभृशमर्दितः। बभौ धारानिपाताक्तो व्यभ्रः पर्वतराडिव। ततः प्राग्ज्योतिषः शक्तिं हेमदंडामयस्मयीं। व्यसृजद्वासु-
देवाय द्विधा तामर्जुनोछिनत्। ततश्छत्रं ध्वजं चैव छित्वा राज्ञोर्जुनः शरैः। विव्याध दशभिस्तूर्णमुत्स्मयन्पर्वतेश्वरं। सोतिविद्धोर्जुनशरैः सु-
पुंखैः कंकपत्रिभिः। भगदत्तस्ततः क्रुद्धः पांडवस्य जनाधिपः। व्यसृजत्तोमरान्मूर्ध्नि श्वेताश्वस्योन्ननाद च। तैरर्जुनस्य समरे किरीटं परिवर्तितं।
परिवर्तितं किरीटं तद्यमयन्नेव पांडवः। सुदृष्टः क्रियतां लोक इति राजानमब्रवीत्। एवमुक्तस्तु संक्रुद्धः शरवर्षेण पांडवं। अभ्यवर्षत्सगोविंदं
धनुरादाय भास्वरं। तस्य पार्थो धनुश्छित्वा तूणीरान्संनिकृत्य च। त्वरमाणो द्विसप्तत्या सर्वमर्मस्वताडयत्। विद्धस्तथाप्यतिव्यथितो वैष्णवास्त्रमुदी-
रयन्। अभिमंत्र्यांकुशं क्रुद्धो व्यसृजत्पांडवोरसि। विसृष्टं भगदत्तेन तदस्त्रं सर्वघाति वै। उरसा प्रतिजग्राह पार्थं संछाद्य केशवः। वैजयंत्यभव-
न्माला तदस्त्रं केशवोरसि। ततोर्जुनः क्लांतमनाः केशवं प्रत्यभाषत। अयुध्यमानस्तुरगान्संयंतास्मीति चानघ। इत्युक्त्वा पुंडरीकाक्ष प्रतिज्ञां
स्वां न रक्षसि। यद्यहं व्यसनी वा स्यामशक्तो वा निवारणे। ततस्त्वयैवं कार्यं स्यान्न तत्कार्यं मयि स्थिते। सबाणः सधनुश्चाहं ससुरासुरमानुषान्
शक्तो लोकानिमान्जेतुं तच्चापि विदितं तव। ततोर्जुनं वासुदेवः प्रत्युवाचार्थवद्वचः। शृणु गुह्यमिदं पार्थ पुरा वृत्तं यथानघ। चतुर्मूर्तिरहं शश्वल्लो-
कत्राणार्थमुद्यतः। आत्मानं प्रविभज्येह लोकानां हितमादधे। एका मूर्तिस्तपश्चर्यां कुरुते मे भुवि स्थिता। अपरा पश्यति जगत्कुर्वाणं साध्व-
साधुनी। अपरा कुरुते कर्म मानुषं लोकमाश्रिता। शेते चतुर्थी त्वपरा निद्रां वर्षसहस्रिकां। यासौ वर्षसहस्रांते मूर्तिरुत्तिष्ठते मम। वरा

र्भ्योवरान्क्लिष्टास्तस्मिन्कालेददातिसा। तंतुकालमनुप्राप्तंविदित्वापृथिवीतदा। अयाचतवरंयन्मांनरकार्थायतच्छृणु। देवानांदान
वानांचअवध्यस्तनयोस्तुमे। उपेतोवैष्णवास्त्रेणतन्मेत्वंदातुमर्हसि। एवंवरमहंश्रुत्वाजगत्यास्तनयेतदा। अमोघमस्त्रंप्रायच्छंवैष्ण
वंपरमंपुरा। अवोचंचैतदस्त्रंवैह्यमोघंभवतुक्षमे। नरकस्याभिरक्षार्थंनैनंकश्चिद्वधिष्यति। अनेनास्त्रेणतेगुप्तः सुतःपरबल
र्दनः। भविष्यतिदुराधर्षःसर्वलोकेषुसर्वदा। तथेत्युक्त्वातदादेवी कृतकामामनस्विनी। सचाप्यासीद्दुराधर्षोनरकःशत्रुताप
नः। तस्मात्प्राग्ज्योतिषंप्राप्तंतदस्त्रंपार्थमामकं। नास्यावध्योस्तिलोकेषुसेंद्ररुद्रेषुमारिष। तन्मयात्वत्कृतेनैतदन्यथाव्यपनो
पितं। विमुक्तंपरमास्त्रेणजहिपार्थमहासुरं। वैरिणंजहिदुर्धर्षंभगदत्तंसुरद्विषं। यथाहंजघ्निवान्पूर्वंहितार्थंनरकंतथा। ए
मुक्तस्तदापार्थःकेशवेनमहात्मना। भगदत्तंशितैर्बाणैःसहसासमवाकिरत्। ततःपार्थोमहाबाहुरसंभ्रांतोमहामनाः। कुं
भयोरंतरेनागंनाराचेनसमार्पयत्। ससमासाद्यतंनागंबाणोवज्रइवाचलं। अभ्यगात्सहपुंखेनवल्मीकइवपन्नगः। सकरीभ
गदत्तेनप्रेर्यमाणोमुहुर्मुहुः। नकरोतिवचस्तस्यदरिद्रस्येवयोषिता। सतुविष्टभ्यगात्राणिदंताभ्यामवनिंययौ। नदन्नार्तस्वरं
प्राणानुत्ससर्जमहाद्विपः। ततश्चंद्रार्धबिंबेनबाणेननतपर्वणा। बिभेदहृदयंराज्ञोभगदत्तस्यपांडवः। सभिन्नहृदयोराजाभ
गदत्तःकिरीटिना। शरासनंशरांश्चैवगतासुःप्रमुमोचह। शिरसस्तस्यविभ्रष्टंपपातचवरांशुकं। नालताडनविभ्रष्टंपला
शंनलिनादिव। सहेममालीतपनीयभांडात्पपातनागाद्गिरिसन्निकाशात्। सुपुष्पितोमारुतवेगरुग्णोमहीधराग्रादिव
कर्णिकारः। निहत्यतंनरपतिमिंद्रविक्रमंसखायमिंद्रस्यतदैंद्रिराहवे। ततोपरांस्तवजयकांक्षिणोनरान्बभंजवायुर्बलवान्

द्रुमानिव॥ ॥इति द्रोणपर्वणि भगदत्तवधः॥२७॥ संजय उ०॥ ॥प्रियमिंद्रस्य सततं सखायममितौजसं। हत्वा प्राग्ज्योतिषं पार्थः
प्रदक्षिणमवर्त्तत। ततो गांधारराजस्य सुतौ परपुरंजयौ। अर्द्देतामर्जुनं संख्ये भ्रातरौ वृषकाचलौ। तौ समेत्यार्जुनं वीरौ पुरः पश्चाच्च
धन्विनौ। अविध्येतां महावेगैर्निशितैराशुगैर्भृशं। वृषकस्य हयान्हत धनुश्छत्रं रथं ध्वजं। तिलशो व्यधमत्पार्थः सौबलस्य शितैः
शरैः। ततोर्जुनः शरव्रातैर्नानाप्रहरणायुधैः। गांधारानकुलांश्चक्रे सौबलप्रमुखान्पुनः। ततः पंचशतान्वीरान्गांधारानुद्यतायु
धान्। प्राहिणोन्मृत्युलोकाय क्रुद्धो बाणैर्धनंजयः। हताश्वात्तु रथात्तूर्णमवतीर्य महाभुजः। आरुरोह रथं भ्रातुरन्यच्च धनुराददे।
तावेकरथमारूढौ भ्रातरौ वृषकाचलौ। शरवर्षेण बीभत्सुमविध्येतां मुहुर्मुहुः। स्यालौ तव महात्मानौ राजानौ वृषकाचलौ। भृ
शं विजघ्नतुः पार्थमिंद्रं वृत्रबलाविव। लब्धलक्ष्यौ तु गांधारावहतां पांडवं पुनः। निदाघवार्षिकौ मासौ लोकं घर्मांबुभिर्यथा।
तौ रथस्थौ नरव्याघ्रौ राजानौ वृषकाचलौ। संश्लिष्टांगौ स्थितौ राजन्जघानैकेषुणार्जुनः। तौ रथात्सिंहसंकाशौ लोहिताक्षौ महा
भुजौ। गतासू पेततुर्वीरौ सोदरावेकलक्षणौ। तयोर्भूमिं गतौ देहौ रथाद्बंधुजनप्रियौ। यशो दश दिशः पुण्यं गमयित्वा व्यवस्थितौ।
दृष्ट्वा विनिहतौ संख्ये मातुलावपलायिनौ। भृशं मुमुचुरस्राणि पुत्रास्तव विशांपते। निहतौ भ्रातरौ दृष्ट्वा मायावातविशारदः
कृष्णौ संमोहयन्मायां विदधे शकुनिस्ततः। लगुडायोगुडाश्मानः शतघ्न्यश्च सशक्तयः। गदापरिघनिस्त्रिंशशूलमुद्गरपट्टिशाः।
सकंपनर्ष्टिनखरमुशलानि परश्वधाः। क्षुराः क्षुरप्रनालीकावत्सदंतास्थिसंधयः। चक्राणि विशिखाः प्रासा विविधान्यायुधा
नि च। प्रपेतुः शतशो दिग्भ्यः प्रदिग्भ्यश्चार्जुनं प्रति। खरोष्ट्रमहिषाः सिंहा व्याघ्राः सृमरविक्रमाः। ऋक्षाः शालावृकागृध्राः कप

द्रो०प०
३७

यक्षस्सरीसृपाः।विविधानिचरक्षांसिक्षुधितान्यर्जुनंप्रति।संक्रुद्धान्यभ्यधावंतविविधानिवयांसिच।ततोदिव्यास्त्रविदुरःकुंतीपुत्रोधनं
जयः।विसृजन्निषुजालानिसहसातान्यताडयत्।तेहन्यमानाःशूरेणप्रवरैःसायकैर्दृढैः।विरुवंतोमहारावंविनेशुःसर्वतोमुखं।
ततस्तमःप्रादुरभूदर्जुनस्यरथंप्रति।तस्माच्चतमसोवाचःक्रूराःपार्थमभर्त्सयन्।तच्चमोभैरवंघोरंभयकर्त्तृमहाहवे।उत्तमास्त्रे
णमहताज्योतिषेणार्जुनोवधीत्।हतेतस्मिन्जलौघास्तुप्रादुरासन्भयानकाः।अंभसस्तस्यनाशार्थमादित्यास्त्रमथार्जुनः।प्रा
युंक्तांभस्ततस्तेनप्रायशोस्त्रेणशोषितं।एवंबहुविधामायाःसौबलस्यकृताःकृताः।जघानास्त्रबलेनाशुप्रहसन्नर्जुनस्तदा।तदा
हतासुमायासुत्रस्तोर्जुनशराहतः।अपायाज्जवनैरश्वैःशकुनिःप्राकृतोयथा।ततोर्जुनोस्त्रविच्छ्रेष्ठ्यंदर्शयिन्नात्मनोरिषु।अभ्य
वर्षच्छरौघेणकौरवाणामनीकिनीं।साहन्यमानापार्थेनतवपुत्रस्यवाहिनी।द्वैधीभूतामहाराजगंगेवासाद्यपर्वतं।द्रोणमेवा
न्वपद्यंतकेचित्तत्रनरर्षभाः।केचिद्दुर्योधनंराजन्नर्द्यमानाःकिरीटिना।नापश्यामततःसैन्यंसैन्येवैरजसावृते।गांडीवस्यच
निर्घोषःश्रुतोदक्षिणतोमया।शंखदुंदुभिनिर्घोषंवादित्राणांचनिःस्वनं।गांडीवस्यतुनिर्घोषोव्यतिक्रम्यास्पृशद्दिवं।ततःपुन
र्दक्षिणतःसंग्रामाश्चित्रधन्विनां।सुयुद्धंचार्जुनस्यासीदहंतुद्रोणमन्वयां।योधिष्ठिराण्यनीकानिप्रहरंतितनस्ततः।नानावि
धान्यनीकानिपुत्राणांतवभारत।अर्जुनोव्यधमत्कालेदिवीवाभ्राणिमारुतः।तंवासवमिवायांतंभूरिवर्षशरौघिणं।महेष्वासा
नरव्याघ्रानोग्रकेचिदवारयन्।तेहन्यमानाःपार्थेनत्वदीयाव्यथिताभृशं।स्वानेवबहवोजघ्नुर्विद्रवंतस्ततस्ततः।तेर्जुनेन
शरामुक्ताःकंकपत्रास्तनुच्छिदः।शलभाइवसंपेतुःसंवृण्वानादिशोदश।तुरंगरथिनंनागंपदातिमपिमारिष।विनिर्भिद्यक्षि

राम
३७

त्तिंजग्मुर्वल्मीकमिवपन्नगाः। नचद्वितीयंव्यंसृजत्कुंजराश्वनरेषुसः। पृथगेकशरारुग्णा। निपेतुस्तेगतासवः। हतैर्मनुष्यैर्द्विरदैश्वस
र्वतः शराभिसृष्टैश्चहयैर्निपातितैः। तदाश्वगोमायुबलाभिनादितंविचित्रमायोधनशिरोबभूवह। पितासकृतंस्यजनिस्कृह्वदरंसहात्थै
र्वपुत्रंपितरंशरातुरः। स्वरक्षणेकृतमतयस्तदाजनास्त्यजंतिवाहानपिपार्थपीडिताः॥ ॥इतिद्रोणपर्वणि॥२०॥ धृतराष्ट्रः॥ ॥
तेष्वनीकेषुभग्नेषुपांडुपुत्रेणसंजय। चलितानांद्रुतानांचकथमासीन्मनोजवः। अनीकानांप्रभग्नानामवस्थानमपश्यतां। दुष्क
रंप्रतिसंधानंतन्ममाचक्ष्वसंजय॥ ॥संजयउ॥ ॥तथापितवपुत्रस्यप्रियकामाविशांपते। यशःप्रवीरालोकेषुरक्षंतोद्रोण
मन्वयुः। समुद्यतेषुचास्त्रेषुसंभ्रांतेचयुधिष्ठिरे। अकुर्वन्नार्यकर्माणिभैरवेसत्यभीतवत्। अंतरंभीमसेनस्यप्रापतन्नामितौ
जसः। सात्यकेश्चैववीरस्यधृष्टद्युम्नस्यवाविभो। द्रोणंद्रोणमितिक्रूराः पांचालाः समनोदयन्। माद्रोणमितिपुत्रास्तेकुरून्सर्वा
ननोदयन्। द्रोणंद्रोणमितित्वेकेमाद्रोणमितिचापरे। कुरूणांपांडवानांचद्रोणद्यूतमवर्तत। यंयंप्रमथतेद्रोणः पांचालानांरथव्र
जं। तत्रतत्रतुपांचाल्योधृष्टद्युम्नोभ्यवर्तत। तथाभागविपर्यासेसंग्रामेभैरवेसति। वीराः समासदन्वीराननगर्छन्भीरवः परान्।
अकंपनीयाः शत्रूणांबभूवुस्तत्रपांडवाः। अकंपयंस्त्वनीकानिसारंतः क्लेशमात्मनः। तेन्वमर्षवशंप्राप्ताह्रीमंतः सत्वनोदिताः।
त्यक्त्वाप्राणान्न्यवर्तंतघ्नंतंद्रोणंमहाहवे। आयसामिवसंपातः शिष्टानामिवचाभवत्। दीव्यतांतुमुलेयुद्धेप्राणैरमिततेजसां। न
तुस्मरंतिसंग्राममपिवृद्धास्तथाविधं। दृष्टपूर्वंमहाराजश्रुतपूर्वमथापिवा। प्राकंपतेवपृथिवीतस्मिन्वीरावसादने। निवर्तता
बलौघेनमहताभारपीडिना। घूर्णतोपिबलौघस्यदिवंस्तब्ध्वेवनिस्वनः। अजातशत्रोस्तत्सैन्यमाविवेशास्कृभैरवः। समासाद्य

तु पांडूनामनीकानि सहस्रशः । द्रोणेन चरता संख्ये प्रभग्नानि शितैः शरैः । ते वध्यमाना द्रोणेनाद्भुतकर्मणा । पर्यवारयसोदोध
द्रोणं सैनापतिं स्वयं । तदद्भुतमभूद्युद्धं द्रोणपांचालयोस्तदा । नैव तस्योपमा कांचिदिति मे निश्चिता मतिः । ततो नीलोऽनलप्रख्यो ददाह
कुरुवाहिनीं । शरस्फुलिंगश्चापार्चिर्दहन्कक्षमिवानलः । तं दहंतमनीकानि द्रोणपुत्रः प्रतापवान् । पूर्वाभिभाषी श्लक्ष्णया स्मयमा
नोऽभ्यभाषत । नील किं बहुभिर्दग्धैस्तव योधैः शरार्चिषा । मयैकेन हि युध्यस्व क्रुद्धः प्रहर चाशु मां । तं पद्मनिकराकारं पद्मपत्रनिभेक्षणं ।
व्याकोशपद्माभमुखो नीलो विव्याध सायकैः । तेनातिविद्धः सहसा द्रौणिर्भल्लैः शितैस्त्रिभिः । धनुर्ध्वजं च छत्रं च द्विषतः समकृंतत । स
प्लुतः स्यंदनात्तस्मान्नीलश्चर्मवरासिभृत् । द्रौणायनेः शिरः कायाद्धर्तुमैच्छत्पतत्रिवत् । तस्योन्नतांसं सुनसं शिरः कायात्सकुंडलं । भल्ले
नापाहरद्द्रौणिः स्मयमान इवानघ । संपूर्णचंद्राभमुखः पद्मपत्रनिभेक्षणः । प्रांशुरुत्पलपत्राभो निहतोऽन्यपतद्भुवि । ततः प्रविव्यथे से
ना पांडवी भृशमाकुला । आचार्यपुत्रेण हते नीले ज्वलिततेजसि । अचिंतयंश्च ते सर्वे पांडवानां महारथाः । कथं नो वासविस्त्रायाः
च्छत्रुभ्य इव मारिष । दक्षिणेन तु सेनायाः कुर्वन्कदनं बली । संसप्तकावशेषस्य नारायणबलस्य च ॥ ॥ इति द्रोणपर्वणि नीलव
धः ॥ ३१ ॥ संजय उ० ॥ ॥ प्रतिघातं तु सैन्यस्य नामृष्यत वृकोदरः । सोऽभ्याहनद्गुरुं षष्ट्या कर्णं च दशभिः शरैः । तस्य द्रोणः शितैर्बा
णैस्तीक्ष्णधारैरजिह्मगैः । जीवितांतमभिप्रेप्सुर्मर्मण्याशु जघान ह । आनंतर्यमभिप्रेप्सुः षड्विंशत्या समार्पयत् । कर्णो द्वादश
भिर्बाणैरश्वत्थामा च सप्तभिः । षड्भिर्दुर्योधनो राजा तत एनमथाकिरत् । भीमसेनोऽपि तान्सर्वान्प्रत्यविध्यन्महाबलः । द्रोणं पं
चाशता कर्णं च दशभिः शरैः । दुर्योधनं द्वादशभिर्द्रौणिमष्टाभिराशुगैः । आरावं तुमुलं कुर्वन्नभ्यवर्तत तान्रणे । तस्मिन्सं
त्यजति प्राणान्मृत्युसाधारणीकृते । अजातशत्रुस्तान्योधान्भीमं त्रातेत्यनोदयत् । ते ययुर्भीमसेनस्य समीपममितौजसः ।

युयुधानप्रभृतयोमाद्रीपुत्रौचपांडवौ। तेसमेत्यस्मसंरब्धाःसहिताःपुरुषर्षभाः। महेष्वासवरैर्गुप्ताद्रोणानीकंबिभित्सवः। समापेतु
र्महावीर्याभीमप्रभृतयोरथाः। तान्प्रत्यगृह्णादव्यग्रोद्रोणोपिरथिनांवरः। महारथानतिबलान्वीरान्समरयोधिनः। बाह्यंमृत्युभयंत्य
क्त्वातावकाःपांडवान्ययुः। सादिनःसादिनोभ्येत्यतथैवरथिनोरथान्। आसीच्छक्त्यसिसंपातोयुद्धमासीत्परश्वधैः। प्रकृष्टमसियु
द्धंचबभूवकटुकोदयं। कुंजराणांचसंश्लिष्टंयुद्धमासीत्सुदारुणं। अपतत्कुंजरादन्योहयादन्यस्त्ववाक्शिराः। नरोबाणेनविनिर्भिन्नो
रथादन्यश्चमारिष। तत्रान्यस्यचसंमर्देपतितस्यविवर्मणः। शिरःप्रध्वंसयामासवक्षस्याक्रम्यकुंजरः। अपरांश्चापरेमृद्नन्वार
णाःपतितान्नरान्। विषाणैश्चावनिंगत्वाव्यभिंदन्रथिनोबहून्। नरांत्रैःकेचिदपरेविषाणालग्नसंस्रवैः। बभ्रमुःसमरेनागा
मृद्नंतःशतशोनरान्। कार्ष्णायसतनुत्राणान्नराश्वरथकुंजरान्। पतितान्पोथयांचक्रुर्द्विपाःस्थूलनलानिव। गृध्रपत्राधिवासांसि
शयनानिनराधिपाः। ह्रीमंतःकालसंपक्वाःसुदुःखान्यनुशेरते। हंतिस्मात्रपितापुत्रंरथेनाभ्येत्यसंयुगे। पुत्रश्चपितरंमोहान्नि
र्मर्यादमवर्त्तत। रथोभग्नोध्वजश्छिन्नश्छत्रमुर्व्यांनिपातितं। युगार्द्धंछिन्नमादायप्रदुद्रावतथाहयः। सासिर्बाहुर्निपतितःशि
रश्छिन्नंसकुंडलं। गजेनाक्षिप्यबलिनारथःसंचूर्णितःक्षितौ। रथिनाताडितोनागोनाराचेनापतत्क्षितौ। सारोहश्चापतद्वाजी
गजेनाभ्याहतोभृशं। निर्मर्यादंमहद्युद्धमवर्त्तत सुदारुणं। हातातहापुत्रसखेक्वासितिष्ठक्वधावसि। प्रहराहरजह्येनंस्मित
क्ष्वेडितगर्जितैः। इत्येवमुच्चरंतिस्मश्रूयंतेविविधागिरः। नरस्याश्वस्यनागस्यसमसज्जतशोणितं। उपाशाम्यद्रजोभौमंभी
रून्कश्मलमाविशत्। चक्रेणचक्रमासाद्यवीरोवीरस्यसंयुगे। अतीतेष्वपथेकालेजहारगदयाशिरः। आसीत्केशापरामर्शो

मुष्टियुद्धं च दारुणं। नरैवेदं तैश्च शूराणामद्दीपे द्वीपमिच्छतां। तत्राछिद्यत शूरस्य सखड्गो बाहुरुद्यतः। सधनुश्चापरस्यापि सशरः सांकु
शस्तथा। आक्रोशदन्यमन्योत्र तथान्यो विमुखोद्रवत्। अन्यः प्राप्तस्य चान्यस्य शिरः कायादपाहरत्। सशब्दमद्रवच्चान्यः श
ब्दादन्योत्र संत्रसत्। स्वानन्योप्यपरानन्यो जघान निशितैः शरैः। गिरिशृंगोपमश्चात्र नाराचेन निपातितः। मातंगोन्यपतत्कृ
त्तो नदीरोध इवोष्णगे। तथैव रथिनो नागः क्षरन्गिरिरिवारुजन्। अभ्यतिष्ठत्सदा भूमिं सहाश्वं सह सारथिं। शूरान्प्रहरतो दृ
ष्ट्वा कृतास्त्रान्रुधिरोक्षितान्। बहूनन्यान्विशन्मोहो भीरून्हृदयदुर्बलान्। सर्वमाविग्नमभवन्न प्राज्ञायत किंचन। सैन्येन
रजसा ध्वस्तं निर्मर्यादमवर्त्तत। ततः सेनापतिः शीघ्रमयं काल इति ब्रुवन्। नित्याभित्वरितानेव त्वरयामास पांडवान्। कुर्वंतः शा
सनं तस्य पांडवा बाहुशालिनः। सरो हंसा इवापेतुर्घ्नंतो द्रोणरथं प्रति। गृह्णीताद्रवतान्योन्यं बिभीता विनिकृंतत। इत्यासीत्तु
मुलः शब्दो दुर्द्धर्षस्य रथं प्रति। ततो द्रोणः कृपः कर्णो द्रौणी राजा जयद्रथः। विंदानुविंदावावंत्यौ शल्यश्चैतान्यवारयत्। ते त्वार्य
धर्मसंरब्धा दुर्निवारा दुरासदाः। शरार्त्ता न जहुर्द्रोणं पांचालाः पांडवैः सह। ततो द्रोणोतिसंक्रुद्धो विसृजन्शतशः शरान्। चेदि
पांचालपांडूनामकरोत्कदनं महत्। तस्य ज्यातलनिर्घोषः शुश्रुवे दिक्षु मारिष। वज्रसंह्रादसंकाशस्त्रासयन्मानवान्बहून्।
एतस्मिन्नंतरे जिष्णुर्जित्वा संसप्तकान्बहून्। अभ्ययात्तत्र यत्रासौ द्रोणः पांडून्प्रमर्द्दति। तान्शरौघान्महावर्त्तान्शोणितो
दान्महाह्रदान्। तीर्णः संसप्तकान्हत्वा प्रत्यदृश्यत फाल्गुनः। तस्य कीर्तिमतो लक्ष्म सूर्यप्रतिमतेजसः। दीप्यमानमप

श्यामं तेजसा वानरध्वजं। सं सप्तकसमुद्दं तमुष्णोष्यास्त्रगभस्तिभिः। स पांडवयुगांतार्कः कुरूनप्यभ्यतापयत्। प्रददाह कुरून्सर्वानर्जुनः शस्त्रतेजसा।
युगांते सर्वभूतानि धूमकेतुरिवोत्थितः। तेन बाणसहस्रौघैर्गजाश्वरथ[illegible]नः। ताड्यमानाः क्षितिं जग्मुर्मुक्तकेशाः शरार्दिताः। केचिदार्तस्वनं च
क्रुर्विनेशुरपरे पुनः। पार्थबाणहताः केचिन्निपेतुर्विगतासवः। तेषामुत्पतितान्कांश्चित्पतितांश्च पराङ्मुखान्। न जघानार्जुनो योधान्योधव्रतमनुस्म
रन्। ते विकीर्णरथाश्छिन्नाः प्रायशश्च पराङ्मुखाः। कुरवः कर्णकर्णेति हाहेति च विचुक्रुशुः। तमाधिरथिराक्रंदं विज्ञाय शरणैषिणां। माभैष्टे
ति प्रतिश्रुत्य ययावभिमुखोऽर्जुनं। स भारतरथश्रेष्ठः सर्वभारतहर्षणः। प्रादुश्चक्रे तदाग्नेयमस्त्रमस्त्रविदां वरः। तस्य दीप्तशरौघस्य दीप्तचापधरस्य
च। शरौघान्शरजालेन विव्याध च धनंजयः। तथैवाधिरथिस्तस्य बाणान्ज्वलिततेजसः। अस्त्रमस्त्रेण संवार्य प्राणदद्विसृजञ्छरान्। धृष्टद्युम्नश्च
भीमश्च सात्यकिश्च महारथः। विव्यधुः कर्णमासाद्य त्रिभिस्त्रिभिरजिह्मगैः। अर्जुनास्त्रं तु राधेयः संवार्य शरवृष्टिभिः। तेषां त्रयाणां चापानि चिच्छेद वि
शिखैस्त्रिभिः। ते निकृत्तायुधाः शूरा निर्विषा भुजगा इव। रथशक्तीः समुत्क्षिप्य भृशं सिंहा इवानदन्। ता भुजाग्रैर्महावेगा निसृष्टा भुजगोपमाः
दीप्यमाना महाशक्त्यो जग्मुराधिरथिं प्रति। ता निकृत्य शरव्रातैस्त्रिभिस्त्रिभिरजिह्मगैः। ननाद भगवान्कर्णः पार्थाय विसृजञ्छरान्। अर्जुनश्चापि
राधेयं विद्ध्वा सप्तभिराशुगैः। कर्णादवरजं बाणैर्जघान निशितैः शरैः। ततः शत्रुंजयं हत्वा पार्थः षड्भिरजिह्मगैः। जहार [illegible] सद्यो भल्लेन विपाठस्य
शिरो रथात्। पश्यतां धार्तराष्ट्राणामेकेनैव किरीटिना। प्रमुखे सूतपुत्रस्य सोदर्या निहतास्त्रयः। ततो भीमः समुत्पत्य स्वरथाद्वैनतेयवत्। वरासि
ना कर्णपक्षाञ्जघान दश पंच च। पुनः स्वरथमारुह्य धनुरादाय चापरं। विव्याध दशभिः कर्णं सूतमश्वांश्च पंचभिः। धृष्टद्युम्नोऽप्यसिवरं चर्म चादा
य भास्वरं। जघान चंद्रवर्माणं बृहत्क्षत्रं च नैषधं। ततः स्वरथमारुह्य पांचाल्योऽन्यच्च कार्मुकं। आदाय कर्णं विव्याध त्रिसप्तत्या ननाद च। शैनेयोऽप्यन्य
दादाय धनुरिंद्रसमद्युतिः। सूतपुत्रं चतुःषष्ट्या विद्ध्वा सिंह इवानदत्। भल्लाभ्यां साधुमुक्ताभ्यां छित्वा कर्णस्य कार्मुके। पुनः कर्णं त्रिभिर्बाणैर्बाह्वोरु
रसि चार्पयत्। ततो दुर्योधनो द्रोणो राजा चैव जयद्रथः। निमज्जमानं राधेयमुज्जह्रुः सात्यकार्णवात्। पत्यश्वरथमातंगास्त्वदीयाः शतशोऽपरे।

द्रो॰प॰
५०
पाद८

कर्णमिवाभ्यधावंतत्रासयानाः प्रहारिणः।धृष्टद्युम्नश्चभीमश्चसौभद्रोर्जुनएवच।नकुलःसहदेवश्चसात्यकिश्चयुयुधूरणे।एवमेषमहारौद्रःक्षयार्थंसर्व
धन्विनां।तावकानांपरेषांचत्यक्त्वाप्राणानभूद्रणः।पदातिरथनागाश्वागजाश्चरथपत्तिभिः।रथिनोनागपत्यश्वैरथपत्तिरथद्विपैः।अश्वैरश्वागजै
र्नागारथिनोरथिभिःसह।संयुक्ताःसमपश्यंतपत्तयश्चापिपत्तिभिः।एवंसंकुलितंयुद्धमासीत्क्रव्यादहर्षणं।महद्भिस्तैरभीतानांयमराष्ट्रविवर्धनं।
ततोहतानररथवाजिकुंजरैरनेकशोद्विपरथपत्तिवाजिनः।गजैर्ग[illegible]जारथिभिरुदायुधाः।रथाहयैर्हयाःपत्तिगणैश्चपत्तयः।रथैर्द्विपाद्विरदवरै
र्महाहयाहयैर्वरा[illegible]वररथिभिश्चवाजिनः।निरस्तजिह्वादशनेक्षणाःक्षितौक्षयंगताःप्रमथितवर्मभूषणाः।तथापरेबहुकरणैर्वरायुधैर्हता
गताःप्रतिभयदर्शनाःक्षितिं।विपोथिताहयगजपादताडिताभृशाकुलारथकुलनेमिभिःक्षताः।प्रमोदनेश्वापदपक्षिरक्षसांजनक्षयेवर्त्ततितत्र
दारुणे।महाबलास्तेकुपिताःपरस्परंनिसूदयंतःप्रविचेरुरोजसा।ततोबलेभृशलुलितेपरस्परंनिरीक्षमाणेरुधिरौघसंप्लुते।दिवाकरेस्तंगिरि
मास्थितेशनैरुभेप्रयातेशिबिरायभारत॥ ॥इतिद्रोणपर्वणिद्वितीयदिनयुद्धे॥३२॥संजयउवाच॥ ॥एवमस्मास्क्रभग्नेषुफाल्गुनेनामि
तौजसा।द्रोणेचमोघसंकल्पेरक्षितेचयुधिष्ठिरे।सर्वेविध्वस्तकवचास्तावकायुधिनिर्जिताः।रजस्वलाभृशोद्विग्नावीक्षमाणादिशोदश।अव
हारंततःकृत्वाभारद्वाजस्यसंमते।लब्धलक्षैःशरैर्भिन्नाभृशावहसितारणे।श्लाघमानेषुभूतेषुफाल्गुनस्यामितान्गुणान्।केशवस्यचसौहा
र्देकीर्त्यमानेर्जुनंप्रति।अभिशस्ताइवाभूवन्ध्यानमूकत्वमास्थिताः।ततःप्रभातसमयेद्रोणंदुर्योधनोब्रवीत्।प्रणयादभिमानाच्चद्विषद्वृद्ध्याच
दुर्मनाः।श्रृण्वतांसर्वयोधानांसंरब्धोवाक्यकोविदः।नूनंवयंवध्यपक्षेभवतोद्विजसत्तम।तथाहिनाग्रहीःप्राप्तंसमीपेद्ययुधिष्ठिरं।इच्छतस्तेन
मुच्येतचक्षुःप्राप्तोरणेरिपुः।जिघृक्षतोरक्ष्यमाणःसामरैरपिपांडवैः।वरंदत्वाममप्रीतःपश्चाद्विकृतवानसि।आशाभंगंनकुर्वंतिभक्तस्या
र्याःकथंचन।ततोप्रीतस्तथोक्तःसभारद्वाजोब्रवीन्नृपं।नार्हसेमांतथाज्ञातुंघटमानंतवप्रिये।ससुरासुरगंधर्वाःसयक्षोरगराक्षसाः।
नालंलोकारणेजेतुंपाल्यमानंकिरीटिना।विश्वसृग्यत्रगोविंदःपृतनानीस्तथार्जुनः।तत्रकस्यबलंक्रामेदन्यत्रत्र्यंबकात्प्रभो।स

राम
५०

त्वं तातब्रवीम्यद्य न तज्ज्ञात्वन्यथा भवेत्। अद्यैकं प्रवरं कंचित्पातयिष्ये महारथं। तं च व्यूहं विधास्यामि यो भेद्यस्त्रिदशैरपि। योगेन
केनचिद्राजन्नर्जुनस्त्वपनीयतां। न ह्यसाध्यमविज्ञातं तस्य संख्येस्ति किंचन। तेन ह्युपात्तं सकलं सर्वज्ञानमितस्ततः। द्रोणेन व्याहृते त्वेवं संस
प्तकगणाः पुनः। आह्वयन्नर्जुनं X ज्ञातम X संख्ये दक्षिणामभितो दिशं। ततोर्जुनस्याथ परैः सार्धं समभवद्रणः। तादृशो यादृशो नान्यः
श्रुतो दृष्टोपि वा क्वचित्। ततो द्रोणेन विहितो व्यूहो राजन्व्यरोचत। चरन्मध्यंदिने सूर्यः प्रतपन्निव दुर्दृशः। तं चाभिमन्युर्वचनात्पितुर्ज्येष्ठ
स्य भारत। बिभेद दुर्भिदं संख्ये चक्रव्यूहमनेकधा। स कृत्वा दुष्करं कर्म हत्वा वीरान्सहस्रशः। षट्सु वीरेषु संसक्तो दौःशासनिवशं
गतः। वयं परमसंहृष्टाः पांडवाः शोककर्शिताः। सौभद्रे निहते राजन्नवहारमकुर्महि॥ ॥धृतराष्ट्र उ॥ ॥पुत्रं पुरुषसिंहस्य संजय
अप्राप्तयौवनं। रणे विनिहतं श्रुत्वा भृशं मे दीर्यते मनः। दारुणः क्षत्रधर्मोयं विहितो धर्मकर्तृभिः। यत्र राज्येप्सवः शूरा बाले शस्त्रमपा
तयन्। बालमत्यन्तसुखिनं विचरंतमभीतवत्। कृतास्त्रं बहवो जघ्नुर्ब्रूहि गावल्गणे कथं। विभित्सता रथानीकं सौभद्रेणामितौजसा।
विक्रीडितं यथा संख्ये तन्ममाचक्ष्व संजय॥ ॥संजय उ०॥ ॥यन्मां पृच्छसि राजेंद्र सौभद्रस्य निपातनं। तत्ते कार्त्स्न्येन वक्ष्यामि शृणु रा
जन्समाहितः। विक्रीडितं कुमारेण यथानीकं बिभित्सता। आरुग्णाश्च यथा वीरा दुःसाध्याश्चापि संप्लवे। दावाग्न्यभिपरीतानां भूरिगुल्म
तृणद्रुमे। वनौकसामिवारण्ये त्वदीयानामभूद्भयं॥ ॥इति द्रोणपर्वणि॥ ३३॥ संजय उ॥ ॥समरेत्युग्रकर्माणः कर्मभिर्व्यंजकश्रमाः।
सकृष्णाः पांडवाः पंच देवैरपि दुरासदाः। सत्त्वकर्मान्वयैर्बुद्ध्या कीर्त्या च यशसा श्रिया। नैव भूतो न भविता नैव तुल्यगुणः पुमान्। सत्य
धर्मरतो दांतो विप्रपूजादिभिर्गुणैः। सदैव त्रिदिवं प्राप्तो राजा किल युधिष्ठिरः। युगांते चांतको राजन्जामदग्न्यश्च वीर्यवान्। रथस्थो भी
मसेनश्च कथ्यंते सदृशास्त्रयः। प्रतिज्ञाकर्मदक्षस्य रणे गांडीवधन्वनः। उपमां नाधिगच्छामि पार्थस्य सदृशीं क्षितौ। गुरुवात्सल्यम

त्यंतं नेभ्रत्संविनयोदमः। नकुलेभ्रातिरूप्यंचशौर्यंचनियतानिषट्। श्रुतगांभीर्यमाधूर्यसत्वरूपपराक्रमैः। सदृशोदेवयोवीरः सहदेवः किलाश्विनोः। येचकृत्स्नगुणाः स्फीताः पांडवेषुचयेगुणाः। अभिमन्योकिलैकस्थोदृश्यंतेगुणसंचयाः। युधिष्ठिरस्यवीर्येण कृष्णस्यचरितेनच। कर्मभिभ्रीमसेनस्यसदृशोभीमकर्मणः। धनंजयस्यरूपेणविक्रमेणश्रुतेनच। विनयात्सहदेवस्यसदृशोनकुलस्यच॥ ॥धृतराष्ट्रः॥ ॥अभिमन्युमहं सूतसौभद्रं मपराजितं। श्रोतुमिच्छामिकार्त्स्न्येनकथमायोधनेहतः। ॥ ॥संजयउ॥ ॥स्थिरोभवमहाराजशोकंधारयदुर्धरं। महांतंबंधुनाशंतेकथयिष्यामितंश्रृणु। चक्रव्यूहोमहाराजआचार्यणाभिकल्पितः। तत्रशक्रोपमाः सर्वेराजानोविनिवेशिताः। द्वारस्थानेषुविन्यस्ताः कुमाराः सूर्यवर्चसः। संघातोराजपुत्राणांसर्वेषामभवत्तदा। कृताधिसमयाः सर्वेसुवर्णविकृतध्वजाः। रक्तांबरधराः सर्वेसर्वेरक्तविभूषणाः। सर्वेरक्तपताकाश्चसर्वेवे हेममालिनः। चंदनागरुदिग्धांगाः स्रग्विणः सूक्ष्मवाससः। सहिताः पर्यधावंतकार्ष्णिंप्रतियुयुत्सवः। तेषांदशसहस्राणिबभूवुर्दृढधन्विनां। पौत्रंतवपुरस्कृत्यलक्ष्मणंप्रियदर्शनं। अन्योन्यसमदुःखास्ते अन्योन्यसमसाहसाः। अन्योन्यंस्पर्द्धमानाश्च अन्योन्यस्यहितेरताः। दुर्योधनस्तुराजेंद्रसैन्यमध्येव्यवस्थितः। कर्णदुःशासनकृपैर्वृतोराजामहारथैः। देवराजोपमः श्रीमान्श्वेतछत्राभिसंवृतः। चामरव्यजनाक्षेपैरुदयन्निवभास्करः। प्रमुखेतस्यसैन्यस्यद्रोणावस्थितनायके। सिंधुराजस्तथातिष्ठछ्रीमान्मेरुरिवाचलः। सिंधुराजस्यपार्श्वस्थाअश्वत्थामपुरोगमाः। सुतास्तवमहाराजत्रिंशत्रिदशसन्निभाः। गांधारराजः कितवः शल्योभूरिश्रवास्तथा। पार्श्वतः सिंधुराजस्यव्यराजंतमहारथाः। ततः प्रववृतेयुद्धंतुमुलंरोमहर्

राम
४१

र्पणं। तावकानांपरेषांचमृतंकृत्वानिवर्त्तनं॥ ॥द्रोणपर्वेभिमन्युवधो॥३०॥ संजयउ॥ ॥तदनीकमनाधृष्यंभारद्वाजेनरक्षितं।
पार्थाःसमभ्यवर्त्ततभीमसेनपुरोगमाः। सात्यकिश्चेकितानश्चधृष्टद्युम्नश्चपार्षतः। कुंतिभोजश्चविक्रांतोद्रुपदश्चमहारथः।
आर्जुनिःक्षत्रधर्मा च बृहत्क्षत्रश्चवीर्यवान्। चेदिपोधृष्टकेतुश्चमाद्रीपुत्रौघटोत्कचः। युधामन्युश्चविक्रांतःशिखंडीचापरा-
जितः। उत्तमौजाश्चदुर्द्धर्षोविराटश्चमहारथः। द्रौपदेयाश्चसंरब्धाःशैशुपालश्चवीर्यवान्। कैकेयाश्चमहावीर्याःसृंजयाश्चसह-
स्रशः। एतेचान्येचसगणाःकृतास्त्रायुद्धदुर्मदाः। समभ्यधावन्सहसाभारद्वाजंयुयुत्सवः। समीपेवर्त्तमानांस्तान्भारद्वाजोति-
वीर्यवान्। असंभ्रांतःशरौघेणमहतासमवारयत्। महौघःसलिलस्येवगिरिमासाद्यदुर्भिदं। द्रोणंतेनाभ्यवर्त्ततवेलामिव
जलाशयाः। पीड्यमानाःशरैराजन्द्रोणचापविनिःसृतैः। नशेकुःप्रमुखेस्थातुंभारद्वाजस्यपांडवाः। तदद्भुतमपश्यामद्रोणस्यभु-
जयोर्बलं। यदेनंनाभ्यवर्त्ततपांचालाःसृंजयैःसह। तमायांतमभिक्रुद्धंद्रोणंदृष्ट्वायुधिष्ठिरः। बहुधाचिंतयामासद्रोणस्यप्रति-
वारणं। अशक्यंतुतमन्येनद्रोणंमत्वायुधिष्ठिरः। अविषह्यंगुरुंभारंसौभद्रेसमवासृजत्। वासुदेवादनवरंफाल्गुनाच्चामितौ-
जसं। अब्रवीत्परवीरघ्नमभिमन्युमिदंवचः। एत्यनोनार्जुनोगर्हेद्यथाताततथाकुरु। चक्रव्यूहस्यनवयंविद्मभेदंकथंचन। त्वंवा-
र्जुनोवाकृष्णोवाभिंद्यात्प्रद्युम्नएववा। चक्रव्यूहंमहाबाहोपंचमोनोपपद्यते। अभिमन्योवरंतातयाचतांदातुमर्हसि। पितॄ-
णांमातुलानांचसैन्यानांचैवसर्वशः। धनंजयोहिनस्तातगर्हयेदेत्यसंयुगात्। क्षिप्रमस्त्रंसमादायद्रोणानीकंविशातय॥ ॥

द्रो०प०
४२

॥ ॥ अभिमन्युरुवाच ॥ ॥ द्रोणस्य दृढमत्युग्रमनीकप्रवरं युधि। पितॄणां जयमाकांक्षन्नवगाहे विलंबितं। उपदिष्टो हि मे पित्रा
योगोनीकविशातने। नोत्सहे हि विनिर्गंतुमहं कस्यांचिदापदि॥ ॥युधिष्ठिरः॥ ॥ भिंध्यानीकं युधां श्रेष्ठ द्वारं संजनयस्व नः। वयं त्वा
नुगमिष्यामो येन त्वं तात यास्यसि। धनंजयसमं युद्धे त्वां वयं तात संयुगे। प्रणिधायानुयास्यामो रक्षंतः सर्वतोमुखाः॥ ॥भीमः॥ ॥
अहं त्वानुगमिष्यामि धृष्टद्युम्नोथ सात्यकिः। पांचालाः केकया मत्स्यास्तथा सर्वे प्रभद्रकाः। सकृद्भिन्नं त्वया व्यूहं तत्र तत्र पुनः पुनः।
वयं प्रध्वंसयिष्यामो निघ्नमाना वरान्वरान्॥ ॥अभिमन्युः॥ ॥ अहमेतत्प्रवेक्ष्यामि द्रोणानीकं दुरासदं। पतंग इव संक्रुद्धो ज्वलि
तं जातवेदसं। तत्कर्माद्य करिष्यामि हितं यद्वंशयोर्द्वयोः। मातुलस्य च यत्प्रीतिं करिष्यामि पितुश्च मे। शिशुनैकेन संग्रामे काल्यमा
नानि संघशः। द्रक्ष्यंति सर्वभूतानि द्विषत्सैन्यानि वै मया॥ ॥युधिष्ठिरः॥ ॥ एवं ते भाषमाणस्य बलं सौभद्र वर्द्धतां। यस्त्वमुत्सहसे भे
त्तुं द्रोणानीकं दुरासदं। रक्षितं पुरुषव्याघ्रैर्महेष्वासैर्महाबलैः। साध्यरुद्रमरुत्तुल्यैर्वस्वग्न्यादित्यविक्रमैः॥ ॥संजय उ॥ ॥तस्य तद्व
चनं श्रुत्वा स यंतारमनोदयत्। सुमित्राश्वान्रणे क्षिप्रं द्रोणानीकाय नोदय॥ ॥इति द्रोणपर्वण्यभिमन्युवधे॥ ७५॥ संजय उ॥ ॥
सौभद्रस्तद्वचः श्रुत्वा धर्मराजस्य धीमतः। अनोदयत यंतारं द्रोणानीकाय भारत। तेन संनोद्यमानस्तु याहि याहीति सारथिः। प्रत्युवा
च ततो राजन्नभिमन्युमिदं वचः। अतिभारोयमायुष्मन्नाहितस्त्वयि पांडवैः। संप्रधार्य क्षमं बुध्या ततस्त्वं योद्धुमर्हसि। आचार्यो हि
कृती द्रोणः परमास्त्रे कृतश्रमः। अत्यंतसुखसंवृद्धस्त्वं वायुद्धविशारदः। ततोभिमन्युः प्रहसन्सारथिं वाक्यमब्रवीत्। सारथे को न्व
यं द्रोणः समग्रं क्षत्रमेव च। ऐरावतगतं शक्रं सहामरगणैरहं। योधयेयं रणमुखे न मे क्षत्रेद्य विस्मयः। न ममैतद्द्विषत्सैन्यं कला

राम
४२

मर्हति षोडशीं॥ अपि विश्वजितं विष्णुं मातुलं प्राप्य स्वात्मजः। पितरं चार्जुनं युद्धे न भीर्मामुपयास्यति। अभिमन्युश्च तां वाचं कदर्थीकृ
त्य सारथेः। याहीत्येवाब्रवीदेनं द्रोणानीकाय माचिरं। ततः संनोदयामास हयानाशु त्रिहायनान्। नातिहृष्टमनाः सूतो हेम
भांडपरिच्छदान्। ते प्रेषिताः सुमित्रेण द्रोणानीकाय वाजिनः। द्रोणमभ्यद्रवन्राजन्महावेगपराक्रमं। तमुदीक्ष्य तथा यांतं स
र्वे द्रोणपुरोगमाः। अभ्यवर्त्तंत कौरव्याः पांडवाश्च तमन्वयुः। स कर्णिकारप्रवरोच्छ्रितध्वजः सुवर्णवर्मार्जुनिरर्जुनावरः। युयु
त्सया द्रोणमुखान्महारथान्समासदत्सिंहशिशुर्यथा द्विपान्। ते विंशंतमुदायुक्ताः संप्रहारं प्रचक्रिरे। आसीद्गांग इवावर्त्तो
मुहूर्त्तमुदधाविव। शूराणां युध्यमानानां निघ्नतामितरेतरं। संग्रामस्तुमुलो राजन्प्रावर्त्तत सुदारुणः। प्रवर्त्तमाने संग्रामे त
स्मिन्नतिभयंकरे। द्रोणस्य मिषतो व्यूहं भित्वा प्राविशदार्जुनिः। तं प्रविष्टं विनिघ्नंतं शत्रुसंघान्महाबलं। हस्त्यश्वरथपत्यौघाः
परिवव्रुरुदायुधाः। नानावादित्रनिनदैः क्ष्वेडितोत्कृष्टगर्जितैः। हुंकारैः सिंहनादैश्च तिष्ठ तिष्ठेति निस्वनैः। घोरैर्हलहला
शब्दैर्मागास्तिष्ठेहि मामिति। असावहममुत्रेति प्रवदंतो मुहुर्मुहुः। बृंहितैर्गर्जितैर्हसितैः खुरनेमिस्वनैरपि। संनाद
यंतो वसुधामभिदुद्रुवुरार्जुनिं। तेषामापततां वीरः शीघ्रयोधी महाबलः। क्षिप्रास्त्रो न्यवधीद्राजन्मर्मज्ञो मर्मभेदिभिः।
तैर्हन्यमाना विवशा नानालिंगैः शितैः शरैः। अभिपेतुः सुबहवः शलभा इव पावकं। ततस्तेषां शरीरैश्च शरीरावय

द्रो०प०
४३

वैश्रसः। आत्तस्ताक्षितिं क्षिप्रं कुशैर्वेदीमिवाध्वरे। बद्धगोधांगुलित्राणान्सशरासनसायकान्। सासिवर्मांकुशा
भीषून् सतोमरपरश्वधान्। सगदायोगुडप्रासान् सर्ष्टितोमरपट्टिशान्। सभिंडिपालपरिघान् सशक्तिवरकंपनान्।
संप्रतोद महाशंखान् सकुंतान् सकचग्रहान्। समुद्गरक्षेपणीयान् सपाशपरिघोपलान्। सकेयूरांगदान् बाहून्
हृद्यगंधानुलेपनान्। संचिच्छेदार्जुनिर्दृप्तांस्त्वदीयानां सहस्रशः। तैः स्फुरद्भिर्महाराज शुशुभे भूः स्वलोहितैः। पं
चास्यैः पन्नगैश्छिन्नैर्गरुडेनेव मारिष। सनासाननकेशांतैरव्रणैश्चारुकुंडलैः। संदष्टौष्ठपुटैः क्रोधात्क्षरद्भिः
शोणितं बहु। सचारुमुकुटोष्णीषैर्मणिरत्नविराजितैः। विनालनलिनाकारैर्दिवाकरशशिप्रभैः। हितप्रियंव
दैः काले बहुभिः पुण्यगंधिभिः। द्विषच्छिरोभिः पृथिवीं सवैत्तस्तार फाल्गुनिः। गंधर्वनगराकारान् विधिवत्क
ल्पितान्रथान्। ईषामुखान्चित्रवर्णान्न्यस्तदंडकबंधुरान्। विनिघ्नन्वैविच्वरणान् विनासादश्वानानपि। विचक्रोपस्क
पस्थ भग्नोपकरणानपि। अपातितोपस्तरणान्हतयोधान्सहस्रशः। शरैर्विशकलीकुर्वन्दिक्षु सर्वास्ववपत। पुनर्द्विपा
न् द्विपारोहान्वेज

राम
४३

पर्यस्तांकुशध्वजान्। तूणांश्चर्माण्यथो कक्ष्या ग्रैवेयांश्च सकंबलान्। घंटाः शुंडान्विषाणाग्रान् छत्रमालाः पदानुगान्। शरैर्निशितधारोग्रैः शात्रवाणामशातयत्। वा
नायुजान्पार्वतीयान्कांबोजानथ बाल्हिकान्। स्थिरवालधिकर्णाक्षान् जवनान्साधुवाहिनः। आरूढान्शिक्षितैर्योधैः शक्त्यृष्टिप्रासयोधिभिः। विध्वस्तचा
मरमुखत्राणविप्रविद्धप्रकीर्णकान्। निरस्तजिह्वानयनान्निष्क्रांतांत्रयकृद्गतान्। हतारोहान्छिन्नघंटान्क्रव्यादगणमोदनान्। निकृत्तचर्मकवचान् शकृन्मू
त्रासृगाप्लुतान्। निपातयन्नश्ववरांस्तावकान्सव्यरोचत। एको विष्णुरिवाचिंत्यः कृत्वा कर्म सुदुष्करं। तथा निर्मथितं तेन त्र्यंगं तव बलं महत्। यथासुरबलं
घोरं त्र्यंबकेण महौजसा। कृत्वा कर्म रणे सह्यं परैरार्जुनिराहवे। अभिनच्च पदायोधांस्त्वदीयानेव सर्वशः। एवमेकेन तां सेनां सौभद्रेण शितैः शरैः। भृशं विश
हतां दृष्ट्वा स्कंदेनेवासुरीं चमूं। त्वदीयास्तव पुत्राश्च वीक्षमाणा दिशो दश। संशुष्कास्याश्चलन्नेत्राः प्रस्विन्ना रोमहर्षिणः। पलायनकृतोत्साहा निरुत्साहा द्विषज्ज
ये। गोत्रनामभिरन्योन्यं क्रंदंतो विजयैषिणः। हतान्पुत्रांस्तथा भ्रातॄन्बंधून्संबंधिनस्तथा। प्रातिष्ठंत समुत्सृज्य त्वरयंतो हयद्विपान्॥ ॥इति द्रोणपर्वण्यभिम
न्युवधे॥३७॥ संजय उवाच॥ ॥तां प्रभग्नां चमूं दृष्ट्वा सौभद्रेणामितौजसा। दुर्योधनो भृशं क्रुद्धः स्वयं सौभद्रमभ्ययात्। ततो राजानमावृत्तं सौभद्रं प्रति सं
गे। दृष्ट्वा द्रोणोऽब्रवीद्योधान्परीप्सध्वं नराधिपं। पुराभिमन्युर्लक्ष्यं नः पश्यतां हंति वीर्यवान्। तमाद्रवत मा भैष्ट क्षिप्रं रक्षत कौरवं। ततः कृतज्ञा बलिनः सुहृ
दो जितकाशिनः। त्रायमाणा भयाद्वीरं परिवव्रुस्तवात्मजं। द्रोणो द्रौणिः कृपः कर्णः कृतवर्मा च सौबलः। बृहद्बलो मद्रराजो भूरिर्भूरिश्रवाः शलः। पौरवो वृ
षसेनश्च विसृजंतः शितान्शरान्। सौभद्रं शरवर्षेण महता समवाकिरन्। संमोहयित्वा तमथ दुर्योधनममोचयन्। आस्याद्ग्रासमिवाक्षिप्तं ममृषे नार्जुनात्म
जः। तान्शरौघेण महता साश्वसूतान्महारथान्। विमुखीकृत्य सौभद्रः सिंहनादमथानदत्। तस्य नादं ततः श्रुत्वा सिंहस्येवामिषैषिणः। नामृष्यंत सुसंर
ब्धाः पुनर्द्रोणमुखा रथाः। त एनं कोष्ठकीकृत्य रथवंशेन मारिष। व्यसृजन्निषुजालानि नानालिंगानि संघशः। तान्यंतरिक्षे चिच्छेद पौत्रस्ते निशितैः शरैः। तां
श्चैव प्रतिविव्याध तदद्भुतमिवाभवत्। ततस्ते कोपितास्तेन शरैराशीविषोपमैः। परिवव्रुर्जिघांसंतः सौभद्रमपलायिनं। समुद्रमिव पर्यस्तं त्वदीयं तं बलार्णवं।
दधारैकोऽर्जुनिर्बाणैर्वेलेव भरतर्षभ। शूराणां युध्यमानानां निघ्नतामितरेतरं। अभिमन्योः परेषां च नासीत्कश्चित्पराङ्मुखः। तस्मिंस्तु घोरे संग्रामे वर्तमाने

भयंकरे । दुःसहो नवभिर्बाणैरभिमन्युमविध्यत । दुःशासनो द्वादशभिः कृपः शारद्वतस्त्रिभिः । द्रोणस्तु सप्तदशभिः शरैराशीविषोपमैः । विविंशतिश्च सप्तत्याहृ
त्कृतवर्मा च सप्तभिः । भूरिश्रवास्त्रिभिर्बाणैर्मद्रेशः षड्भिराशुगैः । द्वाभ्यां शराभ्यां शकुनिस्त्रिभिर्दुर्योधनो नृपः । स तु तान्प्रतिविव्याध त्रिभिस्त्रिभिरजिह्मगैः । नृत्य
न्निव महाराज चापहस्तः प्रतापवान् । ततोऽभिमन्युः संक्रुद्धस्त्रास्यमानस्तवात्मजैः । विदर्शयन्वै सुमहच्छिक्षौरसकृतं बलं । गरुडानिलरंहोभिर्यन्तुर्वाक्यक
रैर्हयैः । दान्तैरश्मकदायादं त्वरमाणोऽभ्यवारयत् । विव्याध दशभिर्बाणैस्तिष्ठ तिष्ठेति चाब्रवीत् । तस्याभिमन्युर्दशभिर्हयान्सूतं ध्वजं शरैः । बाहू धनुः शिरश्चो
र्व्यां स्मयमानोऽभ्यपातयत् । ततस्तस्मिन्हते वीरे सौभद्रेणाश्मकेश्वरे । संचचाल बलं सर्वं पलायनपरायणं । ततः कर्णः कृपो द्रोणो द्रौणिर्गान्धारराट् शलः ।
शल्यो भूरिश्रवाः क्राथः सोमदत्तो विविंशतिः । वृषसेनः सुषेणश्च कुण्डभेदी प्रतर्दनः । वृन्दारकोललित्थश्च प्रबाहुर्दीर्घलोचनः । दुर्योधनश्च संक्रुद्धः शर
वर्षैरवाकिरन् । सोऽतिविद्धो महेष्वासैरभिमन्युरजिह्मगैः । शरमादत्त कर्णाय परकायावमर्दनं । तस्य भित्वा तनुत्राणं देहं निर्भिद्य चाशुगः । प्राविशद्धर
णीं वेगाद्वल्मीकमिव पन्नगः । स तेनाभिप्रहारेण व्यथितो विह्वलन्निव । संचचाल रणे कर्णः क्षितिकंपे यथाचलः । तथान्यैर्निशितैर्बाणैः सुषेणं दीर्घलो
चनं । कुण्डभेदिं च संक्रुद्धस्त्रिभिस्त्रीनवधीद्बली । कर्णस्तं पंचविंशत्या नाराचानां समार्पयत् । अश्वत्थामा च विंशत्या कृतवर्मा च सप्तभिः । स शराचितस
र्वाङ्गः क्रुद्धः शक्रात्मजात्मजः । विचरन्दृश्यते सैन्ये पाशहस्त इवान्तकः । शल्यं च शरवर्षेण समीपस्थमवाकिरत् । उदक्रोशन्महाबाहुस्तव सैन्यानि भीषय
न् । ततः स विद्धोऽस्त्रविदा मर्मभिद्भिरजिह्मगैः । शल्यो राजन्रथोपस्थे निषसाद मुमोह च । तं हि दृष्ट्वा तथा विद्धं सौभद्रेण यशस्विना । संप्राद्रवच्चमूः सर्वा
भारद्वाजस्य पश्यतः । संप्रेक्ष्य तं महाबाहुं रुक्मपुंखैः समावृतं । त्वदीयाः प्रपलायन्ते मृगाः सिंहार्दिता यथा । स तु रणयशसाभिपूज्यमानः पितृसुरचा
रणसिद्धयक्षसंघैः । अवनितलगतैश्च भूतसंघैरतिविबभौ हुतभुग्यथाज्यसिक्तः ॥ ॥इति द्रोणपर्वण्यभिमन्युवधे ॥३८॥ धृतराष्ट्र ॥ ॥ तथा प्रमथ
मानं तं महेष्वासानजिह्मगैः । आर्जुनिं मामकाः संख्ये के त्वेनं समवारयन् ॥ ॥संजय ॥ ॥ शृणु राजन्कुमारस्य रणे विक्रीडितं महत् । विभित्सतो रथानी
कं भारद्वाजेन रक्षितं । मद्रेशं सादितं दृष्ट्वा सौभद्रेणाशुगै रणे । शल्यादवरजः क्रुद्धः किरन्बाणान्समभ्ययात् । स विध्वा दशभिर्बाणैः साश्वयंतारमा

र्जुनिं। उदक्रोशन्महाराज तिष्ठ तिष्ठेति चाब्रवीत्। तस्यार्जुनिः शिरोग्रीवं पाणिपादं धनुर्हयान्। छत्रं ध्वजं नियंतारं त्रिवेणुं तल्पमेव च। चक्रं युगं च तू-
णीरं ह्यनुकर्षं च सायकैः। पताकां चक्रगोप्तारौ सर्वोपकरणानि च। लघुहस्तः प्रचिच्छेद ददृशे तं न कश्चन। स पपात क्षितौ क्षीणः प्रविद्धाभरणांबरः। वा-
युनेव महाशैलः संभग्नोऽमिततेजसा। अनुगास्तस्य वित्रस्ताः प्राद्रवन्सर्वतो दिशः। आर्जुनेः कर्म तद्दृष्ट्वा संप्रणेदुः समंततः। नादेन सर्वभूतानि साधु
साध्विति भारत। शल्यभ्रातर्यथारुग्णे बहुशस्तस्य सैनिकाः। कुलाधिवासनामानि श्रावयंतोऽर्जुनात्मजं। अभ्यधावंत संक्रुद्धा विविधायुधपाणयः।
रथैरश्वैर्गजैश्चान्ये पद्भिश्चान्ये बलोत्कटाः। बाणशब्देन महता रथनेमिस्वनेन च। हुंकारैः क्ष्वेडितोत्क्रुष्टैः सिंहनादैः सगर्जितैः। ज्यातलत्रस्वनैरन्ये गर्जंतो
ऽर्जुननंदनं। ब्रुवंतश्च न नो जीवन्मोक्ष्यसे जीवितादिति। तांस्तथा ब्रुवतो दृष्ट्वा सौभद्रः प्रहसन्निव। यो यः स्म प्राहरत्पूर्वं तं तं विव्याध पत्त्रिभिः। संदर्शयिष्यन्न-
स्त्राणि विचित्राणि लघूनि च। आर्जुनिः समरे शूरो मृदुपूर्वमयुध्यत। वासुदेवादुपात्तं यद्यदस्त्रं यच्च धनंजयात्। अदर्शयत तत्कार्ष्णिः कृष्णाभ्यामविशेष-
यन्। वहतस्तं गुरुं भारं साध्वसं च पुनः पुनः। संदधद्विसृजंश्चेषून्निर्विशेषमदृश्यत। चापमंडलमेवास्य विस्फुरद्दिक्ष्वदृश्यत। सुदीप्तस्य शरत्काले सवि-
तुर्मंडलं यथा। ज्या[illegible]शब्दः शुश्रुवे तस्य तलशब्दश्च दारुणः। महाशनिमुचः काले पयोदस्येव निस्वनः। ह्रीमानमर्षी सौभद्रो मानकृत्प्रियदर्शनः। सं-
मिमानयिषुर्वीरानिष्वस्त्रेणाप्ययुध्यत। मृदुर्भूत्वा महाराज दारुणः समपद्यत। वर्षाभतीतो भगवाञ्शरदीव दिवाकरः। शरान्विचित्रान्सुबहूनरुक्मपुंखा-
ञ्छिलाशितान्। मुमोच शतशः क्रुद्धो गभस्तीनिव भास्करः। क्षुरप्रैर्वत्सदंतैश्च विपाठैश्च महारथः। नाराचैरर्धनाराचैर्भल्लैरंजलिकैरपि। अवाकिरद्रथानी-
कं भारद्वाजस्य पश्यतः। ततस्तत्सैन्यमभवद्विमुखं शरपीडितं॥ ॥इति द्रोणपर्वण्यभिमन्युवधे॥ ३१॥ धृतराष्ट्र उ०॥ ॥द्वैधीभवति मे चित्तं ह्रिया तुष्ट्या च सं-
जय। मम पुत्रस्य यत्सैन्यं सौभद्रः समवारयत्। विस्तरेणैव मे शंस सर्वं गावल्गणे पुनः। विक्रीडितं कुमारस्य स्कंदस्येवासुरैः सह॥ ॥संजय उ०॥ ॥हंत ते सं-
प्रवक्ष्यामि विमर्दमतिदारुणं। एकस्य च बहूनां च यथासीत्तुमुलो रणः। अभिमन्युः कृतोत्साहः कृतोत्साहानरिंदमान्। रथस्थो रथिभिः सर्वांस्तावका-
नभ्यवर्षयत्। द्रोणं कर्णं कृपं शल्यं द्रौणिं भोजं बृहद्बलं। दुर्योधनं सौमदत्तिं शकुनिं च महाबलं। नानानृपान्नृपसुतान्सैन्यानि विविधानि च। अलातच-

कवचं सर्वं चैव रथ्यांश्चापि समार्पयत् । निघ्नन्नमित्रान्सौभद्रः परमास्त्रैः प्रतापवान् । अदर्शयत तेजस्वी दिक्षु सर्वासु भारत । तद्दृष्ट्वा चरितं तस्य सौभद्रस्यामितौजसः ।
समकंपंत सैन्यानि त्वदीयानि सहस्रशः । अथाब्रवीन्महाप्राज्ञो भारद्वाजः प्रतापवान् । हर्षेणोत्फुल्लनयनः कृपमाभाष्य सत्वरं । घट्टयन्निव मर्माणि पुत्र
स्य तव भारत । अभिमन्युं रणे दृष्ट्वा तदा रणविशारदं । एष गच्छति सौभद्रः पार्थानां प्रथितो युवा । नंदयन्सुहृदः सर्वान्राजानं च युधिष्ठिरं । नकुलं सहदेवं
च भीमसेनं च पांडवं । बंधून्संबंधिनश्चान्यान्मध्यस्थान्सुहृदस्तथा । नास्य युद्धे समं मन्ये कंचिदन्यं धनुर्धरं । इच्छन्हन्यादिमां सेनां किमर्थमपि नेच्छति । द्रोण
स्य प्रीतिसंयुक्तं श्रुत्वा वाक्यं तवात्मजः । आर्जुनिं प्रति संक्रुद्धो द्रोणं दृष्ट्वा स्मयन्निव । अथ दुर्योधनः कर्णमब्रवीद्बाह्लिकं नृपः । दुःशासनं महाराज तांस्तथा
न्यान्महारथान् । सर्वमूर्धाभिषिक्तानामाचार्यो ब्रह्मवित्तमः । अर्जुनस्य सुतं मूढो नायं हंतुमिहेच्छति । न ह्यस्य समरे मुच्येदंतकोप्याततायिनः । किमंग पुनरे
वान्यो मर्त्यः सत्यं ब्रवीमि वः । अर्जुनस्य सुतं त्वेषः शिष्यत्वादभिरक्षति । शिष्याः पुत्राश्च दयितास्तदपत्यं च धर्मिणां । संरक्ष्यमाणो द्रोणेन मन्यते वीर्यमात्म
नः । आत्मसंभावितो मूढस्तं प्रमथ्नीत माचिरं । एवमुक्तास्तु ते राज्ञा सात्वतीपुत्रमभ्ययुः । संरब्धास्ते जिघांसंतो भारद्वाजस्य पश्यतः । दुःशासनस्तु तच्छ्रुत्वा
दुर्योधनवचस्तदा । अब्रवीत्कुरुशार्दूलो दुर्योधनमिदं वचः । अहमेनं हनिष्यामि महाराज ब्रवीमि ते । मिषतां पांडुपुत्राणां पांचालानां च पश्यतां । ग्रसि
ष्याम्यद्य सौभद्रं यथा राहुर्दिवाकरं । उत्क्रुश्य चाब्रवीद्वाक्यं कुरुराजमिदं वचः । श्रुत्वा कृष्णौ मया ग्रस्तं सौभद्रमतिमानिनौ । गमिष्यतः प्रेतलोकं जीवलोकान्न
संशयः । तौ च श्रुत्वा मृतौ व्यक्तं पांडोः क्षेत्रोद्भवाः सुताः । एकाह्ना ससुहृद्वर्गाः क्लैब्याद्धास्यंति जीवितं । तस्मादस्मिन्हते शत्रौ हताः सर्वे हितास्तव । शिवेन ध्या
हि मां राजन्नेष हन्मि रिपुं तव । एवमुक्त्वा नदन्राजन्पुत्रो दुःशासनस्तव । सौभद्रमभ्ययात्क्रुद्धः शरवर्षैरवाकिरन् । तमभिक्रुद्धमायांतं तव पुत्रमरिंदमः ।
अभिमन्युः शरैस्तीक्ष्णैः षड्विंशत्या समार्पयत् । दुःशासनस्तु संक्रुद्धः प्रभिन्न इव कुंजरः । अयोधयत सौभद्रमभिमन्युश्च तं रणे । तौ मंडलानि चित्राणि र
थाभ्यां सव्यदक्षिणं । चरमाणावयुध्येतां रथशिक्षाविशारदौ । अथ पणवमृदंगदुंदुभीनां क्रकचमहानकभेरिझर्झराणां । निनदमतिभृशं नराः
प्रचक्रुर्लवणजलोद्भवसिंहनादमिश्रं ॥ ॥इति द्रोणपर्वण्यभिमन्युवधे ॥ ३८ ॥ संजय उवाच ॥ ॥ शरविक्षतगात्रस्तु प्रत्यमित्रमवस्थितं । अभि

मन्युःस्मरन्धीमान्दुःशासनमथाब्रवीत्। दिष्ट्यापश्यामिसंग्रामेमानिनंक्रूरमागतं। निष्ठुरंसक्तधर्माणमाक्रोशनपरायणं। यत्तसभायांतयाराज्ञोह्यनराह्युस्त्या
शृण्वतः। कोपितःपरुषैर्वाक्यैर्धर्मराजोयुधिष्ठिरः। जयोन्मत्तेनभीमश्चबहुकबद्धंप्रभाषितः। तत्त्वयेदमनुप्राप्तंतस्यकोपान्महात्मनः। परवित्तापहारस्य
क्रोधस्याप्रशमस्यच। लोभस्याज्ञाननाशस्यद्रोहस्यात्याहितस्यच। पितॄणांममराज्यस्यहरणस्योग्रधन्विनां। तत्त्वयेदमनुप्राप्तंतत्कोपाद्वैमहात्मनां।
सतत्स्योग्रमधर्मस्यफलंप्राप्नुहिदुर्मते। शासितोस्म्यद्यतेबाणैःसर्वसैन्यस्यपश्यतः। अद्याहमनृणस्तस्यकोपस्यमेवितारणे। अमर्षितायाःकृष्णायाः
कांक्षितस्यचमेपितुः। अद्यकौरव्यभीमस्यभवितास्म्यनृणोयुधि। नहिमेमोक्ष्यसेजीवन्यदिनोत्सृजसेरणं। एवमुक्त्वामहाबाहुर्वीरोदुःशासनान्तकं। सं
दधेपरवीरघ्नःकालाग्न्यनिलवर्चसं। तस्योरस्तूर्णमासाद्यजत्रुदेशेविभिद्यतं। जगामसहपुंखेनवल्मीकमिवपन्नगः। अथैनंपंचविंशत्यापुनरेवसमा
र्पयत्। शरैरग्निसमस्पर्शैराकर्णसमनोदितैः। सगाढविद्धोव्यथितोरथोपस्थउपाविशत्। दुःशासनोमहाराजकश्मलंचाविशन्महत्। सारथिस्त्वरमा
णस्तुदुःशासनमचेतनं। रणमध्यादपोवाहसौभद्रशरपीडितं। पांडवाद्रौपदेयाश्चविराटश्चसमीक्ष्यतं। पांचालाःकेकयाश्चैवसिंहनादमथानदन्। वादित्रा
णिचसर्वाणिनानालिंगानिसर्वशः। प्रावादयंतसंहृष्टाःपांडूनांतत्रसैनिकाः। अपश्यन्स्मयमानाश्चसौभद्रस्यविचेष्टितं। अत्यंतवैरिणंदृप्तंदृष्ट्वाशत्रुंपरा
जितं। धर्ममारुतशक्राणामश्विनोःप्रतिमास्तथा। धारयंतोध्वजाग्रेषुद्रौपदेयामहारथाः। सात्यकिश्चेकितानश्चधृष्टद्युम्नशिखंडिनौ। केकयाधृष्टकेतुश्च
मत्स्याःपांचालसृंजयाः। पांडवाश्चमुदायुक्तायुधिष्ठिरपुरोगमाः। अभ्यद्रवंतत्वरिताद्रोणानीकंविभित्सवः। ततोभवन्महद्युद्धंत्वदीयानांपरैःसह। जय
माकांक्षमाणानांशूराणामनिवर्तिनां। तथातुवर्तमानेवैसंग्रामेतिभयंकरे। दुर्योधनोमहाराजराधेयमिदमब्रवीत्। पश्यदुःशासनंवीरमभिमन्युवशंगतं। प्रप
तंमिवादित्यंनिघ्नंतंशात्रवान्रणे। अथचैतेसुसंरब्धाःसिंहाइवबलोत्कटाः। सौभद्रमुद्यतास्त्रातुंमभ्यधावंतपांडवाः। ततःकर्णःशरैस्तीक्ष्णैरभिमन्युंदुरासदं।
अभ्यवर्षत्संक्रुद्धःपुत्रस्यहितकृत्तव। तस्यचानुचरांस्तीक्ष्णैर्विव्याधपरमेषुभिः। अवज्ञापूर्वकंशूरःसौभद्रस्यरणाजिरे। अभिमन्युस्तुराधेयंत्रिसप्तत्याशिली
मुखैः। अविध्यत्त्वरितोराजन्द्रोणंप्रेप्सुर्महामनाः। तंतथानाशकत्कश्चिद्द्रोणाद्वारयितुंरथी। आरुजंतंरथव्रातान्वज्रहस्तात्मजात्मजं। ततःकर्णोजयप्रेप्सु

र्मिनां सर्वधनुष्मतां । सौभद्रं शतशो विध्यद्‌ उत्तमास्त्राणि दर्शयन् । सोस्त्रैरस्त्रविदां श्रेष्ठो रामशिष्यः प्रतापवान् । समरे शत्रुदुर्धर्षम् अभिमन्युमपीडयत् । स तथा पीड्यमान
स्तु राधेयेनास्त्रवृष्टिभिः । समरे मरसंकाशः सौभद्रो न व्यषीदत । ततः शिलाशितैस्तीक्ष्णैर्भल्लैरानतपर्वभिः । छित्वा धनूंषि शूराणाम् आर्जुनिः कर्णमार्दयत् । धनुर्म
ण्डलनिर्मुक्तैः शरैराशीविषोपमैः । सछत्रध्वजयंतारं साश्वमाशु स्मयन्निव । कर्णोपि चास्य चिक्षेप बाणान् संनतपर्वणः । असंभ्रांतश्च तान् सर्वान् अगृह्णात् फाल्गुना
त्मजः । ततो मुहूर्तात्कर्णस्य बाणेनैकेन वीर्यवान् । सध्वजं कार्मुकं वीरश्छित्वा भूमावपातयत् । ततः कृछ्रगतं कर्णं दृष्ट्वा कर्णादनंतरः । सौभद्रमभ्ययात्तूर्णं दृढमुद्य
म्य कार्मुकं । ततउच्चुक्रुशुः पार्थास्तेषां चानुचरा जनाः । वादित्राणि च संजघ्नुः सौभद्रं चापि तुष्टुवुः ॥ ॥इति द्रोणपर्वण्यभिमन्युवधे ॥४७॥ संजय उवाच ॥ ॥सो
ऽतिगर्जन् धनुष्पाणिर्ज्यां विकर्षन् पुनः पुनः । तयोर्महात्मनोस्तूर्णं रथांतरमवारयत् । सोविध्यद्दशभिर्बाणैरभिमन्युं दुरासदं । सछत्रध्वजयंतारं साश्वमाशु
स्मयन्निव । पितृपैतामहं कर्म कुर्वाणमतिमानुषं । दृष्ट्वार्दितं शरैः कार्ष्णिं त्वदीया हर्षिता भवन् । तस्याभिमन्युरायम्य स्मयन्नेकेन पत्त्रिणा । शिरः प्रच्यावया
मास तद्‌ उथाल्लापेतद्भुवि । कर्णिकारमिवाधूतं वातेनापतितं नगात् । भ्रातरं निहतं दृष्ट्वा राजन् कर्णो व्यथां ययौ । विमुखीकृत्य कर्णं तु सौभद्रः कंकपत्रिभिः । अ
न्यानपि महेष्वासांस्तूर्णमेवाभिदुद्रुवे । ततस्तद्वितर्तं सैन्यं हस्त्यश्वरथपत्तिमत् । क्रुद्धोभिमन्युरभिनत् तिग्मतेजा महायशाः । कर्णस्तु बहुभिर्बाणैरर्द्यमानो भिम
न्युना । अपायाज्जवनैरश्वैस्ततो नीकमभिद्यत । शलभैरिव चाकाशे धाराभिरिव चावृते । अभिमन्योः शरव्रातैर्न प्राज्ञायत किंचन । तावकानां तु योधानां व
ध्यतां निशितैः शरैः । अन्यत्र सैंधवाद्राजन् न स्म कश्चिदतिष्ठत । सौभद्रस्तु ततः शंखं प्रध्माप्य भरतर्षभः । शीघ्रमभ्यपतत्सेनां भारतीं भरतर्षभ । स कक्षे
ऽग्निरिवोत्सृष्टो निर्दहंस्तरसा रिपून् । मध्ये भारतसैन्यानाम् आर्जुनिः पर्यवर्तत । रथनागाश्वमनुजानर्दयन्निशितैः शरैः । स प्रविश्याकरोद्भूमिं कबंधगणसंकु
लां । सौभद्रचापप्रभवैर्निकृत्ताः परमेषुभिः । स्वानेवाभिमुखान्घ्नंतः प्राद्रवन् जीवितार्थिनः । ते घोरा रौद्रकर्माणो विपाठा बहवः शिताः । निघ्नंतो रथनागाश्वा
न् जग्मुराशु वसुंधरां । सायुधाः सांगुलित्राणाः सगदाः सांगदा रणे । दृश्यंते बाहवश्छिन्ना हेमाभरणभूषिताः । शराश्चापानि खड्गाश्च शरीराणि शिरांसि
च । सकुंडलानि स्रग्वीणि भूमावासन् सहस्रशः । सोपस्करैरधिष्ठानैरीषादंडकबंधुरैः । अक्षैर्विमथितैश्चक्रैर्बहुधा पतितैर्गजैः । शक्तिचापासिभिश्चैव प

राम
४६

त्तितेश्च महाभुजेः। वर्मचापशरैश्चैवं व्यवकीर्णैः समंततः। निहतैः क्षत्रियैरश्चैर्वीरियोश्च विशांपते। अगम्यरूपा पृथिवी क्षणेनासीत्सुदारुणा। बध्यतां राज
पुत्राणां कर्त्ता मितरेतरं। प्रादुरासीन्महाशब्दो भीरूणां भयवर्द्धनः। स शब्दो भरतश्रेष्ठ दिशः सर्वा व्यनादयत्। सौभद्रश्चाद्रवत्सेनां घ्नन्नराश्वरथद्विपा
न्। कक्षमग्निरिवोत्सृष्टो निर्दहंस्तरसारिपून्। मध्ये भारतसैन्यानामर्जुनिः प्रत्यदृश्यत। विचरंतं दिशः सर्वाः प्रदिशश्चापि भारत। तं तदा नानुपश्या
मः सैन्येन रजसावृतं। आददानं गजाश्वानां नृणां चायूंषि भारत। क्षणेन भूयः पश्यामः सूर्यं मध्यं दिने यथा। अभिमन्युं महाराज प्रतपंतं द्विषद्गणान्।
स वासवसमः संख्ये वासवस्यात्मजात्मजः। अभिमन्युर्महाराज सैन्यमध्ये व्यरोचत॥ ॥इति द्रोणपर्वण्यभिमन्युवधे॥ ॥ धृतराष्ट्रः॥ ॥बालमत्
यंतसुखिनं स्वबाहुबलदर्पितं। युद्धेषु कुशलं वीरं कुलपुत्रं तनुत्यजं। गाहमानमनीकानि सदश्वैस्तं त्रिहायनैः। अपि यौधिष्ठिरात्सैन्यात्कश्चिदन्व
पतद्बली॥ ॥संजय॥ ॥युधिष्ठिरो भीमसेनः शिखंडी सात्यकिर्यमौ। धृष्टद्युम्नो विराटश्च द्रुपदश्च सकेकयः। धृष्टकेतुश्च संरब्धो मत्स्याश्चाभ्यप
तन्रणे। तेनैव तु तथा यांतः पितरो मातुलैः सह। अभ्यद्रवन्परीप्संतो व्यूढानीकाः प्रहारिणः। तान्दृष्ट्वा द्रवतः शूरांस्त्वदीया विमुखाभवन्। ततस्तद्वि
मुखं दृष्ट्वा तव सूनोर्महद्बलं। जामाता तव तेजस्वी विष्टंभयिषुराद्रवत्। सैंधवस्य महाराज पुत्रो राजा जयद्रथः। स पुत्रगृद्धिनः पार्थान्सहसैन्या
न्वारयत्। उग्रधन्वा महेष्वासो दिव्यमस्त्रमुदीरयन्। वार्द्धक्षत्रिरुपासेधत्प्रवणादिव कुंजरः॥ ॥धृतराष्ट्रः॥ ॥अतिभारमहं मन्ये सैंधवे संजय
हितं। यदेकः पांडवान्सर्वान्पुत्रप्रेप्सून्न्यवारयत्। अत्यद्भुतमहं मन्ये बलं शौर्यं च सैंधवे। तस्य प्रब्रूहि मे वीर्यं कर्म चाग्र्यं महात्मनः। किं दत्तं हुतमिष्टं वा
किं सुतप्तं महत्तपः। सिंधुराजेन येनैकः पांडवान्समवारयत्॥ ॥संजय॥ ॥द्रौपदीहरणे यत्तद्भीमसेनेन निर्जितः। मानात्स तप्तवान्राजा वरार्थं सुम
हत्तपः। इंद्रियाणींद्रियार्थेभ्यः प्रियेभ्यः संनिवर्त्य सः। क्षुत्पिपासातपसहः कृशो धमनिसंततः। देवमाराधयच्छर्वं गृणन्ब्रह्म सनातनं। भक्तानुकंपी भग
वांस्तस्य चक्रे ततो दयां। स्वप्नांतेप्यथ चैवाह हरः सिंधुपतेः सुतं। वरं वृणीष्व प्रीतोस्मि जयद्रथ किमिच्छसि। एवमुक्तस्तु शर्वेण सिंधुराजो जयद्रथः। उवा
च प्रणतो रुद्रं प्रांजलिर्नियतात्मवान्। पांडवेयानहं संख्ये भीमवेगपराक्रमान्। वारयेयं रथेनैकः समस्तानिति भारत। एवमुक्तस्तु देवेशो जयद्रथ

मथाब्रवीत्॥७ ददामि ते वरं सौम्य विना पार्थं धनंजयं। वारयिष्यसि संग्रामे चतुरः पांडुनंदनान्। एवमस्त्विति देवेशमुक्त्वाबुध्यत पार्थिवः। स तेन वरदानेन दि
व्येनास्त्रबलेन च। एकः संवारयामास पांडवानामनीकिनीं। तस्य ज्यातलघोषेण क्षत्रियान्भयमाविशत्। परांस्तु तव सैन्यस्य हर्षः परमकोभवत्। दृ
ष्ट्वा तु क्षत्रिया भारं सैंधवे सर्वमाहितं॥७ उत्क्रुश्याभ्येयवनू राजन्येन यौधिष्ठिरं बलं॥ ॥इति श्रीद्रोणपर्वण्यभिमन्युवधे॥ ॥संजय उवाच॥ ॥यन्मां
पृच्छसि राजेंद्र सिंधुराजस्य विक्रमं। शृणु तत्सर्वमाख्यास्ये यथा पांडूनयोधयत्। तमूहुः वाजिनो वश्याः सैंधवाः साधुवाहिनः। विकुर्वाणा बृहंतो
श्वाः श्वसनोपमरंहसः। गंधर्वनगराकारं विधिवत्कल्पितं रथं। तस्याभ्यशोभयत्केतुर्वाराहो राजतो महान्। श्वेतच्छत्रपताकाभिश्चामरव्यजनेन
च। स बभौ राजलिंगैस्तैस्तारापतिरिवांबरे। मुक्तावज्रमणिस्वर्णैर्भूषितं यदयस्मयं। वरूथं विबभौ तस्य ज्योतिर्भिः खमिवावृतं। स विस्फार्य म
हच्चापं किरन्निषुगणान्बहून्। तत्खंडं पूरयामास यद्व्यदारयदर्जुनिः। स सात्यकिं त्रिभिर्बाणैरष्टाभिश्च वृकोदरं। धृष्टद्युम्नं तथा षष्ट्या विराटं दश
भिः शरैः। द्रुपदं पंचभिस्तीक्ष्णैः सप्तभिश्च शिखंडिनं। केकयान्पंचविंशत्या द्रौपदेयांस्त्रिभिस्त्रिभिः। युधिष्ठिरं तु सप्तत्या ततः शेषानपानुदत्। इषु
जालेन महता तदद्भुतमिवाभवत्। अथास्य शितपीतेन भल्लेनादिश्य कार्मुकं। चिच्छेद प्रहसन्राजा धर्मपुत्रः प्रतापवान्। अक्ष्णोर्निमेषमात्रेण
सोन्यदादाय कार्मुकं। विव्याध दशभिः पार्थं तांश्चैवान्यांस्त्रिभिस्त्रिभिः। तत्तस्य लाघवं ज्ञात्वा भीमो भल्लैस्त्रिभिस्त्रिभिः। धनुर्ध्वजं च छत्रं च क्षितौ क्षि
प्रमपातयत्। सोन्यदादाय बलवान्सज्यं कृत्वाथ कार्मुकं। भीमस्यापातयत्केतुं धनुरश्वांश्च मारिष। स हताश्वादवप्लुत्य छिन्नधन्वा रथोत्तमात्। सा
त्यकेराप्लुतो यानं गिर्यग्रमिव केसरी। ततस्त्वदीयाः संहृष्टाः साधु साध्विति वादिनः। सिंधुराजस्य तत्कर्म प्रेक्ष्याश्रद्धेयमद्भुतं। संक्रुद्धान्पांडवानेको
यद्धारास्त्रतेजसा। तत्तस्य कर्म भूतानि सर्वाण्येवाभ्यपूजयन्। सौभद्रेण हतैः पूर्वं तरां निहतैर्द्विपैः। पांडूनां दर्शितः पंथाः सैंधवेन निवारितः।
यतमानास्तु ते वीरा मत्स्यपांचालकेकयाः। पांडवाश्चान्वपद्यंत एकैकश्येन सैंधवं। यो यो हि यतते भेत्तुं द्रोणानीकं तवाहितः। तत्र तमेव वरं प्राप्य सैं
धवः प्रत्यवारयत्॥ ॥इति द्रोणपर्वण्यभिमन्युवधे॥ ॥संजय उवाच॥ ॥सैंधवेन निरुद्धेषु जयगृद्धिषु पांडुषु। सुघोरमभवद्युद्धं त्वदीयानां परैः

सह। अविश्यपार्थजोऽर्जुनिः सेनां सत्यसंधो दुरासदः। व्यक्षोभयत तेजस्वी मकरः सागरं यथा। तं तथा शरवर्षेण क्षोभयंतमरिंदमं। यथाप्रधानाः सौभद्रम
भ्ययुरथ सत्तमाः। तेषां तस्य च संम[illegible]दारुणः समपद्यत। सृजतां शरवर्षाणि प्रसक्तममितौजसां। रथव्रजेन संरुध्य तैरभिचेरथार्जुनिः। वृषसेनस्य य
तारं छित्वा विच्छेद कार्मुकं। तस्याविव्याध बलवान् शरैरश्वानजिह्मगैः। वातायमानैरथ तैरश्वैरपहृतो रणात्। तेनांतरेणाभिमन्योर्यंतापासारयद्रथं। रथ य
व्राजोस्ततो हृष्टाः साधु साध्विति चुक्रुशुः। तं सिंहमिव संक्रुद्धं प्रमथ्नंतं शरैररीन्। आरादायांतमभ्येत्य वसातीयोऽभ्ययाद्द्रुतं। सोभिमन्युं शरैः ष
ष्ट्या रुक्मपुंखैरवाकिरत्। अब्रवीच्च न मे जीवन् जीवतो युधि मोक्ष्यसे। तमयस्मयवर्माणमिषुणा दूरपातिना। विव्याध हृदि सौभद्रः स पपात व्य
सुः क्षितौ। वसातीयं हतं दृष्ट्वा क्रुद्धाः क्षत्रियपुंगवाः। परिवव्रुस्तदा राजंस्तव पौत्रं जिघांसवः। विस्फारयंतश्चापानि नानारूपाण्यनेकशः। तद्यु
द्धमभवद्घोरं सौभद्रस्यारिभिः सह। तेषां शरान् सेषुसनान् शरीराणि शिरांसि च। सकुंडलानि स्रग्वीणि क्रुद्धश्चिच्छेद फाल्गुनिः। सखड्गाः सांगुलित्रा
णाः सपृष्ठिशपरश्वधाः। अपश्यंत भुजाश्छिन्ना हेमाभरणभूषिताः। स्रग्भिराभरणैर्वस्त्रैः पतितैश्च महाभुजैः। वर्मभिश्चर्मभिर्हारैर्मुकुटैश्छत्रचामरैः।
अपस्करैरधिष्ठानैरीषादंडकबंधुरैः। अक्षैर्विमथितैश्चक्रैर्भग्नैश्च बहुधा युगैः। अनुकर्षैः पताकाभिस्तथा सारथिवाजिभिः। रथैश्च भग्नैर्नागैश्च ह
तैः कीर्णाभवन्मही। निहतैः क्षत्रियैः शूरैर्नानाजनपदेश्वरैः। जयगृध्नैर्वृता भूमिर्दारुणा समपद्यत। दिशो विचरतस्तस्य सर्वाश्च प्रदिशस्तथा। रणेभि
मन्योः क्रुद्धस्य रूपमंतरधीयत। कांचनं यद्यदस्यासीद्वर्म चाभरणानि च। धनुषश्च शराणां च तदापश्याम केवलं। तं तदा नाशकत्कश्चिच्चक्षुर्भ्यामभि
वीक्षितुं। आददानं शरैर्योधान्मध्ये सूर्यमिवस्थितं॥ ॥इति द्रोणपर्वण्यभिमन्युवधो॥ ॥४७॥ ॥संजय उवाच॥ आददानस्तु शूराणामायूंष्य
भवदार्जुनिः। अंतकः सर्वभूतानां प्राणान् काल इवागते। स शक्र इव विक्रांतः शक्रसूनोः सुतो बली। अभिमन्युस्तदानीकं लोडयन् समदृश्यत। प्रवि
श्यैव तु राजेंद्र क्षत्रियेंद्रांतकोपमः। सत्यश्रवसमादत्त व्याघ्रो मृगमिवोल्बणः। स सत्यश्रवसि व्याक्षिप्ते त्वरमाणा महारथाः। प्रगृह्य विपुलं शस्त्रमभिमन्यु
मुपाद्रवन्। अहं पूर्वमहं पूर्वमिति क्षत्रियपुंगवाः। स्पर्धमानाः समाजग्मुर्जिघांसंतोऽर्जुनात्मजं। क्षत्रियाणामनीकानि प्रद्रुतान्यभिधावतां। जग्रासति

मिरासाधरुक्मस्यमिवार्णवे।येकेचनागतास्तस्यसमीपमपलायिनः।नतेष्वतिनिवर्तंतिसमुद्रादिवसिंधवः।महाग्राहगृहीतेववातवेगभयार्दिता।
समकंपतसासेनाविभ्रष्टानौरिवार्णवे।अथरुक्मरथोनाममद्रेश्वरसुतोबली।त्रस्तामाश्वासयत्सेनामत्रस्तोवाक्यमब्रवीत्।अलंत्रासेनवःशूरा
नैषकश्चिन्मयिस्थिते।अहमेनंग्रहिष्यामिजीवग्राहमसंशयः।एवमुक्त्वातुसौभद्रमभिदुद्राववीर्यवान्।सुकल्पितेनोह्यमानःस्यंदनेनविराजता।
सोभिमन्युंत्रिभिर्बाणैर्विद्ध्वावक्षस्यथानदत्।त्रिभिश्चदक्षिणेबाहौसव्येचनिशितैस्त्रिभिः।सतस्येष्वसनंछित्वाफाल्गुनिःसव्यदक्षिणौ।भुजौ
शिरश्चतत्स्वक्षिक्षितौक्षिप्रमपातयत्।दृष्ट्वारुक्मरथंरुग्णंपुत्रंशल्यस्यमानिनं।जीवग्राहंजिघृक्षंतंसौभद्रेणयशस्विना।संग्रामदुर्मदाराजन्रा
जपुत्राःप्रहारिणः।वयस्याःशल्यपुत्रस्यसुवर्णविकृतध्वजाः।तालमात्राणिचापानिविकर्षंतोमहाबलाः।आर्जुनिंशरवर्षेणसमंतात्पर्यवारयन्।
शूरैःशिक्षाबलोपेतैस्तरुणैरत्यमर्षणैः।दृष्ट्वैकंसमरेशूरंसौभद्रमपराजितं।छाद्यमानंशरव्रातैर्हृष्टोदुर्योधनोभवत्।वैवस्वतस्यभवनंगतंह्येनमम
न्यत।सुवर्णपुंखैरिषुभिर्नानालिंगैस्तेजनैः।अदृश्यमार्जुनिंचक्रुर्निमेषात्तेनृपात्मजाः।ससूताश्वध्वजंतस्यस्यंदनंतंचमारिष।आचितंसमप
श्यामश्वाविधंशललैरिव।सगाढविद्धःक्रुद्धश्चतोत्त्रैर्गजइवार्दितः।गांधर्वमस्त्रमायच्छद्रथमायांचभारत।अर्जुनेनतपस्तप्त्वागंधर्वेभ्योयदाहृतं।
तुंबुरुप्रमुखेभ्योवैतेनामोहयताहितान्।एकधाशतधाराजन्दृश्यतेस्मसहस्रधा।अलातचक्रवत्संख्येक्षिप्रमस्त्राणिदर्शयन्।रथचर्यास्त्रमायाभि
र्मोहयित्वापरंतप।बिभेदशतधाराजन्शरीराणिमहीक्षितां।प्राणाःप्राणभृतांसंख्येप्रेषितानिशितैःशरैः।राजन्प्रापुरमुंलोकंशरीराण्यवनिंययुः।ध
नूंष्यश्वान्नियंतॄंश्चध्वजान्बाहूंश्चसांगदान्।शिरांसिचशितैर्बाणैस्तेषांचिच्छेदफाल्गुनिः।चूतारामोयथाभग्नःपंचवर्षःफलोपगः।राजपुत्रशतंतद्व
त्सौभद्रेणनिपातितं।क्रुद्धाशीविषसंकाशान्सुकुमारान्सुखोचितान्।एकेननिहतान्दृष्ट्वाभीतोदुर्योधनोभवत्।रथिनःकुंजरानश्वान्पदातीनभिमृद्नतः।
दृष्ट्वादुर्योधनःक्षिप्रमुपायात्तममर्षितः।तयोःक्षणमिवापूर्णःसंग्रामःसमपद्यत।अथाभवत्तेविमुखःपुत्रःशरशताहतः॥ ॥इतिद्रोणपर्वण्यभिम
न्युवधे॥४५॥धृतराष्ट्रउ॥ ॥यथावदसिमेसूतएकस्यबहुभिःसह।संग्रामंतुमुलंघोरंजयंचैवमहात्मनः।अश्रद्धेयमिवाश्चर्यंसौभद्रस्याथविक्रमं।

किंतु नात्यद्भुतं तेषां येषां धर्मोऽयं पाण्डव। दुर्योधने च विमुखे राजपुत्रशते हते। सौभद्रे प्रति पत्तिं कां प्रसपद्यंत मामकाः॥ ॥संजय॥ ॥संभुग्नास्याश्च
लन्नेत्राः प्रस्विन्ना लोमहर्षणाः। पलायनकृतोत्साहा निरुत्साहा द्विषज्जये। हतान्भ्रातॄन्पितॄन्पुत्रान्सुहृत्संबंधिबांधवान्। उत्सृज्योत्सृज्य संजग्मुस्त्व
रयंतो हयद्विपान्। तान्प्रभग्नांस्तथा दृष्ट्वा द्रोणो द्रौणिर्बृहद्बलः। कृपो दुर्योधनः कर्णः कृतवर्माथ सौबलः। अभिदुद्रुवुः संक्रुद्धाः सौभद्रमपराजितं। ते
तु पौत्रेण ते राजन्प्रायशो विमुखीकृताः। एकस्तु सुखसंवृद्धो बाल्याद्दर्पाच्च निर्भयः। इष्वस्त्रविन्महातेजा लक्ष्मणोऽर्जुनिमभ्यपात्। तमन्वगेवास्य पिता
पुत्रगृद्धी न्यवर्तत। अनु दुर्योधनं चान्ये न्यवर्तंत महारथाः। तं तेऽभिषिषिचुर्बाणैर्मेघा गिरिमिवांबुभिः। स तु तान्प्रममाथैको विष्वग्वातो यथांबुदान्।
पौत्रं तु तव दुर्धर्षं लक्ष्मणं प्रियदर्शनं। पितुः समीपे तिष्ठंतं शूरमुद्यतकार्मुकं। अत्यंतसुखसंवृद्धं धनेश्वरसुतोपमं। आससाद रणे कार्ष्णिर्मत्तो मत्त
मिव द्विपं। लक्ष्मणेन तु संगम्य सौभद्रः परवीरहा। शरैः सुनिशितैस्तीक्ष्णैर्बाह्वोरुरसि चार्पयत्। संक्रुद्धो वै महाराज दंडाहत इवोरगः। पौत्रस्तव महारा
जतव पौत्रमभाषत। सुदृष्टः क्रियतां लोकोऽमुं लोकं गमिष्यसि। पश्यतां बांधवानां त्वां नयामि यमसादनं। एवमुक्त्वा ततो भल्लं सौभद्रः परवीरहा। उ
द्बबर्ह महाबाहुर्निर्मुक्तोरगसन्निभं। स तस्य भुजनिर्मुक्तो लक्ष्मणस्य सुदर्शनं। सुनसं सुभ्रु केशांतं शिरो हार्षीत्सकुंडलं। लक्ष्मणं निहतं दृष्ट्वा हाहे
त्युच्चुकुशुर्जनाः। ततो दुर्योधनः क्रुद्धः प्रिये पुत्रे निपातिते। हतैनमिति चुक्रोश क्षत्रियान्क्षत्रियर्षभः। ततो द्रोणः कृपः कर्णो द्रोणपुत्रो बृहद्बलः। कृतव
र्मा च हार्दिक्यः षड्रथाः पर्यवारयन्। तांस्तु विद्ध्वा शितैर्बाणैर्विमुखीकृत्य चार्जुनिः। वेगेनाभ्यपतत्क्रुद्धः सैंधवस्य महद्बलं। आवव्रुस्तस्य पंथानं गजा
नीकेन दंशिताः। कलिंगाश्च निषादाश्च क्राथपुत्रश्च वीर्यवान्। तत्प्रसक्तमिवात्यर्थं युद्धमासीद्विशांपते। ततस्तत्कुंजरानीकं व्यधमद्धृष्टमार्जुनिः। यथा
वायुर्नित्यगतिर्जलदांश्छतशोंऽबरे। ततः क्राथः शरव्रातैरार्जुनिं समवाकिरत्। अथेतरे संनिवृत्ताः पुनर्द्रोणमुखा रथाः। परमास्त्राणि तन्वानाः सौभद्र
मभिदुद्रुवुः। तान्निवार्यार्जुनिर्बाणैः क्राथपुत्रमथार्दयत्। शरौघेणाप्रमेयेण त्वरमाणो जिघांसया। सधनुर्बाणकेयूरौ बाहू समुकुटं शिरः। सच्छत्रं ध्वज
यंतारं रथं वाजिनोऽप्यपातयत्। कुलशीलश्रुतिबलैः कीर्त्या चास्त्रबलेन च। युक्ते तस्मिन्हते वीराः प्रायशो विमुखाऽभवन्॥ ॥इति द्रोणपर्वण्यभिमन्युवधे॥

द्रो०प०
४९

॥ ॥धृतराष्ट्र उ॥ ॥तथा प्रविष्टं तरुणं सौभद्रमपराजितं। कुलानुरूपं कुर्वाणं संग्रामेष्वपलायिनं। आजानेयैः सुबलिभिर्युक्तमश्वैस्त्रिहायनैः। प्लवमानमिवाका-
शे के शूराः समवारयन्॥ ॥संजय उ॥ ॥अभिमन्युः प्रविश्यैव तावकान्निशितैः शरैः। अकरोत्पार्थिवान्सर्वान्विमुखान्पांडुनंदनः। तं तु द्रोणः कृपः
कर्णो द्रौणिश्च सबृहद्बलः। कृतवर्मा च हार्दिक्यः षड्रथाः प्रत्यवारयन्। दृष्ट्वा तु सैंधवे भारमतिमात्रं समाहितं। सैन्यं तव महाराज युधिष्ठिरमुपाद्रवत्।
सौभद्रमितरे वीरमभ्यवर्षन्शरांबुभिः। तालमात्राणि चापानि विकर्षंतो महाबलाः। तांस्तु सर्वान्महेष्वासान्सर्वविद्यासु निष्ठितान्। व्यष्टंभयद्रणे
बाणैः सौभद्रः परवीरहा। द्रोणं पंचाशता विद्ध्वा विंशत्या च बृहद्बलं। अशीत्या कृतवर्माणं कृपं षष्ट्या शिलीमुखैः। रुक्मपुंखैर्महावेगैराकर्णसमनोदितैः।
अविध्यद्दशभिर्बाणैरश्वत्थामानमार्जुनिः। स कर्णं कर्णिना कर्णे पीतेन निशितेन च। फाल्गुनिर्द्विषतां मध्ये [illegible] न निशितेन च। विव्याध परमेषुणा। पात-
यित्वा कृपस्याश्वांस्तथोभौ पार्ष्णिसारथी। अथैनं दशभिर्बाणैः प्रत्यविध्यत्स्तनांतरे। ततो वृंदारकं वीरं कुरूणां कीर्तिवर्द्धनं। पुत्राणां तव वीराणां पश्यतामव-
धीद्बली। तं द्रौणिः पंचविंशत्या क्षुद्रकाणां समार्पयत्। वरं वरममित्राणामारुजंतमभीतवत्। स तु बाणैः शितैस्तूर्णं प्रत्यविध्यत मारिष। पश्यतां धार्तरा-
ष्ट्राणामश्वत्थामानमार्जुनिः। षष्ट्या शराणां तं द्रौणिस्तिग्मधारैः सुतेजनैः। उग्रैर्नाकंपयद्विद्ध्वा मैनाकमिव पर्वतं। स तु द्रौणिं त्रिसप्तत्या हेमपुंखैरजिह्मगैः। प्रत्य-
विध्यन्महातेजा बलवानपकारिणं। तस्मिन्द्रोणो बाणशतं पुत्रगृद्धी न्यपातयत्। अश्वत्थामा तथाष्टौ च परीप्सन्पितरं रणे। कर्णो द्वाविंशतिं भल्लान्कृ-
तवर्मा च विंशतिं। बृहद्बलस्तु पंचाशत्कृपः शारद्वतो दश। तांस्तु प्रत्यवधीत्सर्वान्दशभिर्दशभिः शरैः। तैरर्द्यमानः सौभद्रः सर्वतो निशितैः शरैः। तं कोशला-
नामधिपः कर्णिनाताडयद्धृदि। स तस्याश्वान्ध्वजं चापं सूतं चापातयत्क्षितौ। अथ कोशलराजस्तु विरथः खड्गचर्मधृक्। इयेष फाल्गुनेः कायाच्छिरो हर्तुं स-
कुंडलं। स कोशलानामधिपं राजपुत्रं बृहद्बलं। हृदि विव्याध बाणेन स भिन्नहृदयोऽपतत्। बभंज च सहस्राणि दश राज्ञां महात्मनां। सृजतामशिवा वाचः ख-
ड्गकार्मुकधारिणां। तथा बृहद्बलं हत्वा सौभद्रो व्यचरद्रणे। विष्टंभयन्महेष्वासो योधांस्तव शरांबुभिः॥ ॥इति द्रोणपर्वण्यभिमन्युवधे [illegible]॥ संजय उ॥ ॥
स कर्णं कर्णिना कर्णे पुनर्विव्याध फाल्गुनिः। शरैः पंचाशता चैनमविध्यत्कोपयन्भृशं। प्रतिविव्याध राधेयस्तावद्भिरथ तं पुनः। स तैराचिततसर्वां-

त३

राम
४९

गोवक्त्रशोभत भारत। कर्णश्चापकरो क्रुद्धो रुधिरोत्पीडवाहिनं। कर्णोपि विद्धो भो भ्भरः शरैश्चित्रोस्त्रलाघुतः। तावुभौ शरचित्रांगौ रुधिरेण समुक्षितौ। ब
भूवतुर्महात्मानौ पुष्पिताविव किंशुकौ। अथ कर्णस्य सचिवान् षट् शूरांश्चित्रयोधिनः। साश्वसूतध्वजरथान्सौभद्रो निजघान ह। तथेतरान्महेष्वा
सान्दशभिर्दशभिः शरैः। प्रत्यविध्यदसंभ्रांतस्तदद्भुतमिवाभवत्। मागधस्य तथापुत्रं हत्वा षड्भिरजिह्मगैः। साश्वं ससूतं तरुणमश्वकेतुमपातय
त्। मार्त्तिकावतिकं भोजं ततः कुंजरकेतनं। क्षुरप्रेण समुन्मथ्य ननाद विसृजञ्छरान्। तस्य दौःशासनिर्विद्ध्वा चतुर्भिश्चतुरो हयान्। सूतमेकेन वि
व्याध दशभिश्चार्जुनात्मजं। ततो दौःशासनिः कार्ष्णिर्विद्ध्वा सप्तभिराशुगैः। संरंभाद्रक्तनयनो वाक्यमुच्चैरथाब्रवीत्। पिता तवाहवं त्यक्त्वा गतः कापुरु
षो यथा। दिष्ट्या त्वमद्य जानीषे योगं न त्वद्य मोक्ष्यसे। एतावदुक्त्वा वचनं कर्मारपरिमार्जितं। नाराचं विससर्जास्मै तं द्रौणिस्त्रिभिराच्छिनत्। तस्यार्जुनि
र्ध्वजं छित्वा शल्यं त्रिभिरताडयत्। तं शल्यो नवभिर्बाणैर्गार्ध्रपत्रैरताडयत्। हृदि संभ्रांतवद्राजंस्तदद्भुतमिवाभवत्। तस्यार्जुनिर्ध्वजं छित्वा हत्वोभौ पा
र्ष्णिसारथी। तं विव्याधायसैः षड्भिः सोपाक्रामद्रथांतरं। शत्रुंजयं चंद्रकेतुं मेघवेगं सुवर्चसं। सूर्यभासं च पंचैतान्हत्वा विव्याध सौबलं। ततो बलस्त्रिभि
र्विद्ध्वा दुर्योधनमथाब्रवीत्। सर्व एनं प्रमथ्नीमः पुरैकैकं हिनस्ति नः। अथाब्रवीत्तदा द्रोणं कर्णो वैकर्तनो रणे। पुरा सर्वान्प्रमथ्नाति ब्रूह्यस्य वधमाशु नः।
ततो द्रोणो महेष्वासः सर्वांस्तान्प्रत्यभाषत। अस्ति वास्यांतरं किंचित्कुमारस्याथ पश्यत। अन्वस्य पितरं ह्यद्य चरतः सर्वतो दिशं। शीघ्रतां नरसिंहस्य
पांडवेयस्य पश्यत। धनुर्मंडलमेवास्य रथमार्गेषु दृश्यते। संदधानस्य विशिखाञ्शीघ्रं चैव विमुंचतः। आरुजन्नपि मे प्राणान्मोहयन्नपि सायकैः। प्र
हर्षयति मां भूयः सौभद्रः परवीरहा। अति मां नंदयत्येष सौभद्रः परवीरहा। अंतरं यस्य संरब्धा न पश्यंति महारथाः। अस्यतो लघुहस्तस्य दिशः सर्वा
महेषुभिः। न विशेषं प्रपश्यामि रणे गांडीवधन्वनः। अथ कर्णः पुनर्द्रोणमाहार्जुनिशराहतः। स्थातव्यमिति तिष्ठामि पीड्यमानोभिमन्युना। तेज
स्विनः कुमारस्य शराः परमदारुणाः। क्षिण्वंति हृदयं मेद्य घोराः पावकतेजसः। तमाचार्योब्रवीत्कर्णं शनकैः प्रहसन्निव। अभेद्यमस्य कवचं युवा चा
स्य पराक्रमः। उपदिष्टा मया चास्य पितुः कवचधारणा। तामेष निखिलां वेत्ति ध्रुवं परपुरंजयः। शक्यं नास्य धनुश्छेत्तुं ज्यां च बाणैः समाहितैः। अभी

द्रो॰प॰
५०

पृष्ठग्रहयांश्चैवतथोभौपार्ष्णिसारथी।एतत्कुरुमहेष्वासराधेययदिशक्यसे।अथैनंविमुखीकृत्यपश्चात्प्रहरणंकुरु।सधनुष्कोनशक्योयमपिजेतुंसुरासुरैः।वि
रथंविधनुषंचैवकुरुष्वैनंयदीच्छसि।तदाचार्यवचःश्रुत्वाकर्णोवैकर्तनस्त्वरन्।अस्यतोलघुहस्तस्यपृषत्कैर्धनुराछिनत्।अश्वानस्यावधीद्भोजोगौतमःपार्ष्णि
सारथी।शेषास्तुछिन्नधन्वानंशरवर्षैरवाकिरन्।त्वरमाणास्त्वराकालेविरथंषण्महारथाः।शरवर्षैरकरुणाबालमेकमवाकिरन्।सछिन्नधन्वाविरथः
स्वधर्ममनुपालयन्।खड्गचर्मधरःश्रीमानुत्पपातविहायसा।मार्गैःसकौशिकाद्यैश्चलाघवेनबलेनच।आर्जुनिर्व्यचरद्व्योम्निभृशंवैपक्षिराडिव।मय्येवनिपत
त्येषःसासिरितिसूर्ध्वदृष्टयः।विव्यधुस्तंमहेष्वासंसमरेछिद्रदर्शिनः।तस्यद्रोणोच्छिनन्मुष्टौखड्गंमणिमयत्सरुं।क्षुरप्रेणमहातेजास्त्वरमाणःसपत्नजि
त्।राधेयोनिशितैर्बाणैर्व्यधमच्चर्मचोत्तमं।व्यसिचर्मेषुपूर्णांगःसोंतरिक्षात्पुनःक्षितिं।आस्थितश्चक्रमुद्यम्यद्रोणंक्रुद्धोभ्यधावत।सचक्ररेणुज्वल
शोभितांगोवभावतीवोज्ज्वलचक्रपाणिः।रणेभिमन्युःक्षणमाससरौद्रः सवासुदेवानुकृतिंप्रकुर्वन्।स्रुतरुधिरकृतैकरागवक्त्रोभृकुटिपुटाकुटि
लोतिसिंहनादः।प्रभुरमितबलोरणेभिमन्युर्नृपवरमध्यगतोभृशंव्यराजत्॥ ॥इतिद्रोणपर्वण्यभिमन्युवधे॥४७॥ संजयउवाच॥ ॥विष्णोःस्व
सुर्नंदिकरःसविष्ण्वायुधभूषणः।रराजातिरथःसंख्येजनार्दनइवापरः।मारुतोद्धूतकेशांतमुद्यतासिवरायुधं।वपुःसमीक्ष्यपृथ्वीशाद्दुःसमीक्ष्यंसुरै
रपि।तच्चक्रंभृशमुद्विग्नाःसंचिच्छिदुरनेकधा।महारथस्ततःकार्ष्णिःसंजग्राहमहागदां।विधनुःस्यंदनासिस्तैर्विचक्रश्चारिभिःकृतः।अभिमन्युर्गदापाणि
रश्वत्थामानमार्दयत्।सगदामुद्यतांदृष्ट्वाज्वलंतीमशनीमिव।अपाक्रामद्रथोपस्थाद्विक्रमांस्त्रीन्नरर्षभः।तस्याश्वान्गदयाहत्वातथोभौपार्ष्णिसारथी।श
राचितांगःसौभद्रःश्वाविद्वत्समदृश्यत।ततःसुबलदायादंकालिकेयमपोथयत्।जघानचास्यानुचरान्गांधारान्सप्तसप्ततिं।पुनर्ब्रह्मवसातीयान्जघान
रथिनोदश।केकयानांरथान्सप्तहत्वाचदशकुंजरान्।दौःशासनिरथंसाश्वंगदयासमपोथयत्।दौःशासनिस्तुसंक्रुद्धोगदामुद्यम्यमारिष।अभिदुद्रावसौभ
द्रंतिष्ठतिष्ठेतिचाब्रवीत्।तावुद्यतगदौवीरावन्योन्यवधकांक्षिणौ।भ्रातृव्यौसंप्रजह्रातेपुरेवत्र्यंबकांधकौ।तावन्योन्यंगदाग्राभ्यामाहत्यपतितौक्षितौ।इंद्र
ध्वजाविवोत्सृष्टौरणमध्येपरंतपौ।दौःशासनिरथोत्थायकुरूणांकीर्तिवर्धनः।उत्तिष्ठमानंसौभद्रंगदयामूर्ध्न्यताडयत्।गदावेगेनमहताव्यायामेन
चमोहितः।विचेतान्यपतद्भूमौसौभद्रःपरवीरहा।एवंविनिहतोराजन्नेकोबहुभिराहवे।क्षोभयित्वाचमूंसर्वांनलिनीमिवकुंजरः।अशोभतहतोवीरो
मोहि

राम
५०
ततो

व्याधैर्वनगजो यथा। तं तथा पतितं वीरं तावकाः पर्यवारयन्। दावं दग्ध्वा यथा शान्तं पावकं शिशिरात्यये। विमृद्य तरुशृङ्गाणि सन्निवृत्तमिवानिलं। अस्तं गत
मिवादित्यं तप्त्वा भारतवाहिनीं। उपप्लुतं यथा सोमं संशुष्कमिव सागरं। पूर्णचन्द्राभवदनं काकपक्षवृताक्षकं। तं भूमौ पतितं दृष्ट्वा तावकास्ते महारथाः। मुदा
परमया युक्ताश्चुक्रुशुः सिंहवन्मुहुः। आसीत्परमको हर्षस्तावकानां विशांपते। इतरेषां तु वीराणां नेत्रेभ्यः प्रापतज्जलं। अन्तरिक्षे च भूतानि प्राक्रोशन्त विशां
पते। दृष्ट्वा निपतितं वीरं च्युतं चन्द्रमिवाम्बरात्। द्रोणकर्णमुखैः षड्भिर्धार्तराष्ट्रैर्महारथैः। एकोऽयं निहतः शेते नैष धर्मो मतो हि नः। तस्मिंस्तु निहते वीरे बह्वशो
भत मेदिनी। द्यौर्यथा चन्द्रसूर्याभ्यां नक्षत्रगणमालिनी। रुक्मपुङ्खैश्च संपूर्णा रुधिरौघपरिप्लुता। उत्तमाङ्गैश्च शूराणां भ्राजमानैः सकुण्डलैः। विचित्रैश्च प
रिस्तोमैः पताकाभिश्च संहता। चामरैश्च कुथाभिश्च प्रविद्धैश्चाम्बरोत्तमैः। रथाश्वनरनागानामलंकारैश्च सुप्रभैः। खड्गैः सुनिशितैः पीतैर्निर्मुक्तैर्भुजगैरि
व। चापैश्च विविधैश्छिन्नैः शक्त्यृष्टिप्रासकम्पनैः। विविधैश्चायुधैश्चान्यैः संवृता भूरशोभत। वाजिभिश्चापि निर्जीवैः श्वसद्भिः शोणितोक्षितैः। सारोहैर्वि
षमा भूमिः सौभद्रेण निपातितैः। साङ्कुशैः समहामात्रैः सवर्मायुधकेतुभिः। पर्वतैरिव विध्वस्तैर्विशिखैर्मथितैर्गजैः। पृथिव्यामनुकीर्णैश्च व्यश्वसारथि
योधिभिः। हृदैरिव प्रक्षुभितैर्हतनागै रथोत्तमैः। पदातिसंघैश्च हतैर्विविधायुधभूषणैः। भीरूणां त्रासजननी घोररूपाभवन्मही। तं दृष्ट्वा पतितं भूमौ च
न्द्रार्कसदृशद्युतिं। तावकानां परा प्रीतिः पाण्डूनां चाभवद्व्यथा। अभिमन्यौ हते राजन् शिशुकेऽप्राप्तयौवने। संप्राद्रवच्चमूः सर्वा धर्मराजस्य पश्यतः। दीर्यमाणं बलं
दृष्ट्वा सौभद्रे विनिपातिते। अजातशत्रुस्तान्वीरानिदं वचनमब्रवीत्। स्वर्गमेष गतः शूरो यो हतो न पराङ्मुखः। संस्तम्भयत मा भैष्ट विजेष्यामो रणे रिपून्। इत्येव
स महातेजा दुःखितेभ्यो महाद्युतिः। धर्मराजो युधां श्रेष्ठो ब्रुवन्दुःखमपानुदत्। युद्धे ह्याशीविषाकारान्राजपुत्रान्रणे रिपून्। पूर्वं निहत्य संग्रामे पश्चादार्जुनि
रभ्यगात्। हत्वा दशसहस्राणि कौशल्यं च महारथं। कृष्णार्जुनसमः कार्ष्णिः शक्रलोकं गतो ध्रुवं। रथाश्वनरमातङ्गान्विनिहत्य सहस्रशः। अवितृप्तः स संग्रा
माद्दशोच्यः पुण्यकर्मकृत्। गतः पुण्यकृतां लोकान् शाश्वतान्पुण्यनिर्जितान्॥ ॥इति द्रोणपर्वण्यभिमन्युवधे॥ [illegible] ॥संजय उवाच॥ ॥वयं तु प्रवरं हत्वा
तेषां तैः शरपीडिताः। निवेशायाभ्युपायाम सायाह्ने रुधिरोक्षिताः। निरीक्षमाणास्तु वयं परे चायोधनं शनैः। अपयाता महाराज ग्लानिं प्राप्ता विचेतसः।

द्रो·प·
५१

ततोनिशायादिवसस्यचाशिवः शिवारुतैः संधिरवर्तताद्भुतः। कुशेशयापाण्डुनिभे दिवाकरे विलंबमाने स्तमुपेत्य पर्वतं। वरासिशक्त्यृष्टिवरूथचर्मणां
विभूषणानां च समुत्क्षिपन्प्रभाः। दिवं च भूमिं च समानयन्निव प्रियां तनुं भानुरुपैति पावकं। महाभ्रकूटाचलशृंगसन्निभैर्गजैरनेकैरिववज्रपातितैः।
सवैजयंत्यंकुशवर्मयंतृभिर्निपातितैर्नष्टगतिश्चिता क्षितिः। हतेश्वरैश्चूर्णितपत्त्युपस्करैर्हताश्वसूतैर्विपताककेतुभिः। महारथैर्भूः शुशुभे विचू
र्णितैः पुरैरिवामित्रहतैर्नराधिप। रथाश्ववृंदैः सहसादिभिर्हतैः प्रविद्धभांडाभरणैः पृथग्विधैः। निरस्तजिह्वादशनांत्रलोचनैर्धराबभौ घोरवि
रूपदर्शना। प्रविद्धवर्माभरणाम्बरायुधा विपन्नहस्त्यश्वरथानुगा नराः। महार्हशय्यास्तरणोचिताः सदा क्षिताव नाथा इव शेरते हताः। अतीव हृ
ष्टाः श्वशृगालवायसा बकाः सुपर्णाश्च वृकास्तरक्षवः। वयांस्यसृक्पान्यथ रक्षसां गणाः पिशाचसंघाश्च सुदारुणा रणे। त्वचो विनिर्भिद्य पिब
न्वसामसृक्तथैव मज्जाः पिशितानि चाश्नुवन्। वपां विलुंपंति हसंति गांति च प्रकर्षमाणाः कुणपान्यनेकशः। शरीरसंघातवहा ह्यसृग्जला
रथोडुपा कुंजरशैलसंकटा। मनुष्यशीर्षोपलमांसकर्दमा प्रविद्धनानाविधशस्त्रमालिनी। भयावहा वैतरणीव दुस्तरा प्रवर्तिता योधवरैस्त
दा नदी। उवाह मध्येन रणाजिरं भृशं भयं वहा जीवमृतप्रवाहिनी॥ पिबंति चाश्नंति च यत्र दुर्दशाः पिशाचसंघास्तु नदंति भैरवाः। सुनंदि
ताः प्राणभृतां भयंकराः समानभक्षाः श्वशृगालपक्षिणः। तथा तदायोधनमुग्रदर्शनं निशामुखे पितृपतिराष्ट्रवर्धनं। निरीक्षमाणाः शनकै
र्जहुर्नराः समुत्थितान्नृत्यकबंधसंकुलं। अपेतविध्वस्तमहार्हभूषणं निपातितं शक्रसमं महाबलं। रणेभिमन्युं ददृशुस्तदा जना यथाध्वरे
हव्यमसदसीव पावकं॥ ॥इति द्रोणपर्वण्यभिमन्युवधः॥ ५१॥ संजय उवाच॥ ॥हते तस्मिन्महावीर्ये सौभद्रे रथयूथपे। विमुक्तरथसन्नाहाः
सर्वे निक्षिप्तकार्मुकाः। उपोपविष्टा राजानं परिवार्य युधिष्ठिरं। तदेव युद्धं ध्यायंतः सौभद्रगतमानसाः। ततो युधिष्ठिरो राजा स विललाप सु
दुःखितः। अभिमन्यौ हते वीरे भ्रातुः पुत्रे महारथे। द्रोणानीकमसंबाधं मम प्रियचिकीर्षया। भित्वा व्यूहं प्रविष्टोसौ गोमध्यमिव केसरी। यस्य

राम
५१

श्च राम हेष्वासाः प्रत्यनीकगता रणे। प्रभग्ना विनिवर्त्तंते कृतास्त्रा युद्धदुर्मदाः। प्रत्यंतं शत्रुरस्माकं येन दुःशासनः शरैः। क्षिप्रं ह्यभिमुखो मे रैवः ख्वे वि संज्ञो
विमुखीकृतः। सुतीर्त्वा दुस्तरं वीरो द्रोणानीकमहार्णवं। आप्य दौःशासनिं कार्ष्णिर्गतो वैवस्वतक्षयं। कथं द्रक्ष्यामि कौंतेयं सौभद्रे निहतेर्ज्जुनं। सुभ
द्रां वा महाभागां प्रियं पुत्रमपश्यती। किं स्विद्वयमपेतार्थमश्लिष्टमसमंजसं। तावुभौ प्रतिवक्ष्यामो हृषीकेशधनंजयौ। अहमेव सुभद्रायाः के
शवार्जुनयोरपि। प्रियकामो जयाकांक्षी कृतवानिदमप्रियं। न लुब्धो बुध्यते दोषान्लोभान्मोहात्प्रवर्त्तते। मधुलिप्सुर्हि नापश्यं प्रपातमहमीह
शं। यो हि भोज्ये पुरस्कार्यो यानेषु शयनेषु च। भूषणेषु च सोस्माभिर्बालो युधि पुरस्कृतः। कथं हि बालस्तरुणो युद्धानामविशारदः। सदश्व इव
संबाधे विषमे क्षेममर्हति। नो चेद्धि वयमप्येनं महीमनुशयीमहि। बीभत्सोः कोपदीप्तस्य दग्धाः कृपणचक्षुषा। अलुब्धो मतिमान्ह्रीमान्क्षमा
वान्रूपवान्बली। वपुष्मान्मानकृद्वीरः प्रियः सत्यपराक्रमः। यस्य श्लाघंति विबुधाः कर्माण्यूर्जितकर्मणः। निवातकवचाञ्जघ्ने कालकेयांश्च वीर्य
वान्। महेंद्रशत्रवो येन हिरण्यपुरवासिनः। अक्ष्णोर्निमेषमात्रेण पौलोमाः सगणा हताः। परेभ्योप्यभयार्थिभ्यो यो ददात्यभयं विभुः। तस्या
स्माभिर्न शकितस्त्रातुमप्यात्मजो बली। भयं तु सुमहत्प्राप्तं धार्त्तराष्ट्रान्महाबलात्। पार्थः पुत्रवधात्क्रुद्धः कौरवान्शोषयिष्यति। क्षुद्रः क्षुद्रसहाय
श्च स्वपक्षक्षयकारकः। व्यक्तं दुर्योधनो दृष्ट्वा शोचन्नेहास्यति जीवितं। न मे जयः प्रीतिकरो न राज्यं न चामरत्वं न सुरैः सलोकता। इमं समीक्ष्या
प्रतिवीर्यपौरुषं निपातितं देववरात्मजात्मजं॥ ॥इति द्रोणपर्वण्यभिमन्युवधे॥५१॥ संजय उ०॥ ॥अथैनं विलपंतं च कुंतीपुत्रं युधिष्ठिरं।
कृष्णद्वैपायनस्तत्र आजगाम महानृषिः। अर्चयित्वा यथान्यायमुपविष्टं युधिष्ठिरः। अब्रवीच्छोकसंतप्तो भ्रातुः पुत्रवधेन च। अधर्मयुक्तै
र्बहुभिः परिवार्य महारथैः। युध्यमानो महेष्वासः सौभद्रो निहतो रणे। बालश्च बालबुद्धिश्च सौभद्रः परवीरहा। अनुपायेन संग्रामे युध्यमा
नो विशेषतः। मया प्रोक्तः स संग्रामे द्वारं संजनयस्व नः। प्रविष्टेभ्यंतरे तस्मिन्सैंधवेन स्म वारितः। ननु नाम समं युद्धमेष्टव्यं युद्धजीविभिः।

५८
द्रो०

इदं चैवासमं युद्धमीदृशं यत्कृतं परैः। तेनास्मि भृशसंतप्तः शोकबाष्पसमाकुलः। शमं नैवाधिगच्छामि चिंतयानः पुनः पुनः॥ ॥संजय उवाच॥ ॥तं त
था विलपंतं वै शोकव्याकुलमानसं। उवाच भगवान्व्यासो युधिष्ठिरमिदं वचः॥ ॥व्यास उवाच॥ ॥युधिष्ठिर महाप्राज्ञ सर्वशास्त्रविशारद। व्य
सनेषु न मुह्यंति त्वादृशा भरतर्षभ। स्वर्गमेष गतः शूरः शत्रून्हत्वा बहून्रणे। अकालसदृशं कर्म कृत्वा वै पुरुषोत्तमः। अनतिक्रमणीयो वै युधिष्ठिर।
देवदानवगंधर्वान्मृत्युर्हरति भारत॥ ॥युधिष्ठिरः॥ ॥इमे वै पृथिवीपालाः शेरते पृथिवीतले। निहताः पृतनामध्ये मृतसंज्ञा महाबलाः। नागा
युतबलाश्चान्ये वायुवेगबलास्तथा। त एते निहताः संख्ये तुल्यरूपा नरैर्नराः। नैषां पश्यामि हंतारं प्राणिनां संयुगे क्वचित्। विक्रमेणोपसंपन्ना
स्तपोबलसमन्विताः। जेतव्यमिति चान्योन्यं येषां नित्यं हृदि स्थितं। अथ चेमे हताः प्राज्ञाः शेरते विगतायुषः। मृता इति च शब्दोऽयं वर्तते च गतार्थवित्।
इमे मृता महीपालाः प्रायशो भीमविक्रमाः। निश्चेष्टा निरभीमानाः शूराः शत्रुवशं गताः। राजपुत्राश्च संरब्धा वैश्वानरमुखं गताः। अत्र मे संशयः प्राप्तः
कुतः संज्ञा मृता इति। कस्य मृत्युः कुतो मृत्युः कथं संहरते प्रजाः। हरत्यमरसंकाश तन्मे ब्रूहि पितामह॥ ॥संजय॥ ॥तं तथा परिपृच्छंतं कुंतीपुत्रं
युधिष्ठिरं। आश्वासनमिदं वाक्यमुवाच भगवानृषिः॥ ॥व्यासः॥ ॥अत्राप्युदाहरंतीममितिहासं पुरातनं। अकंपनस्य कथितं नारदेन पुरा नृप।
स चापि राजा राजेंद्र पुत्रव्यसनमुत्तमं। अप्रसह्यतमं लोके प्राप्तवानिति मे मतिः। तदहं संप्रवक्ष्यामि मृत्योः प्रभवमुत्तमं। ततस्त्वं मोक्ष्यसे दुःखात्
स्नेहबंधनसंश्रयात्। समस्तपापराशिघ्नं शृणु कीर्तयतो मम। धर्म्यमाख्यानमायुष्यमशोकघ्नं पुष्टिवर्धनं। पवित्रमरिसंघघ्नं मंगलानां च मंगलं।
यथैव वेदाध्ययनमुपाख्यानमिदं तथा। श्रवणीयं महाराज प्रातर्नित्यं नृपोत्तमैः। पुत्रानायुष्मतो राज्यमीहमानैः श्रियं तथा। पुरा कृतयुगे तात आ
सीद्राजा ह्यकंपनः। स शत्रुवशमापन्नो मध्ये संग्राममूर्धनि। तस्य पुत्रो हरिर्नाम नारायणसमो बले। श्रीमान्कृतास्त्रो मेधावी युधि शक्रोपमो ब
ली। स शत्रुभिः परिवृतो बहुधा रणमूर्धनि। व्यस्यन्बाणसहस्राणि योधेषु वरगजेषु च। स कर्म दुष्करं कृत्वा संग्रामे शत्रुतापनः। शत्रुभिर्निहतः सं

ख्ये हतनायां युधिष्ठिर। स राजा प्रेतकृत्यानि तस्य कृत्वा सुदुःखितः। शोचन्नहनिरात्रौ च नालभत्सुखमात्मनः। तस्य शोकं विदित्वा तु पुत्रव्यसनसंभवं।
आजगामाथ देवर्षिर्नारदोऽस्य समीपतः। स तु राजा महाभागो दृष्ट्वा देवर्षिमागतं। पूजयित्वा महाभाग कथामकथयत्तदा। तस्य सर्वं समाचष्ट यथावृत्तं
नरेश्वरः। शत्रुभिर्विजयं संख्ये पुत्रस्य च वधं तथा। मम पुत्रो महावीर्य इंद्रविष्णुसमद्युतिः। शत्रुभिर्निहतः संख्ये पराक्रम्य हतो बली। क एष मृत्युर्भ
गवन्किंवीर्यबलपौरुषः। एतदिच्छामि तत्त्वेन श्रोतुं मतिमतां वर। तस्य तद्वचनं श्रुत्वा नारदो वरदः प्रभुः। आख्यानमिदमाचष्ट पुत्रशोकापहं महत्।
॥ ॥नारदः॥ ॥ शृणु राजन्महाबाहो आख्यानं बहुविस्तरं। यथावृत्तं श्रुतं चैव मयापि वसुधाधिप। प्रजाः सृष्ट्वा तदा ब्रह्मा आदिसर्गे पितामहः।
असंहृतं महातेजा दृष्ट्वा जगदिदं प्रभुः। तस्य चिंता समुत्पन्ना संहारं प्रति पार्थिव। चिंतयन्न ह्यसौ वेद संहारं वसुधाधिप। तस्य रोषान्महाराज खे
भ्योऽग्निरुदतिष्ठत। तेन सर्वा दिशो व्याप्ताः सांतर्देशा दिधक्षता। ततो दिवं भुवं चैव ज्वालामालासमाकुलं। चराचरं जगत्सर्वं ददाह भगवान्प्रभुः।
ततो हतानि भूतानि चराणि स्थावराणि च। महता क्रोधवेगेन त्रासयन्निव वीर्यवान्। ततो हरो जटी स्थाणुर्निशाचरपतिः शिवः। जगाम शर
णं देवं ब्रह्माणं परमेष्ठिनं। तस्मिन्नापतिते स्थाणौ प्रजानां हितकाम्यया। अब्रवीत्परमो देवो ज्वलन्निव महामुनिः। किं कुर्मः काम कामार्ह कामा
ज्जातोऽसि पुत्रक। करिष्यामि प्रियं सर्वं ब्रूहि स्थाणो यदिच्छसि॥ ॥इति द्रोणपर्वणि॥ ॥स्थाणुरुवाच॥ ॥प्रजासर्गनिमित्तं हि कृतो यत्न
स्त्वया विभो। त्वया सृष्टाश्च वृद्धाश्च भूतग्रामाः पृथग्विधाः। तास्तवेह पुनः क्रोधात्प्रजा दह्यंति सर्वशः। ता दृष्ट्वा मम कारुण्यं प्रसीद भगवन्प्रभो।
॥ ॥ब्रह्मोवाच॥ ॥ संहर्तुं न च मे कामो एतदेवं भवेदिति। पृथिव्या हितकामं तु ततो मां मन्युराविशत्। इयं हि मां सदा देवी भारार्त्ता समचूचुद
त्। संहारार्थं महादेव भारेणाभिहता सती। ततोऽहं नाधिगच्छामि तत्त्वेन बहुविधं तदा। संहारस्याप्रमेयस्य ततो मां मन्युराविशत्॥ ॥रुद्रः॥ ॥
संहारार्थं प्रसीदस्व मा रुषो वसुधाधिप। मा प्रजाः स्थावराश्चैव जंगमाश्च व्यनीनशत्। तव प्रसादाद्भगवन्निदं वै त्रिविधं जगत्। अनागतमतीतं

यपश्च संप्रतिवर्तते। भगवान्क्रोधसंदीप्तः क्रोधादग्निं समासृजत्। स दहन्सर्वभूतानि द्रुमांश्च सरितस्तथा। पल्वलानि च सर्वाणि सर्वं चैव तृणोल
पाः। स्थावरं जंगमं चैव देव निःशेषं कुरुते जगत्। प्रसीद भगवन्मा त्वं रोषो न स्याद्वरो मम। सर्वे हि सृष्टा नश्यंति तव देव कथंचन। तस्मान्निवर्ततां तेज
स्त्वय्येवेह प्रलीयतां। तत्संपश्य देव सृष्टं शं प्रजानां हितकाम्यया। यथेमे प्राणिनः सर्वे निवर्तेरंस्तथा कुरु। अभावं नेह गच्छेयुरुत्सन्नजननाः प्रजाः।
आदिदेव नियुक्तोऽस्मि त्वया लोकेषु लोककृत्। मा विनश्येज्जगन्नाथ जगत्स्थावरजंगमं॥ प्रसादाभिमुखं देव तस्मादेवं ब्रवीम्यहं॥ ॥नारद उ॥
श्रुत्वा हि वचनं देवः प्रजानां हितकारणात्। तेजः संधारयामास पुनरेवांतरात्मनि। ततोऽग्निमुपसंहृत्य भगवान्लोकसत्कृतः। प्रवृत्तिं च निवृत्तिं च कल्प
यामास वै प्रभुः। उपसंहरतस्तस्य तमग्निं रोषजं तदा। प्रादुर्बभूव विश्वेभ्यो गोभ्यो नारी महात्मनः। कृष्णा रक्ता तथा पिंगा रक्तजिह्वास्य
लोचना। कुंडलाभ्यां च राजेंद्र तप्ताभ्यां तप्तभूषणा। सा निःसृत्य तथा खेभ्यो दक्षिणां दिशमाश्रिता। स्मयमाना च सावैक्षद्देवौ विश्वेश्वरावुभौ।
तामाहूय तदा देवो लोकादिनिधनेश्वरः। मृत्यो इति महीपाल जहि चेमाः प्रजा इति। त्वं हि संहारबुद्ध्याथ प्रादुर्भूता रुषो मम। तस्मात्संहर सर्वा
स्त्वं प्रजाः सजडपंडिताः। मम त्वं हि नियोगेन ततः श्रेयो ह्यवाप्स्यसि। एवमुक्ता तु सा तेन मृत्युः कमललोचना। दध्यौ चात्यर्थमबला प्ररुरोद च
सुस्वरं। पाणिभ्यां प्रतिजग्राह तान्यश्रूणि पितामहः। सर्वभूतहितार्थाय तां चाप्यनुनयत्तदा॥ ॥इति द्रोणपर्वणि॥ ॥नारद उ॥ ॥विनीय दुः
खमबला आत्मन्येव प्रजापतिं। उवाच प्रांजलिर्भूत्वा लतेवावर्जिता पुनः॥ ॥मृत्युरुवाच॥ ॥ त्वया सृष्टा कथं नारी ईदृशी वदतां वर। क्रूरं क
र्माहितं कुर्यां तदेव किमु जानती। बिभेम्यहमधर्माद्धि प्रसीद भगवन्प्रभो। प्रियान्पुत्रान्वयस्यांश्च भ्रातॄन्मातॄः पितॄन्पतीन्। अपध्यास्यंति मे देव मृ
तेषु तेभ्यो बिभेम्यहं। कृपणानां हि रुदतां ये पतंत्यश्रुबिंदवः। तेभ्योऽहं भगवन्भीता शरणं त्वाहमागता। यमस्य भवनं देव न गच्छेयं सुरोत्तम। कायेन वि
नयोपेता मूर्ध्नोदग्रनखेन च। एतदिच्छाम्यहं कामं त्वत्तो लोकपितामह। इच्छेयं त्वत्प्रसादाद्धि तपस्तप्तुं प्रजेश्वर। प्रदिशेमं वरं देव त्वं मह्यं भगव

प्रभो।त्वयाह्युक्ता गमिष्यामि धेनुकाश्रममुत्तमम्।तत्र तप्स्ये तपस्तीव्रं तवैवाराधने रता।न हि शक्ष्यामि देवेश प्राणान्प्राणभृतां प्रियान्।हर्तुं विलपमा
नानामधर्मादभिरक्ष मां॥ ॥ब्रह्मोवाच॥ ॥मृत्यो संकल्पितासि त्वं प्रजासंहारहेतुना।गच्छ संहर सर्वास्त्वं प्रजा मा ते विचारणा।भविता त्वेतदेवं हि ने
तज्जात्वन्यथा भवेत्।भव त्वनिंदिता लोके कुरुष्व वचनं मम॥ ॥नारद उ॥ ॥एवमुक्ताभवत्तूष्णीं ततः प्रांजलिर्भगवन्मुखी।संहारे नाकरोद्बुद्धिं प्रजानां हित
काम्यया।तूष्णीमासीत्तदा देवः प्रजानामीश्वरेश्वरः।प्रसादं चागमत्क्षिप्रमात्मन्येव प्रजापतिः।स्मयमानश्च देवेशो लोकान्सर्वानवैक्षत।लोका
स्त्वासन्यथापूर्वं दृष्टास्तेनापमन्युना।निवृत्त रोषे तस्मिंस्तु भगवत्यपराजिते।सा कन्यापि जगामाथ समीपात्तस्य धीमतः।अपसृत्याप्रतिश्रुत्य प्रजा
संहरणं तदा।त्वरमाणा च राजेंद्र मृत्युर्धेनुकमभ्यगात्।सा तत्र परमं तीव्रं चचार व्रतमुत्तमं।सा तदा एकपादेन तस्थौ पद्मानि षोडश।पंच चान्यानि का
रुण्यात्प्रजानां तु हितैषिणी।इंद्रियाणींद्रियार्थेभ्यः प्रियेभ्यः सन्निवर्त्य सा।ततस्त्वेकेन पादेन पुनरन्यानि सप्त वै।तस्थौ पद्मानि षट्चैव सप्त चैकं च
पार्थिव।ततः पद्मायुतं सा तु मृगैः सह चचार सा।पुनर्गत्वा ततो नंदां पुण्यां शीतामलोदकां।अप्सु वर्षसहस्राणि सप्त चैकं च सानयत्।धारयि
त्वा तु नियमं नंदायां वीतकल्मषा।सा पूर्वं कौशिकीं पुण्यां जगाम नियमैधृता।तत्र वायुजलाहारा चचार नियमं पुनः।पंचगंगेषु सा पुण्या कन्या
वेतसकेषु च।तपोविशेषैर्बहुभिः कर्षयन्देहमात्मनः।ततो गत्वा च सा गंगां महामेरुं च केवलं।तस्थौ चाश्मेव निश्चेष्टा प्राणायामपरायणा।पु
नर्हिमवतो मूर्ध्नि यत्र देवाः पुरायजन्।तत्रांगुष्ठेन सा तस्थौ निखर्वं परमं शुभा।पुष्करेष्वथ गोकर्णे नैमिषे मलये तथा।अपाकर्षत्स्वकं देहं नि
यमैर्मनसः प्रियैः।अनन्यदेवता नित्यं दृढभक्ता पितामहे।तस्थौ पितामहं चैव तोषयामास धर्मतः।ततस्तामब्रवीत्प्रीतो लोकानां प्रभवो
व्ययः।सौम्येन मनसा राजन्प्रीतः प्रीतमना तदा।मृत्यो किमिदमत्यंतं तपांसि चरसीति ह।ततोऽब्रवीत्पुनर्मृत्युर्भगवंतं पितामहं।नाहं हन्यां प्र
जा देव स्वस्थाश्चाक्रोशतीस्तथा।एतदिच्छामि सर्वेश त्वत्तो वरमहं प्रभो।अधर्मभयभीतास्मि ततोऽहं तप आस्थिता।भीतायास्तु महाभाग प्रयच्छ

भयमव्ययं। आर्त्ता वा नागसी नारी पापा नि भवमेगतिः। तामब्रवीत्ततो देवो भूतभव्यभविष्यवित्। अधर्मो नास्ति ते मृत्यो संहरंत्याइमाः प्रजाः। मया ह्युक्तं
मृषा भद्रे भविता न कथंचन। तस्मात्संहर कल्याणि प्रजाः सर्वाश्चतुर्विधाः। धर्मः सनातनस्त्वां सर्वथा पावयिष्यति। लोकपालो यमश्चैव सहाया व्या
धयस्तथा। अहं च विबुधाश्चैव पुनर्दास्याम ते वरं। यथा त्वमेनसा मुक्ता विरजाः ख्यातिमेष्यसि। सैवमुक्ता महाराज कृतांजलिरिदं विभुं। पुनरेवा
ब्रवीद्वाक्यं प्रसाद्य शिरसा तदा। यद्येवमेतत्कर्त्तव्यं मया न स्याद्विना प्रभो। तवाज्ञा मूर्ध्नि मे न्यस्ता यत्तु वक्ष्यामि तच्छृणु। लोभः क्रोधोऽभ्यसूयेर्ष्या द्रो
होमोहश्च देहिनां। अह्रीश्चान्योन्यपुरुषा देहं भिंद्युः पृथग्विधाः॥ ॥ब्रह्मोवाच॥ ॥तथा भविष्यते मृत्यो साधु संहर त्वं प्रजाः। अधर्मस्ते न भवि
ता नापध्यास्याम्यहं शुभे। यान्यश्रुबिंदूनि करे ममासंस्ते व्याधयः प्राणिनामात्मजाताः। ते मारयिष्यंति नरान्गतासून्नाधर्मस्ते भविता मास्म भैषीः। ना
धर्मस्ते भविता प्राणिनां वै त्वं वै धर्मस्त्वं च धर्मस्य चेशा। धर्म्या भूत्वा धर्मनित्या धरित्री तस्मात्प्राणान्सर्वथेमान्नियच्छ। सर्वेषां वै प्राणिनां कामरोषौ
संत्यज्यातः संहरस्वेह जीवान्। एवं धर्मस्त्वां भविष्यत्यनंतो मिथ्यावृत्तान्मारयिष्यत्यधर्मः। तेनात्मानं पावयस्वात्मनात्वं पापे नात्मानं मज्जयिष्यत्यसत्त्वं।
तस्मात्कामं रोषमप्यागतं त्वं संत्यज्यातः संहरस्वात्र जीवान्॥ ॥नारदः॥ ॥सा वै भीता मृत्युसंज्ञोपदेशाच्छापाद्भीता बाढमित्यब्रवीत्तं। सा च प्राणांते
प्राणिनामंतकाले कामक्रोधौ त्यज्य हरत्यसक्ता। मृत्युस्तेषां व्याधयस्तत्प्रसूता व्याधी रोगो रुज्यते येन जंतुः। सर्वेषां च प्राणिनां प्राणघाते तस्माच्छोकं
मा कृथा निःफलं त्वं। सर्वे देवाः प्राणिनां प्रायणांते गत्वा वृत्ताः संनिवृत्तास्तथैव। एवं सर्वे प्राणिनामस्त्वं गत्वा वृत्ता नादेवा मर्त्यवद्राजसिंह। वायुर्भीमो भी
मनादो महोजा भेत्ता देहान्प्राणिनां सर्वगोऽसौ। नैवावृत्तिर्न प्रवृत्तिः कदाचित्प्राप्नोत्युग्रोऽनंततेजा विसृष्टः। सर्वे देवा मर्त्यसंज्ञाविशिष्टास्तस्मात्पुत्रं मा शुचो
राजसिंह। स्वर्गं प्राप्तो मोदते ते तनूजो नित्यं रम्यान्वीरलोकानवाप्य। त्यक्त्वा दुःखं संगतः पुण्यकृद्भिरेषा मृत्युर्देवदिष्टा प्रजानां। प्राप्ते काले संहरति प्र
यथावत्स्वयं कृता प्राणहरा प्रजानां। आत्मानं वै प्राणिनो घ्नंति सर्वे नैनं मृत्युर्दंडपाणिर्हिनस्ति। तस्मान्मृतान्नानुशोचंति धीरा मृत्युं ज्ञात्वा निश्चयं

अक्लिष्टां। इत्युक्त्वा हि देवर्षिर्वूक्त्वा तां विदित्वा पुत्रान्नष्टान्‌ शोकमात्रांस्त्वमजस्त्र॥ ॥द्वैपायन॥ ॥एतच्छ्रुत्वार्थवद्वाक्यं नारदेन प्रकाशितं। उवाचाकंपनो रा
जा सखायं नारदं तथा। व्यपेतशोकः प्रीतोस्मि भगवन्नृषिसत्तम। श्रुत्वेतिहासं त्वत्तस्तु कृतार्थोस्म्यभिवादये। तथोक्तो नारदस्तेन राज्ञा ऋषिवरो नमः। ज
गाम नंदनं शीघ्रं देवर्षिरमितात्मवान्‌। पुण्यं यशस्यं स्वर्ग्यं च धन्यमायुष्यमेव च। अस्येतिहासस्य सदा श्रवणं श्रावणं तदा। एतदर्थपदं श्रुत्वा तदा राजा
युधिष्ठिरः। क्षत्रधर्मं च विज्ञाय शूराणां च परां गतिं। संप्राप्तोसौ महावीर्यः स्वर्गलोकं महारणे। अभिमन्युः परान्हत्वा प्रमुखे सर्वधन्विनां। युध्यमानो म
हासोहतः सोभिमुखो रणे। असिना गदया शक्त्या धनुषा च महारथः। विरजाः सोमसूनुः स पुनस्तत्र प्रलीयते। तस्मात्परां धृतिं कृत्वा भ्रातृभिः सह पांड
व। अप्रमत्तः सुसन्नद्धः शीघ्रं योद्धुमुपाक्रम॥ ॥इति द्रोणपर्वणि मृत्युप्रजापतिसंवादः॥ ॥संजय उ॥ ॥श्रुत्वा मृत्युसमुत्पत्तिं कर्माण्यनुपमा
नि च। धर्मराजः पुनर्वाक्यं प्रसाद्यैनमथाब्रवीत्‌। गुरवः पुण्यकर्माणः शक्रप्रतिमविक्रमाः। स्थाने राजर्षयो ब्रह्मन्ननघाः सत्यवादिनः। भूय एव तु मां त
थ्यैर्वचोभिरभिवृंहय। राजर्षीणां पुराणानां समाश्वासय कर्मभिः। किं पत्युर्दक्षिणा दत्ताः केश्च दत्ता महात्मभिः। राजर्षिभिः पुण्यकृद्भिस्तद्भवान्प्रब्रवी
तु मे॥ ॥व्यास उ॥ ॥श्वैत्यस्य नृपतेः पुत्रः संजयो नाम नामतः। सखायौ तस्य चैवास्तामृषी पर्वतनारदौ। तौ कदाचिद्गृहं तस्य प्रविष्टौ तद्दिदृक्षया।
विधिवच्चार्चितौ तेन प्रीतौ तत्रोषतुः सुखं। तं कदाचित्सुखासीनं ताभ्यां सह शुचिस्मिता। दुहिताभ्यगमत्कन्या संजयं वरवर्णिनी। तयाभिवादितः क
न्यामभ्यनंदद्यथाविधि। तत्सलिंगाभिराशीर्भिरिष्टाभिरभितः स्थितां। तां निरीक्ष्याब्रवीद्वाक्यं पर्वतः प्रहसन्निव। कस्येयं चंचलापांगी सर्वलक्षणसं
मता। उताहो भाः स्विदर्कस्य ज्वलनस्य शिखा त्वियं। श्रीर्ह्रीः कीर्तिर्धृतिः पुष्टिः सिद्धिश्चंद्रमसः प्रभा। एवं ब्रुवाणं देवर्षिं नृपतिः संजयोब्रवीत्‌। म
मेयं भगवन्कन्या मत्तो वरमभीप्सति। नारदस्त्वब्रवीदेनं देहि मह्यमिमां नृप। भार्यार्थं सुमहच्छ्रेयः प्राप्तुं चेदिच्छसे नृप। ददामीत्येव संहृष्टः संजयः
प्राह नारदं। पर्वतस्तु सुसंक्रुद्धो नारदं वाक्यमब्रवीत्‌। हृदयेन मया पूर्वं वृता वै त्वं तु वानसि। यस्माद्वृता त्वया विप्र मा गाः स्वर्गं यथेप्सया। एवमुक्तो ना

द्रो॰प॰
५५

रदत्तं प्रत्युवाचोत्तरं वचः । मनोवाग्बुद्धिसंभाषा दत्ता चोदकपूर्वकं । पाणिग्रहणमंत्राश्च प्रथितं वरलक्षणं । न त्वेषा निष्ठिता निष्ठा निष्ठा सप्तपदी स्मृता ।
प्रत्तु तन्नैव कार्यार्थी मां त्वं व्याहतवानसि । तस्मात्त्वमपि न स्वर्गं गमिष्यसि मया विना । अन्योन्यमेवं शप्त्वा तावेतस्थतुस्तत्र तौ तदा । अथ सोपि नृपो विप्रा
न्पानाच्छादनभोजनैः । पुत्रकामः परं शक्त्या यत्नाज्ञो पारचरत्सुचिः । तस्य प्रसन्ना विप्रेंद्राः कदाचित्पुत्रमीप्सवः । तपःस्वाध्यायनिरता वेदवेदांग
पारगाः । सहिता नारदं प्राहुर्देह्यस्मै पुत्रमीप्सितं । तथेत्युक्त्वा द्विजैरुक्तः संजयं नारदोऽब्रवीत् । (प्र)संन्ना राजर्षे पुत्रमीप्सति ब्राह्मणाः । वरं वृणीष्व भ
द्रं ते यादृशं पुत्रमीप्सितं । तथोक्तः प्रांजली राजा पुत्रं वव्रे गुणान्वितं । यशस्विनं कीर्तिमंतं तेजस्विनमरिंदमं । यस्य मूत्रं पुरीषं च क्लेदः स्वेदश्च कांचनं ।
स्वर्णष्ठीविरित्येवं तस्य नामाभवत्कृतं । तस्मिन्वरप्रदानेन प्रवर्धत्यमितं धने । कारयामास नृपतिः सौवर्णं सर्वमीप्सितं । गृहप्राकारदुर्गाणि ब्राह्मणाव
सथानपि । शय्यासनानि यानानि स्थालीपीठरभाजनं । तस्य राज्ञस्तथा यद्वेश्म बाह्याश्चोपस्कराश्च ये । सर्वं तत्कांचनमयं कालेन परिवर्धितं । अथ दस्युग
णाः श्रुत्वा दृष्ट्वा चैनं तथाविधं । संभूय तस्य नृपतेः समारब्धाश्चिकीर्षितुं । केचित्तत्राब्रुवन्राज्ञः पुत्रं गृह्णीम वै स्वयं । सोऽस्याकरः कांचनस्य तत्र यत्नं चरा
महे । ततस्ते दस्यवो लुब्धाः प्रविश्य नृपतेर्गृहं । राजपुत्रं ततो जह्रुः स्वर्णष्ठीविनं बलात् । गृहीत्वा नमुपायज्ञा नीत्वारण्यमचेतसः । हत्वा विशस्य चा
पश्यंस्ते लुब्धा वसु न किंचन । तस्य प्राणैर्विमुक्तस्य नष्टं तद्वरदं वसु । दस्यवश्च तदान्योन्यं जघ्नुर्मूर्खा विचेतसः । हत्वा परस्परं नष्टाः कुमारं चाद्भुतं भुवि ।
असंभाव्यं गता घोरं नरकं दुष्टचारिणः । तं दृष्ट्वा निहतं पुत्रं वरदत्तं महातपाः । विललाप सुदुःखार्तो बहुधा करुणं नृपः । विलपंतं निशम्याथ पुत्रशो
कहतं नृपं । प्रत्यदृश्यत देवर्षिर्नारदस्तस्य सन्निधौ । उवाच चैनं दुःखार्तं विलपंतमचेतसं । संजयं नारदोऽभ्येत्य तन्निबोध युधिष्ठिर । कामानामवि
तृप्तस्त्वं संजयेह मरिष्यसि । यस्य चैते वयं गेहे उषिता ब्रह्मवादिनः । आविक्षितं मरुत्तं च मृतं संजय शुश्रुम । संवर्तो याजयामास स्पर्धया वै बृहस्प
तेः । यस्मै राजर्षये प्रादाद्धनं स भगवान्प्रभुः । हैमं हिमवतः पादं यियक्षोर्विविधैः सवैः । यस्य सेंद्रा मरुद्गणा बृहस्पतिपुरोगमाः । देवा विश्वसृजः पा

राम
५५

६ दानं धर्मश्च वा कृत्स्नं ज्ञानमगर्वं क्षमान्वितं शौर्यं वित्तं त्यागसमेतं दुर्लभमेन त्वनुर्भ इमानि

श्चैधिजनांते समासते। यज्ञवाटस्य सौवर्णाः सर्वे चास्न् परिच्छदाः। यस्य सर्वं तदा ह्यन्नं मनोभिप्राय गंकुचि। कामं ते बुभुजुर्विप्राः सर्वे चान्नार्थिनो द्विजाः।
पयो दधि घृतं क्षौद्रं भक्ष्यं भोज्यं च शोभनं। यस्य यज्ञेषु सर्वेषु वासांस्याभरणानि च। ईप्सितान्युपतिष्ठंते प्रहृष्टं वेदपारगान्। मरुतः परिवेष्टारो मरु
त्तस्याभवन् गृहे। आविक्षितस्य राजर्षेर्विश्वेदेवाः सभासदः। यस्य वीर्यवतो राज्ञः स्वद्ध्यास स्य संपदः। हविर्भिस्तर्पिता येन सम्यक् क्लृप्तैर्दिवौक
सः। ऋषीणां च पितॄणां च देवानां सुखजीविनां। ब्रह्मचर्यं श्रुतिमुखैः सर्वैर्दानैश्च सर्वदा। शयनासनयानानि स्वर्णराशीश्च दुस्त्यजाः। तत्सर्व
ममितं वित्तं दत्तं विप्रेभ्य इच्छया। सोऽनुध्यातः शक्रेण प्रजाः कृत्वा निरामयाः। श्रद्धानो जितांल्लोकान् गतः पुण्यकृतोक्षयान्। सप्रजः सन्
पामात्यः सदारापत्य बांधवः। यौवनेन सहस्राब्दं मरुत्तो राज्यमन्वशात्। स चेन्ममार संजय चतुर्भद्रतरस्त्वया। पुत्रात्पुण्यतरश्चैव मा पुत्रमनुत
प्यथाः। अयज्वानमदाक्षिण्यमभिश्वैत्येत्युदाहरन्॥ ॥इति द्रोणपर्वणि षोडशराजकीये॥ ५५॥ नारद उ॥ ॥ सुहोत्रं नाम राजानं मृतं संज
य शुश्रुम। एकवीरमनाधृष्यं तममरैरपि वीक्षितुं। यः प्राप्य राज्यं धर्मेण ऋत्विग्ब्रह्मपुरोहितान्। अपृच्छदात्मनः श्रेयः पृष्ट्वा तेषां मते स्थितः। प्र
जानां पालनं धर्मो दानमिज्याद्विषज्जयः। एतत्सुहोत्रो विज्ञाय धर्मेणैच्छद्धनागमं। धर्मेणाराधयद्देवान्बाणैः शत्रूञ्जयस्तथा। सर्वाण्यपि च भू
तानि स्वगुणैरन्वरंजयत्। यो भुक्ते मां वसुमतीं म्लेच्छाटविकवर्जितां। यस्मै ववर्ष पर्जन्यो हिरण्यं परिवत्सरान्। हैरण्यास्तत्र वाहिन्यः स्वैरिण्यो
व्यहरन् पुरा। ग्राहान् कर्कटकांश्चैव मत्स्यांश्च विविधान्बहून्। कामान्वर्षति पर्जन्यो रूपाणि विविधानि च। सौवर्णान्यप्रमेयाणि वाप्यश्च क्रो
शसंमिताः। सहस्रं वामनान्कुब्जान्नक्रान्मकरकच्छपान्। सौवर्णान्विहितान्दृष्ट्वा ततोऽस्मयत वै तदा। तत्सुवर्णमपर्यंतं राजर्षिः कुरुजांगले। ईजा
नो वितते यज्ञे ब्राह्मणेभ्यो ह्यमन्यत। सोऽश्वमेधसहस्रेण राजसूयशतेन च। पुण्यैः क्षत्रिययज्ञैश्च प्रभूतवरदक्षिणैः। काम्यनैमित्तिकाज
स्रैः। इष्टां गतिमवाप्तवान्। स चेन्ममार संजय चतुर्भद्रतरस्त्वया। पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः। अयज्वानमदाक्षिण्यमभिश्वैत्येति

द्रो॰प॰
५६

व्याहरत्॥ ॥इति द्रोणपर्वणि षोडशराजकीये॥५५॥ नारद उ॥ ॥राजानं पौरवं वीरं मृतं सृंजय शुश्रुम। सहस्रं यः सहस्राणां श्वेतानश्वानवा
सृजत्। तस्याश्वमेधे राजर्षेर्देशाद्देशात्समेयुषां। शिक्षाक्षरविधिज्ञानां नासीत्संख्या विपश्चितां। वेदविद्याव्रतस्नाता वदान्याः प्रियदर्शनाः। सु
भिक्षाच्छादनगृहाः सुशय्यासनवाहनाः। नटनर्तकगंधर्वैः पूर्णकैर्वर्द्धमानकैः। नित्योद्योगैश्च क्रीडद्भिस्तत्र स्म परिहर्षिताः। यज्ञे यज्ञे यथाका
लं दक्षिणाः सोत्यकालयत्। द्विपाद्दशसहस्राख्याः प्रभिन्नाः कांचनप्रभाः। सध्वजाः सपताकाश्च रथा हेममयास्तथा। यः सहस्रं सहस्राणि कन्या
हेमविभूषिताः। धुर्यजाश्वगजारूढाः सगृहक्षेत्रगोशताः। शतं शतं सहस्राणि स्वर्णमालामहात्मनां। गवां सहस्रानुचरान् दक्षिणामत्यका
लयत्। हेमशृंग्यो रौप्यखुराः सवत्साः कांस्यदोहनाः। दासीदासखरोष्ट्रांश्च प्रादादजाविकं बहु। रत्नानां विविधानां च विविधांश्चान्नपर्वतान्।
तस्मिन् संवितते यज्ञे दक्षिणामत्यकालयत्। तत्रास्य गाथां गायंति ये पुराणविदो जनाः। अंगस्य यजमानस्य स्वधर्माधिगताः शुभाः। गुणोत्त
राः क्रतवस्तस्यासन् सार्वकामिकाः। स चेन्ममार॰ पुत्रात्पुण्यतरस्त्वण अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरत्॥ ॥इति द्रोणपर्वणि षो
डशराजकीये॥५६॥ नारद उ॥ ॥शिबिमौशीनरं चापि मृतं सृंजय शुश्रुम। य इमां पृथिवीं सर्वां चर्मवत्परिवेष्टयत्। सद्वीपार्णववनां र
थघोषेण नादयन्। स शिबिर्वैरिशत्रूणां मुख्यान्निघ्नन् सपत्नजित्। तेन यज्ञैर्बहुविधैरिष्टं पर्याप्तदक्षिणैः। स राजा वीर्यवान् धीमानवाप्य वसु
पुष्कलं। सर्वमूर्द्धाभिषिक्तानां संमतः सोभवद्युधि। अयजच्चाश्वमेधैर्यो विजित्य पृथिवीमिमां। निरर्गलैर्बहुफलैर्निष्ककोटिसहस्रदः।
हस्त्यश्वपशुभिर्धान्यैर्मृगैर्गोजाविभिस्तथा। विविधां पृथिवीं पुण्यां शिबिर्ब्राह्मणसात्करोत्। यावत्यो वर्षतो धारा यावत्यो दिवि तारकाः। याव
त्यः सिकता गांग्यो यावन्मेरोर्महोपलाः। उदन्वति यावंति रत्नानि प्राणिनोपि च। तावतीरददद्गावः शिबिरौशीनरोध्वरे। नोद्यंतारं धुरस्तस्य कंचि
दन्यं प्रजापतिः। भूतं भव्यं भवंतं वा नाध्यगच्छन्नरोत्तमं। तस्यासन् विविधा यज्ञाः सर्वकामैः समन्विताः। हेमयूपासनगृहा हेमप्राकारतोरणाः।

राम
५६

शुचि स्वाद्वन्नपानं च ब्राह्मणाः प्रयुतायुताः । नानाभक्ष्यैः प्रियकथाः पयोदधिमहाह्रदाः । तस्यासन्यज्ञवाटेषु नद्यः शुभ्रान्नपर्वताः । पिबत स्ना
त खादध्वमिति यज्ञे वै तेजनाः । यस्मै प्रदाद्वरं रुद्रस्तुष्टः पुण्येन कर्मणा । अक्षयं ददतो वित्तं श्रद्धा कीर्तिस्तथा क्रिया । यथोक्तमिव भूतानां प्रियं त्वं
स्वर्गमुत्तमं । एतान् सावरानिष्टान्नृशिबिः कालेदिनं गतः । स चेन्ममार सं० पुत्रात्पुण्यतर० अयज्वानमं० ॥ ॥इति द्रोणपर्वणि षोडशराज
कीये ५५ नारदः ॥ ॥ रामं दाशरथिं चैव मृतं संजय शुश्रुम । यं प्रजा अन्वमोदन्त पिता पुत्रानिवौरसान् । असंख्येया गुणा यस्मिन्नासन्नमि
ततेजसि । यश्चतुर्दश वर्षाणि निदेशात्पितुरच्युतः । वने वनितया सार्धमवसल्लक्ष्मणाग्रजः । जघान च जनस्थाने राक्षसान्मनुजर्षभः । तपस्वि
नां रक्षणार्थं सहस्राणि चतुर्दश । तत्रैव वसतस्तस्य रावणो नाम राक्षसः । जहार भार्यां वैदेहीं संमोह्यैनं सहानुजं । तमागस्कारिणं रामः पौलस्त्य
मजितं परैः । जघान समरे क्रुद्धः पुरेव त्र्यंबकोंधकं । सुरासुरैरवध्यं तं देवब्राह्मणकंटकं । जघान स महाबाहुः पौलस्त्यं सगणं रणे । स प्रजानुग्र
हं कृत्वा त्रिदशैरभिपूजितः । व्याप्य कृत्स्नं जगत्कीर्त्या सुरर्षिगणसेवितः । स प्राप्य विविधं राज्यं सर्वभूतानुकंपनः । आजहार महायज्ञं प्रजा धर्मे
ण पालयन् । निरर्गलं सजारूथ्यमश्वमेधशतं विभुः । आजहार सुरेशस्य हविषा मुदमाहरन् । अन्यैश्च विविधैर्यज्ञैराजे बहुगुणैर्नृपः । क्षुत्पिपा
से जयद्रामः सर्वरोगांश्च देहिनां । स तत्गुणसंपन्नो दीप्यमानः स्वतेजसा । अति सर्वाणि भूतानि रामो दाशरथिर्बभौ । ऋषीणां देवतानां
च मानुषाणां च सर्वशः । पृथिव्यां सहवासोभूद्रामे राज्यं प्रशासति । नाहीयत तदा प्राणः प्राणिनां न तदन्यथा । प्राणापानसमानाश्च रामे राज्यं
प्रशासति । पर्यदीप्यंत तेजांसि तदानर्थाश्च नाभवन् । दीर्घायुषः प्रजाः सर्वा युवा न म्रियते तदा । वेदैश्चतुर्भिः संप्रीताः प्राप्नुवंति दिवौकसः । हव्यं क
व्यं च विविधं निःश्रुतं हुतमेव च । अदंशमशका देशा नष्टव्यालसरीसृपाः । नाप्सु प्राणभृतां मृत्युर्नाकाले ज्वलनोदहत् । अधर्मरुचयो लुब्धा मू
र्खा वा नाभवंस्तदा । शिष्टेष्टप्राज्ञकर्मणः सर्ववर्णास्तदाभवन् । स्वधां पूजां च रक्षोभिर्जनस्थाने प्रणाशिते । शरान्निहत्य रक्षांसि पितृदेवेभ्य

ईश्वरः। सहस्रपुत्राः पुरुषाद्दशवर्षशतायुषः। न च ज्येष्ठाः कनिष्ठेभ्यस्तत्राभ्यकारयन्। श्यामो युवा लोहिताक्षो मत्तमातंगविक्रमः। व्याजानुबा
हुः सुभुजः सिंहस्कंधो महाबलः। दशवर्षसहस्राणि दशवर्षशतानि च। सर्वभूतमनःकांतो रामो राज्यमकारयत्। स्वात्मानं संप्रतिष्ठाप्य राज्यं व
शमिहाष्टधा। स चेन्ममार सृंजय०। पुत्रात्पुण्यतर०। व्ययज्वानम०॥ ॥इति द्रोणपर्वणि षोडशराजकीये॥५८॥ नारद उ०॥ ॥भगीरथं च राजा
नं मृतं सृंजय शुश्रुम। येन भागीरथी गंगा चयनैः कांचनैश्चिता। यः सहस्रं सहस्राणां कन्या हेमविभूषिताः। राज्ञश्च राजपुत्रांश्च ब्राह्मणेभ्यो सम
न्यत्। सर्वा रथगताः कन्या रथाः सर्वे चतुर्युजः। रथे रथे शतं नागाः सर्वे वै हेममालिनः। सहस्रमश्वा एकैकं गजानां पृष्ठतोन्वयुः। अश्वे अश्वे शतं
गावो गवां पश्चादजाविकं। तेनाक्रांता जनौघेन दक्षिणा भूयसीर्ददत्। उपह्वरेति व्यथिता तस्यांके निषसाद ह। तथा भागीरथी गंगा उर्वशी चाभवत्पु
रा। दुहितृत्वं गता राज्ञः पुत्रत्वमगमत्तदा। तां तु गाथा जगुः प्रीता गंधर्वाः सूर्यवर्चसः। पितृदेवमनुष्याणां शृण्वतां वल्गुवादिनः। भगीरथं यज्वा
नमैक्ष्वाकुं भूरिदक्षिणं। गंगा समुद्रगा देवी वव्रे पितरमीश्वरं। तस्य सेंद्रैः सुरगणैर्देवयज्ञाः स्वलंकृताः। सम्यक्परिगृहीताश्च शांतविघ्ना निरामयाः।
यो यस्मिन्नैच्छत विप्रो वै यत्र चात्मनः प्रियं। भगीरथस्तदा प्रीतस्तत्र तत्राददद्वशी। नादेयं ब्राह्मणस्यासीद्यस्य यत्स्यात्प्रियं धनं। सोपि विप्रप्रसादेन ब्र
ह्मलोकं गतो नृपः। येन याता मखमुखा दिशा विहृत्य पादपाः। तेनाव्युच्छात्तुमिच्छंति तेन गत्वा राजमीश्वरं। स चेन्ममार०। पुत्रात्पुण्यत०। व्ययज्वान०॥ ॥
इति द्रोणपर्वणि षोडशराजकीये॥५९॥ नारद उ०॥ ॥ दिलीपं चैलविलं मृतं सृंजय शुश्रुम। यस्य यज्ञशतेष्वासन्प्रयुतायुतशो द्विजाः। तत्र ज्ञा
नार्थसंपन्ना यज्वानः पुत्रपौत्रिणः। य इमां वसुसंपूर्णां वसुधां वसुधाधिपः। इजानो वितते यज्ञे ब्राह्मणेभ्यो ह्यमन्यत। दिलीपस्य तु यज्ञेषु कृतः प
था हिरण्मयाः। तं धर्म इव कुर्वाणाः सेंद्रा देवाः समागमन्। चषालश्च चषालं च यस्य यूपे हिरण्मये। रागखांडवभोज्यस्य श्रमतो पार्थिवा रते। तदे
तदद्भुतं मन्ये अन्यैर्न सदृशं नृपैः। यद्वक्षयुध्यमानस्य चक्रे न परिपेततुः। राजानं ददृशुर्ये च वानं दिलीपं सत्यवादिनं। ये पश्य भूरिदाक्षिण्यं तेपि

स्वर्गजितोनराः। पंचशशानजीर्यंतिखट्वांगस्यनिवेशने। स्वाध्यायघोषोज्याघोषः पिबताश्नीतखादत॥ सचेन्ममारसृं०पुत्रात्पुण्यतर०। अयज्वानं०॥
॥ ॥इतिद्रोणपर्वणिषोडशराजकीये॥६॥ नारद उ॥ ॥मांधातारंयौवनाश्वंमृतंसृंजयशुश्रुम। देवासुरमनुष्याणांत्रैलोक्यविजयीनृपः। यंदेवा
वश्विनौगर्भात्पितुःपूर्वंचकृषतुः। मृगयांविचरन्राजातृषितःक्लांतवाहनः। धूमंदृष्ट्वागमत्सत्रंपृषदाज्यमवापसः। तंदृष्ट्वायुवनाश्वस्यजठरेसूनु
तांगतं। गर्भंहिजह्रतुर्देवावश्विनौभिषजांवरौ। तंदृष्ट्वापितुरुत्संगेशयानंदेववर्चसं। अन्योन्यमब्रुवन्देवाः कमयंधास्यतीतिवै। मामेवायंधयत्वग्रे
इतिहस्माहवासवः। ततोंगुलिभ्योहींद्रस्यप्रादुरासीत्पयोमृतं। मांधास्यतीतिकारुण्याद्यदिंद्रोह्यन्वकंपयत्। तस्मात्तुमांधातेत्येवंनामतस्याद्भुतंकृतं।
ततस्तुधाराःपयसोघृतस्यचमहात्मनः। तस्यास्येयौवनाश्वस्यपाणिरिंद्रस्यचास्रवत्। अपिबत्पाणिमिंद्रस्यसचाप्यह्नाव्यवर्द्धत। सोभवद्द्वादशसमोद्वा
दशाहेनवीर्यवान्। इमांचपृथिवींकृत्स्नामेकाह्नासमजीजयत्। धर्मात्माधृतिमान्वीरःसत्यसंधोजितेंद्रियः। जनमेजयंसुधन्वानंगयंपूरुंबृहद्रथं। असि
तंचैवरामंचमांधातामनुजोजयत्। उदेतिचयतःसूर्योयत्रचप्रतितिष्ठति। तत्सर्वंयौवनाश्वस्यमांधातुःक्षेत्रमुच्यते। सोश्वमेधशतैरिष्ट्वाराजसूयशते
नच। अददद्रोहितान्मत्स्यान्ब्राह्मणेभ्योविशांपते। हैरण्यान्योजनोत्सेधानायतान्दशयोजनं। बहुप्रकारान्स्वाद्वन्नभक्ष्यभोज्यान्नपर्वतान्। अतिरिक्तं
ब्राह्मणेभ्योभुंजानाहीयतेजनः। भक्ष्यान्नपाननिचयाःशुशुभुस्त्वन्नपर्वताः। घृतह्रदाःसूपपंकादधिफेनागुडोदकाः। रुरुधुःपर्वतान्नद्योमधुक्षीरव
हाःशुभाः। देवासुरनरायक्षागंधर्वोरगपक्षिणः। विप्रास्तत्रागताश्चासन्वेदवेदांगपारगाः। ब्राह्मणाऋषयश्चापिनासंस्तत्राविपश्चितः। समुद्रांतांवसुम
तींवसुपूर्णांतुसर्वतः। सतांब्राह्मणसात्कृत्वाजगामास्तंतदानृपः। गतःपुण्यकृतांलोकान्व्याप्यस्वयशसादिशः॥ सचेन्ममारसृं०पुत्रात्पुण्यतरं०। अयज्वानं०
॥ ॥इतिद्रोणपर्वणिषोडशराजकीये॥७॥ नारद उ॥ ॥ययातिंनाहुषंचैवमृतंसृंजयशुश्रुम। राजसूयशतैरिष्ट्वासोश्वमेधशतेनच। पुंडरीकस
हस्रेणवाजपेयशतेनच। अतिरात्रसहस्रेणचातुर्मास्यैश्चकामतः। अग्निष्टोमैश्चविविधैःसत्रैश्चप्राज्यदक्षिणैः। अब्राह्मणानांयद्वित्तंपृथिव्याम

द्रो०प०
५८

त्तिकिंचन। तत्सर्वं परिसंख्याय ततो ब्राह्मणसात्करोत्। भूदेवेषास्फुरे युद्धे हत्वा देवसहायतां। चतुर्धा व्यभजत्सर्वां चतुर्भ्यः पृथिवीमिमां। यज्ञैर्नानावि
धैरिष्ट्वा प्रजा अनुत्पाद्य चोत्तमां। देवयान्यां चौशनस्यां शर्मिष्ठायां च धर्मतः। देवारण्येषु सर्वेषु विजह्रा रामरोपमः। आत्मनः कामचारेण द्वितीय इ
व वासवः। यदा नाभ्यागमच्छांतिं कामानां सर्ववेदवित्। ततो गाथामिमां गीत्वा सदारः प्राविशद्वनं। यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः। ना
लमेकस्य तत्सर्वमिति मत्वा शमं व्रजेत्। एवं कामान्परित्यज्य ययातिर्धृतिमेत्य च। पूरुं राज्ये प्रतिष्ठाप्य प्रयातो वनमीश्वरः। सचेन्ममार० पुत्रा
त्पुण्यतर० श्वैत्य पुत्रजानन०॥ ॥इति द्रोणपर्वणि षोडशराजकीये ६७॥ नारद॥ ॥नाभागमंबरीषं च मृतं सृंजय शुश्रुम। यः सहस्रं सहस्राणां राज्ञां चै
कस्त्वयोधयत्। जिगीषमाणः संग्रामे समंताद्वैरिणोऽभ्ययात्। अस्त्रवेदविदो घोराः सृजंतश्चाशिवा गिरः। बललाघवशीलत्वं पश्य सोऽस्त्रबलेन च।
छत्रायुधध्वजरथांश्छित्वा प्रासान् गतव्यथः। तं एतं मुक्तसंनाहाः प्रार्थयंतो विवेषिणः। शरण्यमीयुः शरणं तवास्मेति वादिनः। स तु तान्वशगान्कृत्वा
जित्वा चेमां वसुंधरां। इजे यज्ञशतैरिष्टैर्यथाशास्त्रं तथानघ। बुभुजुः सर्वसंपन्नमन्नमन्ये जनाः सदा। तस्मिन्यज्ञे तु संतुष्टाः परमार्चिताः। मोदका
न्पूरिकापूपान्स्वादुपूर्णाश्च शष्कुलीः। करंभान्पृथुमृद्वीकाश्चान्यानि सुकृतानि च। सूपान्मैरेयकापूपान् रागखांडवपानकान्। मृष्टान्नानि सुयुक्ता
नि मृदूनि सुरभीणि च। घृतं मधु पयस्तोयं दधीनि रसवंति च। फलमूलं च सुस्वादु द्विजास्तत्रोपभुंजते। मादनीयानि पानानि विदित्वा चात्मनः सुखं
अपिबंत यथाकामं पानपा गीतवादितैः। तत्र स्म गाथा गायंति क्षीबा हृष्टाः पठंति च। नाभागस्तुतिसंयुक्ता ननृतुश्च सहस्रशः। तेषु यज्ञेष्वंबरीषो द
क्षिणामत्यकालयत्। राज्ञो राजसहस्राणि दशायुत याजिनो। हिरण्यकवचांत्सर्वान्श्वेतछत्रप्रकीर्णकान्। हिरण्यस्यंदनारूढान्सानुयात्रपरि
च्छदान्। ईजानो वितते यज्ञे दक्षिणामत्यकालयत्। मूर्धाभिषिक्तांश्च नृपान् राजपुत्रशतानि च। सदंडकोशान्निचयान्ब्राह्मणेभ्यो ह्यमन्यत। नैव
पूर्वे जना चक्रुर्न करिष्यंति चापरे। यदंबरीषो नृपतिः करोत्यमितदक्षिणः। इत्येवमन्वमोदंत प्रीता यस्य महर्षयः। सचेन्ममार० पुत्रात्पुण्यतर०।

षिषे०

राम
५८

श्वयज्वानं ॥ ॥इतिद्रोणपर्वणि षोडशराजकीये ॥६५॥ नारद उ॥ ॥ शशबिंदुंच राजानं मृतं संजय शुश्रुम । ईजे स विविधैर्यज्ञैः श्रीमान्सत्यपराक्र
मः । तस्य भार्यासहस्राणां शतमासीन्महात्मनः । एकैकस्यां च भार्यायां सहस्रं तनया भवन् । ते कुमाराः पराक्रांताः सर्वे नियुतयाजिनः । राजानः
क्रतुभिर्मुख्यै राजानो वेदपारगाः । हिरण्यकवचाः सर्वे सर्वे चोत्तमधन्विनः । सर्वेश्वमेधै राजानः कुमाराः शाशबिंदवः । तानश्वमेधे राजेंद्रो ब्राह्मणे
भ्यो ददासिता । शतं शतं रथगजा एकैकं पृष्ठतोन्वयुः । राजपुत्रं तदा कन्यास्तपनीयस्वलंकृताः । कन्यां कन्यां शतं नागा नागे नागे शतं रथाः । रथे रथे श
तं चाश्वा बलिनो हेममालिनः । अश्वे अश्वे शतं गावो गवां पंचाशदाविकाः । एतद्धनमपर्यंतमश्वमेधे महामखे । शशबिंदुर्महाभागो ब्राह्मणेभ्यो
व्यमन्यत । वार्क्षाश्च यूपा यावंतो अश्वमेधे महामखे । ते तथैव पुनश्चान्ये तावंतः कांचनाभवन् । भक्ष्यान्नपानैर्निचयाः पर्वताः क्रोशमुच्छ्रिताः । तस्याश्व
मेधे निर्वृत्ते राज्ञः शिष्टास्त्रयोदश । शिष्टपुष्टजनाकीर्णाः शांतविघ्नास्त्वनामयाः । शशबिंदुरिमां भूमिं चिरं भुक्त्वा दिवं गतः । स चेन्ममार सृंजय । चतुर्भद्रतरः
श्वयज्वानं ॥ ॥इति द्रोणपर्वणि षोडशराजकीये ॥६६॥ नारद उ॥ ॥ गयं चामूर्त्तरयसं मृतं संजय शुश्रुम । यो वै वर्षशतं राजा हुतशिष्टाश
नो भवत् । तस्मै ह्यग्निर्वरं प्रादात्ततो वव्रे वरं गयः । तपसा ब्रह्मचर्येण व्रतेन नियमेन च । गुरूणां च प्रसादेन वेदानिच्छामि वेदितुं । स्वधर्मेणाविहिंस्या
न्यान्धनमिच्छामि चाक्षयं । विप्रेषु ददतश्चैव श्रद्धा भवतु नित्यशः । अनन्यासु सवर्णासु पुत्रजन्म च मे भवेत् । अन्नं मे ददतः श्रद्धा धर्मे मे रमतां मनः ।
अविघ्नं चास्तु मे नित्यं धर्मकार्येषु पावक । तथा भविष्यतीत्युक्त्वा तत्रैवांतरधीयत । गयो ह्यवाप्य तत्सर्वं धर्मेणारीनजीजयत् । स दर्शपौर्णमासाभ्यां का
लेष्वाग्रयणेन च । चातुर्मास्यैश्च विविधैर्यज्ञैश्चावाप्तदक्षिणैः । अयजच्छ्रद्धया राजा परिसंवत्सरान्शतं । गवां शतसहस्राणि शतमश्वशतानि च । तु
तं निष्कसहस्राणि गवां चाप्ययुतानि षट् । उत्थायोत्थाय स प्रादात्परिसंवत्सरान्शतं । नक्षत्रेषु च सर्वेषु ददन्नक्षत्रदक्षिणाः । ईजे च विविधैर्यज्ञैर्य
था सोमोंगिरा यथा । सौवर्णां पृथिवीं कृत्वा य इमां मणिशर्करां । विप्रेभ्यः प्राददाद्राजा सोश्वमेधे महामखे । जांबूनदमया यूपाः सर्वे रत्नपरिच्छदाः ।

गयस्यासन्समृद्धाश्च सर्वेन्नेन मनोहराः। सर्वकामसमृद्धाश्च प्रादात्तांश्च गयस्तदा। ब्राह्मणेभ्यः प्रहृष्टेभ्यः सर्वभूतेभ्य एव च। समुद्रवनद्वीपनदीनद
वनेषु च। नगरेषु च राष्ट्रेषु दिवि व्योम्नि च येवसन्। भूतग्रामाश्च विविधाः संतृप्ता यज्ञसंपदा। गयस्य सदृशो यज्ञो नास्त्यन्य इति ते ब्रुवन्। षट्त्रिंशद्यो
जनायामा त्रिंशद्योजनमायता। पश्चात्पुरश्चतुर्विंशा वेदी ह्यासीद्धिरण्मयी। गयस्य यजमानस्य मुक्तावज्रमणिस्तृता। प्रादात्स ब्राह्मणेभ्योथ
वासांस्याभरणानि च। यथोक्ता दक्षिणाश्चान्या विप्रेभ्यो भूरिदक्षिणः। यत्र भोजनशिष्टस्य पर्वताः पंचविंशतिः। कुल्याः कुशलवाहिन्यो रसानाम
भवंस्तदा। वस्त्राभरणगंधानां राशयश्च पृथग्विधाः। यस्य प्रभावाच्च गयस्य त्रिषु लोकेषु विश्रुतः। वटश्चाक्षय्यकरणः पुण्यं ब्रह्मसरश्च तत्। स चेन्ममा
र॰ पुत्रात्पुण्यतर॰ अयज्वान॰॥ ॥इति द्रोणपर्वणि षोडशराजकीये॥ ६६॥ नारद उ॥ ॥सांकृतिं रंतिदेवं च मृतं सृंजय शुश्रुम। यस्य द्विशतसा
हस्रा आसन्सूदा महात्मनः। गृहानभ्यागतान्विप्रानतिथीन्परिवेषकाः। पक्वापक्वं दिवारात्रमपर्यंत धनं तदा। न्यायेनाधिगतं वित्तं ब्राह्मणेभ्यो
ह्यमन्यत। वेदानधीत्य धर्मेण यश्चक्रे द्विषतो वशे। उपस्थिताश्च पशवः स्वयं यं शंसितव्रतं। बहवः स्वर्गमिच्छंतो विधिवत्सत्रयाजिनं। नदी महानसा
द्यस्य प्रवृत्ता चर्मराशितः। तस्माच्चर्मण्वतीश्चैवमग्निहोत्रेभवत्पुरा। ब्राह्मणेभ्यो ददन्निष्कान्सौवर्णान्स प्रभावतः। तुभ्यं निष्कं तुभ्यं निष्कमिति ह स्म
प्रभाषते। तुभ्यं तुभ्यमिति प्रादान्निष्कान्निष्कान्सहस्रशः। ततः पुनः समाश्वस्य निष्कानेव प्रयच्छति। अल्पं दत्तं मयाद्येति निष्ककोटिं प्रदाय सः। एका
ह्ना दास्यति पुनः कोन्यस्तत्संप्रदास्यति। द्विजपाणिवियोगेन दुःखं मे शाश्वतं महत्। भविष्यति न संदेह एवं राजाददद्वसु। सहस्रशश्च सौवर्णान्वृ
षभान्गोशतानुगान्। साष्टं शतं सुवर्णानां निष्कमाहुर्धनं तथा। अध्यर्धमासमददद्ब्राह्मणेभ्यः शतं समाः। अग्निहोत्रोपकरणं यज्ञोपकरणं च यत्।
ऋषिभ्यः करकान्कुंभान्स्थालीः पिठरमेव च। शयनासनयानानि प्रासादांश्च गृहाणि च। वृक्षांश्च विविधान्दद्यादन्नानि च धनानि च। सर्वं सौवर्णमे
वासीद्रंतिदेवस्य धीमतः। तथास्य गाथा गायंति ये पुराणविदो जनाः। रंतिदेवस्य तां दृष्ट्वा समृद्धिमतिमानुषीं। नैतादृशं दृष्टपूर्वं कुबेरसदनेष्वपि।

धनं च शर्ण्मासाद्य किंपुनर्मनुजेश्वरि । राज्यं वस्त्रोकसारेयमित्यूचुस्तत्र विस्मिताः ॥ सांकृते रंतिदेवस्य यां रात्रिमतिथिर्वसेत् । आलभ्यंत तदा गावः
सहस्राण्येकविंशतिः । तत्र स्म सूदाः क्रोशंति सुमृष्टमणिकुंडलाः । सूपं भूयिष्ठमश्नीध्वं नाद्य मांसं यथा पुरा । रंतिदेवस्य यत्किंचित्सौवर्णमभवत्तदा ।
तत्सर्वं वितते यज्ञे ब्राह्मणेभ्यो ह्यमन्यत । प्रत्यक्षं तस्य हव्यानि प्रतिगृह्णंति देवताः । कव्यानि पितरः काले सर्वकामान्द्विजोत्तमाः ॥ स चेन्ममार श्वैत्य पुत्रात्पु
ण्यतरः ॥ अयज्वानं ॥ ॥ इति द्रोणपर्वणि षोडशराजकीये ६६ ॥ नारद उ० ॥ ॥ दौष्यंतिं भरतं चापि मृतं सृंजय शुश्रुम । कर्माण्यसुकराण्यन्यैः कृ
तवान्यः शिशुर्वने । हिमावदातान्यः सिंहान्नखदंष्ट्रायुधान्बली । निर्वीर्यांस्तरसा कृत्वा विचकर्ष बबंध च ॥ क्रूरांश्चोग्रतरान्व्याघ्रान्दमित्वा चाकरोद्वशे ।
मनःशिलाइव शिलाः संयुक्ता जंतुराशिभिः । व्यालादींश्चापि बलवान्सुप्रतीकान्गजानपि । दंष्ट्रासु गृह्य विमुखान्शुष्कास्यानकरोद्वशे । महिषानप्यतिबलान्ब
लिनो विचकर्ष ह । सिंहानां च सुदृप्तानां शतान्याकर्षयद्बलात् । बलिनः सृमरान्खड्गान्नानासत्वानि चाप्युत । कृच्छ्रप्राणान्वने बध्वा दमयित्वाप्यपासृजत् । तं स
र्वदमनेत्याहुर्द्विजास्तेनास्य कर्मणा । तं प्रत्यषेधज्जननी मा सत्वानि विजीजहि । सोऽश्वमेधशतेनेष्ट्वा यमुनामनु वीर्यवान् । त्रिशतोऽश्वान्सरस्वत्यां गंगामन
नु चतुःशतान् । सोऽश्वमेधसहस्रेण राजसूयशतेन च । पुनरीजे महायज्ञैः समाप्तवरदक्षिणैः । अग्निष्टोमातिरात्राभ्यामिष्ट्वा विश्वजिता च पि । वाजपेयसह
स्राणां सहस्रैश्च सुसंवृतैः । इष्ट्वा शाकुंतलो राजा तर्पयित्वा द्विजान्धनैः । सहस्रं यत्र पद्मानां कण्वाय भरतो ददौ । जांबूनदस्य शुद्धस्य कनकस्य महायशाः । य
स्य यूपः शतव्यामः परिणाहे च कांचनः । समागम्य द्विजैः सार्धं सेंद्रैर्देवैः समुच्छ्रितः । अलंकृतान्राजमानान्सर्वरत्नैर्मनोहरैः । हिरण्यमश्वान्द्विरदान्र
थानुष्ट्राजाविकं । दासीदासं धनं धान्यं गाः सवत्साः पयस्विनीः । ग्रामान्गृहांश्च क्षेत्राणि विविधांश्च परिच्छदान् । कोटिशतायुतांश्चैव ब्राह्मणेभ्यो ह्यमन्यत ।
चक्रवर्ती ह्यदीनात्मा जितारिर्ह्यजितः परैः ॥ स चेन्ममार ॥ पुत्रात्पुण्यतरः ॥ अयज्वानं ॥ ॥ इति द्रोणपर्वणि षोडशराजकीये ६७ ॥ नारद उ० ॥ ॥
पृथुं वैन्यं च राजानं मृतं सृंजय शुश्रुम । यमभ्यषिंचन्साम्राज्ये राजसूये महर्षयः । यत्नतः प्रथितेत्यूचुः सर्वानभिभवन्पृथुः । क्षतान्नस्त्रायते सर्वानि

द्रो०प०
६०

संवं क्षत्रियोभवत्। प्रथुं वैन्यं प्रजा दृष्ट्वा रक्ताः स्मेति यदब्रुवन्। ततो राजेति नामास्य अनुरागादजायत। अकृष्टपच्या पृथिवी आसीद्वैन्यस्य कामधुक्।
सर्वकामदुहो गावः पुटके पुटके मधु। आसन् हिरण्मया दर्भाः सुखस्पर्शाः सुखावहाः। तेषां चीराणि संवीताः प्रजास्तेष्वेव शेरते। फलान्यमृतकल्पानि
स्वादूनि च मधूनि च। तेषामासीत्तदाहारो निराहाराश्च नाभवन्। अरोगाः सर्वसिद्धार्था मनुष्या अकुतोभयाः। निवसंत यथाकामं वृक्षेषु च गुहासु च। प्र
विभागो न राष्ट्राणां पुराणां चाभवत्तदा। यथासुखं यथाकामं यथैता मुदिताः प्रजाः। तस्य संस्तंभिता आपः समुद्रमभियास्यतः। पर्वताश्च ददुर्मार्गं ध्वज
भंगश्च नाभवत्। तं वनस्पतयः शैला देवासुरनरोरगाः। सप्तर्षयः पुण्यजना गंधर्वाप्सरसोपि च। पितरश्च सुखासीनमभिगम्येदमब्रुवन्। सम्राडसि क्ष
त्रियोसि राजा गोप्तापि तासि नः। देह्यस्मभ्यं महाराज प्रभुः सन्नीप्सितान्वरान्। यैर्वयं शाश्वतीस्तृप्तीर्वर्तयिष्यामहे सुखं। तथेत्युक्त्वा पृथुर्वैन्यो गृहीत्वाज
गवं धनुः। शरांश्चाप्रतिमान्घोरान् चिंतयित्वाब्रवीन्महीं। एह्येहि वसुधे क्षिप्रमेभ्यः कांक्षितं पयः। ततो दास्यामि भद्रं ते अन्नं यस्य यथेप्सितं॥
॥ ॥वसुधोवाच॥ ॥दुहितृत्वेन मां वीर संकल्पयितुमर्हसि। तथेत्युक्त्वा पृथुः सर्वं विधानमकरोद्वशी। ततो भूतनिकायास्तां वसुधां दुदुहुस्तदा। तां
वनस्पतयः पूर्वं समुत्तस्थुर्दुधुक्षवः। सातिष्ठद्वत्सला वत्सं दोग्धृ पात्राणि वीप्सती। वत्सोभूत्पुष्पितः शालः प्लक्षो दोग्धाभवत्तदा। छिन्नप्ररोहणं दुग्धं
पात्रमौदुंबरं शुभं। उदयः पर्वतो वत्सो मेरुर्दोग्धा महागिरिः। रत्नान्योषधयो दुग्धं पात्रमश्ममयं तथा। दोग्धा चासीत्तदा देवो दुग्धमूर्जस्करं प्रियं। अ
सुरा दुदुहुर्मायामामे पात्रे तु ते तदा। दोग्धा द्विमूर्धा तत्रासीत् वत्सश्चासीद्विरोचनः। कृषिं च सस्यं च नरा दुदुहुः पृथिवीतले। स्वायंभुवो मनुर्वत्सस्तेषां
दोग्धाभवत्पृथुः। अलाबुपात्रे च तथा विषं दुग्धा वसुंधरा। धृतराष्ट्रोभवद्दोग्धा तेषां वत्सस्तु तक्षकः। सप्तर्षिभिर्ब्रह्म दुग्धा तथा चाक्लिष्टकर्मभिः। दो
ग्धा बृहस्पतिः पात्रं छंदो वत्सश्च सोमराट्। अंतर्धानं चाम पात्रे दुग्धा पुण्यजनैर्विराट्। दोग्धा वैश्रवणस्तेषां वत्सश्चासीद्वृषध्वजः। पुण्यगंधान्पद्म
पात्रे गंधर्वाप्सरसोदुहन्। वत्सश्चित्ररथस्तेषां दोग्धा विश्वरुचिः प्रभुः। स्वधां रजतपात्रेषु दुदुहुः पितरश्च तां। वत्सो वैवस्वतस्तेषां यमो दोग्धांतक

राम
६०

कस्तदा। एवं निकायैस्तोउद्ध्या पयोभीष्टंहिंसा विरात्। येर्वर्त्तयंति ते यद्युपात्रैर्वर्त्तेस्तिस्य निरामयाः। यज्ञैश्च विविधैरिष्ट्वा प्रयुर्वैन्यः प्रतापवान्। संतर्पयित्वा
भूतानि सर्वैः कामैर्मनःप्रियैः। हैरण्यान्करोद्गजायेकेचित्साधिवीभुवि। तान्ब्राह्मणेभ्यः प्रायच्छदश्वमेधे महामखे। षष्टिं नागसहस्राणि षष्टिं नागश
तानि च। सौवर्णानि करोद्राजा ब्राह्मणेभ्यश्च तान्ददौ। इमां च पृथिवीं सर्वां मणिरत्नविभूषितां। सौवर्णामकरोद्राजा ब्राह्मणेभ्यश्च तां ददौ। स चेन्ममार॥ पु
त्रात्पुण्यतरः॥ अयज्वानं॥ ॥इतिद्रोणपर्वणि षोडशराजकीये॥ ७॥ नारद॥ ॥रामो महातपाः शूरो वीरलोकनमस्कृतः। जामदग्न्यो प्यतियशा अ
वितृप्तो मरिष्यति। यस्मादिमामनुपर्येति भूमिं कुर्वन्निमां स्रवं। न चासीद्विक्रिया यस्य प्राप्य श्रियमनुत्तमां। यः क्षत्रियैः परामृष्टे वत्से पितरि चाब्रवीत्। त
तोवधीत्कार्तवीर्यमजितं समरे परैः। क्षत्रियाणां चतुःषष्टिमयुतानि सहस्रशः। तदा मृत्योः समेतानि एकेकं धनुषाजयत्। ब्रह्मद्विषां चाथ तस्मिन्सह
स्राणि चतुर्दश। पुनरन्यान्निजग्राह दंतकूरं जघान ह। सहस्रं मुशलेनाघ्नन्सहस्रमसिनावधीत्। उद्बंधनात्सहस्रं च हेहयाः समरे हताः। सरथाश्वगजा वी
रा निहतास्तत्र शेरते। पितुर्वधामर्षितेन जामदग्न्येन धीमता। निजघ्ने दशसाहस्रान्रामः परशुना तदा। न ह्यमृष्यत ता वाचो यास्तैर्भृशमुदीरिताः। भृगो रा
माभिधावेति यदा क्रंदन्द्विजोत्तमाः। ततः काश्मीरदरदान्कुंतीक्षुद्रकमालवान्। अंगवंगकलिंगांश्च विदेहांस्ताम्रलिप्तकान्। रक्षोवाहान्वीतिहोत्रांस्त्रिग
र्तान्मार्तिकावतान्। शिबीनन्यांश्च राजन्यान्देशान्देशान्सहस्रशः। निजघान शितैर्बाणैर्जामदग्न्यः प्रतापवान्। कोटिशतसहस्राणि क्षत्रियाणां सहस्रशः।
इंद्रगोपकवर्णस्य बंधुजीवनिभस्य च। रुधिरस्य परीवाहैः पूरयित्वा सरांसि च। सर्वानष्टादश द्वीपान्वशमानीय भार्गवः। ईजे क्रतुशतैः पुण्यैः समाप्तव
रदक्षिणैः। वेदीमष्टनलोत्सेधां सौवर्णां विधिनिर्मितां। सर्वरत्नशतैः पूर्णां पताकाशतमालिनीं। ग्राम्यारण्यैः पशुगणैः संपूर्णां च महीमिमां। ततः शतसह
स्राणि द्विपेन्द्रान्हेमभूषितान्। रामस्य जामदग्न्यस्य प्रतिजग्राह कश्यपः। निर्दस्युं पृथिवीं कृत्वा शिष्टेष्टजनसंकुलां। कश्यपाय ददौ रामो हयमेधे
महामखे। त्रिःसप्तकृत्वो राजन्पृथिवीं कृत्वा निःक्षत्रियां पुरा। इष्ट्वा क्रतुशतैर्वीरो ब्राह्मणेभ्यो ह्यमन्यत। सप्तद्वीपां वसुमतीं मारीचो ग्रह्णत द्विजः। रामं प्रोवा

चनिर्गछवसुधातोममाज्ञया।सकाश्यपस्यवचनाद्वोत्सार्यसरितांपतिं।इषुपातंपुथांचक्रेषः कुर्वन्नास्फणशासनं।अध्यावसद्गिरिश्रेष्ठंमहेंद्रंपर्व
तोत्तमं।एवंगुणशतैर्युक्तोभृगूणांकीर्तिवर्धनः।जामदग्न्योप्यतियशामरिष्यतिमहाद्युतिः।त्वयाचतुर्भद्रतरःपुण्यात्पुण्यतरस्तव।अयज्वानमदा
क्षिण्यंमापुत्रमनुतप्यथाः।एतेचतुर्भद्रतरास्त्वयाभद्रशताधिकाः।मृतानरवरश्रेष्ठमरिष्यंतिचसंजय॥ ॥इतिद्रोणपर्वणिषोडशराजकीये॥ ॥
॥६७॥व्यासउ॥ ॥पुण्यमाख्यानमायुष्यंश्रुत्वाषोडशराजिकं।अव्याहरन्नरपतिस्तूष्णीमासीत्ससंजयः।तमब्रवीत्तथासीनंनारदोभगवानृषिः।
श्रुतंकीर्तयतोमह्यंगृहीतंतेमहाद्युते।आहोस्विदंततोनष्टंश्राद्धंशूद्रीपताविव।सएवमुक्तःप्रत्याहप्रांजलिःसंजयस्तदा।एतच्छ्रुत्वामहाबाहोधन्य
माख्यानमुत्तमं।राजर्षीणांपुराणानांयज्वनांदक्षिणावतां।विस्मयेनहृतेशोकेतमसीवार्कतेजसा।विपाप्मास्म्यव्यथोपेतोब्रूहिकिंकरवाण्य
हं॥ ॥नारद॥ ॥दिष्ट्यापहतशोकस्त्वंवृणीष्वेहयदिच्छसि।तत्तत्प्रपत्स्यतेसर्वंनमृषावादिनोवयं॥ ॥संजय॥ ॥एतेनैवप्रतीतोहंप्रसन्नो
यद्भवान्मम।प्रसन्नोयस्यभगवान्नतस्यास्तीहदुर्लभं॥ ॥नारदउ॥ ॥पुनर्ददामितेपुत्रंदस्युभिर्निहतंतथा।उद्धृत्यनरकात्कष्टात्पशुवत्प्रो
क्षितंयथा॥ ॥व्यासउ॥ ॥प्रादुरासीत्ततःपुत्रःसंजयस्याद्भुतप्रभः।प्रसन्नेनर्षिणादत्तःकुबेरतनयोपमः।ततःसंगम्यपुत्रेणप्रीतिमानभवन्नृपः।
ईजेचक्रतुभिःपुण्यैःसमाप्तवरदक्षिणैः।अकृतार्थश्चभीतश्चनचसन्नाहिकोहतः।अयज्वाचानपत्यश्चततोसौजीवितःपुनः।शूरोवीरःकृ
तार्थश्चप्रतापयारीन्सहस्रशः।अभिमन्युर्गतोवीरःपृतनाभिमुखोहतः।ब्रह्मचर्येणयांल्लोकान्विद्यया च पावकृतेन च।इष्टैश्चक्रतुभिर्यांतितांस्तेपुत्रो
क्षयांगतः।विद्वांसःकर्मभिःपुण्यैःस्वर्गमीहंतिनित्यशः॥ ॥संजयउवाच॥ ॥तस्मिन्नहनिसंवृत्तेघोरेप्राणभृतांक्षये।आदित्येस्तंगतेश्रीमा
न्संध्याकालउपस्थिते।अपयातेषुसैन्येषुवासायभरतर्षभः।हत्वासंसप्तकव्रातान्दिव्यैरस्त्रैःकपिध्वजः।प्रायात्स्वशिबिरंजिष्णुर्जैत्रमास्थायतंरथं।

र्य

राम
६१

गच्छन्नेव रणगोविंदं सन्नकंठोभ्यभाषत । किं नु मे हृदयं चैतत्तं वा स्यं संज्वलति केशव । स्पंदंति चापनिष्टानि गात्रं संसीदतीव चाच्युत । अनिष्टे चैव मे श्लिष्टं
हृदयं नापसर्पति । भुवि यादिक्षु चाप्युग्रा उत्पातो त्रासयंति मां । बहुप्रकारा दृश्यंते सर्व एवाघशंसिनः । अपि स्वस्ति भवेद्राज्ञः सामात्यस्य गुरो
र्मम ॥ ॥ वासुदेव उवाच ॥ ॥ व्यक्तं शिवं तव भ्रातुः सामात्यस्य भविष्यति । मा शुचः किंचिदेवान्यत्तत्रानिष्टं भविष्यति ॥ ॥ संजय ॥ ॥ ततः संध्यामु
पास्यैव वीरौ वीरावसादने । कथयंतौ रणे हत्तं प्रयातौ रथमास्थितौ । ततः स्वशिबिरं प्राप्तौ हतानंदं हतत्विषं । वासुदेवार्जुनौ चैव कृत्वा कर्म सु
दुष्करं । ध्वस्ताकारं समालक्ष्य शिबिरं परवीरहा । बीभत्सुरब्रवीत्कृष्णमस्वस्थहृदयस्ततः । नाद्य वाद्यानि तूर्याणि मांगल्यानि जनार्दन । मिश्रा दुंदुभि
निर्घोषैः शंखशब्दाडंबरैः सह । वीणा वा नाद्य वाद्यंते सम्यातालस्वनैः सह । मंगलानि च गीतानि न गायंति पठंति च । स्तुतियुक्तानि रम्याणि ममा
नीकेषु वंदिनः । योधाश्चापि हि मां दृष्ट्वा निवर्तंते ह्यधोमुखाः । कर्माणि च यथापूर्वं कृत्वा नाभिवदंति मां । अपि स्वस्ति भवेदद्य भ्रातृभ्यो मम माधव ।
न हि शुध्यति मे भावो दृष्ट्वा स्वजनमाकुलं । अपि पांचालराजस्य विराटस्य च मानद । सर्वेषामपि योधानां सामग्र्यं स्यान्ममाच्युत । न च मामद्य सौभ
द्रः प्रहृष्टो भ्रातृभिः सह । रणादायांतमुचितं प्रत्युद्याति हसन्निव ॥ ॥ संजय उवाच ॥ ॥ एवं संकथयंतौ तौ प्रविष्टौ शिबिरं स्वकं । ददृशाते भृशा
स्वस्थान्पांडवान्नष्टचेतसः । दृष्ट्वा भ्रातॄंश्च पुत्रांश्च विमनो वानरध्वजः । अपश्यंश्चैव सौभद्रमिदं वचनमब्रवीत् । मुखवर्णोऽप्रसन्नो वः सर्वेषामे
व लक्षये । न चाभिमन्युं पश्यामि न च मां प्रतिनंदति । मया श्रुतश्च द्रोणेन चक्रव्यूहो विनिर्मितः । न च वस्तस्य भेत्तास्ति ऋते सौभद्रमाहवे । न चो
पदिष्टस्तस्यासीन्मया नीकविनिर्गमः । कच्चिन्न बालो युष्माभिः परानीकं प्रवेशितः । भित्वानीकं महेष्वासः परेषां बहुशो युधि । कच्चिन्न निहतः शे
ते सौभद्रः परवीरहा । लोहिताक्षं महाबाहुं जातं सिंहमिवाद्रिषु । उपेंद्रसदृशं ब्रूत कथमायोधने हतं । सुकुमारं महेष्वासं वासवस्यात्मजात्मजं ।

द्रो॰ प॰
६२

सदा मम प्रियं श्रुत्वा कथमायोधने हतं। वार्ष्णेयी दयितं शूरं मया सतत लालितं। अंबा पाश्चाप्रियं नित्यं क्रोधवधी काल मोदितः। सदा गोहलिसि
हस्य केशवस्य महात्मनः। विक्रमश्रुतिमाहात्म्यैः कथमायोधने हतः। सुभद्रा याः प्रियं नित्यं द्रौपद्याः केशवस्य च। यदि पुत्रं न पश्यामि यास्यामि यास्या
मि यमसादनं। मृदुकुंचितकेशांतं वालबालमृगेक्षणं। मत्तद्विरदविक्रांतं शालपोतमिवोद्गतं। स्मिताभिभाषिणं दांतं गुरुवाक्यकरं सदा। बाल्ये
तु मुल्ककर्मणं प्रियवाक्यममर्षणं। महोत्साहं महाबाहुं दीर्घराजीवलोचनं। भक्तानुकंपिनं शांतं न च नीचानुसारिणं। कृतज्ञं ज्ञानसंपन्नं कृतास्त्र
मनिवर्तिनं। युद्धाभिनंदिनं तं द्विषतामघवर्द्धनं। स्वेषां प्रियहिते युक्तं पितॄणां जयगृद्धिनं। न च पूर्वप्रहर्तारं संग्रामे नष्टसंभ्रमं। यदि पुत्रं न पश्या
मि यास्यामि यमसादनं। रथेषु गण्यमानेषु गणितं तं महारथं। मत्तो ध्यर्द्धगुणं संख्याने रूपं बाहुशालिनं। सुललाटं सुकेशांतं सुभ्रूक्षिदशन
च्छदं। अपश्यतस्तद्वदनं का शांतिर्हृदयस्य मे। तंत्रीस्वनसुखं रम्यं पुंस्कोकिलसमन्वितं। अशृण्वतः स्वनं तस्य का शांतिर्हृदयस्य मे। रूपं चा
प्रतिरूपस्य त्रिदशेष्वपि दुर्लभं। अपश्यतो धुर्वीरस्य का शांतिर्हृदयस्य मे। सुकुमारः सदा वीरो महार्हशयनोचितः। भूमावनाथवच्छेते नूनं नाथ
वतां वरः। शयानं समुपासंति यं पुरा परमस्त्रियः। तमद्य विप्रविद्धांगमुपासंत्यशिवाः शिवाः। यः पुरा बोध्यते सुप्तः सूतमागधवंदिभिः। बोध
यंत्यद्य तं नूनं श्वापदा विकृतैः स्वरैः। छत्रच्छायासमुचितं तस्य तद्वदनं शुभं। नूनमद्य रजो धूस्तं रणरेणुः करिष्यति। हा पुत्रकाविरतस्य सततं पुत्रद
र्शने। भाग्यहीनस्य कालेन यथा मे नीयसे बलात्। साद्य संयमनी नूनं सभा सुकृतिनां गतिः। स्वभाभिर्भासिता रम्या त्वया त्यर्थं विराजते। नूनं वै
वस्वतश्च त्वां वरुणश्च प्रियातिथिं। शतक्रतुर्धनेशश्च प्राप्तमर्चंत्यभीतकं। एवं विलप्य बहुधा भिन्नपोतो वणिग्यथा। दुःखेन महताविष्टो युधिष्ठिर
मपृच्छत। कच्चित्स कदनं कृत्वा परेषां कुरुनंदन। स्वर्गतोभिमुखः संख्ये युध्यमानो नरर्षभ। स नूनं बहुभिर्युक्तो युध्यमानो नरर्षभैः। पाद्यमानः

राम
६२

शरीरे स्त्रीक्ष्योः कर्णद्रोणकृपादिभिः। नानालिंगैः स्रुवः तोये र्भमपुत्रोल्पवेतनः। असहायः सहायार्थं मामनुध्यातवान्ध्रुवं। दृष्टुमेस्यादपि बाणैः पतते
स पुनः पुनः। इति मां प्रलपन्मन्ये नृशंसैर्भुवि पातितः। अथवा मातलेः सूतश्च सुस्त्रीयो माधवस्य च। सुभद्रायां च संभूतो नैवं वक्तुमिहार्हति। वज्रसा
रमयं नूनं हृदयं सुदृढं मम। अपश्यतो दीर्घबाहुं रक्ताक्षं यन्न दीर्यते। कथं बाले महेष्वासे नृशंसा मर्मभेदिनः। स्वस्त्रीये वासुदेवस्य मम पुत्रे क्षिपन्ध
रान्। यो मां नित्यमदीनात्मा प्रत्युद्गम्याभिनंदति। उपायांतमरिघ्नं त्वा सोद्य मां किं न पश्यति। नूनं स पतितः शेते धरण्यां रुधिरोक्षितः। शोभ
यन्मेदिनीं गात्रैरादित्य इव पातितः। सुभद्रामनुशोचामि या पुत्रमपलायिनं। रणे विनिहतं श्रुत्वा शोकार्ता वै विनंक्ष्यति। सुभद्रा वक्ष्यते किं मामभि
भिमन्युमपश्यती। द्रौपदी चैव दुःखार्ते ते च वक्ष्यामि किं त्वहं। वज्रसारमयं नूनं हृदयं यन्न यास्यति। सहस्रधा वधूं दृष्ट्वा रुदतीं शोककर्षितां। हृप्त
नादा धार्तराष्ट्राणां सिंहनादो मया श्रुतः। युयुत्सुश्चापि कृष्णेन श्रुतो वीरानुपालभन्। अशक्नुवंतो बीभत्सुं बालं हत्वा महारथाः। किं नदध्वमधर्मज्ञाः पा
र्थे वा हृष्यतां बलं। किं तयोर्विप्रियं कृत्वा केशवार्जुनयोर्मृधे। सिंहवन्नदत प्रीताः शोककाल उपस्थिते। आगमिष्यति वः क्षिप्रं फलं पापस्य कर्मणः।
अधर्मो हि कृतस्तीव्रः कथं स्यादफलश्चिरं। इति तान्प्रतिभाषन्वै वैश्यापुत्रो महायशाः। अपायाच्छस्त्रमुत्सृज्य कोपदुःखसमन्वितः। किमर्थमेतन्नाख्या
तं त्वया कृष्ण रणे मम। अधक्ष्यं तानहं क्रूरांस्तदा सर्वान्महारथान्॥ ॥संजय उ०॥ ॥ पुत्रशोकार्दितं पार्थं ध्यायंतं साश्रुलोचनं। निगृह्य वासुदेवस्तं पुत्रा
धिभिरभिप्लुतं। मैवमित्यब्रवीत्कृष्णस्तीव्रशोकसमन्वितं। सर्वेषामेव वै पन्थाः शूराणामनिवर्तिनां। क्षत्रियाणां विशेषेण येषां युद्धेन जीविका। एषा वै
युध्यमानानां शूराणामनिवर्तिनां। विहिता धर्मशास्त्रज्ञैर्गतिर्गतिमतां वर। ध्रुवं युद्धे हि मरणं शूराणामनिवर्तिनां। गतः पुण्यकृतां लोकानभिमन्युर्न
संशयः। एतच्च सर्ववीराणां कांक्षितं भरतर्षभ। संग्रामेभिमुखा मृत्युं प्राप्नुयामेति मानद। स हि वीरान्रणे हत्वा राजपुत्रान्महारथान्। वीरैराकांक्षितं
मृत्युं संप्राप्तोभिमुखो रणे। मा शुचः पुरुषव्याघ्र पूर्वैरेष सनातनः। धर्मकृद्भिः कृतो धर्मः क्षत्रियाणां रणे क्षयः। इमं ते भ्रातरः सर्वे दीना भरतसत्तम।

तु पितृशोकसमाविष्टेन पार्थ्यस्सुहृदस्तव। एतां स्त्वं वत्स्यसा समाश्वास्य मानद। विदितं वेदितव्यं ते न ते शोकं कर्तुमर्हसि। एवमाश्वासितः पार्थः सुहृदा
क्लिष्टकर्मणा। ततोऽब्रवीत्तदा भ्रातॄन् सर्वान्पार्थः सगद्गदं। स दीर्घबाहुः पृथ्वंसो दीर्घराजीवलोचनः। अभिमन्युर्यथा वृत्तः श्रोतुमिच्छाम्यहं तथा। सनागस्यं
दनहयान्द्रक्ष्यध्वं निहतान्मया। संग्रामे सानुबंधांस्तान्मम पुत्रस्य वैरिणः। कथं च वः कृतास्त्राणां सर्वेषां शस्त्रपाणिनां। सौभद्रो निधनं गच्छेद्वज्रिणापि
समागतः। यद्येवमहमज्ञास्यमशक्तान्रक्षणे पुत्रस्य पांडुपांचालान्मया गुप्तो भवेत्ततः। कथं च वो रथस्थानां शरवर्षाणि मुंचतां। नीतोऽभिमन्युर्नि
धनं कदर्थीकृत्य वः परैः। अहो वः पौरुषं नास्ति न च वोऽस्ति पराक्रमः। यत्राभिमन्युः समरे पश्यतां वो निपातितः। आत्मानमेव गर्हेयं यदहं वः सुदुर्ब
लान्। युधानेनत्राय निर्यातो भीरून्न कृतनिश्चयान्। अहोस्विद्भूषणार्थाय वर्मशस्त्रायुधानि वः। वाचश्च वक्तुं संसत्सु मम पुत्रमरक्षतां। एवमुक्त्वा त
तो वाक्यं तिष्ठंश्चापवरासिमान्। न स्म शक्यते तदा बीभत्सुः केनचित्समीक्षितुं। तमंतकमिव क्रुद्धं निःश्वसंतं मुहुर्मुहुः। पुत्रशोकाभिसंतप्तमश्रुपूर्णमुखं
तदा। नाभाषितुं शक्नुवंति द्रष्टुं वा सुहृदोऽर्जुनं। अन्यत्र वासुदेवाद्वा ज्येष्ठाद्वा पांडुनंदनात्। सर्वास्ववस्थासु हितावर्जुनस्य मनोनुगौ। बहुमानात्प्रि
यत्वाच्च तावेनं वक्तुमर्हतः। ततस्तं पुत्रशोकेन भृशं पीडितमानसं। राजीवलोचनं क्रुद्धं राजा वचनमब्रवीत्॥ ॥इति द्रोणपर्वण्यभिमन्युवधे॥ ६०॥ यु
धिष्ठिर उवाच॥ ॥त्वयि याते महाबाहो संशप्तकवधं प्रति। प्रयत्नमकरोत्तीव्रमाचार्यो ग्रहणे मम। व्यूढानीकाव्यं द्रोणं वारयामस्म सर्वशः। प्रतिव्यू
ह्य रथानीकं यतमानं तथा रणे। स वार्यमाणो रथिभी रक्षितेन मया तथा। अस्मानपि जघानाशु पीडयन्निशितैः शरैः। ते पीड्यमाना द्रोणेन द्रोणानी
केन शक्नुमः। प्रतिवीक्षितुमप्याजौ भेत्तुं तत्कुत एव तु। वयं त्वप्रतिमवीर्यं सर्वे सौभद्रमात्मजं। उक्तवंतः स्म ते तात भिंध्यनीकमिति प्रभो। स तथा नोदितो
ऽस्माभिः सदश्व इव वीर्यवान्। असह्यमपि तं भारं वोढुमेवोपचक्रमे। स तथास्त्रोपदेशेन वीर्येण च समन्वितः। प्राविशत्तद्बलं बालः सुपर्ण इव सागरं। ते
नुयाता वयं वीरं सात्वतीपुत्रमाहवे। प्रवेष्टुकामास्तेनैव येन स प्राविशच्चमूं। ततः सैंधवको राजा क्षुद्रस्तात जयद्रथः। वरदानेन रुद्रस्य सर्वान्नः स

मवारयत्।ततो द्रोणः कृपः कर्णो द्रौणिः कौशल्य एव च। कृतवर्मा च सौभद्रं षड्रथाः पर्यवारयन्। परिवार्य तु तैः सर्वैर्युधि बालो महारथैः। यतमानः परं शक्त्या
बहुभिर्विरथीकृतः। ततो दौःशासनिः कृच्छ्रं तथा तैर्विरथीकृतं। संशयं परमं प्राप्तं दिष्टान्तेनाभ्ययोजयत्। स तु हत्वा सहस्राणि द्विपाश्वरथसादिनां। अष्टौ र
थसहस्राणि नव दंतिशतानि च। राजपुत्रशतं चान्यद्वीरांश्चालक्षितान्बहून्। बृहद्बलं च राजानं स्वर्गेणाजौ प्रयुज्य तं। ततः परमधर्मात्मा दिष्टान्तमु
पजग्मिवान्। एतावदेव निर्वृत्तमस्माकं शोककारणं। स चैवं पुरुषव्याघ्रः स्वर्गलोकमवाप्तवान्। ततोऽर्जुनो वचः श्रुत्वा धर्मराजेन भाषितं। हा पुत्र इति निःश्व
स्य व्यथितो न्यपतद्भुवि। विषण्णवदनाः सर्वे परिगृह्य धनंजयं। नेत्रैरनिमिषैर्दीनाः प्रत्यवेक्षन्परस्परं। प्रतिलभ्य ततः संज्ञां वासविः क्रोधमूर्छितः। कंपमा
नोऽज्वरेणेव निःश्वसंश्च मुहुर्मुहुः। पाणिं पाणौ विनिष्पिष्य श्वसमानोऽश्रुनेत्रवान्। उन्मत्त इव विप्रेक्षन्निदं वचनमब्रवीत्॥ ॥अर्जुन उ॥ ॥सत्यं वः प्रतिजाना
मि श्वोऽस्मि हंता जयद्रथं। न चेद्वधभयाद्भीतो धार्तराष्ट्रान्प्रहास्यति। न चास्मां छरणं गच्छेत्कृष्णं वा देवकीसुतं। भवंतं वा महाराज श्वोऽस्मि हंता जयद्रथं। धार्त
राष्ट्रप्रियकरं मयि विस्मृतसौहृदं। पापं बालवधे हेतुं श्वोऽस्मि हंता जयद्रथं। रक्ष्यमाणाश्च तं संख्ये ये मां योत्स्यंति केचन। अपि द्रोणकृपौ वीरौ छादयिष्या
मि तांश्छरैः। यद्येतदेवं संग्रामे न कुर्यां पुरुषर्षभाः। मा स्म पुण्यकृतां लोकान्प्राप्नुयां शूरसंमतान्। ये लोका मातृहंतॄणां ये चापि पितृघातिनां। गुरुदाररतानां
च पिशुनानां च ये तथा। साधूनसूयतां ये च ये चापि परिवादिनां। ये च निक्षेपहर्तॄणां ये च विश्वासघातिनां। तान्नहत्वाधिगच्छेयं न चेद्धन्यां जयद्रथं। भुक्तपू
र्वां स्त्रियं ये च निंदितामघशंसिनां। ब्रह्मघ्नानां च ये लोका ये च गोघातिनामपि। पायसं वा यवान्नं वा शाकं कृसरमेव वा। संयावापूपमांसानि ये च लोका वृथाश्न
तां। वेदाध्यायिनमत्यर्थं संशितं वा द्विजोत्तमं। अवमन्यमानो यास्यामि वृद्धान्साधूंस्तथा गुरून्। स्पृशतो ब्राह्मणं गां च पादेनाग्निं च यः स्मृतः। अप्सु श्लेष्म पुरी
षं वा मूत्रं वा मुंचतां गतिः। तां गच्छेयं गतिं घोरां न चेद्धन्यां जयद्रथं। नग्नस्य स्नातुं पुमानस्य या च वंध्यातिथेर्गतिः। उत्कोचिनां मृषोक्तीनां वंचकानां च या गतिः।
आत्मापहारिणां चैव या च मिथ्याभिशंसिनां। भृत्यैः संवदमानानां पुत्रदाराश्रितैस्तथा। असंविभज्य क्षुद्राणां या गतिर्मिष्टमश्नतां। तां गच्छेयं गतिं घोरां न चे

हन्यां जयद्रथं । संश्रितं वापि यस्त्यक्त्वा साधुं तद्वचनेरतं । नाबिभर्ति च शं सात्मा निंदते चोपकारिणं । अर्हते प्रातिवेश्माय श्राद्धं यो न ददाति च । अनर्हते च यो दद्या[illegible] वृ
षलीपतये च । मद्यपो भिन्नमर्यादः कृतघ्नो भ्रातृनिंदकः । तेषां गतिमियां क्षिप्रं न चेद्धन्यां जयद्रथं । धर्मादपेता ये चान्ये मया नात्रानुकीर्तिताः । ये चानुकीर्ति
ताः क्षिप्रं गतिं तेषामवाप्नुयां । यदि व्युष्टामिमां रात्रिं श्वो न हन्यां जयद्रथं । इमां चाप्यपरां भूयः प्रतिज्ञां मे निबोधत । अजातामपसव्येन उत्संगे वापि वादतां । पा
लाशमासनं ये चा पादकुर्दधौतेवनं । कोशं संमार्जनीयेषां खपतां व्रतथोषासि । गच्छेयं तान्हं लोकान्न चेद्धन्यां जयद्रथं । शीतभीताश्च ये विप्रा रणभीताश्च ये
त्रियाः । तां गच्छेयं गतिं घोरां न चेद्धन्यां जयद्रथं । एककूपोदके ग्रामे वेदध्वनिविवर्जिते । षण्मासं तत्र वासेन मे न चेद्धन्यां जयद्रथं । धनयौवनदर्पेण भर्तारं याव
मन्यते । तां गतिं च गमिष्यामि न चेद्धन्यां जयद्रथं । परदाररताये च ये च ब्राह्मणनिंदकाः । गीतवाद्यरताये च वृषलीपतयस्तथा । मधुपाभिन्नमर्यादाः कृत
घ्ना भर्तृनिंदकाः । तां गतिं हि गमिष्यामि न चेद्धन्यां जयद्रथं । धर्मादपेता ये चान्ये मया नात्रानुकीर्तिताः । दिवा मैथुनिनः पापा दिवसेषु च शेरते । अगारदा
हा गरदो येग्न्यातिथ्यविवर्जिताः । रजस्वलां सेवयतो गोपानेषु च विघ्नकृत । कन्यासु कन्येन ददते ब्राह्मणाः सर्वविक्रयी । वेदविक्रयिणो चापि या या गतिर्बलिघा
तिनां । यो च का बहुयाजीनां ब्राह्मणानां च वृत्तिनां । अस्य मैथुनिकाल्लोकान्ये च मैथुनिके रताः । तान्हं लोकान्गमिष्यामि न चेद्धन्यां जयद्रथं । ऋणाभूमिहरा
णां च स्त्रीबालधनकांक्षिणां । देवद्रव्यप्रलुब्धानां या गतिर्वेदनिंदिनां । तां गतिं हि गमिष्यामि न चेद्धन्यां जयद्रथं । यद्यस्मिन्नहते पापे सूर्योस्तमुपयास्यति ।
इहैव संप्रवेष्टास्मि ज्वलितं जातवेदसं । असुरसुरमनुष्याः पक्षिणश्चोरगा वा पितृरजनिचरा ब्रह्मदेवर्षयो वा । चरमचरमपीदं यत्परं चापि तस्मात्तदपि
मम रिपुं तं रक्षितुं नैव शक्ताः । यदि विशति रसातलं तदग्र्यं वियदपि देवपुरं दितेः पुरं वा । तदपि शरशतैरहं प्रभाते भृशमभिपत्य रिपोः शिरोभिहर्ता । एव
मुक्त्वा विचिक्षेप गांडीवं सव्यदक्षिणं । तस्य शब्दमतिक्रम्य धनुःशब्दोस्पृशद्दिवं । अर्जुनेन प्रतिज्ञाते पांचजन्यं जनार्दनः । प्रदध्मौ तत्र संक्रुद्धो देवदत्तं च फाल्गु
नः । स पांचजन्योच्युतवक्त्रवायुना भृशं सुसंपूरितोदरनिःसृतध्वनिः । जगत्सपातालवियद्दिगीश्वरं प्रकंपयामास युगात्यये यथा । ततो वादित्रघोषाश्च प्रा

दुरासन्नमंततः ॥ सिंहनादाश्च पांडूनां प्रतिभाते महात्मना ॥ ॥इति द्रोणपर्वण्यभिमन्युवधः समाप्तः ॥ ७१ ॥ संजय उवाच ॥ ॥श्रुत्वा तु तं महाशब्दं पांडूनां
जयगृद्धिनां । चारैः प्रवारिते तत्र समुत्थाय जयद्रथः । शोकसंमूढहृदयो दुःखेनाभिहतो भृशं । मज्जमान इवागाधे विपुले शोकसागरे । जगाम समितिं राज्ञां
सैंधवो विलपन्बहु । स तेषां नरदेवानां सकाशे परिदेवयन् । अभिमन्योः पितुर्भीतः सव्रीडो वाक्यमब्रवीत् । यो सौ पांडोः किल क्षेत्रे जातः शक्रे
ण कामिना । स निनीषति दुर्बुद्धिर्मां किलैकं यमक्षयं । तत्स्वस्ति वोस्तु यास्यामि स्वगृहं जीवितेप्सया । अथ वा स्थ प्रतिबलास्त्रातुं मां क्षत्रियर्षभाः । पार्थेन
प्रार्थितं वीरास्ते ददंतु ममाभयं । द्रोणदुर्योधनकृपाः कर्णमद्रेशबाल्हिकाः । दुःशासनोदयः शक्तास्त्रातुमप्यंतकार्दितं । किमंग पुनरेकेन फाल्गुनेन जिघांस
ता । न त्रायेयुर्भवंतो मां समस्ताः पतयः क्षितेः । प्रहर्षं पांडुसेनायाः श्रुत्वा मम महद्भयं । सीदंतीव च मेंगानि मुमूर्षोरिव पार्थिवाः । वधो नूनं प्रतिज्ञातो मम गांडी
वधन्वना । यथा हि हृष्टाः क्रोशंति शोककालेप्यपांडवाः । न देवा न च गंधर्वा नासुरोरगराक्षसाः । उत्सहंतेन्यथा कर्तुं कुत एव नराधिपाः । तस्मान्मामनुजानी
त भद्रं वोस्तु नरर्षभाः । अदर्शनं गमिष्यामि न मां द्रक्ष्यंति पांडवाः । एतन्मात्मापतत्तज्यं सोपवातोभवाम्यहं । दुःशलाभ्रातृसौहार्दान्मां रक्षंतु तथा ध्रुवं । एवं वि
लपमानं तु भयव्याकुलचेतसं । आत्मकार्यगरीयस्त्वाद्राजा दुर्योधनोब्रवीत् । न भेतव्यं नरव्याघ्र को हि त्वां पुरुषर्षभ । मध्ये क्षत्रियवीराणां तिष्ठंतं प्रार्थयेद्युधि ।
अहं वैकर्तनः कर्णश्चित्रसेनो विविंशतिः । भूरिश्रवाः शलः शल्यो वृषसेनो जयस्तथा दुरासदः । पुरुमित्रो जयो भोजः कांबोजश्च सुदक्षिणः । सत्यव्र
तो महाबाहो विकर्णो दुर्मुखः सहः । दुःशासनः सुबाहुश्च कलिंगश्चाप्युदायुधः । विंदानुविंदावावंत्यौ द्रोणो द्रौणिः ससौबलः । एते चान्ये च बहवो नाना
जनपदेश्वराः । ससैन्यास्त्वाभियास्यंति व्येतु ते मानसो ज्वरः । त्वं चापि रथिनां श्रेष्ठः स्वयं शूरोमितद्युते । स कथं पांडवेयेभ्यो भयं पश्यसि सैंधव । अक्षौहि
ण्यो दशैका च मदीयास्तव रक्षणे । यत्ता योत्स्यंति मा भैस्त्वं सैंधव व्येतु ते मानसो ज्वरः ॥ ॥संजय ॥ ॥ एवमाश्वासितो राजन्पुत्रेण तव सैंधवः । दुर्योधनेन सहितो
द्रोणं रात्रावुपागमत् । उपसंग्रहणं कृत्वा द्रोणाय स विशांपते । उपोपविश्य प्रणतः पर्यपृच्छदिदं तदा ॥ ॥जयद्रथ ॥ ॥ निमित्ते दूरपातित्वे लघुत्वे दृ
ढवेधने । मम ब्रवीतु भगवान्विशेषं फाल्गुनस्य च । विद्याविशेषमिच्छामि ज्ञातुमाचार्य तत्वतः । ममार्जुनस्य च विभो यथातत्वं प्रचक्ष्व मे ॥ ॥द्रोण ॥

समितिं २

सममाचार्यकं तात तव चैवार्जुनस्य च। यो गाढः स्वोषितस्तात तस्मात्त्वत्तोऽधिकोऽर्जुनः। न तु ते युधि संत्रासः कार्यः पार्थात्कथंचन। अहं हि रक्षिता राजन्भयात्त्वां
नात्र संशयः। न हि मद्बाहुगुप्तस्य प्रभवंत्यमरा अपि। व्यूहिष्यामि च तं व्यूहं यं पार्थो न तरिष्यति। तस्माद्युध्यस्व मा भैस्त्वं स्वधर्ममनुपालय। पितृपैतामहं मा
र्गमनुयाहि नराधिप। अधीत्य विधिवद्वेदानग्नयः सुहुतास्त्वया। इष्टं च बहुभिर्यज्ञैर्न ते मृत्युकृतं भयं। दुर्लभं मानुषैर्मंदैर्महाभाग्यमवाप्य तु। भुज
वीर्यार्जितांल्लोकान् [illegible] प्राप्स्यस्यनुत्तमान्। कुरवः पांडवाश्चैव वृष्णयोऽन्ये च मानवाः। अहं च सहपुत्रेण अध्रुवा इति चिंत्यतां। पर्यायेण वयं सर्वे का
लेन बलिना हताः। [illegible] लोकं गमिष्यामः स्वैः स्वैः कर्मभिरन्विताः। तपस्तप्त्वा तु यांल्लोकान्प्राप्नुवंति तपस्विनः। क्षत्रधर्माश्रिताः शूराः क्षत्रियाः प्राप्नुवं
ति तान्। ॥संजय॥ ॥एवमाश्वासितो राजन्भारद्वाजेन सैंधवः। अपानुदद्भयं पार्थाद्युद्धाय च मनो दधे। ततः प्रहर्षः सैन्यानां तवाप्यासीद्विशांप
ते। वादित्राणां ध्वनिश्चोग्रः सिंहनादरवैः सह॥ ॥इति द्रोणपर्वणि जयद्रथवधे ॥७४॥ संजय उ० ॥ ॥प्रतिज्ञाते च पार्थेन सिंधुराजवधे तदा। वासुदेवो म
हाबाहुर्धनंजयमभाषत। भ्रातॄणां मतमाज्ञाय त्वया वाचा प्रतिश्रुतं। सैंधवं श्वोऽस्मि हंतेति तत्साहसतमं कृतं। असंमंत्र्य मया सार्धमतिभारोऽयमु
द्यतः। कथं नु सर्वलोकस्य नावहास्यो भविष्यसि। धार्तराष्ट्रस्य शिबिरे मया प्रणिहिताश्चराः। त इमे शीघ्रमागम्य प्रवृत्तिं वेदयंति नः। त्वया वै संप्रति
ज्ञाते सिंधुराजवधे तदा। सिंहनादः सवादित्रैः सुमहानिह तैः श्रुतः। तेन शब्देन वित्रस्ता धार्तराष्ट्राः ससैंधवाः। नाकस्मात्सिंहनादोऽयमिति मत्वा व्यव
स्थिताः। सुमहाञ्छब्दसंपातः कौरवाणां महाभुज। आसीन्नागाश्वपत्तीनां रथघोषश्च भैरवः। अभिमन्युवधं श्रुत्वा ध्रुवमार्तो धनंजयः। रात्रौ निर्यास्यति
क्रोधादिति मत्वा व्यवस्थिताः। तैर्यतद्भिरियं सत्या श्रुता सत्यवतस्तव। प्रतिज्ञा सिंधुराजस्य वधे राजीवलोचन। ततो विमनसः सर्वे त्रस्ताः क्षुद्रमृगा इ
व। आसन्सुयोधनामात्याः स च राजा जयद्रथः। अथोत्थाय सहामात्यैर्दीनः शिबिरमात्मनः। आयात्सौवीरसिंधूनामीश्वरो भृशदुःखितः। स मंत्रका
ले संमंत्र्य सर्वा नैःश्रेयसीः क्रियाः। सुयोधनमिदं वाक्यमब्रवीद्राजसंसदि। मामसौ पुत्रहंतेति श्वोऽभियाता धनंजयः। प्रतिज्ञातो हि सेनाया मध्ये तेन व
धो मम। तां न देवा न गंधर्वा नासुरोरगराक्षसाः। उत्सहंतेऽन्यथा कर्तुं प्रतिज्ञां सव्यसाचिनः। ते मां रक्षत संग्रामे मा वो मूर्ध्नि धनंजयः। पदं कृत्वाप्नुयाल्ल

स्यंतस्माद त्रविधीयतां। स्वपरक्षा न मे संख्ये क्रियते कुरुनंदन। अनुजानीहि मां राजन् गमिष्यामि गृहान्प्रति। एवमुक्तस्तु वाक्शरैर्विमनाः सुयोधनः।
श्रुत्वाभिवचनं तस्य ध्यानमेवान्वपद्यत। तमार्त्तमभिसंप्रेक्ष्य राजा किल स सैंधवः। मृदु चात्महितं चैव सापेक्षमिदमुक्तवान्। नेह पश्यामि भवतां तथा वीर्यं
धनुर्द्धरं। योऽर्जुनस्यास्त्रमस्त्रेण प्रतिहन्यान्महाहवे। वासुदेवसहायस्य गांडीवं धुन्वतो धनुः। कोऽर्जुनस्याग्रतस्तिष्ठेदपि साक्षाच्छतक्रतुः। महेश्वरोऽपि
पार्थेन श्रूयते योधितः पुरा। पदातिना महातेजा गिरौ हिमवति प्रभुः। दानवानां सहस्राणि हिरण्यपुरवासिनां। जघानैकरथेनैव देवराजप्रणोदि
तः। समायुक्तो हि कौंतेयो वासुदेवेन धीमता। सामरानपि लोकांस्त्रीन्निहन्यादिति मे मतिः। सोहमिच्छाम्यनुज्ञातुं रक्षितुं वा महात्मना। द्रोणेन स
ह पुत्रेण वीरेण यथा वा मन्यसे। स राज्ञा स्वयमाचार्यो भृशमाक्रंदितोऽर्जुने। संविधानं च विहितं रथो आधाः किल सज्जिताः। कर्णो भूरिश्रवा द्रोणिर्दुर्ष
सेनश्च दुर्जयः। कृपश्च मद्रराजश्च षडेतेऽग्रपुरोगमाः। शकटः पद्मपृष्ठश्चार्द्धो व्यूहो द्रोणेन कल्पितः। कर्णिकापाद्ममध्यस्थः सूचीपार्श्वे जयद्रथः। स्था
स्यते रक्षितो वीरैः। सिंधुराड् युद्धदुर्मदैः। धनुः शस्त्रे च वीर्ये च प्राणे चैव तथोरसि। अविषह्यतमा ह्येते दीक्षिताः पार्थ षड्रथाः। एतानजित्वा सगणा
न्नैव प्राप्यो जयद्रथः। तेषामेकैकशो वीर्यं षण्णां त्वमनुचिंतय। सहिता हि नरव्याघ्रा न शक्या जेतुमोजसा। भूयश्च चिंतयिष्यामो नीतिमात्महिता
य वै। मंत्रज्ञैः सचिवैः सार्द्धं सुहृद्भिः कार्यसिद्धये॥ ॥अर्जुन॥ ॥ षड्रथान्धार्त्तराष्ट्रस्य मन्यसे यान्बलाधिकान्। तेषां वीर्यं ममार्द्धेन न तुल्यमिति
लक्षये। अस्त्रमस्त्रेण सर्वेषामेतेषां मधुसूदन। मया द्रक्ष्यसि संभिन्नं जयद्रथवधैषिणा। द्रोणस्य मिषतः सोहं सगणस्य विलप्यतः। मूर्द्धानं सिंधु
राजस्य पातयिष्यामि भूतले। यदि साध्याश्च रुद्राश्च वसवश्च सहाश्विनः। मरुतश्च सहेंद्रेण विश्वेदेवास्तथेश्वराः। पितरः सहगंधर्वाः सुपर्णाः सागरा न
यः। द्यौर्वियत्पृथिवी चेयं दिशश्च सदिगीश्वराः। ग्राम्यारण्यानि भूतानि स्थावराणि चराणि च। त्रातारः सिंधुराजस्य भवंति मधुसूदन। तथापि बाणैर्निह
तं श्वो द्रष्टासि रणे मया। सत्येन च शपे कृष्ण तथैवात्मानमालभे। यश्च गोप्ता महेष्वासस्तस्य पापस्य दुर्मतेः। तमेव प्रथमं द्रोणमभियास्यामि केशव।

तस्मिन्नृद्यूतमिदं बहुं मन्यते स्म सुयोधनः। तस्मात्तस्यैव सेनान्यमभित्वाया सामि सैंधवं। इष्वास्त्रसिध्योमहेष्वासात्राशवे स्त्रिमतेजसेः। मृत्रं गाण्डीवगिरैवज्ञै
दृश्यमाणो मया युधि। नरनागाश्वदेहेभ्यो विस्रविष्यति शोणितं। पतद्भिः पतितेभ्यश्च विभिन्नेभ्यः शितैः शरैः। गांडीवप्रेषिता बाणा मनोनि
लसमाजुवे। नृग॥ नागाश्वान्विदेहास्तु रश्वः कर्तास्मि सहस्रशः। यमात्कुबेराद्वरुणाद्रुद्रादिंद्राच्च यन्मया। उपात्तमस्त्रं घोरं यत्तद्द्रष्टारो नरा युधि।
ब्रह्मणोस्त्रेण चान्यानि हन्यमानानि संयुगे। मयाद्रक्ष्यंति सैन्यानि सैंधवस्याभिरक्षिणः। शरवेगसमुत्कृत्ते राज्ञां केशैः नमूर्द्धभिः। श्वाभीर्यमा
णां पृथिवीं द्रष्टासि श्वो मया युधि। क्रव्यादांस्तर्पयिष्यामि द्रावयिष्यामि शात्रवान्। सुहृदो नंदयिष्यामि पातयिष्यामि सैंधवं। बह्वागस्कृत्कुसं
बंधी पापदेशसमुद्भवः। मया सैंधवको राजा हतः स्वान्शोचयिष्यति। सर्वक्षीराशने भोक्तारः पापाचाररणाजिरे। मया सराजा तीक्ष्णबाणेन्तुन्नो
द्रक्ष्यति सैंधवान्। तथा प्रभाते कर्तास्मि यथा लोके सुयोधनः। नान्यं धनुर्धरं लोके मंस्यते मत्समं युधि। गांडीवं च धनुर्दिव्यं योद्धा चाहं नरर्षभ। त
त्वं च यंता हृषीकेश किं नु स्यादजितं मया। तव प्रसादाद्भगवन्किमिवाप्तिरणे मम। अविषह्यं हृषीकेश किं जानन्मां विगर्हसे। यथा हि लक्ष्म चंद्रे वै
समुद्रे च यथा जलं। एवमेतां प्रतिज्ञां मे सत्यां विद्धि जनार्दन। मावमंस्था ममास्त्राणि मावमंस्था धनुर्दृढं। मावमंस्था बलं बाह्वोर्मावमंस्था धनंजयं।
तथाभियाति संग्रामं न जीये यज्जयामि च। तेन सत्येन संग्रामे हतं विद्धि जयद्रथं। ध्रुवं वै ब्राह्मणे सत्यं ध्रुवा साधुषु सन्नतिः। श्रीध्रुवा चापि दक्षेषु
ध्रुवो नारायणे जयः॥ ॥संजय॥ ॥एवमुक्त्वा हृषीकेशं स्वयमेवात्मानमात्मना। संदिदेशार्जुनो राजन्वासविः केशवं प्रभुं। यथा प्रभातां रजनीं क
ल्पितः स्याद्रथो मम। तथा कार्यं त्वया कृष्ण कार्यं हि महदुद्यतं॥ ॥इति द्रोणपर्वणि जयद्रथवधे॥ ७३॥ संजय उ॥ ॥तां निशां दुःखशोकार्तौ श्वसंतौ
विव चोरगौ। निद्रां नैवोपलेभाते वासुदेवधनंजयौ। नरनारायणौ क्रुद्धौ ज्ञात्वा देवाः सवासवाः। व्यथिताश्चिंतयामासुः किंस्विदेतद्भविष्यति। ववु
श्च दारुणा वाता रूक्षा घोराभिशंसिनः। सकबंधस्तथादित्ये परिघः समदृश्यत। शुष्काशन्यश्च संपेतुः सनिर्घाताः सविद्युतः। चचाल चापि पृथ्वी

वीसशैलवनकानना। वृक्षैश्च महाराज सागरावरुपालयाः। इति स्रोतः प्रवृत्ताश्च तथा गंगां तु समुद्रगाः। रथाश्वनरनागं च प्रवृत्तमधरोत्तरं। कव्यादा
नांप्रमोदार्थं यमराष्ट्रविवृद्धये। शाहनानि शकुन्भूवे अनुभूरुरुदुःसह। तान्दृष्ट्वा दारुणान् सर्वाननुतापातान्को महर्षभान्। सर्वेजे व्यथिताः सैन्या स्त्वदीया
भरतर्षभ। कृत्वा महाबलस्यार्थं प्रतिज्ञां सव्यसाचिनः। अथ फाल्गुनं महाबाहुमब्रवीत्साकृत्वा सनिः। आश्वासयस्व भद्रां त्वं भगिनीं स्नुषया सह। स्नु
षां स्वसां च गोदीनां विशोके कुरु माधव। सान्त्वसत्येन युक्तेन वचसाश्वासय प्रभो। ततोर्जुनगृहं गत्वा वासुदेवः सुदुर्मनाः। भगिनीं पुत्रशोकार्तामा
श्वासयत दुःखितां॥ ॥वासुदेव उ॥ ॥ माशोकं कुरु वार्ष्णेयि कुमारं प्रति सस्नुषा। सर्वेषां प्राणिनां भीरु निष्ठैषा कालनिर्मिता। कुले जातस्य वीरस्य क्षत्रि
यस्य विशेषतः। सदृशं मरणं ह्येतत्तव पुत्रस्य मा शुचः। दिष्ट्या महारथो वीरः पितुस्तुल्यपराक्रमः। क्षात्रेणाविधिना प्राप्तो वीरलोकानभीप्सितान्। जि
त्वास बहुशः शत्रून्प्रेषयित्वा च मृत्यवे। गतः पुण्यकृतां लोकान्सर्वकामदुघोक्षयान्। तपसा ब्रह्मचर्येण श्रुतेन प्रज्ञया पि च। संतो यां गतिमिच्छंति ग
तस्तां तव पुत्रकः। वीरसूर्वीरपत्नी त्वं वीरश्वशुरबांधवा। मा शुचस्तनयं भद्रे गतः स परमां गतिं। प्राप्स्यते चाप्यसौ क्षुद्रः सैंधवो बालघातकः। अस्या
वलेपस्य फलं ससुहृद्गणबांधवः। व्युष्टायां तु वरारोहे रजन्यां पापकर्मकृत्। नहि मोक्ष्यते पार्थात्प्रविष्टोप्यमरावतीं। श्वः शिरः श्रोष्यसे तस्य सैंधु
वस्य रणे हतं। समंतपंचकाद्बाह्यं विशोका भव मा रुद। क्षत्रधर्मं पुरस्कृत्य गतः शूरः सतां गतिं। यां वयं प्राप्नुयामो हि ये चान्ये शस्त्रजीविनः। व्यूढो
रस्को महाबाहुरनिवर्ती रथप्रणुत्। गतस्तव वरारोहे पुत्रः स्वर्गं ज्वरं जहि। अनुयातश्च पितरं मातृपक्षं च वीर्यवान्। सहस्रशोरिसंघातान्हत्वा शू
रो महारथः। आश्वासय स्नुषां राज्ञि मा शुचः क्षत्रिये भृशं। श्वः प्रियं सुमहच्छ्रुत्वा विशोका भव नंदिनि। यत्पार्थेन प्रतिज्ञातं तत्तथा न तदन्यथा।
चिकीर्षितं हि ते भर्तुर्न भवेज्जातु चान्यथा। यदि च मनुजपन्नगाः समया रजनिचराः पतगाः सुरासुराश्च। रणगतमभियांति सिंधुराजं न स भविता
सह तैः प्रभातमात्रे॥ ॥इति द्रोणपर्वणि॥ ७१॥ संजय उवाच॥ ॥एतच्छ्रुत्वा वचस्तस्य केशवस्य महात्मनः। सुभद्रा पुत्रशोकार्त्ता विललाप सुदुःखि

ता। हा पुत्र मम मंदायाः कथं संयुगमेत्य हि। निधनं प्राप्तवांस्तात पितृतुल्यपराक्रमः। कथमिंदीवरश्यामं सुदंष्ट्रं चारुलोचनं। मुखं ते दृश्यते वत्स गुंठि
तं रणरेणुना। नूनं शूरं निपतितं त्वां पश्यंत्यनिवर्तिनं। सुशिरोग्रीवबाह्वंसं व्यूढोरस्कं निरूदरं। चारूपचितसर्वांगं स्वक्षं शस्त्रक्षतांकितं। भू
तानि त्वाभिवीक्षंते नूनं चंद्रमिवोदितं। शयनीयं पुरा यस्य स्पर्ध्यास्तरणसंवृतं। भूमावद्य कथं शेते विप्रविद्धः सुखोचितः। योन्वास्यत पुरा वीरो व
रस्त्रीभिः सुखोऽभिमन्युर्महाभुजः। कथमन्वास्यते सोद्य शिवाभिः पतितो मृधे। योस्तूयत पुरा हृष्टैः सूतमागधबंदिभिः। सोद्य क्रव्याद्गणैर्घोरैर्विनद
द्भिरुपास्यते। पांडवेषु च नाथेषु वृष्णिवीरेषु चाविभो। पांचालेषु च वीरेषु केनाद्यानाथवद्धतः। अतृप्तदर्शना पुत्र दर्शनस्य तवानघ। मंदभाग्या ग
मिष्यामि व्यक्तमद्य यमक्षयं। विशालाक्षं सुकेशांतं चारुवाक्यं सुगंधि च। तव पुत्र कदा भूयो मुखं पश्यामि निर्व्रणं। एषोहितेषितोवत्सस्तनोर्णो
पिबाशुभे। अंकमारुह मंदाया अतृप्तायाश्च दर्शने। धिग्बलं भीमसेनस्य धिक्पार्थस्य धनुष्मतः। धिग्बलं वृष्णिवीराणां पांचालानां च धिग्बलं। धिक्के
कयांस्तथा चेदीन्मत्स्यांश्चैवाथ सृंजयान्। ये त्वां रणगतं वीरं न जानंति निपातितं। अद्य पश्यामि पृथिवीं शून्यामिव हतत्विषं। अभिमन्युमपश्यंती
शोकव्याकुललोचना। स्वस्रीयं वासुदेवस्य पुत्रं गांडीवधन्वनः। कथं त्वा विरथं वीरं द्रक्ष्याम्यन्यैर्निपातितं। हा वीर दृष्टो नष्टश्च धनं स्वप्न इवासि मे। अ
हो ह्यनित्यं मानुष्यं जलबुद्बुदचंचलं। इमां ते तरुणीं भार्यां त्वदाधिभिरभिप्लुतां। कथं संधारयिष्यामि विवत्सामिव धेनुकां। अहो ह्यकाले प्रस्थानं कृतवा
नसि पुत्रक। विहाय फलकाले मां सुगृद्धां तव दर्शने। नूनं गतिः कृतांतस्य प्राज्ञैरपि सुदुर्विदा। यत्र त्वं केशवे नाथे संग्रामे नाथवद्धतः। यज्विनां पु
ण्यशीलानां ब्राह्मणानां कृतात्मनां। चरितब्रह्मचर्याणां पुण्यतीर्थावगाहिनां। कृतज्ञानां वदान्यानां गुरुशुश्रूषिणामपि। सहस्रदक्षिणानां च या गति
स्तामवाप्नुहि। या गतिर्युध्यमानानां शूराणामनिवर्तिनां। हत्वारीन्निहतानां च संग्रामे तां गतिं व्रज। गोसहस्रप्रदातॄणां क्रतुदानां च या गतिः। नैवे
शिकं चाभिमतं ददतां या गतिः शुभा। ब्राह्मणेभ्यः शरण्येभ्यो निधिं निदधतां च या। या चापि न्यस्तदंडानां तां गतिं व्रज पुत्रक। ब्रह्मचर्येण यां याति

मुनयः संशितव्रताः। एकपत्न्यश्च या यांति तां गतिं व्रज पुत्रक। यशेः स्क चरितैर्या च गतिर्भवति शाश्वती। चातुराश्रमिणां याश्च पावितानां स्वकर्मभिः। दीनानुकं-
पिनां या च सततं संविभागिनां। पैशुन्याद्‌ च निवृत्तानां तां गतिं व्रज पुत्रक। व्रतिनां धर्मशीलानां गुरुशुश्रूषिणामपि। अमोघातिथिनां या च तां गतिं व्रज पुत्र-
क। कृच्छ्रेषु या धारयतामात्मानं व्यसनेषु च। गतिः शोकाग्निदग्धानां तां गतिं व्रज पुत्रक। पितृमातृशुश्रूषां कारयंतीह ये सदा। स्वदारनिरतानां च या
गतिस्तामवाप्नुहि। ऋतुकाले स्वकां पत्नीं गच्छतां या मनस्विनां। न चान्यदारसेवीनां तां गतिं व्रज पुत्रक। साम्ना ये सर्वभूतानि गच्छंति गतमत्सराः। नारुंतुदानां
क्षमिणां या गतिस्तामवाप्नुहि। मधुमांसनिवृत्तानां मदाद्दंभात्तथानृतात्। परोपतापत्यक्तानां तां गतिं व्रज पुत्रक। ह्रीमंतः सर्वशास्त्रज्ञा ज्ञानतृप्ता जितेंद्रियाः।
या गतिं साधवो यांति तां गतिं व्रज पुत्रक। एवं विलपतीं दीनां सुभद्रां शोककर्षितां। अभ्यपद्यत पांचाली वैराटीसहिता तदा। ताः प्रकामं रुदित्वा च विलप्य
च सुदुःखिताः। उन्मत्तवत्तदा राजन्विसंज्ञा न्यपतन्क्षितौ। सोपचारस्तु कृष्णस्तां दुःखितां भृशदुःखितः। सिक्त्वांभसा समाश्वास्य बहूक्त्वोक्तहितं वचः। विसं-
ज्ञकल्पां रुदतीमपविद्धां प्रवेपतीं। भगिनीं पुंडरीकाक्ष इदं वचनमब्रवीत्। सुभद्रे मा शुचः पुत्रं पांचाल्याश्वासयोत्तरां। गतोऽभिमन्युः प्रथितां गतिं क्ष-
त्रियपुंगवः। ये चान्ये पि कुले संति पुरुषा नो वरानने। सर्वे तां वै गतिं यांतु अभिमन्योर्यशस्विनः। कुर्याम तदहं कर्म क्रियासुः सुहृदश्च नः। कृतवा-
न्याहशं ह्येकस्तव पुत्रो महाबलः। एवमाश्वास्य भगिनीं द्रौपदीमपि चोत्तरां। पार्थस्यैव महाबाहुः पार्श्वमागादरिंदमः। ततोऽभ्यनुज्ञाय नृपान्कृष्णो
बंधूंस्तथा विभुः। विवेशांतःपुरं राजंस्ते च जग्मुः स्वमालयं॥ ॥इति द्रोणपर्वणि॥ ७१॥ सजयपत्र॥ ॥ ततोऽर्जुनस्य भवनं प्रविश्याप्रतिमं विभुः। स्पृष्ट्वा-
म्भः पुंडरीकाक्षः स्थंडिले शुभलक्षणे। संतस्तार शुभां शय्यां दर्भैर्वैडूर्यसन्निभैः। ततो माल्यैश्च विधिवल्लाजैर्गंधैः सुमंगलैः। अलंचकार तां श-
य्यां परिवार्यायुधोत्तमैः। ततः स्पृष्टोदकं पार्थं विनीताः परिचारकाः। दर्शयित्वैत्यकं चक्रुर्नैशं त्रैयंबकं बलिं। ततः प्रीतमनाः पार्थो गंधैर्माल्यैश्च
माधवं। अलंकृत्योपहारं तं नैत्यकं तस्मै न्यवेदयत्। स्मयमानस्तु गोविंदः फाल्गुनं प्रत्यभाषत। सुप्यतां पार्थ भद्रं ते कल्याणाय व्रजाम्यहं। स्था-

द्रो॰प॰
६८

शिबिरं

पयित्वा ततो दाशार्हो गोहुस्वान्तं प्रपुधान्वराट्। दारुकानुगतः श्रीमान्विवेश भवनं स्वकं। शिष्ये स शयने शुभ्रे बहुकृत्यं विचिंतयन्। पार्थस्य सर्वं भगवान् शोकदुःखापहं विधिं। व्यदधत्सुउरः कास्तस्तेजोद्युतिविवर्द्धनं। योगमास्थाय योगानां सर्वेषामीश्वरेश्वरः। श्रेयस्कामः पृथुयशा विष्णुर्जिष्णुप्रियंकरः। न पांडवानां शिबिरे कश्चित्सुष्वाप तां निशां। प्रजागरः सर्वजनमाविवेश विशांपते। पुत्रशोकाभितप्तेन प्रतिज्ञा महती कृता। सहसा सिंधुराजस्य वधं गांडीवधन्वना। यत्कथं तु महाबाहुर्वासविः परवीरहा। प्रतिज्ञां सफलां कुर्यादिति ते समचिंतयन्। कष्टं हीदं व्यवसितं पांडवेन महात्मना। स च राजा महावीर्यो वारयेदर्जुनं कथं। भ्रातरश्चैव विक्रांता बहुला निबला निच। धृतराष्ट्रस्य पुत्रेण सर्वं तस्मै निवेदितं। स हत्वा सैंधवं संख्ये पुनरेतु धनंजयः। जित्वा रिपुगणांश्चैव पारयत्वर्जुनो व्रतं। न शक्ष्यत्यनृतां कर्तुं प्रतिज्ञां विजये न हि। अहो धिक्साहसं पार्थः कृतवान्शोकमोहितः। अहत्वा सिंधुराजं हि दुःखमनुप्रवेक्ष्यति। न ह्येतदनृतं कर्तुमलं पार्थो धनंजयः। ह यद्यस्तिस्करुतं किंचिदस्माकं हंतु सैंधवं। हत्वा सर्वाननरीन्पार्थस्त्राणं चास्मान्महाभयात्। एवमाशंसमाना स्ते केचिद्वि कुरुपस्कृतिं। श्रुत्वा चेहस्वमनसो व्यक्रमाशासिरे जयं। भविता नु गतिः कृत्यमिदमित्यपेक्षुवन्। द्रोणश्च सह पुत्रेण ये चान्ये प्रवरा रथाः। महावीर्यः सह स्राक्षो दैत्यदानवमर्दिता। सोपेनं नोत्सहेद्धंतुं रणे द्रोणेन रक्षितं। धर्मपुत्रः कथं राजा भविष्यति मृतेर्जुने। तस्मिन्विजयः कृत्स्नः पांडवेन समाहितः। यदि नः सुकृतं किंचिद्युह्यदत्तं हुतं तथा। फलेन तेन सर्वेशा सव्यसाची जयत्वरीन्। एवं कथयतां तेषां जयमाशंसतां प्रभो। कृच्छ्रेण महता राजन्रजनी व्यत्यवर्तत। तस्या रजन्यां मध्ये तु प्रतिबुद्धो जनार्दनः। स्मृत्वा प्रतिज्ञां पार्थस्य दारुकं प्रत्यभाषत। अर्जुनेन प्रतिज्ञातमार्तेन हतबंधुना। जयद्रथं हनिष्यामि श्वोभूत इति दारुक। तत्तु दुर्योधनः श्रुत्वा मंत्रिभिर्मंत्रयिष्यति। यथा जयद्रथं पार्थो न हन्यादिति संयुगे। अक्षौहिण्यो हि ताः सर्वा रक्षिष्यंति जयद्रथं। द्रोणश्च सह पुत्रेण सर्वास्त्रविधिपारगः। एको वीरः सहस्राक्षो दैत्यदानवमर्दिता। सोपि तं नोत्सहेद्धंतुं द्रोणेनेरक्षितं। सोहं श्वस्तत्करिष्यामि यथा कुंतीसुतोर्जुनः। अप्राप्तेस्तं दिनकरे हनिष्यति जयद्रथं। न हि दारा न मित्राणि ज्ञातयो न च बांधवाः। कश्चिद्वान्यः प्रियतरः कुंतीपुत्रान्ममार्जुनात्। अनर्जुनमिमं लोकं

राम
६८

मुहूर्त्तमपि दारुक । उदीक्षितुं न शक्तोहं भविता न तदन्यथा । अहं ध्वजिन्यः सर्वास्ताः सहयाः सनरद्विपाः । अर्जुनार्थे हनिष्यामि सकर्णाः ससुयोधनाः ।
श्वो निरीक्षंतु मे वीर्यं त्रयो लोका महाहवे । धनंजयार्थे समरे पराक्रांतस्य दारुक । श्वो नरेंद्रसहस्राणि राजपुत्रशतानि च । साश्वद्विपरथान्याजौ विद्रविष्यं-
ति दारुक । श्वस्तांश्चक्रप्रमथितां द्रक्ष्यसे नृपवाहिनीं । मया क्रुद्धेन समरे पांडवार्थे निपातितां । श्वः सदेवाः सगंधर्वाः पिशाचोरगराक्षसाः । ज्ञास्यंति लोकाः
सर्वे मां सुहृदं सव्यसाचिनः । यस्तं द्वेष्टि स मां द्वेष्टि यस्तमनु स मामनु । इति संकल्प्यतां बुध्या शरीरार्द्धं ममार्जुनः । यथा त्वमप्रभातायामस्यां निशि रथोत्तमं
कल्पयित्वा यथाशास्त्रमागच्छ संयतो दारुक । गदां कौमोदकीं दिव्यां शक्तिं चक्रं धनुः शरान् । आरोप्य वै रथे सूत सर्वोपकरणानि च । स्थानं हि कल्पयित्वा च
रथोपस्थे ध्वजस्य मे । विनतेयस्य वीरस्य समरे रथशोभिनः । छत्रं जांबूनदैर्जालैरर्कज्वलनसन्निभैः । विश्वकर्मकृतैर्दिव्यैरश्वानपि विभूषितान् । बलाह-
कं मेघपुष्पं सैन्यं सुग्रीवमेव च । युक्त्वा वाजिवरांस्तात कवची तिष्ठ दारुक । पांचजन्यस्य निर्घोषमार्षभेणैव पूरितं । श्रुत्वा च भैरवं नादमुपायास्त्वं जवेन हि ।
एकाह्नाहममर्षं च सर्वदुःखानि चैव हि । भ्रातुः पैतृष्वसेयस्य व्यपनेष्यामि दारुक । सर्वोपायैर्यतिष्यामि यथा बीभत्सुराहवे । पश्यतां धार्त्तराष्ट्राणां हनिष्यति
जयद्रथं । यस्य यस्य च बीभत्सुर्वधे यत्नं करिष्यति । आशंसे सारथे तत्र भवितास्य ध्रुवो जयः ॥ ॥दारुक उवाच ॥ ॥जय एव ध्रुवस्तस्य कुत एव पराजयः ।
यस्य त्वं पुरुषव्याघ्र सारथ्यमुपजग्मिवान् । एवं चैतत्करिष्यामि यथा मामनुशाससि । सुप्रभातामिमां रात्रिं जयाय विजयस्य हि ॥ ॥इति द्रोणपर्वणि ज-
यद्रथवधे ॥ ७९ ॥ संजय उ० ॥ ॥कुंतीपुत्रस्तु तं मंत्रं स्मरन्नेव धनंजयः । प्रतिज्ञामात्मनो रक्षन्मुमोहामितविक्रमः । तं तु मोहेन संतप्तं स्वप्ने कपिवरध्वजं । आससा-
द महातेजा ध्यायंतं गरुडध्वजः । प्रत्युत्थानं तु कृष्णस्य स्वभावाद्धनंजयः । नालोपयत धर्मात्मा भक्त्या प्रेम्णा च सर्वदा । प्रत्युत्थाय च गोविंदं स तस्मा आसनं
ददौ । न चासने स्वयं बुद्धिं बीभत्सुर्व्यदधात्तदा । ततः कृष्णो महातेजा जानन्पार्थस्य निश्चयं । कुंतीपुत्रमिदं वाक्यमासीनमिदमब्रवीत् । मा विषादे मनः पार्थ
कृथाः कालो हि दुरतिक्रमः । कालः सर्वाणि भूतानि नियच्छति परे विधौ । किमर्थं च विषादस्ते तद्ब्रूहि वदतां वर । न शोचितव्यं विदुषा शोकः कार्यविनाशनः ।

यत्तु कार्यं भवेत्कार्यं कर्मणा तत्समाचर । ह्रीनचेष्टस्य यः शोकः स हि शत्रुर्धनंजय । शोचन्नंदयते शत्रून्कर्शयत्यपि बांधवान् । क्षीयते च नरस्तस्मान्न त्वं
शोचितुमर्हसि । इत्युक्तो वासुदेवेन बीभत्सुरपराजितः । अब्रवीत्तदा विद्वानिदं वचनमर्थवत् । मया प्रतिज्ञा महती जयद्रथवधे कृता । श्वोऽस्मि हंता दुरा
त्मानं पुत्रघ्नमिति केशव । मत्प्रतिज्ञाविघातार्थं धार्तराष्ट्रैः किलाच्युत । पृष्ठतः सैंधवः कार्यः सर्वैर्गुप्तो महारथैः । दश चैका च ताः कृष्ण अक्षौहिण्यः सु
दुर्जयाः । हतावशेषास्तत्रैता माधव संख्यया । ताभिः परिवृतः संख्ये सर्वैश्चैव महारथैः । कथं शक्येत संद्रष्टुं दुरात्मा कृष्ण सैंधवः । प्रतिज्ञापारणं
चैव न भविष्यति केशव । प्रतिज्ञायां विहीनायां कथं जीवेत मद्विधः । दुःखोपायस्य मे वीर विकांक्षा परिवर्तते । द्रुतं च याति सविता तत एतद्ब्रवीम्यहं । शो
कस्थानं तु तच्छ्रुत्वा पार्थस्य द्विजकेतनः । संस्पृश्यांभस्ततो दाशार्हः प्राङ्मुखः समवस्थितः । इदं वाक्यं महातेजा बभाषे पुष्करेक्षणः । हितार्थं पांडुपुत्रस्य सैंध
वस्य वधे धृतः । पार्थ पाशुपतं नाम परमास्त्रं सुदारुणं । येन दैत्यान्मृधे सर्वान् जघ्ने देवो महेश्वरः । यदि तद्विदितं तेऽद्य श्वो हंतासि जयद्रथं । अथाज्ञातं प्रपद्य
स्व मनसा वृषभध्वजं । तं देवं मनसा ध्यायन्जोषमास्व धनंजय । ततस्तस्य प्रसादात्त्वं भक्तः प्राप्स्यसि तन्महत् । ततः कृष्णवचः श्रुत्वा संस्पृश्यांभो धनंजयः ।
भूमावासीन एकाग्रो जगाम मनसा भवं । ततः प्रणिहिते ब्राह्मे मुहूर्ते शुभलक्षणे । आत्मानमर्जुनोऽपश्यद्गगने सह केशव । ज्योतिर्भिश्च समाकीर्णं सिद्ध
चारणसेवितं । वायुवेगगतिः पार्थः खं भेजे सहकेशवः । केशवेन गृहीतश्च दक्षिणे विभुना भुजे । प्रेक्षमाणो बहून्भावाञ्जगामाद्भुतदर्शनान् । उदीच्यां दि
शि धर्मात्मा सोऽपश्यच्छ्वेतपर्वतं । कुबेरस्य विहारे च नलिनीं पद्मभूषितां । सरिच्छ्रेष्ठां च तां गंगां वीक्षमाणो बहूदकां । विश्वकर्मकृतैर्दिव्यैरन्यानपि च भूषि
तान् । स्निग्धांजनचयाकारं संप्राप्तो कालपर्वतं । पुण्यं हिमवतः पादं मणिमंतं च पर्वतं । ब्रह्मतुंगं नदीश्चान्यास्तथा जनपदानपि । सुशृंगं शतशृंगं च शर्यातिव
नमेव च । पुण्यमश्वशिरःस्थानं स्थानं वाथर्वणस्य च । वृषदंशं च शैलेंद्रं महामंदरमेव च । अप्सरोभिः समाकीर्णं किन्नरैश्चोपशोभितं । सदापुष्पफले
हंसैरुपेतान्स्फाटिकोपमान् । सिंहव्याघ्रसमाकीर्णान्नानामृगसमाकुलान् । पुण्याश्रमवतीरम्यान्मनोज्ञाण्डजसेवितान् । मंदरस्य प्रदेशांश्च कि

भरोद्गीतनादितान् । हिमरोप्यमयैः शृंगैर्नानौषधिविदीपितान् । तथा मंदारपुष्पैश्च पुष्पितैरुपशोभितान् । सित्रशैलेब्रजन्पार्थः सहकृष्णः समवेक्षत ।
शुभैः प्रस्रवणैर्जुष्टं हेमधातुविभूषितं । चंद्ररश्मिप्रकाशांगां पृथिवीं पुरमालिनीं । समुद्रांश्चाद्भुताकारान् पश्यद्बहुलाकरान् । वियद्द्यां पृथिवीं चैव तथा
विष्णुपदं व्रजन् । विस्मितः सहकृष्णेन क्षिप्तो बाण इवाभ्यगात् । ग्रहनक्षत्रसोमानां सूर्याग्न्योश्च समप्रभं । अपश्यत तदा पार्थो ज्वलंतमिव पर्वतं । समास-
द्य तु तं शैलं शैलाग्रे समवस्थितं । तपोनित्यं महात्मानमपश्यद्वृषभध्वजं । सहस्रमिव सूर्याणां दीप्यमानं स्वतेजसा । शूलिनं जटिलं गौरं वल्कलाजिन-
वाससं । नयनानां सहस्रैश्च विचित्रांगं महौजसं । पार्वत्या सहितं देवं भूतसंघैश्च भास्वरैः । गीतवादित्रसंघातैस्ताललास्यसमन्वितं । वल्गितास्फोटितो-
त्क्रुष्टैः पुण्यगंधैश्च सेवितं । स्तूयमानं स्तवैर्दिव्यैर्मुनिभिर्ब्रह्मवादिभिः । गोप्तारं सर्वभूतानामीश्वरं परमार्चितं । वासुदेवस्तु तं दृष्ट्वा खावपदे च संक्षितिं ।
पार्थेन सह धर्मात्मा गृणन्ब्रह्म सनातनं । लोकादिं विश्वकर्माणमजमीशानमव्ययं । मनसः परमां योनिं खं वायुं ज्योतिषां निधिं । स्रष्टारं वारिधाराणां भु-
वश्च प्रकृतिं परां । देवदानवयक्षाणां मानवानां च साधनं । योगिनां परमं ब्रह्म दृष्टं ब्रह्मविदां निधिं । चराचरस्य स्रष्टारं प्रतिहर्तारमेव च । कालकोपं महा-
त्मानं शक्रसूर्यगुणोदयं । अवंदत तदा कृष्णो वाङ्मनोबुद्धिकर्मभिः । यं प्रपद्यंति विद्वांसः सूक्ष्माध्यात्मपदैषिणः । यमृग्वेदविदो गायंति ऋचोऽक्षरमेव च ।
यजुर्वेदविदश्चैव आदित्यवर्णं तमसः परस्तात् । गायंति यं सामविदो इहैव इति निश्चितं । तमजं कारणात्मानं जग्मतुः शरणं भवं । तमेवाग्निं तमादित्यं भू-
यो भूयोऽभ्यवंदत । ज्ञात्वैकं भूतभव्यादिं सर्वभूतभवोद्भवं । ततस्तावागतौ शर्वः प्रोवाच प्रहसन्निव । स्वागतं वां नरश्रेष्ठावुत्तिष्ठेतां गतक्लमौ । किं च वामीप्सि-
तं वीरौ मनसः क्षिप्रमुच्यतां । येन कार्येण संप्राप्तौ युवां तत्साधयाम्यहं । व्रियतामात्मनः श्रेयस्तत्सर्वं प्रददामि वां । तस्य तद्वचनं श्रुत्वा प्रत्युत्थाय कृतांज-
ली । वासुदेवार्जुनौ शर्वं तुष्टुवाते महामती । भक्त्या स्तवेन दिव्येन महात्मानमनिंदितं ॥ ॥ वासुदेव उ ॥ ॥ नमो भवाय रुद्राय शर्वाय वरदाय च । प-
शूनां पतये नित्यं उग्राय च कपर्दिने । महादेवाय भीमाय त्र्यंबकाय च शंभवे । ईशानाय भगघ्नाय नमोऽस्त्वंधकघातिने । कुमारगुरवे नित्यं नीलग्रीवाय

द्रो॰प॰
७०

वेधसे।विलोहिताय धूम्राय व्याधयेवापराजिते।नित्यंनीलशिखंडाय शूलिनेदिव्यचक्षुषे।हंत्रेगोप्त्रेत्रिनेत्राय व्याधयेवसुरेतसे।अचिंत्यायांबिका
भर्त्रेसर्वदेवस्तुतायच।वृषध्वजायपिंगायजटिनेब्रह्मचारिणे।तप्यमानायसलिलेब्रह्मण्यायाजितायच।विश्वात्मनेविश्वसृजेविश्वमावृत्यतिष्ठते।
नमोनमस्तेसेव्यायभूतानांप्रभवेसदा।ब्रह्मवक्त्रायसर्वायशंकरायशिवायच।नमोस्तुवाचस्पतयेप्रजानांपतयेनमः।नमोविश्वस्यपतयेमहतां
पतयेनमः।नमःसहस्रशिरसेसहस्रभुजमन्यवे।सहस्रनेत्रपादायनमोसंख्येयकर्मणे।नमोहिरण्यवर्णायहिरण्यकवचायच।भक्तानुकंपिने
नित्यंसिध्यतांनोवरःप्रभो॥ ॥संजयउ॥ ॥एवंस्तुत्वामहादेवंवासुदेवःसहार्जुनः।प्रसादयामासभवंतदापास्त्रोपलब्धये॥ ॥इतिस्वप्नरात्रि
ध्रियंसमाप्तं॥८०॥संजयउ॥ ॥ततोर्जुनःप्रीतमनाववंदेवृषभध्वजं।प्रहृष्टोत्फुल्लनयनःसमस्तंतेजसांनिधिं।तंचोपहारंस्वकृतंनैशंनैत्यकमा
त्मनः।ददर्शत्र्यंबकाभ्यासेवासुदेवनिवेदितं।ततोभिपूज्यमनसाशर्वंकृष्णंचपांडवः।इच्छाम्यहंदिव्यमस्त्रमित्यभाषतशंकरं।ततःपार्थस्यवि
ज्ञायवरार्थेवचनंप्रभुः।वासुदेवार्जुनौवीरःस्मयमानोभ्यभाषत।स्वागतंवांनरश्रेष्ठौविज्ञातंमनसेप्सितं।येनकामेनसंप्राप्तौभवद्भ्यांतद्ददाम्यहं।
सरोमृतमयंदिव्यमभ्याशेशत्रुसूदनौ।तत्रमेतद्धनुर्दिव्यंशरश्चनिहितंपुरा।येनदेवारयःसर्वेमयायुधिनिपातिताः।ततआनीयतांकृष्णौस
शरंधनुरुत्तमं।तथेत्युक्त्वातुतौवीरौतंशर्वंपार्षदैःसह।प्रस्थितौतत्सरोदिव्यंदिव्याश्चर्यशतैर्वृतं।निर्दिष्टंयद्वृषांकेनपुण्यंसर्वार्थसाधनं।तौजं
ग्मतुरसंभ्रांतौनरनारायणावृषी।ततस्तुतत्सरोगत्वासूर्यमंडलसन्निभं।नागमंतर्जलेघोरंददृशातेर्जुनाच्युतौ।द्वितीयंचापरंनागंसहस्रशि
रसंवरं।वमंतंविपुलाम्ज्वालांददृशातेग्निवर्चसं।ततःकृष्णश्चपार्थश्चसंस्पृश्यापःकृतांजली।तौनागावुपतस्थातेनमस्यंतौवृषध्वजं।गृणंतौ
वेदविद्वांसौतद्ब्रह्मशतरुद्रियं।अप्रमेयंप्रणमंतौगत्वासर्वात्मनाभवं।ततस्तौरुद्रमाहात्म्याद्धित्वारूपंमहोरगौ।धनुर्बाणश्चशत्रुघ्नंतद्द्वंद्वंसमपद्य
त।ततोजगृहतुःप्रीतौधनुर्बाणंचसुप्रभं।आजह्रतुर्महात्मानौददतुश्चमहात्मने।ततःपार्श्वाद्वृषांकस्यब्रह्मचारीन्यवर्तत।पिंगाक्षस्तेजसः

राम
७०

ध

सेवं बलावान्नीललोहितः। स तत्स्य धनुःश्रेष्ठं तस्थौ स्थानं समास्थितः॥ व्याकर्षच्चापि विधिवत्सशरं धनुरुत्तमं। तस्य मौर्वीं च मुष्टिं च स्थानं चालक्ष्य पांडवः।
श्रुत्वा मंत्रं भवप्रोक्तं जग्राहामितविक्रमः। स सरस्येव तं बाणं मुमोचातिबलः प्रभुः। चकार च पुनर्वीरस्तस्मिन्सरसि तद्धनुः। ततः प्रीतं भवं ज्ञात्वा स्मृति
मानर्जुनस्तदा। वरमारण्यके दत्तं दर्शनं शंकरस्य च। मनसा चिंतयामास तन्मे संपद्यतामिति। तस्य तन्मतमाज्ञाय प्रीतः प्रादाद्वरं भवः। तच्च पाशुपतं घो
रं प्रतिज्ञायाश्च पारणं। ततः पाशुपतं दिव्यमवाप्य पुनरीश्वरात्। संहृष्टरोमा दुर्धर्षः कृतं कार्यममन्यत। ववंदतुश्च संहृष्टौ शिरसा तौ महेश्वरं। अनु
ज्ञातौ क्षणे तस्मिन्भवेनार्जुनकेशवौ। प्राप्तौ स्वशिबिरं वीरौ मुदा परमया युतौ। तथा भवेनानुमतौ महासुरनिपातिना। इंद्राविष्णू यथा प्रीतौ जंभस्य वध
कांक्षिणौ॥ ॥इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधे तृतीययुद्धदिवसः समाप्तः॥ ८० ॥संजय उवाच॥ ॥तयोः संवदतोरेवं कृष्णदारुकयो
स्तदा। सात्यगाद्रजनी राजन्नथ राजान्वबुध्यत। पठंति पाणिस्वनिका मागधा मधुपर्किकाः। वैतालिकाश्च सूतांश्च तुष्टुवुः पुरुषर्षभं। नर्तकाश्चाप्यनृत्यंत ज
गुर्गातानि गायनाः। मृदंगा झर्झरा भेर्यः पणवानकगोमुखाः। आडंबराश्च शंखाश्च दुंदुभ्यश्च महास्वनाः। एवमेतानि सर्वाणि तथान्यानि च भारत। वादयं
ति स्म संहृष्टाः कुशलाः साधुशिक्षिताः। स मेघसमनिर्घोषो महाञ्छब्दोऽस्पृशद्दिवं। पार्थिवप्रवरं सुप्तं युधिष्ठिरमबोधयत्। प्रतिबुद्धः सुखं सुप्तो महार्हे शु
यनोत्तमे। उत्थायावश्यकार्यार्थं ययौ स्नानगृहं ततः। ततः शुक्लांबराः स्नातास्तरुणाः। ह्यष्टशतं नराः। स्नापकाः कांचनैः कुंभैः पूर्णैः समुपतस्थिरे। भद्रासने
सूपविष्टः परिधायांबरं लघु। सस्नौ चंदनसंयुक्तैः पानीयैरभिमंत्रितैः। उत्सादितः कषायेण बलवद्भिः सुशिक्षितैः। आप्लुतः साधिवासेन जलेन स सुगं
धिना। हरिणा वदनेनांगमुपलिप्य महाभुजः। स्रग्वी चाक्लिष्टवसनः प्रांजलिः प्राङ्मुखः स्थितः। जजाप जप्यं कौंतेयः सतां मार्गमनुष्ठितः। ततोऽग्निश
रणं दीप्तं प्रविवेश विनीतवत्। समिद्धं सपवित्राभिराहुतिभिस्तथा। मंत्रपूताभिरर्चित्वा निश्चक्राम गृहात्ततः। द्वितीयां पुरुषव्याघ्रः कक्षां नि
ष्क्रम्य पार्थिवः। तत्र वेदविदो विप्रान्ददर्श ब्राह्मणर्षभान्। दांतान्वेदव्रतस्नातान्स्नातानवभृथेषु च। सहस्रानुचरान्सौरानष्टौ दशशतानि च। अक्षतैः

स्नमनोभिश्चवाचयित्वामहाभुजः।तान्द्विजान्मधुसर्पिर्भ्यांफलैःश्रेष्ठैःस्नमंगलैः।आदात्कांचनमेकैकंनिष्कंविप्रायपांडवः।स्वलंकृतांश्चाश्वरतांवासां
सीष्टाश्चदक्षिणाः।तथागाःकपिलादोग्ध्रीःसवत्साःपांडुनंदनः।हेमशृंगीरूप्यखुरादत्वाचक्रेप्रदक्षिणं।स्वस्तिकान्वर्धमानांश्चनंद्यावर्तांश्चकांचनान्।
माल्यंचजलकुंभांश्चज्वलितंचहुताशनं।पूर्णान्यक्षतपात्राणिरुचकान्रोचनांस्तथा।स्वलंकृताःशुभाःकन्यादधिसर्पिर्मधूदकं।मांगल्यान्पक्षिणश्चै
वयच्चान्यदभिपूजितं।दृष्ट्वास्पृष्ट्वाचकौंतेयोबाह्यांकक्षामगात्तदा।ततस्तस्यमहाबाहोस्तिष्ठतःपरिचारकाः।सौवर्णंसर्वतोभद्रंमुक्तावैडूर्यमंडितंप
रार्ध्यास्तरणास्तीर्णंसोत्तरच्छदमृद्धिमत्।विश्वकर्मकृतंदिव्यमुपाजह्रुर्वरासनं।तत्रतस्योपविष्टस्यभूषणानिमहात्मनः।उपाजह्रुर्महार्हाणिप्रे
ष्याःशुभ्राणिसर्वशः।मुक्ताभरणवेषस्यकौंतेयस्यमहात्मनः।रूपमासीन्महाराजद्विषतांशोकवर्धनं।चामरैश्चंद्ररश्म्याभैर्हेमदंडैःसुशोभनैः
दोधूयमानःशुशुभेविद्युद्भिरिवतोयदः।संस्तूयमानःसूतैश्चवंद्यमानश्चबंदिभिः।उपगीयमानोगंधर्वैरास्तेस्मकुरुनंदनः।ततोमुहूर्त्तादासीत्तुदं
तिनांनिस्वनोमहान्।रथानां।नेमिघोषश्चखुरघोषश्चवाजिनां।ह्रादेनगजघंटानांशंखानांनिनदेनच।नराणांपादशब्दैश्चकंपतीवस्ममेदिनी।
ततःसत्रासमासाद्यजानुभ्यांभूतलेस्थितः।वीरसावंदनीयंतमवदज्जगतीपतिं।कुंडलीबद्धनिस्त्रिंशःसन्नद्धकवचोयुवा।अभिप्रणम्यशिरसाद्वा
स्थोधर्मात्मजस्यच।न्यवेदयद्धृषीकेशमुपयातंमहात्मनः।शंखचक्रगदापाणिःपीतवासाश्चतुर्भुजः।त्वदाज्ञाशासनाकांक्षीद्वारितिष्ठतिकेशवः।सो
भ्युवाचपुरुषव्याघ्रआगच्छतुजनार्दनः।अर्घ्यंविवासनेचास्मैदीयतांपरमार्चितं।ततःप्रवेश्यवार्ष्णेयमुपवेश्यपवरासने।र्चयामासविधिवद्धर्मरा
जोयुधिष्ठिरः।। ।।इतिद्रोणपर्वणिजयद्रथवधे।।८१।।संजयउ०।। ।।ततोयुधिष्ठिरोराजाप्रतिनंद्यजनार्दनं।उवाचपरमप्रीतःकौंतेयोदेवकीसु
तं।सुखेनरजनीव्युष्टाकच्चित्तेमधुसूदन।कच्चिज्ज्ञानानिसर्वाणिप्रसन्नानितवाच्युत।वासुदेवोपितद्युक्तंपर्यपृच्छद्युधिष्ठिरं।ततःक्षत्ताप्रकृ
तीन्यवेदयदुपस्थिताः।अनुज्ञातश्चराज्ञासप्रावेशयततंजनं।विराटंभीमसेनंचधृष्टद्युम्नंचसात्यकिं।चेदिपंधृष्टकेतुंचद्रुपदंचमहारथं।शिखं

उत्तमं धर्ममेवैव चेकितानं च केकयान्। पृथुपुत्रं चैव कौरव्यं पांचाल्यं चोत्तमौजसं। युधामन्युं सुबाहुं च द्रौपदेयांश्च सर्वशः। एते चान्ये च बहवः क्षत्रियाः
पांडवर्षभं। उपतस्थुर्महात्मानं विविक्तेष्वासनेषु ते। एकस्मिन्नासने वीरावुपविष्टौ महाबलौ। कृष्णश्च युयुधानश्च महात्मानौ महाद्युती। ततो युधिष्ठि
रस्तेषां शृण्वतां मधुसूदनं। अब्रवीत्पुंडरीकाक्षमाभाष्य मधुरं वचः। एकं त्वां वयमाश्रित्य सहस्राक्षमिवामराः। प्रार्थयामो जयं युद्धे शाश्वतानि सुखा
नि च। त्वं हि राज्यविनाशं च द्विषद्भिश्च निराक्रियां। क्लेशांश्च विविधान्कृष्ण सर्वांस्तानपि वेत्सि नः। त्वयि सर्वेश सर्वेषामस्माकं भक्तवत्सल। सुखमा
यत्तमस्माकं प्रयोक्ता च मधुसूदन। स तथा कुरु वार्ष्णेय यथा त्वामभिमतं मम। अर्जुनस्य यथा सत्या प्रतिज्ञा स्याच्चिकीर्षिता। स भवांस्तारयत्वस्माद्दुःखामर्ष
महार्णवात्। पारं तितीर्षतामद्य प्लवो नो भव माधव। न हि तत्कुरुते संख्ये कौंतेय वीर्यसमस्त्वयि। रथी यत्कुरुते कृष्ण सारथिर्यत्नमास्थितः। यथैव सर्वास्वा
पत्सु पासि वृष्णीन्जनार्दन। तथैवास्मान्महाबाहो वृजिनात्त्रातुमर्हसि। त्वमगाधे प्लवे मग्नान्पांडवान्कुरुसागरे। तारयाद्य प्लवो भूत्वा शंखचक्रगदाधर।
नमस्ते देवदेवेश सदाभिवृद्धिविनाशन। विष्णो जिष्णो हरे कृष्ण वैकुंठ पुरुषोत्तम। नारदस्त्वां समाचख्यौ पुराणमृषिसत्तमं। वरदं शृंगिणं देवं तत्सत्यं कु
रु माधव। इत्युक्तः पुंडरीकाक्षो धर्मराजेन संसदि। मेघौघानिस्वनो वाग्मी प्रत्युवाच युधिष्ठिरं॥ ॥वासुदेव उ॥ ॥ सामरेष्वपि लोकेषु सर्वेषु न तथा
विधः। शरासनधरः कश्चिद्यथा पार्थो धनुर्धरः। वीर्यवान्स्त्वसंपन्नः पराक्रांतो महाबलः। सिंहर्षभगतिः श्रीमान्दृष्टस्तेहनिष्यति। अहं च तत्करि
ष्यामि यथा कुंतीसुतोऽर्जुनः। धार्तराष्ट्रस्य सैन्यानि धक्ष्यत्यग्निरिवोच्छ्रितः। ये धृतं पापकर्माणं कुबुद्धिं भेदघातिनं। अप्यद्य नैनं मार्गेमिषुभिः स्फे
ष्यतेऽर्जुनः। तस्याद्य गृध्राः श्येनाश्च वडगोमायवस्तथा। भक्षयिष्यंति मांसानि ये चान्ये पुरुषादकाः। यद्यस्य देवा गोप्तारः सेंद्राः सर्वे तथाप्यसौ।
राजधानीं यमस्याद्य हतः प्राप्स्यति संकुलो। निहत्य सैंधवं जिष्णुरद्य त्वामुपयास्यति। विशोको विज्वरो राजन्भव भूतिपुरस्कृतः॥ ॥इति द्रोण
पर्वणि जयद्रथवधे ॥८०॥ संजय उवाच॥ ॥तथा संभाषतां तेषां प्रादुरासीद्धनंजयः। दिदृक्षुर्भरतश्रेष्ठं राजानं ससुहृज्जनं। तं प्रविष्टं शुभां क

क्षामभिवाद्याग्रतः स्थितं। समुत्थायार्जुनं प्रेम्णा सस्वजे पांडवर्षभः। मूर्ध्नि चैनमुपाघ्राय परिष्वज्य च बाहुना। आशिषः परमाः प्रोक्त्वा स्मयमानोभ्यभाषत।
व्यक्तमर्जुन संग्रामे ध्रुवस्ते विजयो महान्। यादृग्रूपा च ते छाया प्रसन्नश्च जनार्दनः। तमब्रवीत्ततो जिष्णुर्महदाश्चर्यमुत्तमं। दृष्टवानस्मि भद्रं ते
केशवस्य प्रसादजं। ततस्तत्कथयामास यथादृष्टं धनंजयः। आश्वासनार्थं सुहृदां त्र्यंबकेन समागमं। ततः शिरोभिरवनिं स्पृष्ट्वा सर्वे च वि
स्मिताः। नमस्कृत्य वृषांकाय साधु साध्वित्यथाब्रुवन्। अनुज्ञातास्ततः सर्वे सुहृदो धर्मसूनुना। त्वरमाणाः सुसंनद्धा हृष्टा युद्धाय निर्ययुः। अ
भिवाद्य तु राजानं युयुधानाच्युतार्जुनाः। हृष्टा विनिर्ययुः सर्वे युधिष्ठिरनिवेशनात्। रथेनैकेन दुर्धर्षौ युयुधानजनार्दनौ। जग्मतुः सहितौ वीराव
र्जुनस्य निवेशनं। तत्र गत्वा हृषीकेशः कल्पयामास सूतवत्। रथं रथवरस्याजौ वानरर्षभलक्षणं। स मेघसमनिर्घोषस्तप्तकांचनसप्रभः। ब
भौ रथः परिक्षिप्तः शिशुर्दिवसकृद्यथा। ततः पुरुषशार्दूलः सज्जः सज्जं पुरःसरः। कृताह्निकाय पार्थाय न्यवेदयत तं रथं। तं तु लोकवरः पुंसां कि
रीटी हेमवर्मभृत्। चापबाणधरो वाहं प्रदक्षिणमवर्तत। ततो विद्यावयोवृद्धैः क्रियावद्भिर्जितेंद्रियैः। स्तूयमानो जयाशीर्भिरारुरोह महारथं।
जैत्रैः सांग्रामिकैर्मंत्रैः पूर्वमेव रथोत्तमं। अभिमंत्रितमर्चिष्मानुदयं भास्करो यथा। स रथे रथिनां श्रेष्ठः कांचने कांचनावृतः। विबभौ विमलोर्चिष्मा
न्मेराविव दिवाकरः। अन्वारुरोहतुः पार्थं युयुधानजनार्दनौ। शार्यातेर्यज्ञमायांतो यथेंद्रं देवमश्विनौ। अथ जग्राह गोविंदो रश्मीन्रश्मिविदां वरः।
मातलिर्वासवस्येव वृत्रं हंतुं प्रयास्यतः। स ताभ्यां सहितः पार्थो विबभौ रथमास्थितः। सहितौ बुधशुक्राभ्यां यथेंद्रस्तारकामये। ततो वादित्रनिर्घो
षैर्मंगल्यैश्च शुभैः स्तवैः। प्रयांतमर्जुनं सूता मागधाश्चैव तुष्टुवुः। सजयाशीः सपुण्याहः सूतमागधनिस्वनः। युक्तो वादित्रनिर्घोषैस्तेषां प्रीति
करोभवत्। तमनुप्रयतो वायुः पुण्यगंधवहः शुभः। ववौ संहर्षयन्पार्थं द्विषतश्चापि शोषयन्। ततस्तस्मिन्क्षणे राजन्विविधानि शुभानि च। प्रादु
रासन्निमित्तानि विजयाय बहूनि च। पांडवानां त्वदीयानां विपरीतानि मारिष। दृष्ट्वार्जुनो निमित्तानि विजयाय प्रदक्षिणा। युयुधानं महेष्वास

मिदं वचनमब्रवीत्॥ युद्धे तथा नाद्य युद्धे मे दृश्यते विजयो ध्रुवं। तथा ह्यद्य निमित्तानि दृश्यंते शिनिपुंगव। सोहं तत्र गमिष्यामि यत्र सैंधवको नृपः।
यियासुर्यमलोकाय मम वीर्यं प्रतीक्षते। यथा परमकं कृत्यं सैंधवस्य वधे मम। तथैव सुमहत्कृत्यं धर्मराजस्य रक्षणे। स त्वमद्य महाबाहो राजा-
नं परिपालय। यथैव हि मया गुप्तस्त्वया गुप्तो भवेत्तथा। न हि पश्यामि तं लोके यस्त्वां युधि पराजयेत्। वासुदेवसमं युद्धे स्वयमप्यमरेश्वरः। त्वयि वा-
हं पराश्वस्य प्रद्युम्ने वा महारथे। शक्यो यः सैंधवं हंतुमनपेक्षो नरर्षभ। मय्यपेक्षा न कर्तव्या कथंचिदपि सात्वत। राजन्येव परा गुप्तिः कार्या सर्वात्मना
त्वया। न हि यत्र महाबाहुर्वासुदेवो व्यवस्थितः। किंचिद्व्यापद्यते तत्र यत्राहमपि वा ध्रुवं। एवमुक्तस्तु पार्थेन सात्यकिः परवीरहा। तथेत्युक्त्वा गमत्तत्र
यत्र राजा युधिष्ठिरः॥ ॥इति द्रोणपर्वणि जयद्रथवधे॥ ४॥ धृतराष्ट्र उ०॥ ॥श्वोभूते किमकार्षुस्ते दुःखशोकसमन्विताः। अभिमन्यौ हते तत्र के
वा युध्यंत मामकाः। जानंतस्तस्य कर्माणि कुरवः सव्यसाचिनः। कथं तत्किल्बिषं कृत्वा निर्भया ब्रूहि मामकाः। पुत्रशोकाभिसंतप्तं क्रुद्धं मृत्युमिवांतकं।
आयांतं पुरुषव्याघ्रं कथं ददृशुराहवे। कपिराजध्वजं संख्ये विधुन्वानं महद्धनुः। दृष्ट्वा शोकपरिद्यूनं किमकुर्वत मामकाः। किं नु संजय संग्रामे वृत्तं दु-
र्योधनं प्रति। परिदेवो महानत्र श्रुतो नाभिनंदनं। बभूवुर्ये मनोग्राह्याः शब्दाः श्रुतिसुखावहाः। न श्रूयंतेद्य ते सर्वे सैंधवस्य निवेशने। स्तुवतां ना-
द्य श्रूयंते पुत्राणां शिबिरे मम। सूतमागधसंघानां नर्तकानां च सर्वशः। शब्देन नादितो भीक्ष्णमभवद्यत्र मे श्रुतिः। दीनानां मद्य तं शब्दं न शृणोमि
समीरितं। निवेशने सत्यधृतेः सोमदत्तस्य संजय। आसीनोहं पुरा तात शब्दमश्रौषमुत्तमं। तदद्य हीनपुण्योहमार्तस्वरनिनादितं। निवेशनं ह-
तोत्साहं पुत्राणां मम लक्ष्यते। विविंशतेर्दुर्मुखस्य चित्रसेनविकर्णयोः। अन्येषां च सुतानां मे न तथा श्रूयते ध्वनिः। ब्राह्मणाः क्षत्रिया वैश्या यं शि-
ष्याः समुपासते। द्रोणपुत्रं महेष्वासं गायका नर्त्तकाश्च ये। वितंडालापसंलापैर्द्रुतवादित्रवादितैः। गीतैश्च विविधैरिष्टैरमंत यो दिवानिशं। उपास्य-
मानो बहुभिः कुरुसात्वतपांडवैः। सूत तस्य गृहे शब्दो नाद्य द्रोणे यथा पुरा। द्रोणपुत्रं महेष्वासं गायना नर्त्तकाश्च ये। अत्यर्थमुपतिष्ठंति तेषां न श्रू

यतेध्वनिः। विंदानुविंदयोश्चापि विराटे यो महाध्वनिः॥ श्रूयते सोद्य न तथा केकयानां च वेश्मसु। नित्यं प्रमुदितानां तु यः पाणीगीतस्वनो महान्। नृत्य
तां श्रूयते तात तत्र गणानां सोद्य न ध्वनिः। सप्ततंतून्वितन्वानायमुपासंति याजकाः। सोमदत्तिं श्रुतनिधिं तेषां न श्रूयते ध्वनिः। ज्याघोषो ब्रह्मघोषश्च तोम
रासिरथध्वनिः। द्रोणस्यासीदविरतं गृहे तं न शृणोम्यहं। नानादेशसमुत्थानां गीतानां यो भवत्स्वनः। वादित्रनिनदो नाम सोद्य न श्रूयते महान्।
यदाप्रभृत्युपप्लव्यात् शांतिमिच्छन् जनार्दनः। आगतः सर्वभूतानामनुकंपार्थमच्युतः। ततोहमब्रुवं सूत मंदं दुर्योधनं तदा। वासुदेवेन तात पुत्रे सं
शाम्य पांडवैः। कालप्राप्तमहं मन्ये मा त्वं दुर्योधनातिगाः। शमं चेद्याचमानं त्वं प्रत्याख्यास्यसि केशवं। हितार्थमभिजल्पंतं न तवास्ति रणे जयः। प्र
त्याचष्ट स दाशार्हमृषभं सर्वधन्विनां। अनुनेयानि जल्पंतमनयान्नान्वबुध्यत। ततो दुःशासनस्यैव कर्णस्य च मतं तदा। अन्ववर्तत हित्वा मां कृष्टः
कालेन दुर्मतिः। न ह्यहं द्यूतमिच्छामि विदुरो न प्रशंसति। सैंधवो नेच्छति द्यूतं भीष्मो न द्यूतमिच्छति। शल्यो भूरिश्रवाश्चैव पुरुमित्रो जयस्तथा। अश्वत्थ
मा कृपो द्रोणो द्यूतं नेच्छंति संजय। एतेषां मतमाज्ञाय यदि वर्तेत पुत्रकः। सज्ञातिमित्रः ससुहृच्चिरं जीवेदनामयः। श्लक्ष्णा मधुरसंभाषा ज्ञातिमध्ये प्रियं
वदाः। कुलीनाः संमताः प्राज्ञाः सुखं प्राप्स्यंति पांडवाः। धर्मापेक्षो नरो नित्यं सर्वत्र लभते सुखं। प्रेत्यभावे च कल्याणं प्रसादं प्रतिपद्यते। अर्हंत्यर्धं
पृथिव्यास्ते भोक्तुं सामर्थ्यसाधनात्। तेषामपि समुद्रांता पितृपैतामही मही॥ नियुज्यमानाः स्थास्यंति पांडवा धर्मवर्त्मनि। संति नो ज्ञातयस्तात ये
षां श्रोष्यंति पांडवाः। शल्यस्य सोमदत्तस्य भीष्मस्य च महात्मनः। द्रोणस्याथ विकर्णस्य बाल्हीकस्य कृपस्य च। अन्येषां चैव वृद्धानां भरतानां महा
त्मनां। त्वदर्थं ब्रुवतां तात करिष्यंति वचो हितं। कं वा त्वं मन्यसे तेषां यस्त्वा ब्रूयात्तदन्यथा। कृष्णो न धर्मं संत्यज्य सर्वे ते हि तदन्वयाः। मयापि चोक्तास्ते
वीरा वचनं धर्मसंहितं। नान्यथा प्रकरिष्यंति धर्मात्मानो हि पांडवाः। इत्यहं विलपन् सूत बहुशः पुत्रमुक्तवान्। न च मे श्रुतवान् मूढो मन्ये कालस्य पर्य
यं। वृकोदरार्जुनौ यत्र वृष्णिवीरश्च सात्यकिः। उत्तमौजाश्च पांचाल्यो युधामन्युश्च दुर्जयः। धृष्टद्युम्नश्च दुर्धर्षः शिखंडी चापराजितः। अश्मकाः के

कृपाश्चैव सत्वधर्मा च सोमकिः। वैद्यश्चैव कितानश्च पुत्रः काश्यस्य चाभिभोः द्रौपदेयाश्च विराटश्च द्रुपदश्च महारथः। यमौ च पुरुषव्याघ्रौ मंत्राय
मधुसूदनः। एकतोऽशा द्युध्येत लोकेऽस्मिन्वै जिजीविषुः। दिव्यमस्त्रं विकुर्वाणाः सयहेयुर्वा थ्यरिंदमान्। नान्यो दुर्योधनात्कश्चिच्छकुनेर्वापि
सौबलात्। दुःशासनचतुर्थानां नान्यं पश्यामि पंचमं। येषां चाभीषुहस्तश्च विष्वक्सेनो रथे स्थितः। सन्नद्धश्चार्जुनो योद्धा तेषां नास्ति पराजयः।
तेषां मम विलापानां नेह दुर्योधनः स्मरेत्। हतौ हि पुरुषव्याघ्रौ भीष्मद्रोणौ त्वमात्थ मे। तेषां विदुरवाक्यानामुक्तानां दीर्घदर्शिना। दृष्ट्वेमां फल
निर्वृत्तिं मन्ये शोचंति पुत्रकाः। हिमात्यये यथा कक्षं शुष्कं वातेरितो महान्। अग्निर्दहेत्तथा सेनां मामकां स धनंजयः। आचक्ष्व स्वेह नः सर्वं कुश
लो ह्यसि संजय। यदुपायात्त सायाह्ने कृत्वा पार्थस्य किल्बिषं। अभिमन्यौ हते तात कथमासीन्मनो हि वः। विजानंतोऽस्य कर्माणि युधि गांडीवधन्व
नः। अपकृत्य महत्तात सोढुं शक्ष्यंति मामकाः। किं नु दुर्योधनः कृत्यं कर्णः कृत्यं किमब्रवीत्। दुःशासनः सौबलश्च तेषामेवं गते सति। सर्वेषां स
मवेतानां पुत्राणां मम संजय। यद्वृत्तं तात संग्रामे मंदस्यापनयैर्भृशं। लोभानुगतदुर्बुद्धेः क्रोधेन विकृतात्मनः। राज्यकामस्य मूढस्य रागोपहत
चेतसः। दुर्नीतं वा सुनीतं वा तन्ममाचक्ष्व संजय॥ ॥ इति द्रोणपर्वणि जयद्रथवधे ॥७८॥ संजय उ०॥ ॥ हंत ते कथयिष्यामि सर्वं प्रत्यक्षदर्शिवान्।
शुश्रूषस्व स्थिरो भूत्वा तवापनयो महान्। गतोदके सेतुबंधो यादृक्तादृगयं तव। विलापो निष्फलो राजन्मा शुचो भरतर्षभ। पृथग्मशिरो दुर्जयितो
पश्चात्सत्वचघ्घनं। पीत्वा वारि यथा कश्चित्पश्चात्प्रछेतत कृहं। संविवाहाकुले जातां कन्यां पश्चाद्विचारयेत्। किं करोमि विचित्रं राजन्कालो हि दुर
तिक्रमः। अनतिक्रमणीयोऽयं कृतांतस्याद्भुतो विधिः। मा शुचो भरतश्रेष्ठ दिष्टमेतत्पुरातनं। यदि त्वं हि पुरा द्यूतात्कुंतीपुत्रं युधिष्ठिरं। निवर्तयेथा पांडु
त्रांश्च न त्वां व्यसनमाव्रजेत्। दुर्योधनं चाविधेयं बंधयेत्तु रायदि। कुरूले नो दयिष्यंस्त्वं न त्वां व्यसनमाव्रजेत्। न ते बुद्धिव्यभिचारमुपलप्स्यति

पांडवाः। पांचालाश्च मत्स्याश्चैव येचान्येपि जनाधिपाः। सत्कृत्वापि हि कृत्यं त्वं पुत्रं संस्थाप्य सत्पथे। वर्त्तेथाय दिधर्मेण न त्वां व्यसन माव्रजेत्। त्वं तु आज्ञातमो
लोके हित्वा धर्मं सनातनं। दुर्योधनस्य कर्णस्य शकुनेश्चान्वगा मतं। ततो विलपितं सर्वं मया राजन्निशामितं। अर्थे विवदमानस्य विषमिश्रं यथा मधु
नामन्यत तथा कृष्णो राजानं पांडवं पुरा। न भीष्मं न च द्रोणं पांचं यथा त्वां मन्यते सुतः। सत्यजीनाद्युदातु त्वां राजन् धर्माद्विच्युतं। तदा प्रभृति कृष्णस्त्वां न तथा
बहुमन्यते। परुषाण्युच्यमानांश्च यथा पार्थानुपेक्षसे। तस्यानुबंधः प्राप्तस्त्वां पुत्राणां राज्यकामुकः। पितृपैतामहं राज्यमपाहृतं सदानघ। अथ पार्थैर्जि
तां कृत्स्नां पृथिवीं प्रतिपद्यथाः। पांडुनावर्द्धितं राज्यं कौरवाणां यशस्तथा। ततश्चाभ्यधिकं भूयः पांडवैर्धर्मचारिभिः। तेषां तत्तादृशं कर्म त्वामासाद्य सुनि
फलं। यत्से प्राप्नशिता राज्यात्त्वये हामिषगृद्धिना। यत्पुनर्युद्धकाले त्वं पुत्रान् गर्हयसे नृप। बहुधा व्याहरन् दोषान्न तदद्योपपद्यते। नहि रक्षंति राजानो
युध्यंतो जीवितं रणे। चमूं विगाह्य पार्थानां युध्यंते क्षत्रियर्षभाः। यां तु कृष्णार्जुनौ सेनां यां सात्यकिवृकोदरौ। रक्षेरन् को नु तां युध्येदन्यत्र कौरवात्।
येषां योद्धा गुडाकेशो येषां मंत्री जनार्दनः। येषां च सात्यकिर्गोप्ता गोप्ता येषां वृकोदरः। को हि तान् विषहेद्योद्धुं मर्त्यधर्मा धनुर्धरः। अन्यत्र कौरवेयेभ्यो
ये वा तेषां पदानुगाः। यावत्तु शक्यते कर्त्तुमंतरज्ञैर्जनाधिप। क्षत्रधर्मरतैः शूरैस्तावत्कुर्वंति ते कृताः। यथा तु पुरुषव्याघ्रैर्युद्धं परमदारुणं। कुरूणां पां
डवैः सार्द्धं तत्सर्वं शृणु तत्त्वतः॥ ॥इति द्रोणपर्वणि जयद्रथवधे॥ ८०॥ संजय उ०॥ ॥तस्यां निशायां व्युष्टायां द्रोणः शस्त्रभृतां वरः। स्वान्यनीका
नि सर्वाणि प्राक्रमद्व्यूहितुं ततः। शूराणां गर्जतां राजन् संक्रुद्धानाममर्षिणां। श्रूयंते स्म गिरश्चित्राः परस्परवधैषिणां। विस्फार्य तु धनूंष्यान्ये ज्याः
करैः परिमृज्य च। विनिश्वसंतः प्राक्रोशन् क्वेदानीं स धनंजयः। विकोशान् सत्सरूनन्ये सेलं तथा राज्ञस्समाहितान्। पीतानाकाशसंकाशानसीन्केचिद्व
चिक्षिपुः। चरंतस्त्वसिमार्गांश्च लघुहस्ताः स्वशिक्षया। संग्राममनसः शूरा दृश्यंते स्म सहस्रशः। सघंटाश्चंदनादिग्धाः स्वर्णवज्रविभूषिताः।

समुत्क्षिप्तगदाश्चान्ये पर्यतिष्ठंत पांडवान्। अन्ये बलमदोन्मत्ताः परिघैर्बाहुशालिनः। बभुः संबाधमाकाशमुच्छ्रितैरिंद्रध्वजोपमैः। नाना प्रहरणाश्चा-
न्ये विविधस्रग्विभूषिताः। संग्राममनसः शूरास्तत्र तत्र व्यवस्थिताः। क्वार्जुनः क्व च गोविंदः क्व च मानी वृकोदरः। क्व स ते सुहृदस्तेषामाह्वया-
ना रणे तदा। ततः शंखमुपाध्मायत्त्वरयन्वाजिनः स्वयं। इतस्ततस्तान्रचयन्द्रोणश्चरति वेगितः। तेष्वनीकेषु सर्वेषु स्थितेष्वाहवनंदिषु। भारद्वा-
जो महाराज जयद्रथमथाब्रवीत्। त्वं चैव सौमदत्तिश्च कर्णश्चैव महारथः। अश्वत्थामा च शल्यश्च वृषसेनः कृपस्तथा। शतं चाश्वसहस्राणां
रथानामयुतानि षट्। द्विरदानां प्रभिन्नानां सहस्राणि चतुर्दश। पदातीनां सहस्राणि द्विशतान्येकविंशतिः। गव्यूतिषु त्रिमात्रेषु मामनासा-
द्य तिष्ठत। तत्रस्थं त्वां न संसोढुं शक्ता देवाः सवासवाः। किं पुनः पांडवाः सर्वे समाश्वसिहि पार्थिव। एवमुक्तः समाश्वस्तः सिंधुराजो जयद्रथः
संप्रायात्सह गांधारैर्वृतस्तैश्च महारथैः। वर्मिभिः सादिभिर्यत्तैः प्रासपाणिभिरास्थितैः। चामरापीडिनः सर्वे जांबूनदविभूषिताः। जयद्रथ-
स्य राजेंद्र हयाः साधुप्रवाहिनः। ते चैव सप्तसाहस्रा द्विसाहस्राश्च सैंधवाः। मत्तानां स्वधिरोहाणां हस्त्यारोहैर्विशांपते। नागानां भीमरूपाणां व-
र्मिणां रौद्रकर्मिणां। अध्यर्धेन सहस्रेण पुत्रो दुर्मर्षणस्तव। अग्रतः सर्वसैन्यानां योत्स्यमानो व्यवस्थितः। ततो दुःशासनश्चैव विकर्णश्च तवात्मजः
सिंधुराजार्थसिध्यर्थमग्रानीके व्यवस्थितौ। दीर्घो द्वादशगव्यूतिः पश्चार्धे पंचविस्तृतः। व्यूहः स चक्रशकटो भारद्वाजेन निर्मितः। नानानृपतिभि-
र्वीरैस्तत्र तत्र व्यवस्थितैः। रथाश्वगजपत्त्योघैर्द्रोणेन विहितः स्वयं। पश्चार्धे तस्य पद्मस्तु गर्भव्यूहः सुदुर्भिदः। सूचीपाशस्य मध्ये च गूढो व्यू-
हः पुनः कृतः। एवमेतं महाव्यूहं व्यूह्य द्रोणो व्यवस्थितः। सूचीमुखे महेष्वासः कृतवर्मा व्यवस्थितः। अनंतरं च कांबोजो जलसंधश्च मागधः। दुर्योध-
नः सहामात्यस्तदनंतरमेव च। ततः शतसहस्राणि योधानामनिवर्तिनां। व्यवस्थितानि सर्वाणि शकटे सूचिरक्षिणां। तेषां च पृष्ठतो राजा बलेन
महता वृतः। जयद्रथस्ततो राजन्सूचीपार्श्वे व्यवस्थितः। शकटस्य तु राजेंद्र भारद्वाजः स्थितो मुखे। यत्र तस्याभवद्भोजो जुगोपैनं ततश्च यं। श्वेतवर्मांबरो

द्रो॰प॰
७५

श्लाघोऽभूद्घोररूपो महाभुजः। धनुर्विस्फारयन्द्रोणस्तस्थौ क्रुद्ध इवांतकः। पताकिनं शोणहयं वेदीकृष्णाजिनध्वजं। द्रोणस्य रथमालोक्य प्रहृष्टाः कुरवोभव
न्। सिद्धचारणसंघानां विस्मयः सुमहानभूत्। द्रोणेन विहितं व्यूहं दृष्ट्वा क्षुब्धार्णवोपमं। सशैलसागरवनां नानाजनपदाकुलां। ग्रसेद्व्यूहः क्षितिं सर्वा
मिति भूतानि मेनिरे। बहुरथमनुजाश्वपत्तिनागं प्रतिभयनिस्वनमद्भुताभरूपं। अहितहृदयभेदनं महद्वै शकटमवेक्ष्य कृतं ननंद राजा॥ ॥इ
ति द्रोणपर्वणि जयद्रथवधे॥८७॥ संजय उ॥ ॥ततो व्यूढेष्वनीकेषु समुत्क्रुष्टेषु मारिष। ताड्यमानासु भेरीषु मृदंगेषु नदत्सु च। अनीकानां च संह्रा
दे वादित्राणां च निस्वने। प्रध्मापितेषु शंखेषु संनादे रोमहर्षणे। अभिहारयत्सु शनकैर्भरतेषु युयुत्सुषु। रौद्रे मुहूर्ते संप्राप्ते सव्यसाची व्यदृश्यत। व
टानां वायसानां च पुरस्तात्सव्यसाचिनः। बहुलानि सहस्राणि प्राक्रीडंस्तत्र भारत। मृगाश्च घोरसंनादाः शिवाश्चाशिवदर्शनाः। दक्षिणेन प्रया
तानामस्माकं प्राणदंस्तथा। सनिर्घाता ज्वलंत्यश्च पेतुरुल्काः समंततः। चचाल च मही कृत्स्ना भये घोरे समुत्थिते। विष्वग्वाताः सनिर्घाता रूक्षाः
शर्करकर्षिणः। ववुरायाति कौंतेये संग्रामे समुपस्थिते। नाकुलिस्तु शतानीको धृष्टद्युम्नश्च पार्षतः। पांडवानामनीकानि प्राज्ञौ तौ व्यूहतुस्त
दा। ततो रथसहस्रेण द्विरदानां शतेन च। त्रिभिरश्वसहस्रैश्च पदातीनां शतैः शतैः। अध्यर्धमात्रे धनुषां सहस्रे तनयस्तव। अग्रतः सर्वसैन्यानां
स्थित्वा दुर्मर्षणोऽब्रवीत्। अद्य गांडीवधन्वानं तपंतं युद्धदुर्मदं। अहं संवारयिष्यामि वेलेव मकरालयं। अद्य पश्यंतु संग्रामे धनंजयममर्षणं। विष
क्तं मयि दुर्धर्षमश्मकूटमिवाश्मनि। एवं ब्रुवन्महाराज महात्मा स महामतिः। महेष्वासैर्वृतो राजन्महेष्वासो व्यवस्थितः। ततोंतक इव क्रुद्धः सवज्र इव
वासवः। दंडपाणिरिवासह्यो मृत्युः कालेन नोदितः। शूलपाणिरिवाक्षोभ्यो वरुणः पाशवानिव। युगांताग्निरिवार्चिष्मान्प्रधक्ष्यन्वै पुनः प्रजाः।
क्रोधामर्षबलोद्धूतो निवातकवचांतकः। जयो जेताजितः संख्ये पारयिष्यन्महाव्रतं। आमुक्तकवचः खड्गी जांबूनदकिरीटभृत्। शुभ्रवर्माबर
धरः स्रग्दी चारुकुंडलः। रथप्रवरमास्थाय नरो नारायणानुगः। विधुन्वन्गांडिवं संख्ये बभौ सूर्य इवोदितः। शोणानीकस्य महत इषुपाते धनंजयः।

राम
७५

व्यवस्थाप्य रथं सज्जं शंखं दध्मौ प्रतापवान् । अथ कृष्णोप्यसंभ्रांतः पार्थेन सह मारिष । आध्मापयत् पांचजन्यं शंखप्रवरमोजसा । तयोः शंखप्रणादेन
तव सैन्यं विशांपते । आसीत्संहृष्टरोमाणः कंपिता गतचेतसः । यथा त्रसंति भूतानि सर्वाण्यशनिनिस्वनात् । तथा शंखप्रणादेन वित्रेसुस्तव सैनि
काः । प्रसुस्रुवुः शकृन्मूत्रं वाहनानि च सर्वशः । एवं सवाहनं सर्वमाविग्नमभवद्बलं । व्यषीदंत नरा राजन् शंखशब्देन मारिष । विसंज्ञाश्चाभवन् केचित् केचिद्रा
जन् वितत्रसुः । ततः कपिर्महानादं सह भूतैर्ध्वजालयैः । अकरोद्व्यादितास्यः सन् भीषयंस्तव सैनिकान् । ततः शंखाश्च भेर्यश्च मृदंगाश्चानकैः सह । पुन
रेवाभ्यहन्यंत तव सैन्यप्रहर्षणाः । नानावादित्रसंह्रादैः क्ष्वेडितास्फोटिताकुलैः । सिंहनादैः सवादित्रैः समाहूतैर्महारथैः । तस्मिंस्तुमुलसंह्रादे भीरू
णां भयवर्द्धने । अतीव हृष्टो दाशार्हमब्रवीत् पाकशासनिः ॥ ॥ इति द्रोणपर्वणि जयद्रथवधे ॥८८॥ अर्जुन उवाच ॥ ॥ नोदयाश्वान् हृषीकेश यत्र दुर्मर्षणः
स्थितः । एतद्भित्वा गजानीकं प्रवेक्ष्याम्यरिवाहिनीं ॥ ॥ संजय उवाच ॥ ॥ एवमुक्तो महाबाहुः केशवः सव्यसाचिना । अनोदयद्धयांस्तत्र यत्र दुर्मर्ष
णः स्थितः । स संप्रहारस्तुमुलः संप्रवृत्तः सुदारुणः । एकस्य च बहूनां च रथनागनरक्षयः । ततः सायकवर्षेण पर्जन्य इव वृष्टिमान् । परानवा
किरत्पार्थः पर्वतानिव तोयदः । ते चापि रथिनः सर्वे त्वरिताः कृतहस्तवत् । अवाकिरन् बाणजालैस्तत्र कृष्णधनंजयौ । ततः क्रुद्धो महाबाहुर्वार्य
माणः परैर्युधि । शिरांसि रथिनां पार्थः कायेभ्योपाहरच्छरैः । उद्भ्रांतनयनैर्वक्त्रैः संदष्टौष्ठपुटैः शुभैः । सकुंडलशिरस्त्राणैर्वसुधा समकीर्यत । पुंड
रीकवनानीव विध्वस्तानि समंततः । विनिकीर्णानि योधानां वदनानि चकाशिरे । तपनीयविचित्राणि सिक्तानि रुधिरेण वै । अदृश्यंत यथा राजन्मे
घसंघाः सविद्युतः । शिरसां पततां राजन् शब्दोभूत् पृथिवीतले । कालेन परिपक्वानां तालानां पततामिव । ततः कबंधः कश्चित्तु धनुरालंब्य तिष्ठति ।
कश्चित्खड्गं विनिष्कृष्य भुजेनोद्यम्य तिष्ठति । नाजानंत शिरांस्युर्व्यां पतितानि नरर्षभाः । अमृष्यमाणाः कौंतेयं संग्रामे जयगृद्धिनः । हयानामु
त्तमांगैश्च हस्तिहस्तैश्च मेदिनी । बाहुभिश्च शरैर्भिन्नैर्वीराणां समकीर्यत । अयं पार्थः कुतः पार्थ एष पार्थ इति प्रभो । तव सैन्येषु योधानां पार्थभू

द्रो॰ प॰
७६

तमिवाभवत्। अन्योन्यमेव चाजघ्नुरात्मानमिति चाहवे। पार्थभूतममन्यंत जगत्कालेन मोहिताः। निस्वनंतः सरुधिरा विसंज्ञा गाढवेदनाः। शया
नाबहवो वीराः कीर्तयंतः सुहृज्जनं। सभिंडिपालाः सप्रासाः सशक्त्यृष्टिपरश्वधाः। सनिर्व्यूहाः सनिस्त्रिंशाः सशरासनतोमराः। सबाणावर्मा भि
रणाः सांगदाः सगदा रणे। महाभुजगसंकाशा बाहवः परिघोपमाः। उद्वेष्टंति विचेष्टंति संवेष्टंति च सर्वशः। वेगं कुर्वंति संरब्धा निकृत्ताः परमेषु
भिः। योयः स्म समरे पार्थं प्रतिसंरभते नरः। तस्य तस्यांतको बाणः शरीरमुपसर्पति। नृत्यतो रथमार्गेषु धनुर्व्यायच्छतस्तथा। न कश्चित्तत्र पार्थस्य
ददर्शांतरमण्वपि। यत्तस्य घटमानस्य क्षिप्रं विक्षिपतः शरान्। लाघवात्पांडुपुत्रस्य विस्मयंत्यपरे जनाः। हस्तिनं हस्तियंतारमश्वमाश्विकमे
व च। अभिनत्फाल्गुनो बाणै रथिनं सहसारथिं। आवर्तमानमावृत्तं युध्यमानं च पांडवः। प्रमुखे तिष्ठमानं च न कंचिन्न निहंति सः। यथोद
यन्वै गगने सूर्यो हंति महत्तमः। तथार्जुनो गजानीकमवधीत्कंकपत्रिभिः। तैस्तथाजवपुत्रस्य सैन्यं युधि परंतप। प्रभग्नं हतमाविग्नमतीव शरप
डितं। मारुतेनेव महता मेघानीकं निवार्यते। प्रकाल्यमानं तत्सैन्यं नाशकत्प्रतिवीक्षितुं। प्रतोदैश्चापकोटीभिर्हुंकारैः साधुवाहितैः। कशापार्ष्णि
भिघातैश्च वाग्भिरुग्राभिरेव च। नोदयंतो हयांस्तूर्णं पलायंते स्म सैनिकाः। हस्तिभिः पृतितैर्भिन्नैस्तव सैन्यमदृश्यत। अंतकाले यथा भूमिर्वि
निकीर्णा महाधरैः। यथा मध्यंदिने सूर्यो दुःप्रेक्ष्यः प्राणिभिः सदा। तथा धनंजयः क्रुद्धो दुःप्रेक्ष्यो भाति शत्रुभिः। सादिनो रथिनश्चैव पत्तयश्चा
र्जुनार्दिताः। पार्थं युगांकुशेन गाश्चोद्यंत तथापरे। शरैः संमोहिताश्चान्ये तमेवाभिमुखा ययुः। तव योधा हतोत्साहा विभ्रांतमनसस्तदा॥ ॥इ
ति द्रोणपर्वणि जयद्रथवधे ।८५। धृतराष्ट्र उवाच॥ ॥तस्मिन्प्रभग्ने सैन्याग्रे वध्यमाने किरीटिना। के नु तत्र रणे वीराः प्रत्युद्ययुर्धनंजयं। आहोस्विच्छ
कटव्यूहं प्रविष्टा मोघनिश्चयाः। द्रोणमाश्रित्य तिष्ठंति प्राकारमकुतोभयं॥ ॥संजय उवाच॥ ॥तथार्जुनेन संभग्ने तस्मिंस्तव बले तदा। हतवीरे हतो
त्साहे पलायनकृतक्षणे। पाकशासनिनाभीक्ष्णं वध्यमाने शरोत्तमैः। न तत्र कश्चित्संग्रामे शशाकार्जुनमीक्षितुं। ततस्तव सुतो राजन्दृष्ट्वा

राम
७६

सैन्यं तथागतं । दुःशासनो भृशं क्रुद्धो युद्धायार्जुनमभ्यगात् । जांबूनदशिरस्त्राणः शूरस्तीव्रपराक्रमः । नागानीकेन महता ग्रसन्निव महीमिमां ।
दुःशासनो महाराज सव्यसाचिनमावृणोत् । ह्रादेन गजघंटानां शंखानां निनदेन च । ज्याक्षेपनिनदैश्चैव विरावेण च दंतिनां । भूर्दिशश्चां
तरिक्षं च सर्वमासीत्समावृतं । स मुहूर्तं प्रतिभयो दारुणः समपद्यत । तान्दृष्ट्वा पततस्तूर्णमंकुशैरभिनोदितान् । गृहीतहस्तान्संरब्धान्सपक्षा
निव पर्वतान् । सिंहनादेन महता नरसिंहो धनंजयः । गजानीकममित्राणामभीतो व्यधमच्छरैः । महोर्मिणमिवोद्धूतं श्वसनेन महार्णवं । किरीटी
तद्गजानीकं प्राविशन्मकरो यथा । काष्ठातीत इवादित्यः प्रतपन्युगसंक्षये । दृश्यते दिक्षु सर्वासु पार्थः परपुरंजयः । खुरशब्देन चाश्वानां नेमिघो
षेण तेन च । तेन चोत्कृष्टशब्देन ज्यानिनादेन तेन च । नानावादित्रघोषेण पांचजन्यस्वनेन च । देवदत्तस्य घोषेण गांडीवनिनदेन च । मंदवेगतरा नागा
बभूवुस्ते विचेतसः । शरैराशीविषस्पर्शैर्निर्भिन्नाः सव्यसाचिना । ते गजा विविधैस्तीक्ष्णैः शरैर्गांडीवनोदितैः । अनेकशतसाहस्रैः सर्वांगेषु सम
र्पिताः । आरावं परमं कृत्वा वध्यमानाः किरीटिना । निपेतुरनिशं भूमौ छिन्नपक्षा इवाद्रयः । अपरे दंतकाष्ठेषु कुंभेषु कटकेषु च । शरैः संतापिता ना
गाः क्रौंचवद्व्यनदन्मुहुः । गजस्कंधगतानां च पुरुषाणां किरीटिना । आच्छिद्यंतोत्तमांगानि भल्लैः सन्नतपर्वभिः । सकुंडलानां पततां शिरसां धरणीतले ।
पद्मानामिव संघातैः पार्थश्चक्रे निवेदनं । यंत्रबद्धा विकवचा विक्षता रुधिरोक्षिताः । भ्रमत्सु युधि नागेषु मनुष्या विललंबिरे । केचिदेकेन बाणेन सु
मुक्तेन पतत्रिणा । द्वौ त्रयश्च विनिर्भिन्ना निपेतुर्धरणीतले । सोऽवध्यत्कुद्धजांश्चैव युगानीषास्तथैव च । रथिनः कृंतयामास भल्लैः सन्नतपर्वभिः । न
संदधन्न चाप्यस्यन्न विमुंचन्न चोद्धमन् । मंडलेनैव धनुषा नृत्यन्पार्थो व्यदृश्यत । अतिविद्धाश्च नाराचैर्वमंतो रुधिरं मुखैः । मुहूर्तान्निपतंत्यन्ये वार
णा धरणीतले । उत्थितान्यगणेयानि कबंधानि समंततः । अदृश्यंत महाराज तस्मिन्परमसंकुले । सचापाः सांगुलित्राणाः सखड्गाः सांगदा
स्तथा । अदृश्यंत भुजाश्छिन्ना हेमाभरणभूषिताः । सूपस्कारैरधिष्ठानैरीषादंडकबंधुरैः । चक्रैर्विमथितैरक्षैर्भग्नैश्च परमायुधैः । चर्मचाप

वैरेश्चैवव्यवकीर्णैस्तातस्ततः। स्वभ्रैरिवाभरणैर्वस्त्रैः पतितैश्च महाध्वजैः। निहतैर्वारणैरश्वैः संछिन्नैश्च निपातितैः। अदृश्यत महाराजन्दारुणाप्रति
दर्शना। एवं दुःशासनबलं वध्यमानं किरीटिना। संप्राद्रवन्महाराज व्यथितं वै सनायकं। ततो दुःशासनस्त्रस्तः सहानीकः शरार्दितः। द्रोणं त्राता
रमाकांक्षञ्छकटाख्यं युद्धदुर्मदं॥ ॥इति द्रोणपर्वणि जयद्रथवधे॥८५॥ संजयउ०॥ दुःशासनबलं हत्वा सव्यसाची महारथः। सिंधुराजं प्र
रीप्सन्वै द्रोणानीकमुपाद्रवत्। स तु द्रोणं समासाद्य व्यूहस्य प्रमुखे स्थितं। कृतांजलिरिदं वाक्यं कृष्णस्यानुमतेऽब्रवीत्। शिवेन ध्याहि मां ब्रह्मन्स्वस्ति
चैव वदस्व मे। तव प्रसादादिच्छामि प्रवेष्टुं दुर्भिदां चमूं। भवान्पितृसमो मह्यं धर्मराजसमोपि च। तथा कृष्णसमश्चैव सत्यमेतद्ब्रवीमि ते। अश्व
त्थामा यथा तात रक्षणीयस्त्वयानघ। तथाहमपि ते रक्ष्यः सदैव द्विजसत्तम। तव प्रसादादिच्छामि सिंधुराजानमाहवे। निहंतुं द्विपदां श्रेष्ठ
प्रतिज्ञां रक्ष मे प्रभो। एवमुक्तस्तदाचार्यः प्रत्युवाच स्मयन्निव। यथा त्वं भाषसे पार्थ ममाप्येवं मतं प्रभो। किंतु स्वाम्यर्थयुक्तेन कार्यं युद्धं मनीषि
भिः। मामजित्वा न बीभत्सो जेतुं शक्यो जयद्रथः। एतावदुक्त्वा तं द्रोणः शरव्रातैरवाकिरत्। सरथाश्वध्वजं तीक्ष्णैः प्रहसन्वै ससारथिं। ततोऽर्जुनः
शरव्रातान्द्रोणस्याचार्यसायकैः। द्रोणमभ्यर्दयद्बाणैर्घोररूपैर्महत्तरैः। विव्याध च रणे द्रोणमनुमान्य विशांपते। क्षत्रधर्मं समास्थाय नवभिः सा
यकैः पुनः। तस्येषुन्निशितैः छित्वा द्रोणो विव्याध तावुभौ। विषाग्निज्वलितप्रख्यैरिषुभिः कृष्णपांडवौ। इयेष पांडवस्तस्य बाणैश्छेत्तुं शरासनं।
तस्य चिंतयतस्त्वेवं फाल्गुनस्य महात्मनः। द्रोणः शरैः सुसंयत्तो ज्यां चिच्छेदास्य वीर्यवान्। विव्याध च हयानस्य ध्वजं सारथिमेव च। अर्जुनं च शरै
र्द्रोणः स्मयमानोऽभ्यवाकिरत्। एतस्मिन्नंतरे पार्थः सज्यं कृत्वा महद्धनुः। विशेषयिष्यन्नाचार्यं प्रत्यस्मयन्निव। मुमोच षट्शतान्बाणान्गृ
हीत्वैकमिव द्रुतं। पुनः सप्तशतानन्यान्सहस्रं चावकर्तनान्। चिक्षेपायुतशश्चान्यान्निघ्नन्द्रोणस्य तां चमूं। तैः सम्यगस्तैर्बलिना कृतिना चित्रयो
धिना। मनुष्यवाजिमातंगा विद्धाः पेतुः सहस्रशः। विद्रुताश्च रणे पेतुः संछिन्नायुधजीविनः। रथिनो रथमुख्येभ्यः सहसा शरपीडिताः। चूर्णि

तान्क्षिप्रदग्धानां वज्रानिलहुताशनैः। तुल्यरूपा गजाः पेतुर्गिर्यग्रांबुदसन्निभाः। पेतुरश्वसहस्राणि प्रहतान्यर्जुनेषुभिः। सिंहा हिमवतः पृष्ठे वा
रिधाराहता इव। रथाश्वद्विपपत्त्योघाः सलिलौघा इवोद्धताः। युगांतादित्यरश्म्याभैः पांडवास्त्रशरैर्हताः। तं पांडवादित्यशरांशुजालैः कुरुप्रवीरान्यु
धि निष्पतंतं। स द्रोणमेघः शरवर्षवेगैः प्राछादयन्मेघ इवार्करश्मीन्। अथात्यर्थविसृष्टेन द्विषतामसुभोजिना। आजघ्ने वक्षसि द्रोणो नाराचेन धनं
जयं। स विह्वलितसर्वांगः क्षितिकंपे यथाचलः। धैर्यमालंब्य बीभत्सुर्द्रोणं विव्याध पत्त्रिभिः। द्रोणस्तु पंचभिर्बाणैर्वासुदेवमताडयत्। अर्जुनं च त्रि
सप्तत्या ध्वजं चास्य त्रिभिः शरैः। विशेषयिष्यन्शिष्यं च द्रोणो राजन्पराक्रमी। अदृश्यमर्जुनं चक्रे निमेषाच्छरवृष्टिभिः। प्रसक्तान्पततोऽद्राक्ष्म भारद्वा
जस्य सायकान्। मंडलीकृतमेवास्य धनुश्चाप्यदृश्यताद्भुतं। तेऽभ्ययुः समरे राजन्वासुदेवधनंजयौ। द्रोणसृष्टाः सुबहवः कंकपत्रपरिच्छदाः। तद्दृष्ट्वा तादृ
शं युद्धं द्रोणपांडवयोस्तदा। वासुदेवो महाबुद्धिः कार्यवत्तामचिंतयत्। ततोऽब्रवीद्वासुदेवो धनंजयमिदं वचः। पार्थ पार्थ महाबाहो न नः कालात्ययो भ
वेत्। द्रोणमुत्सृज्य गच्छावः कृत्यमेतन्महत्तरं। पार्थश्चाप्यब्रवीत्कृष्णं यथेष्टमिति केशव। ततः प्रदक्षिणं कृत्वा द्रोणं प्रायान्महाभुजः। परिवृत्तश्च बीभत्सु
रगच्छद्विसृजञ्शरान्। तमब्रवीत्स्मयन्द्रोणः क्वेदं पांडव गम्यते। ननु नाम रणे शत्रूनजित्वा न निवर्तसे॥ ॥अर्जुन उ०॥ ॥गुरुर्भवान्न मे शत्रुः शिष्यः पुत्र
समश्चते। न चास्ति स पुमांल्लोके यस्त्वां युधि पराजयेत्॥ ॥संजय उ०॥ ॥एवं ब्रुवन्स बीभत्सुर्जयद्रथवधोत्सुकः। त्वरायुक्तो महाराज त्वत्सैन्यं समुपाद्र
वत्। तं चक्ररक्षौ पांचाल्यौ युधामन्यूत्तमौजसौ। अन्वयातां महात्मानौ विशंतौ तावकं बलं। ततो जयो महाराज कृतवर्मा च सात्वतः। कांबोजश्च श्रुता
युश्च धनंजयमवारयन्। तेषां दशसहस्राणि रथानामनुयायिनां। अभीषाहाः शूरसेनाः शिबयोऽथ वसातयः। मावेल्लकाः ललित्थाश्च केकया मद्रका
स्तथा। नारायणाः सगोपालाः कांबोजानां गणाश्च ये। कर्णेन निर्जिताः पूर्वं संग्रामे शूरसंमताः। भारद्वाजं पुरस्कृत्य त्यक्तात्मानोऽर्जुनं प्रति। पुत्रशोकाभिसं
तप्तं क्रुद्धं मृत्युमिवांतकं। त्यजंतं तुमुले प्राणान्संनद्धं चित्रयोधिनः। गाहमानमनीकानि मातंगमिव यूथपं। महेष्वासं पराक्रांतं नरव्याघ्रमवारयन्।

ततः प्रववृते युद्धं तुमुलं लोमहर्षणं । अन्योन्यं वै प्रार्थयतां योधानामर्जुनेन च । जयद्रथवधप्रेप्सुनाऽयांतं कुरुषर्षभं । न्यवारयंत सहसा क्रियाव्याधिमिवो-
त्थितं ॥ ॥ इति द्रोणपर्वणि जयद्रथवधे ॥ ८९ ॥ संजय उ० ॥ ॥ सन्निरुद्धस्तु तैः पार्थो महाबलपराक्रमः । द्रुतं समभियातश्च द्रोणेन रथिनां वरः । किरन्निषुग-
णांस्तीव्रान्स रश्मीनिव भास्करः । तापयामास तत्सैन्यं देहं व्याधिगणैर्यथा । अश्वो विद्धो ध्वजश्छिन्नः सारोहः पातितो गजः । छत्राणि चापविद्धानि
रथाश्चक्रैर्विनाकृताः । विद्रावितानि सैन्यानि शरार्त्तानि समंततः । इत्यासीत्तुमुलं युद्धं न प्राज्ञायत किंचन । तेषां प्रयततां संख्ये परस्परमजिह्मगैः ।
अर्जुनो ध्वजिनीं राजन्नभीक्ष्णं समकंपयत् । सत्यां चिकीर्षमाणस्तु प्रतिज्ञां सत्यसंगरः । अभ्यद्रवद्रथश्रेष्ठं शोणाश्वं श्वेतवाहनः । तं द्रोणः पंचविंशत्या
मर्मभिद्भिरजिह्मगैः । अंतेवासिनमाचार्यो महेष्वासः समार्पयत् । तं तूर्णमिव बीभत्सुः सर्वशस्त्रभृतां वरः । अभ्यधावदिषूनस्यन्निषुवेगविघातकान् ।
तस्याशु क्षिपतो भल्लान्भल्लैः सन्नतपर्वभिः । प्रत्यविध्यदमेयात्मा ब्रह्मास्त्रं समुदीरयन् । तदद्भुतमपश्याम द्रोणस्याचार्यकं युधि । यतमानो युवा नैव
प्रत्यविध्यद्यदर्जुनं । क्षरन्निव महामेघो वारिधाराः सहस्रशः । द्रोणमेघः पार्थशैलं ववर्ष शरवृष्टिभिः । अर्जुनः शरवर्षं तद्ब्रह्मास्त्रेणैव वीर्यवान् । प-
रिजघान तेजस्वी बाणैर्बाणान्विशातयन् । द्रोणस्तु पंचविंशत्या श्वेतवाहनमर्दयत् । वासुदेवं च सप्तत्या बाह्वोरुरसि चार्दयत् । पार्थस्तु प्रहसन्धीमानाचा-
र्यं शरौघिणं । विसृजंतं शितान्बाणानवारयत तं युधि । अथ तौ वध्यमानौ तु द्रोणेन रथसत्तमौ । आवर्जयेतां दुर्धर्षौ युगांताग्निमिवोत्थितं । वर्जयन्वै
शरांस्तीक्ष्णान्द्रोणचापवरातिगान् । किरीटमाली कौंतेयो भोजानीकं न्यशातयत् । सोंतरा कृतवर्माणं कांबोजं च सुदक्षिणं । अभ्ययाद्वर्जयन्द्रोणं मैना-
कमिव पर्वतं । ततो भोजो नरव्याघ्रं दुःसहं कुरुसत्तम । अविध्यत्तूर्णमव्यग्रो दशभिः कंकपत्रिभिः । तमर्जुनः शतेनाजौ राजन्विव्याध पत्रिणा । पुनश्चान्यै-
स्त्रिभिर्बाणैर्मोहयन्निव सात्वतं । भोजस्तु प्रहसन्पार्थं वासुदेवं च माधवं । एकैकं पंचविंशत्या सायकानां समार्पयत् । तस्यार्जुनो धनुश्छित्वा विव्याधैनं त्रि-
सप्तभिः । शरैरग्निशिखाकारैः क्रुद्धाशीविषसन्निभैः । अथान्यद्धनुरादाय कृतवर्मा महारथः । पंचभिः सायकैस्तूर्णं विव्याधोरसि भारत । पुनश्च नि

श्रितैर्बाणैः पार्थं विव्याध पंचभिः। तं पार्थो नवभिर्बाणैराजघान स्तनांतरे। दृष्ट्वा विषक्तं कौंतेयं कृतवर्मरथं प्रति। चिंतयामास वार्ष्णेयो न नः कालात्य-
यो भवेत्। ततः कृष्णोऽब्रवीत्पार्थं कृतवर्माणमर्दय। कुरु संबंधकं यत्नात्कामं मध्ये न निशातय। ततः स कृतवर्माणं मोहयित्वार्जुनः शरैः। अभ्यगाज्जवने-
रश्वैः कांबोजानामनीकिनीं। अमर्षितस्ततो हार्दिक्यः प्रविष्टे श्वेतवाहने। विधुन्वन्सशरं चापं पांचाल्याभ्यां समागतः। चक्ररक्षौ तु पांचाल्यावर्जुनस्य प-
दानुगौ। पर्यवारयदायांतौ कृतवर्मा रथेषुभिः। तावविध्यत्ततो भोजः सर्वपारसवैः शरैः। संविच्छेद तु रथस्य ध्वजं कार्मुकमेव च। अथान्यद्धनुरादा-
य हार्दिक्यः क्रोधमूर्छितः। कृत्वा विधनुषौ वीरौ शरवर्षैरवाकिरत्। तावन्ये धनुषी सज्ये कृत्वा भोजं बिभेदतुः। तेनांतरेण बीभत्सुर्विवेशामित्रवाहिनीं।
न लेभाते तु तौ द्वारं वारितौ कृतवर्मणा। धार्तराष्ट्रस्य नीकेषु यतमानौ नरर्षभौ। अनीकान्यर्दयन्युद्धे त्वरितः श्वेतवाहनः। नावधीत्कृतवर्माणं प्राप्तमप्यरि-
सूदनः। तं दृष्ट्वा तु तथा यांतं शूरो राजा श्रुतायुधः। अभ्यद्रवत्सुसंक्रुद्धो विधुन्वानो महद्धनुः। स पार्थं त्रिभिरानर्छत्सप्तत्या च जनार्दनं। क्षुरप्रेणास्य तीक्ष्णे-
न पार्थकेतुमताडयत्। तमर्जुनो नवत्या च शराणां नतपर्वणां। आजघान भृशं क्रुद्धस्तोत्रैरिव महाद्विपं। स तन्न ममृषे राजन्पांडवेयस्य विक्रमं। अथै-
नं सप्तसप्तत्या नाराचानां समार्पयत्। तस्यार्जुनो धनुश्छित्वा शरावापं निकृत्य च। आजघानोरसि क्रुद्धः सप्तभिर्नतपर्वभिः। अथान्यद्धनुरादाय स
राजा क्रोधमूर्छितः। वासविं नवभिर्बाणैर्बाह्वोरुरसि चार्पयत्। ततोर्जुनः स्मयन्नेव श्रुतायुधमरिंदमः। शरैरनेकसाहस्रैः पीडयामास भारत। अश्वां-
श्चास्यावधीत्तूर्णं सारथिं च महारथः। विव्याध चैनं सप्तत्या नाराचानां महाबलः। हताश्वं रथमुत्सृज्य स तु राजा श्रुतायुधः। अभ्यद्रवद्रणे पार्थं गदामुद्य-
म्य वीर्यवान्। वरुणस्यात्मजो वीरः स तु राजा श्रुतायुधः। पर्णाशा जननी तस्य शीततोया महानदी। तस्य माताब्रवीद्राजन्वरुणं पुत्रकारणात्। अवध्यो-
यं भवेल्लोके शत्रूणां तनयो मम। वरुणस्त्वब्रवीत्प्रीतो ददाम्यस्मै वरं हितं। दिव्यमस्त्रं सुतस्तेऽयं येनावध्यो भविष्यति। नास्ति चाप्यमरत्वं वै मनुष्यस्य कथंच-
न। सर्वेणावश्यमर्तव्यं जातेन सरितां वरे। दुर्धर्षस्त्वेष शत्रूणां रणेषु भविता सदा। अस्त्रस्यास्य प्रभावाद्वै व्येतु ते मानसो ज्वरः। इत्युक्त्वा वरुणः प्रादा

द्रो॰प॰
७२

दांमंत्रपुरस्कृतां। यामासाद्य दुराधर्षः सर्वलोके श्रुतायुधः। उवाच चैनं भगवान् स्वयमेव जलेश्वरः। अयुध्यतो न मोक्तव्या सा त्वय्येव पतेदिति। तथा सव
रथातिन्या जनार्दनमताडयत्। प्रतिजग्राह तां कृष्णः पीनेनांसेन वीर्यवान्। नाकंपयत शौरिं सा विंध्यं गिरिमिवानिलः। प्रत्यभ्ययात्तं विहिता कृत्येव
दुरधिष्ठिता। जघान चास्थितं वीरं श्रुतायुधममर्षणं। हत्वा श्रुतायुधं वीरं जगतीमन्वपद्यत। हाहाकारो महांस्तत्र सैन्यानां समजायत। स्वेनास्त्रेण ह
तं दृष्ट्वा श्रुतायुधमरिंदमं। अयुध्यमानाय हि सा केशवाय नराधिप। क्षिप्ता श्रुतायुधेनाथ तस्मात्तमवधीद्गदा। यथोक्तं वरुणेनाजौ तथा स
निधनं गतः। व्यसुश्चाप्यपतद्भूमौ प्रेक्षतां सर्वधन्विनां। पतमानस्तु स बभौ पर्णाशायाः प्रियः सुतः। संभग्न इव वातेन बहुशाखो वनस्पतिः। ततः सर्वा
णि सैन्यानि सेनामुख्याश्च सर्वशः। प्राद्रवंत हतं दृष्ट्वा श्रुतायुधमरिंदमं। ततः कांबोजराजस्य पुत्रः शूरः सुदक्षिणः। अभ्ययाज्जवनैरश्वैः फाल्गुनं श
त्रुसूदनं। तस्य पार्थः शरान् सप्त प्रेषयामास भारत। ते तं शूरं विनिर्भिद्य प्राविशन् धरणीतलं। सोऽतिविद्धः शरैस्तीक्ष्णैर्गांडीवप्रेषितै रणे। अर्जुनं प्रतिवि
व्याध दशभिः कंकपत्रिभिः। वासुदेवं त्रिभिर्विद्ध्वा पुनः पार्थं च पंचभिः। तस्य पार्थो धनुश्छित्वा केतुं चिच्छेद मारिष। भल्लाभ्यां भृशतीक्ष्णाभ्यां तं च वि
व्याध पांडवः। स तु पार्थं त्रिभिर्विद्ध्वा सिंहनादमथानदत्। सर्वपारसवीं चैव शक्तिं शूरः सुदक्षिणः। स घंटां प्राहिणोद्घोरां क्रोधाद्गांडीवधन्वने। सा ज्व
लंती महोल्केव तमासाद्य महारथं। सविस्फुलिंगा निर्भिद्य निपपात महीतले। शक्त्या त्वभिहतो गाढं मूर्छयाभिपरिप्लुतः। समाश्वस्य महातेजाः सृ
क्किणी परिसंलिहन्। तं चतुर्दशभिः पार्थो नाराचैः कंकपत्रिभिः। साश्वध्वजधनुःसूतं विव्याधाचिंत्यविक्रमः। रथं चान्यैः सुबहुभिश्चक्रे विशकलं रणे।
सुदक्षिणं तु कांबोजं मोघसंकल्पविक्रमं। बिभेद हृदि बाणेन पृथुधारेण पांडवः। स भिन्नवर्मा स्रस्तांगः प्रभ्रष्टमुकुटांगदः। पपाताभिमुखः शूरो यंत्रमु
क्त इव ध्वजः। गिरेः शिखरजः श्रीमान् सुशाखः सुप्रतिष्ठितः। निर्भिन्न इव वातेन कर्णिकारो हिमात्यये। शेते स्म निहतो भूमौ कांबोजास्तरणोचितः। म
हार्हाभरणोपेतो धातुमानिव पर्वतः। सुदर्शनीयस्ताम्राक्षः सुनासः स सुदक्षिणः। पुत्रः कांबोजराजस्य पार्थेन विनिपातितः। धारयन्नग्निसंका

राम
७२

शांघ्रिरसा कांचनस्रजं। अशोभत महाबाहुर्व्यसुर्भूमोभिपातितः। ततः सर्वाणि सैन्यानि व्यद्रवंत सुतस्य ते। हतं श्रुतायुधं दृष्ट्वा कांबोजं च सुदक्षिणं।
॥ ॥इति द्रोणपर्वणि जयद्रथवधे श्रुतायुधसुदक्षिणयोर्वधः॥ ८७॥ संजय उवाच॥ ॥हते सुदक्षिणे राजन्वीरे चैव श्रुतायुधे। जवेनाभ्यपतन्याशु कु-
पिताः सैनिकास्तव। अभीषाहाः शूरसेनाः शिबयोथ वशातयः। अभ्यवर्षंस्ततो राजन् शरवर्षैर्धनंजयं। तेषां षष्टिशतान्योधान्प्रामथ्नात्पांडवः शरैः।
तस्माद्भीताः पलायंत व्याघ्रात्क्षुद्रमृगा इव। ते निवृत्य पुनः पार्थं सर्वतः पर्यवारयन्। रणे सपत्नान्निघ्नंतं जिगीषंतं परान्युधि। तेषामापततां तूर्णं गां-
डीवप्रेषितैः शरैः। शिरांसि पातयामास बाहूंश्चैव धनंजयः। शिरोभिः पातितैश्चैव भूमिरासीन्निरंतरा। अभ्रछायेव तत्रासीद्ध्वांक्षगृध्रवटैरिव।
तेषु तेषूत्साद्यमानेषु क्रोधामर्षसमन्वितौ। श्रुतायुश्चाच्युतायुश्च धनंजयमयुध्यतां। बलिनौ स्पर्धिनौ वीरौ कुलजौ बाहुशालिनौ। तावेनं शरवर्षे-
णासव्यदक्षिणमस्यतां। त्वरायुक्तौ महाराज प्रार्थयानौ महद्यशः। अर्जुनस्य वधप्रेप्सू प्रार्थितवधन्विनौ। तावर्जुनः सहस्रेण पत्रिणां नतपर्वणां।
पूरयामास तौ क्रुद्धो तडागं जलदो यथा। श्रुतायुश्च ततः क्रुद्धस्तोमरेण धनंजयं। आजघानोरसि क्रुद्धः पीतेन निशितेन च। सोतिविद्धो बलवता
शत्रुणा शत्रुकर्षणः। आजगाम परं मोहं मोहयन्केशवं रणे। एतस्मिन्नेव काले तु सोच्युतायुर्महारथः। शूलेन भृशतीक्ष्णेन ताडयामास पांडवं। क्षते
क्षारं स ददौ पांडवस्य महात्मनः। पार्थोपि भृशसंविद्धो ध्वजयष्टिं समाश्रितः। ततः सर्वस्य सैन्यस्य तावकस्य विशांपते। सिंहनादो महानासीद्
हतं मत्वा धनंजयं। कृष्णश्च भृशसंतप्तो दृष्ट्वा पार्थं विचेतसं। आश्वासयत्सुहृद्याभिर्वाग्भिस्तत्र धनंजयं। ततस्तौ रथिनां श्रेष्ठौ लब्धलक्ष्यौ धनंजयं
वासुदेवं च वार्ष्णेयं शरवर्षैः समंततः। सचक्रकूबररथं साश्वध्वजपताकिनं। अदृश्यं चक्रतुर्युद्धे तदद्भुतमिवाभवत्। प्रत्याश्वस्तस्तु बीभत्सुः शनकैरि-
व भारत। प्रेतराजपुरं प्राप्य पुनः प्रत्यागतो यथा। संछन्नं शरजालेन रथं दृष्ट्वा सकेशवं। शत्रू चाभिमुखौ दृष्ट्वा दीप्यमानाविवानलौ। प्रादुश्चक्रे
ततः पार्थः शाक्रमस्त्रं महाबलः। तस्मादासन्सहस्राणि शराणां नतपर्वणां। ते जघ्नुस्तौ महेष्वासौ ताभ्यां सृष्टांश्च सायकान्। विचेरुराकाशगताः पा

द्रो॰प॰
८०

र्थवापा विदारिताः। प्रतिहत्य शरांस्तूर्णं शरवेगेन पांडवः। प्रतस्थे तत्र तत्रैव योधयन्वै महारथान्। तौ च फाल्गुनबाणौघैर्विबाहुशिरसौ कृतौ। वसुधामनुप
द्येतां वातनुन्नाविव द्रुमौ। श्रुतायुषश्च निधनं वधं चैवाच्युतायुषः। लोकविस्मापनमभूत्समुद्रस्येव शोषणं। तयोः पदानुगान्हत्वा पुनः पंचशतं रथान्।
प्रत्यगाद्भारतीं सेनां निघ्नन्पार्थो वरान्वरान्। श्रुतायुषश्च निधनं प्रेक्ष्य चैवाच्युतायुषः। अयुतायुश्च संक्रुद्धो दीर्घायुश्चैव भारत। पुत्रौ तयोर्नरश्रेष्ठौ कौं
तेयं प्रतिजग्मतुः। किरंतौ विविधान्बाणान्पितृव्यसनकर्षितौ। तावर्जुनो मुहूर्तेन शरैः सन्नतपर्वभिः। प्रेषयत्परमक्रुद्धो यमस्य सदनं प्रति। लोडयंत
मनीकानि द्विपः पद्मसरो यथा। नाशक्नुवन्वारयितुं पार्थं क्षत्रियपुंगवाः। अंगास्तु गजवृंदेन पांडवं पर्यवारयन्। क्रुद्धाः सहस्रशो राजन्नादिष्टा हस्ति
सादिनः। दुर्योधनसमादिष्टाः कुंजरैः पर्वतोपमैः। प्राच्याश्च दाक्षिणात्याश्च कलिंगप्रमुखा नृपाः। तेषामापततां शीघ्रं गांडीवप्रेषितैः शरैः। चिच्छेद
त्वशिरांस्युग्रो बाहूनपि सभूषणान्। तैः शिरोभिर्मही कीर्णा बाहुभिश्च सहांगदैः। बभौ कनकपाषाणा भुजगैरिव संवृता। बाहवो विशिखैश्छिन्नाः
शिरांस्युन्मथितानि च। च्यवमानान्यदृश्यंत द्रुमेभ्य इव पक्षिणः। शरैः सहस्रशो विद्धा द्विपाः प्रस्रुतशोणिताः। अदृश्यंताद्रयः काले गैरिकांबुस्रवा
इव। निहताः शेरते स्मान्ये बीभत्सोर्निशितैः शरैः। गजपृष्ठगता म्लेच्छा नानाविकृतदर्शनाः। नानावेषधरा राजन्नानाशस्त्रौघसंवृताः। रुधिरेणाव
लिप्तांगा भांति चित्रैः शरैर्हताः। शोणितं निर्वमंति स्म द्विपाः पार्थशराहताः। सहस्रशश्छिन्नगात्राः सारोहाः सपदानुगाः। चुक्रुशुश्च निपेतुश्च बभ्रमु
श्चापरे दिशः। भृशं त्रस्ताश्च बहुधा स्वानेव ममृदुर्गजाः। सांतरायुधिकाश्चैव द्विपास्तीक्ष्णविषोपमाः। विहंतुमसुरैर्मायां ये सृष्टा घोरचक्षुषः। यवनाः पा
रदाश्चैव शकाश्च सुनिकैः सह। काकवर्णा दुराचाराः स्त्रीलोलाः कलहप्रियाः। द्रविडास्तत्र युध्यंते मत्तवारणवारणाः। गोयोनिप्रभवा म्लेच्छाः कालक
याः प्रहारिणः। दार्वाभिसारा दरदाः पुंड्राश्च सह बाह्लिकैः। ते न शक्याः स्म संख्यातुं व्राताः शतसहस्रशः। अभियाय तु ते सर्वे पांडवं निशितैः शरैः। अवा
किरंश्चैते म्लेच्छा नानायुद्धविशारदाः। तेषामपि ससर्जाशु शरवृष्टिं धनंजयः। ततस्तथाविधा यासीच्छलभानामिवायतिः। अभ्रच्छायामिव शरैः सैन्ये

राम
८०

कृत्वाधनंजयः।भुजंअर्द्धभुजंजटिलानभुवानुदित्वासमानतु।म्लेच्छादिजातयःसर्वाःसमेताःशस्त्रमायया।शरैश्चशतशोविद्धास्तेसंघाःसंघचारिणः।आद्रवंत
रणेभीतागिरिगह्वरवासिनः।गजाश्वसादिम्लेच्छानांपातितानांद्वितैःशरैः।वृकाःकंकाःकाकाभूमावपिबन्रुधिरंमुदा।पत्त्यश्वरथनागैश्चसंछन्नाकृत
संक्रमां।शरवृंदशालवांघोरांकेशशैवलशाद्वलां।आवर्त्तयन्नदींघोरांशोणितोघतरंगिणीं।छिन्नांगुलिक्षुद्रमत्स्यांयुगांतेकालनिर्मितां।चकारग
जसंबाधांनदीगत्वरशोणितां।देहेभ्योराजपुत्राणांनागाश्वरथसादिनां।यथास्थलंचनिम्नंचनस्याद्वर्षतिवासवे।तथासीत्पृथिवीसर्वाशोणिते
नपरिप्लुता।षट्सहस्रान्वरान्वीरान्पुनर्दशशतान्वरान्।आहिण्वन्मृत्युलोकायपक्षान्क्षत्रियर्षभः।शरैःसहस्रशोविद्धाविधिवत्कल्पितैरथैः।
शेरतेभूमिमासाद्यशैलावज्रहतायथा।सवाजिरथमातंगान्निघ्नन्व्यचरदर्जुनः।प्रभिन्नइवमातंगोमृद्नन्नड्वनंयथा।भूरिद्रुमलतागुल्मंशुष्केंध
नतृणोलपं।निर्दहेदनलोऽरण्यंयथावायुसमीरितः।सैन्यारण्यंतवतथाकृष्णानिलसमीरितः।शरार्चिरदहत्क्रुद्धःपांडवाग्निर्धनंजयः।शून्यान्कुर्व
न्रथोपस्थान्मानवैःसंस्तरन्महीं।प्रनृत्यन्निवसंग्रामेचापहस्तोधनंजयः।वज्रकल्पैःशरैर्भूमिंकुर्वन्नुत्तरशोणितां।प्राविशद्भारतींसेनांसंक्रुद्धोवै
धनंजयः।तंश्रुतायुस्तथांबष्ठोव्रजमानंन्यवारयत्।तस्यार्जुनःशरैस्तीक्ष्णैःकंकपत्रपरिच्छदैः।न्यपातयद्धयांछीघ्रंयतमानस्यमारिष।धनु
श्चास्यापरैःछित्वाशरैःपार्थोविचक्रमे।अंबष्ठस्तुगदांगृह्यक्रोधपर्याकुलेक्षणः।आससादरणेपार्थंकेशवंचमहारथं।ततःसप्रहसन्वीरोगदा
मुद्यम्यभारत।रथमावार्यगदयाकेशवंसमताडयत्।गदयाताडितंदृष्ट्वाकेशवंपरवीरहा।अर्जुनोऽभृशसंक्रुद्धःसोंऽबष्ठंप्रतिभारत।ततःशरैर्हे
मपुंखैःसगदंरथिनांवरः।छादयामाससमरेमेघःसूर्यमिवोदितं।ततोऽपरैःशरैश्चापिगदांतस्यमहात्मनः।अपातयत्तदापार्थस्तदद्भुतमिवाभ
वत्।अथतांपतितांदृष्ट्वागृह्यतांमहतींगदां।अर्जुनंवासुदेवंचपुनःपुनरताडयत्।तस्यार्जुनःक्षुराग्राभ्यांसगदावुद्यतौभुजौ।चिच्छेदेंद्रध्वजा
कारौशिरश्चान्येनपत्रिणा।सपपातहतोराजन्वसुधामनुनादयन्।इंद्रध्वजइवोत्सृष्टोयंत्रनिर्मुक्तबंधनः।रथानीकावगाढश्चवारणाश्वश

द्रो०प०
८१

तेर्वृतः। सोदृश्यत तदा पार्थो घनैः सूर्य इवावृतः॥ ॥इति द्रोणपर्वणि जयद्रथवधे॥ ॥संजय उ०॥ ॥ततः प्रविष्टे कौंतेये सिंधुराजजिघांसया। द्रोणा
नीकं विनिर्भिद्य भोजानीकं च दुस्तरं। कांबोजस्य च दायादे हते राजन् सुदक्षिणे। श्रुतायुधे च विक्रांते निहते सव्यसाचिना। विप्रद्रुतेष्वनीकेषु किं तु कार्यम
तःपरं। प्रभग्नं स्वबलं दृष्ट्वा पुत्रस्ते द्रोणमभ्यगात्। त्वरन्नेकरथेनैव समेत्य द्रोणमब्रवीत्। गतः स पुरुषव्याघ्रः प्रमथ्येमां महाचमूं। अत्र बुध्या समी
क्षस्व किं तु कार्यमनंतरं। अर्जुनस्य विघाताय दारुणेस्मिन् जनक्षये। यथा स पुरुषव्याघ्रो न हन्येत जयद्रथः। तथा विधत्स्व भद्रं ते त्वं हि नः परमा गतिः।
असौ धनंजयाग्निर्हि कोपमारुतनोदितः। सेनाकक्षं दहति मे वह्निः कक्षमिवोदितः। अतिक्रांते हि कौंतेये भित्वा सैन्यं परंतप। जयद्रथस्य गोप्तारः संश
यं परमं गताः। स्थिरा बुद्धिर्नरेंद्राणामासीद्ब्रह्मविदांवर। नातिक्रमिष्यति द्रोणं जातु जीवन् धनंजयः। सोसौ पार्थो व्यतिक्रांतो मिषतस्ते महाद्युते। सर्वं ह्य
द्यातुरं मन्ये नेदमस्ति बलं मम। जानामि त्वां महाभाग पांडवानां हिते रतं। तथा मुह्यामि च ब्रह्मन् कार्यवत्तां विचिंतयन्। यथाशक्ति च ते ब्रह्मन् वर्तये वृत्ति
मुत्तमां। प्रीणामि च यथाशक्त्या तच्च त्वं नावबुध्यसे। अस्मान्न त्वं सदा भक्तानिच्छस्यमितविक्रम। पांडवान् सततं प्रीणास्यस्माकं विप्रिये रतः। अस्मा
नेवोपजीवंस्त्वमस्माकं विप्रिये रतः। न ह्यहं त्वां विजानामि मधुदिग्धमिव क्षुरं। नादास्यच्चेद्वरं मह्यं भवान् पांडवनिग्रहे। नावारयिष्यं गच्छंतमहं सिंधुप
तिं गृहान्। मया त्वाशंसमानेन त्वत्तस्त्राणमबुद्धिना। आश्वासितः सिंधुपतिर्मोहाद्दत्तश्च मृत्यवे। यमदंष्ट्रांतरं प्राप्तो मुच्यतापि हि मानवः। नार्जुनस्य व
शं प्राप्तो मुच्येताजौ जयद्रथः। स तथा कुरु शोणाश्व यथा मुच्येत सैंधवः। मम चार्तप्रलापानां मा क्रुधः पाहि सैंधवं॥ ॥द्रोण उवाच॥ ॥नाभ्यसूयामि ते वा
क्यमश्वत्थाम समोसि मे। सत्यं तु ते प्रवक्ष्यामि तज्जुषस्व विशांपते। सारथिः प्रवरः कृष्णः शीघ्राश्चास्य हयोत्तमाः। अल्पं च विवरं कृत्वा तूर्णं याति धनंजयः।
किं न पश्यसि बाणौघान् क्रोशमात्रे किरीटिनः। पश्चाद्रथस्य पतितान् क्षिप्तान् शीघ्रं हि गच्छतः। न चाहं शीघ्रयाने द्य समर्थो वयसान्वितः। सेनामुखे च
पार्थानामेतद्बलमुपस्थितं। युधिष्ठिरश्च मे ग्राह्यो मिषतां सर्वधन्विनां। एवं मया प्रतिज्ञातं क्षत्रमध्ये महाभुज। धनंजयेन चोत्सृष्टो वर्तते प्रमुखे मम।

राम
८१

तस्माद्धर्मसुतं हित्वा नाहं योत्स्ये धनंजयं। तुल्याभिजनकर्माणं शत्रुमेकं सहायवान्। गत्वा योधय मा भैस्त्वं त्वमस्य जगतः पतिः। राजा शूरः कृती द
क्षो वैरसुतो घपांडवैः। वीर स्वयं प्रयाह्यद्य यत्र यातो धनंजयः॥ ॥दुर्योधन उ॥ ॥कथं त्वामभ्यगात्कौंतः सर्वशस्त्रभृतां वरः। धनंजयो मया शक्यश्चात्वा
यद्भूतिबाधितुं। अपि शक्योऽरयो जेतुं वज्रहस्तः पुरंदरः। नार्जुनः समरे शक्यो जेतुं परपुरंजयः। येन भोजश्च हार्दिक्यो भवांश्च त्रिदशोपमः। अस्त्रैश्च
ताघेन जितोऽश्कृता युध्यन्निबर्हितः। सुदक्षिणश्च निहतः स तु राजा श्रुतायुधः। शतायुश्चाच्युतायुश्च म्लेच्छाश्च बहवो हताः। तं कथं पांडवं युद्धे दहंत
मिव पावकं। प्रतियोत्स्याम्यहं दुर्धर्षं तन्मे शंसात्र को विद। समं वेत्स्यसे युद्धं मम तेनाद्य संयुगे। परवानस्मि भवति जेष्यो हं रक्ष मे यशः॥ ॥द्रोण
उवाच॥ ॥सत्यं वदसि कौरव्य दुराधर्षो धनंजयः। अहं तु तत्करिष्यामि यथैनं प्रसहिष्यसि। अद्भुतं चाद्य पश्यंतु लोके सर्वे धनुर्द्धराः। विषक्तं त्व
यि कौंतेयं वासुदेवस्य पश्यतः। एष ते कवचं राजंस्तथा बध्नामि कांचनं। यथा न बाणा नास्त्राणि विप्रवेक्ष्यंति वै रणे। यदि त्वां सासुरसुराः सयक्षोरग
पक्षिणः। योधयंति च ये लोकाः सनराश्च न ते भयं। न च कृष्णो न कौंतेयो न चान्यः शस्त्रभृद्रणे। शरानर्पयितुं कश्चित्कवचे तव शक्ष्यति। स त्वं कवचमा
स्थाय युध्यस्वाद्य रणेऽर्जुनं। त्वरमाणः स्वयं याहि न त्वसौ त्वां विशक्ष्यति॥ ॥संजय उ॥ ॥एवमुक्त्वा त्वरन्द्रोणः स्पृष्ट्वांभो वर्म भास्वरं। आबबंधाद्भुततमं ज
प्यन्मंत्रं यथाविधि। रणे तस्मिन्सुमहति विजयाय सुतस्य ते। विसिस्मापयिषुर्लोकं विद्यया ब्रह्मवित्तमः॥ ॥द्रोण उ॥ ॥करोतु स्वस्ति ते ब्रह्मा स्वस्ति चा
पि द्विजातयः। सरीसृपाश्च ये श्रेष्ठास्तेभ्यस्ते स्वस्ति भारत। ययातिर्नहुषश्चैव धुंधुमारो भगीरथः। तुभ्यं राजर्षयः सर्वे स्वस्ति कुर्वंतु नित्यशः। स्वस्ति तेऽस्त्वे
कपादेभ्यो बहुपादेभ्य एव च। स्वस्त्यस्त्वपादकेभ्यश्च नित्यं तव महारणे। स्वाहा स्वधा शची चैव स्वस्ति कुर्वंतु ते सदा। लक्ष्मीररुंधती चैव कुरुतां स्वस्ति तेऽन
घ। असितो देवलश्चैव विश्वामित्रस्तथांगिराः। वसिष्ठः कश्यपश्चैव स्वस्ति कुर्वंतु ते नृप। स शेषः पन्नगश्रेष्ठः स्वस्ति तुभ्यं प्रयच्छतु। गांधारे युधि विक्र
म्य निर्जिताः सुरसत्तमाः। पुरा वृत्रेण दैत्येन भिन्नदेहाः सहस्रशः। हततेजोबलाः सर्वे पुरा सेंद्रा दिवौकसः। ब्रह्माणं शरणं जग्मुर्वृत्राद्भीता महासुरात्।

॥ ॥देवा ऊचुः॥ ॥प्रमर्दितानां वृत्रेण देवानां देवसत्तम। गतिर्भव सुरश्रेष्ठ त्राहि नो महतो भयात्। अथ पार्श्वस्थितान्दृष्ट्वा शक्रादींस्तान्सुरोत्तमान्। आह
तथ्यमिदं वाक्यं विषण्णान्सुरसत्तमान्। रक्ष्या मे सततं देवाः सहेन्द्राः सद्विजातयः। त्वष्टुः सुदुर्धरं तेजो येन वृत्रेण निर्जिताः। त्वष्ट्रा पुरा तपस्तप्त्वा वर्षायु-
तशतं तदा। वृत्रो विनिर्मितो देवाः प्राप्यानुज्ञां महेश्वरात्। स तस्यैव प्रसादाद्वै हतो देवा रिपुर्बली। नागत्वा शांकरं स्थानं भगवान्दृश्यते हरः। दृष्ट्वा हनि-
ष्यथ रिपूंस्त्विप्रं गच्छत मंदरं। यत्रास्ते तपसां योनिर्दक्षयज्ञविनाशनः। ते गत्वा सहिता देवा ब्रह्मणा सह मंदरं। अपश्यंस्तेजसां राशिं सूर्यकोटिसम-
प्रभं। सोऽब्रवीत्स्वागतं देवा ब्रूत किं करवाणि वः। अमोघं दर्शनं मेऽस्तु कामप्राप्तिरतोऽस्तु वः। इत्युक्तास्तेन ते सर्वे प्रत्यूचुस्ते दिवौकसः। तेजो हृतं नो वृत्रेण
गतिर्भव दिवौकसां। मूर्तीरीश स्वदेवेश प्रहारैर्जर्जरीकृताः। शरणं त्वां प्रपन्नास्मो भ गतिर्भव महेश्वर॥ ॥महेश्वर उ०॥ ॥विदितं मे यथा देवाः कृत्येयं
सुमहाबला। त्वष्टुस्तेजोद्भवो घोरो दुर्निवार्योऽकृतात्मभिः। अवश्यं तु मया कार्यं साह्यं सर्वदिवौकसां। ममेदं गात्रजं शक्र कवचं गृह्य भास्वरं। बधाना-
नेन मंत्रेण मानसेन सुरेश्वर॥ ॥द्रोण उ०॥ ॥इत्युक्त्वा वरदः प्रादाद्वर्म तन्मंत्रमेव च। स तेन वर्मणा गुप्तः प्रायाद्वृत्रचमूं प्रति। नानाविधैश्च शस्त्रौघैः
पात्यमानैर्महारणे। न संधिः शक्यते कर्तुं वर्मबंधस्य तस्य तु। ततो जघान समरे वृत्रं देवपतिः स्वयं। तच्च मंत्रमयं बद्धं वर्म चांगिरसे ददौ। अंगिराः प्र-
ह पुत्रस्य मंत्रज्ञस्य बृहस्पतेः। बृहस्पतिरथोवाचाग्निवेश्याय धीमते। अग्निवेश्यो मम प्रादात्तेन बध्नामि वर्म ते। तवाद्य देहरक्षार्थं मंत्रेण नृपसत्तम।
॥ ॥संजय उ०॥ ॥एवमुक्त्वा ततो द्रोणस्तव पुत्रं महामतिः। पुनरेव ततः प्राह शनैराचार्यपुंगवः। ब्रह्मसूत्रेण बध्नामि कवचं तव पार्थिव। हिरण्यगर्भेण
यथा बद्धं विष्णोः पुरा रणे। यथा च ब्रह्मणा बद्धं संग्रामे तारकामये। शक्रस्य कवचं दिव्यं तथा बध्नाम्यहं तव। बध्वा तु कवचं तस्य मंत्रेण विधिपूर्वकं। प्रेष-
यामास राजानं युद्धाय महते द्विजः। स सन्नद्धो महाबाहुरर्जुनस्य रथं प्रति। रथानां च सहस्रेण त्रिगर्तानां प्रहारिणां। तथा दंतिसहस्रेण मत्तानां वीर्यशालि-
नां। अश्वानामयुतेनैव तथान्यैश्च महारथैः। वृतः प्रायान्महाबाहुरर्जुनस्य रथं प्रति। नानावादित्रनिर्घोषैर्यथा वैरोचनिस्तथा। ततः शब्दो महा-

नासीत्सैन्यानां तव भारत। अगाधं क्षोभितं ह्यासीत्समुद्रमिव कौरवं॥ ॥इति श्रीद्रोणपर्वणि जयद्रथवधे॥६॥ संजय उ॥ ॥प्रविश्य सोर्म्महाराज पार्थवालेधि
योस्तदा। दुर्योधने प्रयाते च दृष्ट्वा ततः पुरुषर्षभे। जवेनाभ्यद्रवद्द्रोणं महता निस्वनेन च। पांडवाः सोमकैः सार्द्धं ततो युद्धमवर्त्तत। न फकृत्तमभवद्घोरं तुमुलं
लोमहर्षणं। पांचालानां कुरूणां च व्यूहस्य पुरतो युगं। राजन्कदाचिन्नास्माभिर्दृष्टं नापि च श्रुतं। यादृशं मध्यं गते सूर्ये युद्धमासीद्विशांपते। धृष्टद्युम्नमु
खाः पार्था व्यूढानीकाः प्रहारिणः। द्रोणस्य सैन्यं ते सर्वे शरवृष्टिभिराकिरन्। वयं द्रोणं पुरस्कृत्य सर्वे शस्त्रभृतांवरं। पार्षतप्रमुखान्पार्थानभ्यवर्षाम साय
कैः। महामेघाविवोदीर्णौ मिश्रवातौ हिमात्यये। सेनाये विप्रकाशेते रुचिरे रथभूषिते। समेत्य तु महासेने चक्रतुर्वेगमुत्तमं। जाह्नवीयमुनेनद्यौ प्रावृषी
वोल्बतोदके। नानाशस्त्रपुरोवातो द्विपाश्वरथसंहतः। गदाविद्युन्महारौद्रः संग्रामजलदो महान्। भारद्वाजानिलोद्धूतः शरधारासहस्रवान्। अभ्यवर्षन्म
हारौद्रः पार्थसेनां समंततः। समुद्रमिव घर्मान्ते विशन्घोरो महानिलः। व्यक्षोभयदनीकानि पांडवानां द्विजोत्तमः। तेपि सर्वप्रयत्नेन द्रोणमेव समाद्रवन्।
बिभित्संतो महासेतुं वार्योघाः प्रबला इव। वारयामास तान्द्रोणो जलौघानचलो यथा। पांडवान्समरे क्रुद्धान्पांचालांश्च सकेकयान्। अथापरे पि राजा
नः परावृत्य समंततः। महाबला रणे शूराः पांचालानन्ववारयन्। ततो रणे नरव्याघ्रः पार्षतः पांडवैः सह। संजघानासकृद्द्रोणं बिभित्सन्निव वाहिनीं। य
थैव शरवर्षाणि द्रोणो वर्षति पार्षते। तथैव शरवर्षाणि धृष्टद्युम्नोभ्यवर्षत। सनिस्त्रिंशपुरोवातः शक्तिप्रासर्ष्टिसंहतः। ज्याविद्युच्चापसंह्रादो धृष्टद्यु
म्नो बलाहकः। शरधाराश्मवर्षाणि विसृजन्सर्वतो दिशं। निघ्नन्नररथाश्वौघान्छादयामास वाहिनीं। यं यमार्च्छच्छरैर्द्रोणः पांडवानां रथव्रजं। ततस्ततः
शरैर्द्रोणमपाकर्षत पार्षतः। तथा तु यतमानस्य द्रोणस्य युधि भारत। धृष्टद्युम्नं समासाद्य त्रिधा सैन्यं व्यभज्यत। भोजमेके न्यवर्त्तंत जलसंधं तथापरे।
पांडवैर्हन्यमानाश्च द्रोणमेवापरे व्रजन्। संघाटयित्वा सैन्यानि द्रोणस्तु रथिनांवरः। व्यधमच्चापि तान्यस्य धृष्टद्युम्नो महारथः। धार्त्तराष्ट्रास्त्रिधाभूत
ता वध्यंते पांडुसृंजयैः। अगोपाः पशवोरण्ये बहुभिः श्वापदैरिव। कालः संग्रसते योधान्धृष्टद्युम्नेन मोहितान्। संग्रामे तुमुले तस्मिन्निति संमेनिरे जनाः।

कृपस्य यथा राष्ट्रं दुर्भिक्षव्याधितस्करैः। द्राव्यते तद्ददापन्ना पांडवैस्तव वाहिनी। अर्करश्मिप्रभिन्नेषु शस्त्रेषु कवचेषु च। चक्षूंषि प्रतिहन्यंते सैन्ये
न रजसा तथा। त्रिधाभूतेषु सैन्येषु वध्यमानेषु पांडवैः। अमर्षितस्ततो द्रोणः पांचाल्यं व्यधमच्छरैः। मर्दतस्तान्यनीकानि निघ्नतश्चापि सायकैः।
बभूव रूपं द्रोणस्य कालाग्नेरिव दीप्यतः। रथं नागं हयं चापि पादातं चापि विशांपते। एकैकेनेषुणा संख्ये निर्बिभेद महारथः। पांडवानां तु सैन्येषु नास्ति
कश्चित्स भारत। दधार यो रणे बाणान्द्रोणचापच्युतान् शरान्। तप्यमानमर्केण द्रोणसायकतापितं। बभ्राम पार्षतं सैन्यं तत्र तत्रैव भारत। तथैव पा
र्षतेनापि काल्यमानं बलं तव। अभवत्सर्वतो दीप्तं शुष्कं वनमिवाग्निना। वध्यमानेषु सैन्येषु द्रोणपार्षतसायकैः। त्यक्त्वा प्राणान्परं शक्त्या युध्य
न्त सर्वशः सैनिकाः। तावकानां परेषां च युध्यतां भरतर्षभ। नासीत्कश्चिन्महाभाग योऽत्याक्षीत्संयुगं तदा। भीमसेनं तु कौंतेयं सोदर्याः पर्यवारयन्। विविं
शतिश्चित्रसेनो विकर्णश्च महारथः। विंदानुविंदावावंत्यौ क्षेमधूर्तिश्च वीर्यवान्। त्रयाणां तव पुत्राणां त्रय एवानुयायिनः। बाह्लीकराजस्तेजस्वी कु
लपुत्रो महारथः। सहसेनः सहामात्यो द्रौपदेयानवारयत्। शैब्यो गोवासनो राजा योधैर्दशशतावरैः। काश्यस्याभिभुवः पुत्रं पराक्रांतमयोधयत्।
अजातशत्रुं कौंतेयं ज्वलंतमिव पावकं। मद्राणामीश्वरः शल्यो राजा राजानमावृणोत्। दुःशासनस्त्ववस्थाप्य स्वमनीकममर्षणः। सात्यकिं प्रययौ क्रुद्धः
शूरो रथवरं युधि। स्वकेनाहमनीकेन संनद्धः कवचावृतः। चतुःशतैर्महेष्वासैश्चेकितानमवारयत्। शकुनिस्तु सहानीको माद्रीपुत्राववारयत्। गांधार
कैः सप्तशतैश्चापशक्तिशरासिभिः। विंदानुविंदौ कैकेयौ विराटं मत्स्यमार्छतां। चतुःशतैर्महेष्वासैर्भिश्चार्येभ्युद्यतायुधैः। शिखंडिनं याज्ञसेनिं रुंधन्वान
मपराजितं। बाह्लिकः पुत्रसंयुक्तः पराक्रांतमवारयत्। धृष्टद्युम्नं च पांचाल्यं क्रूरैः शाल्वप्रभद्रकैः। आवंत्यः सहसौवीरैः क्रुद्धरूपमवारयत्। घटोत्कचं
तथा शूरं राक्षसं क्रूरयोधिनं। अलायुधोऽद्रवत्तूर्णं क्रूरमायांतमाहवे। अलंबुसो राक्षसेंद्रः कुंतिभोजं महारथं। सैन्येन महता युक्तः क्रुद्धरूपमवारयत्॥

सैंधवः पृष्ठतश्चासीत्सर्वसैन्यस्य भारत। रक्षितः परमेष्वासैः कृपप्रभृतिभी रथैः। तस्याश्वांश्चक्ररक्षौ द्वौ सैंधवस्याभिहत्तमौ। द्रोणपुत्रो दक्षिणतो राजन्सूत
पुत्रश्च वामतः। पृष्ठगोपास्तु तस्यासन्सौमदत्तिपुरोगमाः। कृपश्च वृषसेनश्च शलः शल्यश्च दुर्जयः। नीतिमंतो महेष्वासाः सर्वे युद्धविशारदाः। सैं
धवस्य विधायैवं रक्षां युयुधिरे तदा॥ ॥इति द्रोणपर्वणि जयद्रथवधे ॥९२॥ संजय उ०॥ ॥राजन्संग्राममाश्चर्यं शृणु कीर्तयतो मम। कुरूणां पांडवा
नां च यथा युद्धमवर्तत। भारद्वाजं समासाद्य व्यूहस्य प्रमुखे स्थिताः। अयोधयन्रणे पार्था द्रोणानीकं बिभित्सवः। रक्षमाणाः स्वकं सैन्यं द्रोणस्यापि
च सैनिकाः। अयोधयन्रणे पार्थान्प्रार्थयंतो महद्यशः। विंदानुविंदावावंत्यौ विराटं दशभिः शरैः। आजघ्नतुः सुसंक्रुद्धौ तव पुत्र हितैषिणौ। विरा
टश्च महाराज तावुभौ समरे स्थितौ। पराक्रांतौ समासाद्य योधयामास सानुगौ। तेषां युद्धं समभवद्दारुणं शोणितोदकं। सिंहस्य द्विपमुख्याभ्यां प्रभिन्ना
भ्यां यथा वने। बाह्लीकं रभसं युद्धे याज्ञसेनिर्महाबलः। आजघ्ने विशिखैस्तीक्ष्णैर्घोरैर्मर्मास्थिभेदिभिः। बाह्लिको याज्ञसेनिं च हेमपुंखैः शिलाशितैः।
आजघान भृशं क्रुद्धो नवभिर्नतपर्वभिः। तद्युद्धमभवद्घोरं शरशक्तिसमाकुलं। भीरूणां त्रासजननं शूराणां हर्षवर्द्धनं। ताभ्यां तत्र शरैर्मुक्तैरंतरिक्षं दि
शस्तथा। अभवत्संवृतं सर्वं न प्राज्ञायत किंचन। शैब्यो गोवासनो राजा बाह्लीकं सहसेनया। स सैन्यो योधयामास गजः प्रतिगजं यथा। कालिंगपुत्रस्तु
संक्रुद्धो द्रौपदेयान्महारथान्। मनः पंचेंद्रियाणीव युयुधे योधयन्नृपः। अयोधयंस्ते च भृशं तं शरौघैः समंततः। इंद्रियार्था यथा देहं शश्वद्देहभृतां वरः।
वार्ष्णेयं सात्यकिं युद्धे दुःशासनस्तव। आजघ्ने सायकैस्तीक्ष्णैर्नवभिर्नतपर्वभिः। सोऽतिविद्धो बलवता महेष्वासेन धन्विना। ईषन्मूर्छां जगामाशु सा
त्यकिः सत्यविक्रमः। समाश्वस्तस्तु वार्ष्णेयस्तव पुत्रं महारथं। विव्याध दशभिस्तूर्णं सायकैः कंकपत्रिभिः। तावन्योन्यं दृढं विद्धावन्योन्यशरविक्ष
तौ। रेजतुः समरे राजन्पुष्पिताविव किंशुकौ। अलंबुसस्तु संक्रुद्धः कुंतिभोजशरार्दितः। अशोभत परं लक्ष्म्या पुष्पाढ्य इव किंशुकः। कुंतिभोज

ततो रक्षो विधाद शाभिराशुगैः। अनदं भैरवं नादं वाहिन्याः प्रमुखे स्थितः। ततस्तौ समरे शूरौ योधयंतौ परस्परं। ददृशुः सर्वभूतानि शक्रजंभौ
यथा पुरा। शकुनिं रभसं युद्धे कृतवैरं च भारत। माद्रीपुत्रौ तु संरब्धौ शरैरर्दयतां भृशं। तन्मूलः स महाराज प्रावर्तत जनक्षयः। त्वया वोपेक्षितो
राजन् कर्णेन च विवर्द्धितः। संधुक्षितश्च पुत्रेण तव क्रोधहुताशनः। य इमां पृथिवीं राजन् दग्धुं सर्वां समुद्यतः। शकुनिः पांडुपुत्राभ्यां कृतः स वि
मुखः शरैः। नाभ्यजानत कर्त्तव्यं युधि किंचित् पराक्रमं। विमुखं चैनमालोक्य माद्रीपुत्रौ महारथौ। ववर्षतुः पुनर्बाणैर्यथा मेघो [illegible] महा
गिरिं। स विध्यमानो बहुभिः शरैः सन्नतपर्वभिः। संप्रायाज्जवनैरश्वैर्द्रोणानीकाय सौबलः। घटोत्कचस्तथा शूरो राक्षसं तमलायुधं। अभ्य
याद्द्रावयन् युद्धे वेगमास्थाय मध्यमं। तयोर्युद्धं महाराज प्रावर्तत जनक्षयः। यादृशं हि पुरा वृत्तं रामरावणयोर्युधि। ततो युधिष्ठिरो राजा मद्रराजो
न माहवे। विध्वा पंचशतैर्बाणैः पुनर्विव्याध सप्तभिः। ततः प्रववृते युद्धं तुमुलं लोमहर्षणं। यथा पूर्वं महद्युद्धं शंबरामरराजयोः। विविंशतिश्चित्र
सेनो विकर्णश्च तवात्मजः। अयोधयन् भीमसेनं महत्या सेनया वृताः॥ ॥ इति द्रोणपर्वणि जयद्रथवधे ॥१७०॥ संजय उवाच॥ ॥ तथा तस्मिन् प्रवृत्ते तु
संग्रामे लोमहर्षणे। कौरवेयांस्त्रिधा भूतान् पांडवाः समुपाद्रवन्। जलसंधं महाबाहुं भीमसेनोऽभ्यवारयत्। युधिष्ठिरः सहानीकः कृतवर्माणमाहवे।
किरंतं शरवर्षाणि रोचमान इवांशुमान्। धृष्टद्युम्नो महाराज द्रोणमभ्यद्रवद्रणे। ततः प्रववृते युद्धं त्वरतां सर्वधन्विनां। कुरूणां पांडवानां च संक्रुद्धा
नाममर्षिणां। संक्षये तु तथाभूते वर्त्तमाने महाभये। द्वंद्वभूतेषु सैन्येषु युध्यमानेष्वभीतवत्। द्रोणः पांचालपुत्रेण बली बलवता सह। विचिक्षेप पृष
त्कौघांस्तदद्भुतमिवाभवत्। पुंडरीकवनानीव विध्वस्तानि समंततः। चक्राते द्रोणपांचाल्यौ नृणां शीर्षाण्यनेकशः। आविकीर्णानि वीराणामनीकेषु
समंततः। वस्त्राभरणशस्त्राणि ध्वजवर्मायुधानि च। तपनीयविचित्रांगाः संसिक्ता रुधिरेण च। संसक्ता इव दृश्यंते मेघसंघाः सविद्युतः। कुंजराश्व

नरान्संख्येपातयंस्तत्रपत्रिभिः। नालभन्माचापाणिचापानिविकर्षंतोमहारथाः। असिचर्माणिचापानिनिस्त्रिंशान्सकवचानिच। विशकार्यंतशूरा
णांसंप्रहारेमहात्मनां। उच्छितान्यगणेयानिकबंधानिसमंततः। अदृश्यंतमहाराजतस्मिन्परमसंकुले। गृध्राः कंकाबकाः श्येनावायसाजं
बुकास्तथा। बहवः पिशिताशाश्चतत्रादृश्यंतमारिष। भक्षयंतश्चमांसानिपिबंतः स्महिशोणितं। विलुंपंतश्चकेशांश्चमज्जाश्चबहुधान
प। आकर्षंतः शरीराणिशरीरावयवांस्तथा। नराश्वगजसंघानांशरीराणिततस्ततः। कृतास्त्रारणदीक्षाभिरक्षिताः शत्रुचारिणः। रणेजय
जयंतोभृशंयुयुधिरेतदा। असिमार्गान्बहुविधान्विचेरुस्तावकारणे। ऋष्टिभिः शक्तिभिः प्रासैः शूलतोमरपट्टिशैः। गदाभिः परिघैश्चैव
व्यायुधाश्चभुजैरपि। अन्योन्यंजघ्निरेक्रुद्धायुद्धरंगगतानराः। रथिनोरथिभिः सार्द्धमश्वारोहाश्चसादिभिः। मातंगावरमातंगैः पदाताश्चपदा
तयः। क्षीबाइवान्येचोन्मत्तारंगेष्विवचवारणाः। उच्चुक्रुशुस्तथान्योन्यंजघ्नुरन्योन्यमाहवे। वर्तमानेतथायुद्धेनिर्मर्यादेविशांपते। धृष्टद्युम्नो
हयानश्वैर्द्रोणस्यव्यतिमिश्रयत्। तेहयाबह्वशोभंतमिश्रितावातरंहसः। पारावतसवर्णाश्चरक्तशोणाश्चसंयुगे। हयाः शुशुभिरेराजन्मेघा
इवसविद्युतः। धृष्टद्युम्नश्चसंप्रेक्ष्यद्रोणमभ्याशमागतं। असिचर्माददेवीरोधनुरुत्सृज्यभारत। चिकीर्षुर्दुष्करंकर्मपार्षतः परवीरहा। ईषा
यासमतिक्रम्यद्रोणस्यरथमाविशत्। अतिष्ठद्युगमध्येसयुगसंनहनेषुच। जघनार्द्धेषुचाश्वानांतत्सैन्यान्यभ्यपूजयन्। खड्गेनचरतस्त
स्यशोणाश्वानधितिष्ठतः। नददर्शांतरंद्रोणस्तदद्भुतमिवाभवत्। यथाश्येनस्यपतनंवनेष्वामिषगृद्धिनः। तथैवासीदभीसारस्तस्यद्रो
णंजिघांसतः। ततः शरशतेनास्यशतचंद्रंसमाक्षिपत्। द्रोणोद्रुपदपुत्रस्यखड्गंचदशभिः शरैः। हयांश्चैवचतुःषष्ट्याशराणांजघ्नि
वान्बली। ध्वजंछत्रंचभल्लाभ्यांतथोभौपार्ष्णिसारथी। अथास्मैत्वरितोबाणमपरंजीवितांतकं। आकर्णपूरितंक्षिप्रंवज्रंवज्रधरोयथा। तंचतु
र्दशभिर्बाणैर्बाणंचिच्छेदसात्यकिः। ग्रस्तमाचार्यमुख्येनधृष्टद्युम्नममोचयत्। सिंहेनेवमृगंग्रस्तंनरसिंहेनमारिष। द्रोणेनमोचयो

द्रो०प०
८५

मासपांचाल्यं शैनिपुंगवः। सात्यकिश्चैव्यगोप्तारं पांचाल्यस्य महाहवे। शराणां त्वरितो द्रोणः षड्विंशत्या समार्पयत्। ततो द्रोणं शैनेयः पौत्रः समन्तेभि
वृकुंजरं। प्रत्यविध्यच्छितैर्बाणैः षड्विंशत्या स्तनांतरे। ततः सर्वे रथास्तूर्णं पांचाला जयगृद्धिनः। सात्वताभिसृते द्रोणे धृष्टद्युम्नमवाक्षिपन्॥ ॥इति द्रो
णपर्वणि जयद्रथवधे॥ धृतराष्ट्र उ॥ ॥द्रोणात्तस्मिन्प्रहृत्तेतु धृष्टद्युम्ने च मोक्षिते। तेन नष्टिवीरेण युयुधानेन संजय। अमर्षितो महेष्वा
सः सर्वशस्त्रभृतां वरः। नरव्याघ्रे शैनेये पौत्रे द्रोणः किमकरोद्युधि॥ ॥संजय उ॥ ॥संप्रवृत्तक्रोधविषो व्यादितास्य शरासनः। तीक्ष्णधा
रेषुदशनः शितनाराचदंष्ट्रवान्। संरंभामर्षताम्राक्षो महाहिरिव निश्वसन्। नरवीरः प्रमुदितैः शोणैरश्वैर्महाजवैः। उत्पतद्भिरिवाकाशे क्रमद्भि
रिव सर्वतः। रुक्मपुंखैः शरैराजन्युयुधानमुपाद्रवत्। संरंभामर्षनाभ्राक्षो रथयोधबलाहकः। कार्मुकाकर्षविक्षेपनाराचबहुविद्युतं।
शक्तिखड्गाशनिधरं क्रोधवेगसमुच्छ्रितं। द्रोणमेघमनावार्यं हयमारुतनोदितं। दृष्ट्वाभिपतितं तूर्णं शूरः परपुरंजयः। उवाच सूतं शैनेयः
प्रहसन्युद्धदुर्मदः। एष वै ब्राह्मणः शूरः स्वकर्मण्यनवस्थितः। आश्रयो धार्तराष्ट्रस्य धर्मराजभयावहः। शीघ्रं प्रजवितैरश्वैः प्रत्युद्याहि प्र
हृष्टवत्। आचार्यं राजपुत्राणां सततं शूरमानिनं। ततो रजतसंकाशा माधवस्य हयोत्तमाः। द्रोणस्याभिमुखाः शीघ्रमगच्छन्वातरंहसः। द्र
पुजालावृतं घोरमंधकारं ततस्ततं। अनाधृष्टमिवान्येषां वीराणामभवत्तदा। ततः शीघ्रास्त्रविदुषोर्द्रोणसात्वतयोस्तदा। नांतरं शरवृष्टीनां ददृशे
तैर्नरसिंहयोः। इषूणां सन्निपातेन शब्दो धाराभिघातजः। शुश्रुवे शक्रमुक्तानामशनीनामिव स्वनः। नाराचैरतिविद्धानां शराणां रूपमाबभौ।
आशीविषविमिश्राणां सर्पाणामिव भारत। तयोर्ज्यातलनिर्घोषः शुश्रुवे प्रतपुरातने। अजस्रं शैलशृंगाणां वज्रेणाहन्यतामिव। उभयोस्तौ रथौ रा
जन्नतौ चाश्वौ तौ च सारथी। रुक्मपुंखैः शरैश्छन्नाश्चित्ररूपा बभूवुस्तदा। निर्मलानामजिह्मानां नाराचानां विशांपते। निर्मुक्ताशीविषाभाणां सं
पातोऽभूत्सुदारुणः। उभयोः पतिते छत्रे तथैव पतितौ ध्वजौ। उभौ रुधिरसिक्तांगावुभौ च विजयैषिणौ। स्रवद्भिः शोणितं गात्रैः प्रसृतौ विववा

राम
८५

रणे। अन्योन्यमभिविध्येतां जीवितांतकरैः शरैः। गर्जितोत्कृष्टसंनादाः शंखदुंदुभिनिस्वनाः। उपारमन्महाराज व्याजहार न कश्चन। तूष्णींभूतान्यनी
कानि योधा युद्धादुपारमन्। ददृशुर्द्वैरथं ताभ्यां जातकौतूहला जनाः। रथिनो हस्तियंतारो हयारोहाः पदातयः। अवैक्षंताचलैर्नेत्रैः परिवार्य रथर्षभौ।
हस्त्यनीकान्यतिष्ठंत तथानीकानि वाजिनां। तथैव रथवाहिन्यः प्रतिव्यूह्य व्यवस्थिताः। मुक्ताविद्रुमचित्रैश्च मणिकांचनभूषितैः। ध्वजैराभरणैश्चि
त्रैः कवचैश्च हिरण्मयैः। वैजयंतीपताकाभिः परिस्तोमांगकंबलैः। विमलैर्निशितैः शस्त्रैर्हयानां प्रकीर्णकैः। जातरूपमयीभिश्च राजतीभिश्च
मूर्द्धसु। गजानां कुंभमालाभिर्दंतवेष्टैश्च भारत। सबलाकाः सखद्योताः सैरावतशतह्रदाः। अदृश्यंतोष्णपर्याये मेघानामिव वागुराः। अपश्यन्न
स्मदीयाश्च ते च यौधिष्ठिरादयः। तद्युद्धं युयुधानस्य द्रोणस्य च महात्मनः। विमानाग्रगता देवा ब्रह्मशक्रपुरोगमाः। सिद्धचारणसंघाश्च विद्याधर
महोरगाः। गतप्रत्यागताक्षेपैश्चित्रैः शस्त्रविघातिभिः। विविधैर्विस्मयं जग्मुस्तयोः पुरुषसिंहयोः। हस्तलाघवमस्त्रेषु दर्शयंतौ महाबलौ। अ
न्योन्यं समविध्येतां शरैस्तौ द्रोणसात्यकी। ततो द्रोणस्य दाशार्हः शरांश्चिच्छेद संयुगे। पत्रिभिः सुदृढैराशु धनुश्चैव महाद्युतेः। निमेषांतरमात्रेण
भारद्वाजोऽपरं धनुः। सज्यं चकार तच्चापि चिच्छेदास्य स सात्यकिः। ततस्त्वरन्पुनर्द्रोणो धनुर्हस्तो व्यतिष्ठत। सज्यं सज्यं पुनश्चास्य चिच्छेद निशितैः
शरैः। एवमेकशतं छिन्नं धनुषां दृढधन्विना। न चांतरं तयोर्दृष्टं संधाने छेदनेऽपि वा। ततोऽस्य संयुगे द्रोणो दृष्ट्वा कर्मातिमानुषं। युयुधानस्य राजे
न्द्र मनसैदमचिंतयत्। एतदस्त्रबलं रामे कार्त्तवीर्ये धनंजये। भीष्मे च पुरुषव्याघ्रे यदिदं सात्वतां वरे। तं चास्य मनसा द्रोणः पूजयामास विक्रमं।
लाघवं वासवस्येव संप्रेक्ष्य द्विजसत्तमः। ततः शस्त्रविदां श्रेष्ठस्तथा देवाः सवासवाः। न तामालक्षयामासुर्लघुतां शीघ्रकारिणः। देवाश्च युयुधा
नस्य गंधर्वाश्च विशांपते। सिद्धचारणसंघाश्च विदुर्द्रोणस्य कर्म तत्। ततोऽन्यद्धनुरादाय द्रोणः क्षत्रियमर्दनः। अस्त्रैरस्त्रविदां श्रेष्ठो योधया
मास भारत। तस्यास्त्राण्यस्त्रमायाभिः प्रतिहत्य स सात्यकिः। जघान निशितैर्बाणैस्तदद्भुतमिवाभवत्। तस्यातिमानुषं कर्म दृष्ट्वान्यैरसमं

परैः। युक्तं योगेन योगज्ञास्तावकाः समरे जयं। यदस्त्रमस्यति द्रोणस्तदेवास्यति सात्यकिः। तमायोदीस्यसंभ्रांतो योधयंश्च परंतपः। ततः क्रुद्धो म
हाराज धनुर्वेदस्य पारगः। वधाय युयुधानस्य दिव्यमस्त्रमुदीरयत्। हाहाकारो महानासीद् दृष्ट्वा दिव्यास्त्रधारिणौ। न विचेरुस्तदाकाशे भूतान्याकाश
गान्यपि। अस्त्रे ते वारुणाग्नेये ताभ्यां पाणिसमागते। न तावद्दभिषज्येते व्यावर्त्तेद्यथ भास्करः। ततो युधिष्ठिरो राजा भीमसेनश्च पांडवः। नकुलः सहदे
वश्च पर्यरक्षंत सात्यकिं। धृष्टद्युम्नमुखैः सार्द्धं विराटश्च सकेकयैः। मत्स्याः शाल्वाश्च सेनाश्च द्रोणमाजग्मुरंजसा। दुःशासनं पुरस्कृत्य राजपुत्राः स
हस्रशः। द्रोणमभ्यवरक्षंत शत्रुभिः परिवारितं। ततो युद्धमभूद्राजंस्तूवते चापधन्विनां। रजसा संवृते लोके शरजालसमावृते। सर्वमाविग्नमभ
वद्भग्ना ज्ञायत किंचन। सैन्येन रजसाध्वस्ते निर्मर्यादमवर्त्तत॥ ॥इति द्रोणपर्वणि चतुर्थयुद्धदिवसे जयद्रथवधे॥ ९५॥ संजय उ०॥ ॥परिवर्त्तमा
न आदित्ये तत्र सूर्यस्य रश्मिभिः। रजसा कीर्यमाणेन मंदीभूताः स्म कौरवाः। तिष्ठतां युध्यमानानां पुनरावर्त्ततामपि। भज्यतां जयतां चैव तावकाश्च
रैः श्रितां। तथा तेषु प्रभग्नेषु सैन्येषु जयगृद्धिषु। अर्जुनो वासुदेवश्च सैंधवायोपजग्मतुः। रथमार्गप्रमाणं तु कौंतेयो निशितैः शरैः। चकार तत्र पंथा
नं पर्यायेन जनार्द्दनः। यत्र यत्र रथो याति पांडवस्य महात्मनः। तत्र तत्रैव दीर्यंते सेनास्तव विशांपते। रथशिक्षां तु दाशार्हो दर्शयामास वीर्यवान्।
उत्तमाधममध्यानि मंडलानि व्यदर्शयत्। ते तु नामांकिताः पीताः कालज्वलनसन्निभाः। स्नायुनद्धाः सुपर्वाणः पृथवो घोरदर्शनाः। वैणवाश्चायस
मयाः स्वायता विविधाः शराः। रुधिरं पतगैः सार्द्धं प्राणिनां पपुराहवे। रथे स्थितः क्रोशमात्रे यानस्य तर्जुनः शरान्। रथे क्रोशमतिक्रांते तस्य ते घ्नंति
शात्रवान्। तार्क्ष्यमारुतरंहोभिर्वाजिभिः साधुवाहिभिः। तथागच्छद्धृषीकेशः कृत्स्नं विस्मापयन्जगत्। न तथा गच्छति रथस्तपनस्य विशांपते। नेंद्र
स्य न च रुद्रस्य नापि वैश्रवणस्य च। नान्यस्य समरे राजन्गतपूर्वस्तथा रथः। यथा ययावर्जुनस्य मनोभिप्रायशीघ्रगः। प्रविश्य तु रणे राजन्केशवः प
रवीरहा। सेनामध्ये हयांस्तूर्णं नोदयामास भारत। ततस्तस्य रथौघस्य मध्यं प्राप्य हयोत्तमाः। कृच्छ्रेण रथं तु ऊहुस्तं क्षुत्पिपासाश्रमान्विताः। क्षता

श्च बहुभिः शस्त्रैर्युद्धशौंडैरनेकशः । मंडलानि विचित्राणि विचेरुस्ते मुहुर्मुहुः । हतानां वाजिनागानां रथानां च सहस्रशः । उपरिष्टादतिक्रांताः
शैलाभाः सहस्रशः । एतस्मिन्नंतरे वीरौ भ्रातरौ नृप । सहसेनौ समार्छेतां पांडवं श्वेतवाहनं । तावर्जुनं चतुःषष्ट्या सप्तत्या च जनार्दनं । शराणां च
शतेनाश्वान् संविध्येतां मुदान्वितौ । तावर्जुनो महाराज नवभिर्नतपर्वभिः । आजघान रणे क्रुद्धो मर्मज्ञो मर्मभेदिभिः । ततस्तौ तु शरौघेण बीभत्सुं
सहकेशवं । आच्छादयेतां संरब्धौ सिंहनादं विनेदतुः । तयोस्तु धनुषी शुभ्रे भल्लाभ्यां श्वेतवाहनः । चिच्छेद समरे तूर्णं ध्वजौ च कनकोज्वलौ । अथा
न्ये धनुषी राजन् प्रगृह्य समरे तदा । पांडवं भृशसंक्रुद्धाववर्दयामासतुः शरैः । तयोस्तु भृशसंक्रुद्धः शराभ्यां पांडुनंदनः । धनुषी चिच्छिदे तूर्णं पुनरेव ध
नंजयः । तथान्यैर्विशिखैस्तूर्णं हेमपुंखैः शिलाशितैः । जघानाश्वांस्तथा पादातांस्तथोभौ पार्ष्णिसारथी । ज्येष्ठस्य च शिरः कायात्क्षुरप्रेणान्यकृंतत ।
सपपात हतः पृथ्व्यां वातरुग्ण इव द्रुमः । विंदं तु निहतं दृष्ट्वा ह्यनुविंदः प्रतापवान् । हताश्वं रथमुत्सृज्य गदां गृह्य महाबलः । अभ्यद्रवत संग्रामे भ्रातुर्व
धमनुस्मरन् । गदया गदिनां श्रेष्ठो नृत्यन्निव महारथः । अनुविंदस्तु गदया ललाटे मधुसूदनं । स्पृष्ट्वा नाकंपयत्कृष्णो मैनाकमिव पर्वतं । तस्यार्जुनः
शरैस्तूर्णं ग्रीवां पादौ भुजौ शिरः । विचकर्त्त स संछिन्नः पपाताद्रिवरो यथा । ततस्तौ निहतौ दृष्ट्वा तयो राजन् पदानुगाः । अभ्यद्रवंत संक्रुद्धाः किरंतः श
तशः शरान् । तानर्जुनः शरैस्तूर्णं निहत्य भरतर्षभः । व्यरोचत यथा वह्निर्दावं दग्ध्वा हिमात्यये । तयोः सेनामतिक्रम्य कृच्छ्रान्निर्याद्धनंजयः । विबभौ
जलदान्मुक्तो दिवाकर इवोदितः । तं दृष्ट्वा कुरवस्त्रस्ताः प्रहृष्टाश्चाभवन्पुनः । अभ्यवर्त्तंत पार्थं समंतात्भरतर्षभ । श्रांतं चैनं समालक्ष्य ज्ञात्वा दू
रे च सैंधवं । सिंहनादेन महता सर्वतः पर्यवारयन् । तांस्तु दृष्ट्वा सुसंरब्धानुत्स्मयन्पुरुषर्षभः । शनकैरिव दाशार्हमर्जुनो वाक्यमब्रवीत् । शरार्दि
ताश्च ग्लानाश्च हया दूरे च सैंधवः । किमिहानंतरं कार्यं भूयिष्ठं तव रोचते । ब्रूहि कृष्ण यथातत्त्वं त्वं हि प्राज्ञतमः सदा । भवन्नेत्रा रणे शत्रून्विजेष्यं
तीह पांडवाः । मम त्वनंतरं कृत्यं यद्वै तत्त्वं निबोध मे । हयान्विमुच्य हि सुखं विशल्यान्कुरु माधव । एवमुक्तस्तु पार्थेन केशवः प्रत्युवाच तं । ममाप्ये

द्रो॰प॰

८७

तन्मतंपार्थयदिदंतेप्रभाषितं॥ ॥अर्जुनउ॥ ॥अहमावारयिष्यामिसर्वसैन्यानिकेशव। त्वमप्यत्रयथान्यायंकुरुकार्यमनंतरं॥ ॥संजयउ॥ ॥
सोवतीर्यरथोपस्थादसंभ्रांतोधनंजयः। गांडीवंधनुरादायतस्थौगिरिरिवाचलः। तमभ्यधावन्क्रोशंतःक्षत्रियाजयकांक्षिणः। इदंछिद्रमितिज्ञा
त्वाधरणीस्थंधनंजयं। तमेकंरथकोशेनमहतापर्यवारयन्। छादयंतःशरैःपार्थंमेघाइवदिवाकरं। अभ्यद्रवंतवेगेनक्षत्रियाःक्षत्रियर्षभं। नरसिं
हंरथोदाराःसिंहमत्तमिवद्विपाः। तत्रपार्थस्यभुजयोर्महद्बलमदृश्यत। यत्क्रुद्धोबहुशःसेनाःसर्वतःसमवारयत्। अस्त्रैरस्त्राणिसंवार्यद्विषतांस
र्वतोविभुः। इषुभिर्बहुभिस्तूर्णंसर्वानेवसमावृणोत्। तत्रांतरिक्षेबाणानांप्रगाढानांविशांपते। संघर्षेणमहार्चिष्मान्पावकःसमजायत। तत्रतत्र
महेष्वासैःश्वसद्भिःशोणितोक्षितैः। हयैर्नागैश्चसंभिन्नैर्नदद्भिश्चारिकर्षणैः। संरब्धैश्चारिभिर्वीरैःप्रार्थयद्भिर्जयंयुधि। एकस्थैर्बहुभिःक्रुद्धैर्न
दीरूपमिवाजायत। शरोर्मिणंध्वजावर्तंनागनक्रंदुरत्ययं। पदातिमत्स्यकलिलंशंखदुंदुभिनिस्वनं। असंख्येयमपारंचरथोर्मिणमतीवच। उष्णी
षकवचच्छन्नंपताकाफेनमालिनं। रथसागरमक्षोभ्यंमातंगांगशिलाचितं। वेलाभूतस्तदापार्थःपत्रिभिःसमवारयत्॥ ॥धृतराष्ट्रउ॥ ॥अर्जु
नेधरणींप्राप्तेहयहस्तेचकेशवे। एतदंतरमासाद्यकथंपार्थोनघातितः॥ ॥संजयउ॥ ॥सद्यःपार्थिवपार्थेननिरुद्धाःसर्वपार्थिवाः। रथस्थाध
रणीस्थेनवाक्यमछांदसंयथा। ततोजनार्दनःसंरब्धःप्रियंपुरुषसत्तमं। असंभ्रांतोमहाबाहुरर्जुनंवाक्यमब्रवीत्। उदपानमिहाश्वानांनालमस्मिन्रणे
र्जुन। परीप्संतिजलंचेमेपेयंत्ववगाहनं। इदमस्तीत्यसंभ्रांतोब्रुवन्नस्त्रेणमेदिनीं। अभिहत्यार्जुनश्चक्रेसरोजनपदाकुलं। हंसकारंडवाकीर्णंच
क्रवाकोपशोभितं। सुविस्तीर्णंप्रसन्नांभःप्रोत्फुल्लवरपंकजं। कूर्ममत्स्यगणाकीर्णमगाधमृषिसेवितं। भगवान्नारदमुनिर्दर्शनार्थंकृतंक्षणात्। ए
वंपार्थस्ततःकृत्वावाजिनांचसरःशुभं। शरवंशंशरस्थूणंशराच्छादनमद्भुतं। शरवेश्माकरोत्पार्थस्त्वष्टेवाद्भुतकर्मकृत्। ततःप्रहस्यगोविंदः
साधुसाध्वितिचाब्रवीत्। शरवेश्मनिपार्थेनकृतेतस्मिन्महात्मना॥ ॥इतिद्रोणपर्वणिजयद्रथवधे॥८५॥ संजयउ॥ ॥सलिलेजनितेतस्मि

८७

१२२

राम

न्कौंतेयेनमहात्मना॥निवारितेद्विषत्सैन्येकृतेचशरवेश्मनि।वासुदेवोरथात्तूर्णमवतीर्यमहाद्युतिः।मोचयामासतुरगान्वितुन्नान्कंकपत्रिभिः।
अदृष्टपूर्वंतंदृष्ट्वासिंहनादोमहानभूत्।सिद्धचारणसंघानांसैनिकानांचसर्वशः।पदातिनंचकौंतेयंयुध्यमानंनरर्षभाः।नाशक्नुवन्वारयितुंतदद्भु
तमिवाभवत्।आपतत्स्वरथौघेषुप्रभूतगजवाजिषु।नसंभ्रमस्तदापार्थेसात्तस्यपुरुषान्प्रति।व्यसृजंतशरौघांस्तेपांडवंप्रतिपार्थिवाः।नविव्यथेच
धर्मात्मावासविःपरवीरहा।शतानिशरजालानिगदाःप्रासांश्चवीर्यवान्।प्रसक्तिस्मागतांस्तूर्णंसरितःसागरोयथा।अस्त्रवेगेनमहतापार्थोबाहुब
लेनच।सर्वेषांपार्थिवेंद्राणामग्रसत्तान्भरोत्तमान्।तत्तुपार्थस्यविक्रांतंवासुदेवस्यचोभयोः।अपूजयन्महाराजकौरवामहदद्भुतं।किमद्भुततमंलो
केभवितान्यत्तथाप्यभूत्।यदश्वान्पार्थगोविंदौपाययामासतूरणे।भयंविपुलमस्मासुतावधत्तांनरोत्तमौ।तेजोविदधतुःशीघ्रंविश्रब्धौरणमूर्द्ध
नि।अथोत्स्मयन्हृषीकेशःस्त्रीमध्यइवभारत।अर्जुनेनकृतेसंख्येशरगर्भगृहेतदा।उपावर्त्तयदव्यग्रस्तानश्वान्पुष्करेक्षणः।मिषतांसर्वसैन्यानां
त्वदीयानांविशांपते।तेषांश्रमंचग्लानिंचवेपथुंवमथुंव्रणान्।सर्वंव्यपानुदत्कृष्णःकुशलोह्यश्वकर्मणि।शल्यानुद्धृत्यपाणिभ्यांपरिमृज्यचतान्ह
यान्।उपावृत्ययथान्यायंपाययामासवारिच।तांस्तुलब्धोदकान्जग्धान्स्नातांश्चविगतक्लमान्।योजयामाससंहृष्टःपुनरेवरथोत्तमे।सतंरथवरंसौ
रिःसर्वशस्त्रभृतांवरः।समास्थायमहातेजाःसार्जुनःप्रययौद्रुतं।रथंरथवरस्याजौयुक्तंलब्धोदकैर्हयैः।दृष्ट्वाकुरुबलश्रेष्ठाःपुनर्विमनसोभवन्।
विनिश्वसंतस्तेराजन्भग्नदंष्ट्राइवोरगाः।विगात्यविगतःपार्थःकृष्णश्चेत्यब्रुवन्पृथक्।सर्वक्षत्रस्यमिषतोरथेनैकेनदंशितौ।बालःक्रीडनकेनेव
कदर्थीकृत्यनोबलं।क्रोशतांयतमानानामसंसक्तौपरंतपौ।दर्शयित्वात्मनोवीर्यंप्रयातौसर्वराजसु।तौप्रयातौपुनर्दृष्ट्वातदान्येसैनिकाब्रुवन्।
त्वरध्वंकुरवःसर्वेवधेकृष्णकिरीटिनोः।रथंयुक्त्वाहिदाशार्होमिषतांसर्वधन्विनां।जयद्रथाययात्येषकदर्थीकृत्यनोरणे।तत्रकेचिन्मिथो
राजन्समभाषंतभूमिपाः।अदृष्टपूर्वंसंग्रामेभयंनोभवदद्भुतं।सर्वसैन्यानिराजाचधार्त्तराष्ट्रोत्ययंगतः।दुर्योधनापराधेनक्षत्रंकृत्स्ना

द्रो० ५०

चमेदिनी। विलयं समनुप्राप्ता तत्पुराजन्नयुध्यत। इत्येवं क्षत्रियास्तत्र ब्रुवत्यन्ये च भारत। सिंधुराजस्य यत्कृत्यं गतस्य यमसादनं। तत्करोतु हृथा
दृष्टिर्द्वित्रिराष्टेनुपायवित्। ततः शीघ्रतरं प्रायात्पांडवः सैंधवं प्रति। विवर्त्तमाने तिग्मांशौ हृष्टैः पीतोदकैर्हयैः। तं प्रयातं महाबाहुं सर्वशस्त्रभृतां वरं। ना
शक्नुवन्वारयितुं योधाः क्रुद्धमिवांतकं। विद्राव्य तु ततः सैन्यं पांडवः शत्रुतापनः। यथा मृगगणान्सिंहः सैंधवार्थे व्यलोडयत्। गाहमानस्त्वनीकानि तूर्णमश्वान्
नोदयत्। बलाकावर्णान्दाशार्हः पांचजन्यमवादयत्। कौंतेयेनाग्रतः सृष्टान्यपतन्पृष्ठतः शराः। कर्णात्तूर्णतरं ह्यश्वास्ते वहन्वातरंहसः। वातोद्धूतपताकांत
स्यं जलदनिस्वनं। घोरं कपिध्वजं दृष्ट्वा विवर्णा रथिनोभवन्। दिवाकरे रजसा सर्वतः संवृते भृशं। शरार्त्ताश्च रणे योधाः कृष्णौ शकुर्न वीक्षितुं। ततो नृपतयः क्रु
द्धाः परिवव्रुर्धनंजयं। क्षत्रिया बहवश्चान्ये जयद्रथवधैषिणं। अपनीयत्सु शल्येषु तिष्ठंतं पुरुषर्षभ। दुर्योधनस्त्वगात्पार्थं त्वरमाणो महाहवे॥ ॥इतिद्रोण
पर्वणि जयद्रथवधे। ८७॥ संजय उ०॥ ॥स्त्रं संतत इव राजानस्तावकानां भयान्नृप। तौ दृष्ट्वा समतिक्रांतौ वासुदेवधनंजयौ। सर्वे तु प्रतिसंरब्धा ह्रीमंतः सत्व
नोदिताः। स्थिरीभूता महात्मानः प्रत्यगच्छन्धनंजयं। ये गताः पांडवं युद्धे रोषामर्षसमन्विताः। तेद्यापि न निवर्त्तंति सिंधवः सागरादिव। असंतस्त्वन्यवर्त्तंत वे
दभ्य इव नास्तिकाः। नरकं भजमानास्ते प्रत्यपद्यंत किल्बिषं। तावतीत्य रथानीकं विमुक्तौ पुरुषर्षभौ। ददृशाते यथा राहोरास्यान्मुक्तौ प्रभाकरौ। मत्स्या
विव महज्जालं विदार्य विगतक्लमौ। तथा कृष्णावदृश्येतां सेनाजालं विदार्य तत्। विमुक्तौ शस्त्रसंबाधाद्द्रोणानीकात्सुदुर्भिदात्। अदृश्येतां
महात्मानौ शत्रुसंबाधकारिणौ। विमुक्तौ ज्वलनस्पर्शान्मकरास्याज्झषाविव। व्यक्षोभयेतां सेनां तौ समुद्रं मकराविव। तावकास्त
व पुत्राश्च द्रोणानीकस्थयोस्तयोः। नैतौ तरिष्यतो द्रोणमिति चक्रुर्मतिं तदा। तौ तु दृष्ट्वा व्यतिक्रांतौ द्रोणानीकं महाद्युती। नाशशंसुर्म
हाराज सिंधुराजस्य जीवितं। आशा बलवती राजन् सिंधुराजस्य जीविते। द्रोणहार्दिक्ययोः कृष्णौ न मोक्ष्येते इति प्रभो। तां मा
शां विफलां कृत्वा संतीर्णौ तौ परंतपौ। द्रोणानीकं महाराज भोजानीकं च दुस्तरं। अस्यै मध्ये कृतौ। अथ दृष्ट्वा व्यतिक्रांतौ

८८

राम

ज्वलिताविव पावकौ। निराशाः सिंधुराजस्य जीवितं नाशशंसिरे। मिथश्च संबभाषेताम भीतौ भूयवर्द्धनौ। जयद्रथवधे वाचस्तास्ताः कृष्णधनंजयौ।
असौ मध्ये कृतः षड्भिर्धार्तराष्ट्रैर्महारथैः। चक्षुर्विषयसंप्राप्तो न नो मोक्ष्यति सैंधवः। यद्यस्य समरे गोप्ता शक्रो देवगणैः सह। तथाप्येनं निहंस्याव इ
ति कृष्णाव भाषतां। इति कृष्णौ महाबाहू मिथः कथयतां तदा। सिंधुराजमवेक्षंतौ तत्पुत्रास्तव चुक्रुशुः। अपीतमरुधन्वानौ प्रयातौ तोत्तृषितौ गजौ। पी
त्वा वारि समाश्वस्तौ तथैवास्तामरिंदमौ। व्याघ्रसिंहगजाक्रांतानतिक्रम्येव पर्वतान्। व्यदृश्येतां महाबाहू यथा मृत्युजरातिगौ। तथा हि मुखव
र्णोयमनयोरिति मेनिरे। तावकादृश्य मुक्तौ तौ विक्रोशंति स्म सर्वशः। द्रोणादाशीविषाकारात् ज्वलितादिव पावकात्। अन्येभ्यः पार्थिवेभ्यश्च भा
स्वंताविव भास्करौ। तौ मुक्तौ सागरप्रख्याद्द्रोणानीकादरिंदमौ। अदृश्येतां मुदा युक्तौ समुत्तीर्यार्णवं यथा। अस्त्रौघान्महतो मुक्तौ द्रोणहार्दिक्यगो
प्ततदा। रोचमानौ व्यदृश्येतामिंद्राग्न्योः सदृशौ रणे। उद्भिन्नरुधिरौ कृष्णौ भारद्वाजस्य सायकैः। शरैश्चितौ व्यरोचेतां कर्णिकारैरिवाचलौ। द्रोणग्राहहृ
दान्मुक्तौ शक्त्याशीविषसंकटात्। अयःशरोग्रमकरात्क्षत्रियप्रवरांभसः। ज्याघोषतलनिर्ह्रादात् निस्त्रिंशासविद्युतः। द्रोणास्त्रमेघान्निर्मुक्तौ
सूर्येंदू तिमिरादिव। बाहुभ्यामिव संतीर्णौ सिंधुषष्ठाः समुद्रगाः। तपांते सरितः पूर्णा महा[illegible]ग्राहसमाकुलाः। इति कृष्णौ महेष्वासौ यशसा लो
विश्रुतौ। सर्वभूतान्यमन्यंत द्रोणास्त्रबलविस्मयात्। जयद्रथं समीपस्थमवेक्षंतौ जिघांस[illegible]या। रुरुं निपाने लिप्संतौ व्याघ्रवत्तावतिष्ठतां। तथा
हि मुखवर्णोयमनयोरिति मेनिरे। तव योधा महाराज हतमेव जयद्रथं। लोहिताक्षौ महाबाहू संयुक्तौ कृष्णपांडवौ। सिंधुराजमभिप्रेक्ष्य हृष्टौ प्रणु
दितौ मुहुः। शौरेरभीषुहस्तस्य पार्थस्य च धनुष्मतः। तयोरासीत्प्रतिभाजः सूर्यपावकयोरिव। हर्ष एव तयोरासीद्द्रोणानीकप्रमुक्तयोः। समीपे
सैंधवं दृष्ट्वा श्येनयोरामिषं यथा। तौ तु सैंधवमालोक्य वर्तमानमिवांतिके। सहसा पेततुः क्रुद्धौ क्षिप्रं श्येनाविवामिषं। तौ तु दृष्ट्वा व्यतिक्रांतौ हृषी
केशधनंजयौ। सिंधुराजस्य रक्षार्थं पराक्रांतः सुतस्तव। द्रोणेनाबद्धकवचो राजा दुर्योधनस्तदा। ययौ पावकरथेनाजौ हयसंस्कारवित्प्रभो। कृष्णपा

द्रो॰ प॰
८९

थौर्महेष्वासो व्यतिक्रम्याति तेस्कृतः। अथ ततः पुंडरीकाक्षं प्रतीयाय महारथः॥ ततः सर्वेषु सैन्येषु वादित्राणि प्रहृष्टवत्। आवाद्यंत स्मतिक्रांते पुचे तव
जयधनंजयं। सिंहनादरवाश्चासन् शंखशब्दविमिश्रिताः। हृष्टाद्दु योधिनं तत्र लब्धलक्ष्यो धनुर्धरः(?) धुमुरवस्थितं। येचततो सिंधुराजस्य गोप्तारः पावकोपमाः।
ते प्रहृष्यंत समरे हृष्ट्वा पुत्रं तवाभिभो। हृष्ट्वा तु योधनं क्रुद्धस्त्वतिक्रांतं सहानुगं। अब्रवीदर्जुनं राजन् प्राप्तकालमिदं वचः॥ ॥इति द्रोणपर्वणि
जयद्रथवधे॥ ८ ॥ वासुदेव उ॥ ॥ सुयोधनमतिक्रांतमेनं पश्य धनंजय। आपद्गतमिमं मन्ये नास्त्यस्य सदृशो रथः। हरपातो महेष्वासः कृती
ह्वो पुत्र दुर्मदः। दृढास्त्रश्चित्रयोधी च धार्तराष्ट्रो महाबलः। अत्यंतसुखसंवृद्धो मानितश्च [illegible] महारथैः। कृती च सततं पार्थ नित्यं द्वेष्टि च पांडवान्।
तेन युद्धमहं मन्ये प्राप्तकालं तवानघ। अत्र नो द्यूतमायतं विजयायेतराय च। अत्र क्रोधविषं [illegible] पार्थ विमुंच चिरसंभृतं। एष मूलमनर्थानां पांडवानां म
हारथः। सोयं प्राप्तस्तवाक्षेपं पश्य साफल्यमात्मनः। कथं हि राजा राज्यार्थी त्वया गच्छेत संयुगे। दिष्ट्या त्विदानीं संप्राप्त एष ते बाणगोचरं। स यथा जी
वितं जह्यात्तथा कुरु धनंजय। ऐश्वर्यमदसंमूढो नैष दुःखमुपेयिवान्। न च ते संयुगे वीर्यं जानाति पुरुषर्षभ। त्वां हि लोकास्त्रयः पार्थ ससुरासुरमानु
षाः। नोत्सहंते रणे जेतुं किमुतैकः सुयोधनः। स दिष्ट्या समनुप्राप्तस्तव पार्थ रथांतिकं। जहि वैनं महाबाहो यथा वृत्रं पुरंदरः। एष ह्यनर्थे सततं प
राक्रांतस्तवानघ। निकृत्या धर्मराजं च द्यूते संजितवानयं। बहूनि सुनृशंसानि कृतान्येतेन मानद। युष्मासु पापमतिना अपापेषु च नित्यदा। तम
नार्यं सदा क्रुद्धं पुरुषं कामचारिणं। आर्यां युद्धे मतिं कृत्वा जहि पार्थ विचारयन्। निकृत्या राज्यहरणं वनवासं च पांडव। परिक्लेशं च कृष्णाया हृदि
कृत्वा पराक्रम। दिष्ट्यैष तव बाणानां गोचरे परिवर्तते। प्रतिघाताय कार्यस्य [illegible] दिष्ट्या च यतते यतः। दिष्ट्या जानाति संग्रामे योद्धव्यं च त्वया सह। दि
ष्ट्या च सफलाः पार्थ सर्वे कामा ह्यकामतः। तस्माज्जहि रणे पार्थ धार्तराष्ट्रं कुलाधमं। यथेंद्रेण हतः पूर्वं जंभो देवासुरे मृधे। अस्मिन् हते त्वया सैन्य
मनाथं सिध्यते धुना। वैरस्यास्य गतस्यांतं मूलं छिंधि दुरात्मनां॥ ॥संजय उवाच॥ ॥तं तथेत्यब्रवीत्पार्थः कृत्यरूपमिदं वचः। सर्वमन्यदनादृत्य।

राम
८९

गध्वजस्त्रयोधनः। येनैतद्दीर्घकालं नोभुक्तं राज्यमकंटकं। अथास्य युधि विक्रम्य छिंद्यां मूर्द्धानमाहवे। अपितस्यांजनाद्रिशाः परिक्लेशस्य माधव
कृष्णायाः शापं गंतु पदं क्लेशस्य धर्षणे। इत्येवं वादिनो हृष्टौ कृष्णौ वीक्षंतौ नृपोत्तमान्। प्रेषयामास तौ तुः संरब्धे सेनोत्तम नराधिप। तयोः समीपं संप्रा
प्य पुत्रस्ते पुरुषर्षभ। न चकार भयं प्राप्ते भये महति मारिष। तदस्य क्षत्रियास्तत्र सर्वे एवाभ्यपूजयन्। यदर्जुन हृषीकेशौ प्रत्युद्यातो ऽभ्यवारयत्। तत्र
सर्वस्य सैन्यस्य तावकस्य विशांपते। महानासीत्ततः शब्दो दृष्ट्वा राजानमाहवे। तस्मिन् जनसमुन्नादे प्रदीप्ते भैरवे सति। कदर्थीकृत्य ते पुत्रः प्रत्यमित्रम
वारयत्। आवारितस्तु कौंतेयस्तव पुत्रेण धन्विना। संरंभमगमद्भूयः स च तस्मिन्परंतपः। तौ दृष्ट्वा प्रतिसंरब्धौ दुर्योधनधनंजयौ। अभ्यवेक्षंत राजा
नो भीमरूपाः समंततः। दृष्ट्वा तु पार्थं संरब्धं वासुदेवं च मारिष। प्रहसन्नेव पुत्रस्ते योद्धुकामः समाह्वयत्। ततः प्रहृष्टो दाशार्हः पांडवश्च धनंजयः। व्या
क्रोशेतां महानादं दध्मतुश्चांबुजोत्तमौ। तौ हृष्टरूपौ संप्रेक्ष्य कौरवेयाश्च सर्वशः। निराशाः समपद्यंत पुत्रस्य तव जीविते। शोकमीयुः परे चैव कुरवः
सर्व एव ते। अमन्यंत च पुत्रं ते वैश्वानरमुखे हुतं। तथा तु दृष्ट्वा योधास्ते प्रहृष्टौ कृष्णपांडवौ। हतो राजा हतो राजेत्येवमूचुर्भयार्दिताः। जनस्य संनि
नादं तु श्रुत्वा दुर्योधनो ऽब्रवीत्। व्येतु वो भीरहं कृष्णौ प्रेषयिष्यामि मृत्यवे। इत्युक्त्वा सैनिकान्सर्वाञ्जयापेक्षी नराधिप। पार्थमाभाष्य संरंभादिदं वचनम
ब्रवीत्। पार्थ यच्छिक्षितं ते ऽस्त्रं दिव्यं मानुषमेव वा। तद्दर्शय यदि जातो ऽसि पांडुना। यद्बलं तव वीर्यं च केशवस्य तथैव च। तत्कुरुष्व मयि क्षि
प्रं पश्यामस्तव पौरुषं। अस्मत्परोक्षं कर्माणि प्रवदंति कृतानि ते। स्वामिसत्कारयुक्तानि यानि तानीह दर्शय॥ ॥इति द्रोणपर्वणि जयद्रथवधे॥ ॥
॥८४॥ संजय उवाच॥ ॥ एवमुक्त्वार्जुनं राजा त्रिभिर्मर्मातिगैः शरैः। प्रत्यविध्यन्महावेगैश्चतुर्भिश्चतुरो हयान्। वासुदेवं च दशभिः प्रत्यविध्यत्स्तनांतरे। प्रतो
दं चास्य भल्लेन छित्वा भूमावपातयत्। तं चतुर्दशभिः पार्थः स्वर्णपुंखैः शिलाशितैः। अविध्यत्तूर्णमव्यग्रस्ते ऽस्याभ्रश्यंत वर्मणि। तेषां नैष्फल्यमालो
क्य पुनर्नव च पंच च। प्राहिणोन्निशितान्बाणांस्तांश्चिच्छेद नैष्फलान्। अब्रवीत्परवीरघ्नः कृष्णो ऽर्जुनमिदं वचः। अदृष्टपूर्वं पश्यामि शिलानामि

द्रो०प०
९०

वसर्पणं। त्वया संप्रेषिताः पार्थ नाथं कुर्वंति पांडवाः। कच्चिज्जीवतो युक्तोऽस्त्वथैव च नरर्षभ। मुच्यंते यथा हि वं भुजयोश्च बलं तव। न नः कालो हि
संग्रामः कथ्यते यो हि पश्चिमः। नो चेद्धि घोरयं कालः प्राप्तः स्यादद्य पश्चिमः। तव चैवास्य दुराचोऽश्रुतन्ममाचक्ष्व पृच्छतः। विस्मयो मे महान्पार्थ तव दृष्ट्वा श
रानिमान्। पार्थ चिक्षिपतः संख्ये दुर्योधनरथं प्रति। वज्राशनिसमा घोराः परकायस्य भेदिनः। शराः कुर्वंति ये नार्थं पार्थ कस्माद्व्यथेदिना॥ ॥अर्जु
न उवाच॥ ॥द्रोणेनैषा मतिः कृष्ण धार्तराष्ट्रे निवेशिता। अंतर्विहिता शस्त्राणामेषा कवचधारणा। अस्मिन्नंतर्हितं कृत्स्नं त्रैलोक्यमपि वर्मणि। ए
को द्रोणो हि तद्वेद तस्मादहमनंतरं। न शक्यमेतत्कवचं बाणैर्भेत्तुं कथंचन। अपि वज्रेण गोविंद स्वयं मघवता युधि। जानंस्त्वमपि गोविंद मां वि
मोहयसे कथं। यद्वृत्तं त्रिषु लोकेषु यच्च केशव वर्तते। तथा भविष्यं यच्चैव तत्सर्वं विदितं तव। न त्वेवं वेद वै कश्चिद्यथा त्वं मधुसूदन। एष दुर्योधनः
कृष्ण द्रोणेन विहितं विदं। तिष्ठत्यभीतवत्संख्ये बिभ्रत्कवचधारणं। यत्त्वत्र विहितं कार्यं भवांस्तद्द्रष्टुमर्हति माधव। स्त्रीवदेष बिभर्त्येष मन्ये कवचधा
रणां। पश्य बाह्वोश्च मे वीर्यं धनुषश्च जनार्दन। पराजयिष्ये कौरव्यं कवचेनाभिरक्षितं। इदमांगिरसे प्रादाद्देवेशो वर्म भास्वरं। पुनर्ददौ सुरपति
र्मह्यं वर्म ससंग्रहं। दैवं यद्यस्य वर्मैतद्ब्रह्मणा वा स्वयं कृतं। नैतद्गोप्स्यति दुर्बुद्धिमद्य बाणहतं मया॥ ॥संजय उ०॥ ॥एवमुक्त्वार्जुनो बाणान्न
भिमंत्र्य व्यकर्षयत्। मानवास्त्रेण मानार्हः सूक्ष्मावरणभेदिना। विकृष्यमाणान्नेवतो धनुर्मध्यगतांछरान्। मानसा[illegible]द्रौणिः स
र्वास्त्रघातिना। तान्निकृत्तान्निरीक्ष्याथ दूरतो ब्रह्मवादिना। न्यवेदयत्केशवाय विस्मितः श्वेतवाहनः। नैतदस्त्रं मया शक्यं द्विः प्रयोक्तुं जनार्दन।
अस्त्रं मामेव हन्याद्धि पश्यत्वद्य बलं मम। ततो दुर्योधनः कृष्णौ नवभिर्नतपर्वभिः। अविध्यत्तरसा राजन्शरैराशीविषोपमैः। भूय एवाभ्यवर्ष
त्समरे कृष्णपांडवौ। शरवर्षेण महता ततो हृष्यंत तावकाः। चक्रुर्वादित्रनिनदान्सिंहनादरवांस्तथा। ततः क्रुद्धो रणे पार्थः सृक्किणी परिलेलिह
न्। नापश्यत ततोऽस्यांगं यन्न स्याद्वर्मरक्षितं। ततोऽस्य निशितैर्बाणैः सुमुक्तैरंतकोपमैः। हयांश्चकार निर्देहानुभौ च पार्ष्णिसारथी। धनुरस्य

राम
९०

धनुरस्याच्छिनद्भित्त्वा हस्तावापं च वीर्यवान्। रथ्यांश्च शकलीकर्तुं सव्यसाची प्रचक्रमे। दुर्योधनं च बाणाभ्यां तीक्ष्णाभ्यां शकलीकृतं। अविध्यद्धस्ततल
योरुभयोरर्जुनस्तदा। प्रयत्नकारी कौंतेयो नखमांसांतरेषुभिः। स वेदनाभिराविग्नः पलायनपरायणः। तं कृच्छ्रामापदं प्राप्तं दृष्ट्वा परम
धन्विनः। समापेतुः परीप्संतो धनंजयशरार्दितं। ते रथैर्बहुसाहस्रैः कल्पितैः कुंजरैर्हयैः। पदातौघैश्च संरब्धैः परिवव्रुर्धनंजयं। अथ नार्जु
नगोविंदौ रथो वापि व्यदृश्यत। अस्त्रमस्त्रेण महता जनौघैश्चापि संवृतौ। ततोऽर्जुनोऽस्त्रवीर्येण निजघ्ने तां च वाहिनीं। तत्र व्यंगीकृताः पेतुः शतशो
रथद्विपाः। ते हता हन्यमानाश्च न्यगृह्णंस्तं रथोत्तमं। स रथस्तंभितस्तस्थौ क्रोशमात्रे समंततः। ततोऽर्जुनं वृष्णिवीरस्त्वरितो वाक्यमब्रवीत्।
धनुर्विस्फारयात्यर्थमहं ध्मास्यामि चांबुजं। ततो विस्फार्य बलवद्गांडीवं जघ्निवान्रिपून्। महता शरवर्षेण तलशब्देन चार्जुनः। पांचजन्यं च बल
वद्दध्मौ तारेण केशवः। रजसा ध्वस्तपक्ष्मांतः प्रस्विन्नवदनो भृशं। तस्य शंखस्य नादेन धनुषो निःस्वनेन च। निःसत्वाश्च ससत्वाश्च क्षितौ पेतुस्त
दा जनाः। तैर्विमुक्तो रथो रेजे वाय्वीरित इवांबुदः। जयद्रथस्य गोप्तारस्ततः क्षुब्धाः सहानुगाः। ते दृष्ट्वा सहसा पार्थं गोप्तारः सैंधवस्य च। चक्रुर्नादा
न्बहुविधान्कंपयंतो वसुंधरां। बाणशब्दरवांश्चोग्रान्विमिश्राञ्शंखनिस्वनैः। प्रादुश्चक्रुर्महात्मानः सिंहनादरवानपि। तं श्रुत्वा निनदं घोरं तावका
नां समुत्थितं। प्रदध्मतुस्ततः शंखौ वासुदेवधनंजयौ। तेन शब्देन महता पूरितेयं वसुंधरा। स शैला सार्णवद्वीपा सपाताला विशांपते। स शब्दो
भरतश्रेष्ठ व्याप्य सर्वा दिशो दश। प्रतिसस्वार तत्रैव कुरुपांडवयोर्बले। तावका रथिनस्तत्र दृष्ट्वा कृष्णधनंजयौ। संभ्रमं परमं प्राप्तास्त्वरमाणा म
हारथाः। अथ कृष्णौ महाभागौ तावका दृश्य दंशितौ। अभ्यद्रवंत संक्रुद्धास्तदद्भुतमिवाभवत्॥ ॥इति द्रोणपर्वणि जयद्रथवधे॥१०१॥ संज
य उवाच॥ ॥ तावका हि समीक्ष्यैव वृष्ण्यंधककुरूत्तमौ। प्रागत्वरञ्जिघांसंतस्तथैव विजयः परान्। सुवर्णचित्रैर्वैयाघ्रैः स्वनवद्भिर्म
हारथैः। दीपयंतो दिशः सर्वा ज्वलद्भिरिव पावकैः। रुक्मपृष्ठैश्च दुष्प्रेक्ष्यैः कार्मुकैः पृथिवीपते। कूजद्भिरतुलान्नादान्कोपितैस्तुरगैरिव। भूरि

श्चवाः शल्यः शल्योवृषसेनोजयद्रथः। कृपश्चमद्रराजश्चद्रौणिश्चरथिनांवरः। तेपिबंतइवाकाशंरथैरष्टौमहारथाः। व्यराजयंचदशादिशोवैयाघ्रैर्हेमि
किंकिणैः। तेदंशिताःसुसंरब्धारथैर्मेघौघनिस्वनैः। समावृण्वन्दिशःसर्वाःपार्थस्यनिशितैःशरैः। कौलूतकाहयाश्चित्रावहंतस्तान्महारथान्।
व्यशोभंततदाशीघ्रासर्वतःसमुद्रवन्। तेश्रेष्ठमहाशंखान्दध्मुःपुरुषसत्तमाः। पूरयंतोदिवंराजन्पृथिवींचससागरां। तथैवदध्मतुःशंखौ
वासुदेवधनंजयौ। प्रवरौसर्वभूतानांसर्वशंखवरौयुधि। देवदत्तंचकौंतेयःपांचजन्यंजनार्दनः। शब्दस्तुदेवदत्तस्यधनंजयसमीरितः। पृथि
वींचांतरिक्षंचदिशःसर्वाःसमावृणोत्। सर्वशब्दानतिक्रम्यपूरयामासरोदसी। तथैवपांचजन्योपिवासुदेवसमीरितः। तस्मिंस्तथावर्तमा
नेदारुणेनादसंकुले। भीरूणांत्रासजननेशूराणांहर्षवर्द्धने। प्रवादितासुभेरीषुमुरजेष्वानकेषुच। अन्येषुचराजेंद्रवाद्यमानेष्वनेकशः। महा
रथाःसमाख्याताउयोधनहितैषिणः। अमृष्यमाणास्तंशब्दंक्रुद्धाःपरमधन्विनः। नानादेश्यामहीपालाःस्वसैन्यपरिरक्षिणः। अमर्षिता
महाशंखान्दध्मुर्वीरामहारथाः। कृतेप्रतिकरिष्यंतःकेशवस्यार्जुनस्यच। बभूवतवतत्सैन्यंयुगांतइवसंभृतं। उद्विग्नरथनागाश्वमस्वस्थमि
वचाभिभो। तन्नभइवाकाशंशूरैःशंखनिनादितं। बभूवभृशमुद्विग्नंनिर्घातैरिवनादितं। सशब्दःसुमहान्राजन्दिशःसर्वाव्यनादयत्।
त्रासयामासतत्सैन्यंयुगांतइवसंभृतः। ततोदुर्योधनोष्टौचराजानस्तेमहारथाः। जयद्रथस्यरक्षार्थंपांडवंपर्यवारयन्। ततोद्रोणिस्त्रिसप्तत्या
वासुदेवमताडयत्। अर्जुनंचत्रिभिर्भल्लैर्ध्वजमश्वांश्चपंचभिः। तमर्जुनःपृषत्कानांशतैःषड्भिरताडयत्। अत्यर्थमिवसंक्रुद्धःप्रतिविध्यज
नार्दनं। कर्णंद्वादशभिर्विद्ध्वावृषसेनंत्रिभिस्तथा। शल्यस्यसशरंचापंमुष्टौचिच्छेदवीर्यवान्। गृहीत्वाधनुरन्यत्तुशल्योविव्याधपांडवं। भू
रिश्रवास्त्रिभिर्बाणैर्हेमपुंखैःशिलाशितैः। कर्णोद्वादशविंशत्यावृषसेनश्चपंचभिः। जयद्रथश्चसप्तत्याकृपश्चदशभिःशरैः। मद्रराजश्च

तावद्भिर्विव्यधुः फाल्गुनं रणे। ततः शराणां षष्ट्या तु द्रोणिः पार्थमवाकिरत्। वासुदेवं च सप्तत्या पुनः पार्थं च सप्तभिः। अहसंश्च नरव्याघ्रः श्वेताश्वः कृष्ण
सारथिः। प्रत्यविध्यत्ततो सर्वान्दर्शयन्पाणिलाघवं। कर्णं द्वादशभिर्विद्ध्वा वृषसेनं त्रिभिः शरैः। शल्यस्य समरे चापं मुष्टिदेशेऽच्छिनत्तत। सोमद
त्तिं त्रिभिर्विद्ध्वा शल्यं च दशभिः शरैः। शितैरग्निशिखाकारैर्द्रौणिं विव्याध सप्तभिः। गौतमं पंचविंशत्या सैंधवं च शतेन हि। पुनर्द्रौणिं च सप्तत्या श
राणां सोभ्यताडयत्। भूरिश्रवास्तु संक्रुद्धः प्रतोदं चिच्छिदे हरेः। अर्जुनं च त्रिसप्तत्या बाणानामाजघान ह। ततः शरशतैस्तीक्ष्णैस्तानरीन्श्वे
तवाहनः। प्रत्यषेधद्द्रुतं क्रुद्धो महावातो घनानिव॥ ॥इति द्रोणपर्वणि जयद्रथवधे।९ ॥धृतराष्ट्र उ॥ ॥ध्वजान्बहुविधाकारान्भ्राजमानानती
तिश्रिया। पार्थानां मामकानां च तन्ममाचक्ष्व संजय॥ ॥संजय उ॥ ॥ध्वजान्बहुविधाकाराञ्छृणु तेषां महात्मनां। रूपतो वर्णतश्चैव नामतश्च
निबोध मे। तेषां तु रथमुख्यानां रथेषु विविधा ध्वजाः। अदृश्यंत राजेंद्र ज्वलिता इव पावकाः। कांचनानीव शृंगाणि कांचनस्य महागिरेः।
अनेकवर्णा विविधा ध्वजाः परमशोभनाः। ते ध्वजाः संवृतास्तेषां पताकाभिः समंततः। नानावर्णविभागाभिर्विबभुः सर्वतो वृताः। पताकाश्च त
तस्तास्तु श्वसनेन समीरिताः। नृत्यमाना व्यदृश्यंत रंगमध्ये विलासिकाः। इंद्रायुधसवर्णाभाः पताका भरतर्षभ। दोधूयमाना रथिनां शोभयंति
ति महारथान्। सिंहलांगूलमुग्रास्यं ध्वजं वानरलक्षणं। धनंजयस्य पश्याम संग्रामे भरतर्षभ। स वानरवरो राजन्पताकाभिरलंकृतः। त्रास
यामास तत्सैन्यं ध्वजे गांडीवधन्वनः। तथैव सिंहलांगूलं द्रोणपुत्रस्य भारत। ध्वजाग्रं समपश्याम बालसूर्यसमप्रभं। कांचनं पवनोद्धूतं शक्र
ध्वजसमप्रभं। नंदनं कौरवेंद्राणां द्रोणेर्लक्ष्म समुच्छ्रितं। हस्तिकक्षा पुनर्हैमी बभूवाधिरथेर्ध्वजे। आहवे वै महाराज ददृशे शरपूरिताः
पताका कांचनस्रग्वी ध्वजः कर्णस्य संयुगे। नृत्यतीव रथोपस्थे श्वसनेन समीरिता। आचार्यस्य तु पांडूनां ब्राह्मणस्य यशस्विनः। गोवृषो

गोतमस्यासीत्कृपस्य स्कपरिष्कृतः। स तेन भ्राजते राजन्गोवृषेण महारथः। त्रिपुरघ्नरथो यद्वद्गोवृषेण विराजते। मयूरो वृषसेनस्य कांचनो मणिर
त्नवान्। व्याहरिष्यन्निवातिष्ठत्सेनाग्रमपिशोभयन्। तेन तस्य रथो भाति मयूरेण महात्मनः। यथा स्कंदस्य राजेंद्र मयूरेण विराजते। मद्रराज
स्य शैलस्य ध्वजाग्रेग्निशिखामिव। सोवर्णमभिपश्यामः सीतामप्रतिमां शुभां। सा सीता भ्राजते तस्य रथमास्थाय मारिष। सर्वबीजविरूढेव य
था सीता श्रियावृता। वराहः सिंधुराजस्य राजतोभिविराजते। ध्वजाग्रेलोहिताकारो हेमजालपरिष्कृतः। शुशुभे केतुना तेन राजतेन जयद्रथः।
यथा देवासुरे युद्धे पुरा पूषा स्म शोभते। सोमदत्तेः पुनर्यूपो यज्ञशीलस्य धन्विनः। ध्वजः सूर्य इवाभाति सोमश्चात्र प्रदृश्यते। स यूपः कांचनो रा
जन्सोमदत्तेर्विराजते। राजसूये मखश्रेष्ठे यथा यूपः समुच्छ्रितः। शल्यस्य तु महाराज राजतो द्विरदो महान्। केतुः कांचनचित्रांगो मयूरैरुपशो
भितः। स केतुः शोभयामास सैन्यं ते भरतर्षभ। यथा श्वेतो महानागो देवराजचमूं तथा। नागो मणिमयो राज्ञो ध्वजः कांचनसंवृतः। किंकिणीश
तसंह्रादे भ्राजंश्चित्रे रथोत्तमे। व्यभ्राजत भृशं राजन्पुत्रस्तव विशांपते। ध्वजेन महता संख्ये कुरूणामृषभस्तदा। नवैते तव वाहिन्यामुच्छ्रिताः पर
मध्वजाः। व्यदीपयंस्ते पृतनां युगांतादित्यसन्निभाः। दशमस्त्वर्जुनस्यासीदेक एव महाकपिः। अदीप्यतार्जुनो येन हिमवानिव वह्निना। ततश्चित्राणि
शुभ्राणि सुमहांति महारथाः। कार्मुकाण्याददुस्तूर्णमर्जुनार्थे परंतप। तथैव धनुरायच्छत्पार्थः शत्रुविनाशनः। गांडीवं दिव्यकर्मा तद्राजन्दुर्मंत्रिते
तव। तवापराधान्निहता बहुधा युधि। नानादिग्भ्यः समाहूताः सहयाः सरथद्विपाः। तेषामासीद्व्यतिक्षेपो गर्जतामितरेतरं। दुर्योधनमु
खानां च पांडूनामृषभस्य च। तत्राद्भुतं तं चक्रे कौंतेयः कृष्णसारथिः। यदेको बहुभिः सार्द्धं समगच्छदभीतवत्। अशोभत महाबाहुर्गांडीवं वि
क्षिपन्धनुः। जिगीषुस्तान्नरव्याघ्रान्जिघांसुश्च जयद्रथं। ततोर्जुनो नरव्याघ्रः कौंतेयः कृष्णसारथिः। अदर्शयत्तावकानामन्योन्यं चक्रे तत्र तु त

पत्र।ततस्तेपिनरव्याघ्राः पार्थंसर्वेमहारथाः। अदृश्यंसमरेचक्रुः सायकौघैःसमंततः। संवृतेनरसिंहैस्तैःकुरूणामृषभेर्जुने। महानासीत्समुद्धू
तस्तस्यसैन्यस्यनिस्वनः॥ ॥इतिश्रीद्रोणपर्वणिध्वजवर्णनं॥२०॥ धृतराष्ट्रउ०॥ ॥अर्जुनेसैंधवंप्राप्तेभारद्वाजेनसंगताः। पांचालाःकुरुभिःसा
र्द्धंकिमकुर्वतसंजय॥ ॥संजयउ०॥ ॥अपराह्णेमहाराजसंग्रामेलोमहर्षणे। पांचालानांकुरूणांचद्रोणद्यूतमवर्तत। पांचालाहिजिघांसंतो
द्रोणंसंहृष्टचेतसः। अभ्यवर्षंतगर्जंतःशरवर्षाणिमारिष। ततस्तुतुमुलस्तेषांसंग्रामोवर्तताद्भुतः। पांचालानांकुरूणांचघोरोदेवासुरोपमः।
सर्वेद्रोणरथंप्राप्यपांचालाःपांडवैःसह। तदनीकंबिभित्संतोमहास्त्राणिप्रदर्शयन्। द्रोणस्यरथपर्यंतंरथिनोरथसंस्थिताः। कंपयंतोभ्यव
र्तंतवेगमास्थायमध्यमं। तमभ्ययाद्बृहत्क्षत्रःकेकयानांमहारथः। प्रवपन्निशितान्बाणान्महेंद्राशनिसन्निभान्। तंतुप्रत्युद्ययौशीघ्रंक्षेमधू
र्त्तिर्महायशाः। प्रवर्षन्निशितान्बाणान्शतशोथसहस्रशः। धृष्टकेतुश्चचेदीनामृषभोतिबलोर्जितः। त्वरितोभ्यद्रवद्द्रोणंमहेंद्रइवशंबरं। तमाप
तंतंसहसाव्यादितास्यमिवांतकं। वीरधन्वामहेष्वासस्त्वरमाणःसमभ्ययात्। युधिष्ठिरंमहाराजजिगीषुंसमवस्थितं। महानीकंततोद्रोणोन्यवार
यतवीर्यवान्। नकुलंकुशलंयुद्धेपराक्रांतंपराक्रमी। अभ्यगच्छत्समायांतंविकर्णस्तेसुतःप्रभो। सहदेवंतथायांतंदुर्मुखःशत्रुकर्षणः। शरैर
नेकसाहस्रैःसमवाकिरदाशुगैः। सात्यकिंतुनरव्याघ्रंव्याघ्रदत्तस्त्ववारयत्। शरैस्तुनिशितैस्तीक्ष्णैःकंपयन्वैमुहुर्मुहुः। द्रौपदेयान्नरव्याघ्रान्मुं
चतःसायकोत्तमान्। संरब्धान्रथिनांश्रेष्ठान्सोमदत्तिरवारयत्। भीमसेनंतथायांतंभीमरूपंभयानकं। प्रत्यवारयदायांतमार्ष्यशृंगिर्महारथः।
तयोःसमभवद्युद्धंनरराक्षसयोर्मृधे। यादृगेवपुरावृत्तंरामरावणयोर्नृप। ततोयुधिष्ठिरोद्रोणंनवत्यानतपर्वणां। आजघ्नेभरतश्रेष्ठःसर्वमर्मसु
भारत। तंद्रोणःपंचविंशत्यानिजघानस्तनांतरे। भूयएवतुविंशत्यासायकानांसमाहिनोत्। साश्वसूतयु

ला३

द्रो॰प॰
९३

जं द्रोणः पश्यतां सर्वधन्विनां। तांश्छरान्द्रोणमुक्तांस्तु शरवर्षेण पांडवः॥ अवारयत धर्मात्मा दर्शयन्पाणिलाघवं॥ ततो द्रोणो भृशं क्रुद्धो धर्मराजस्य
संयुगे। चिच्छेद समरे धन्वी धनुस्तस्य महात्मनः॥ अथैनं छिन्नधन्वानं त्वरमाणो महारथः॥ शरैरनेकसाहस्रैः पूरयामास सर्वतः॥ अदृश्यं प्रेक्ष्य रा
जानं भारद्वाजस्य सायकैः॥ सर्वभूतान्यमन्यंत हतमेव युधिष्ठिरं। केचिच्चैनममन्यंत तथैव विमुखीकृतं। हतो राजेति राजेंद्र ब्राह्मणेन यशस्विना।
स कृच्छ्रं परममाप्तो धर्मराजो युधिष्ठिरः॥ स त्यक्त्वा कार्मुकं छिन्नं भारद्वाजेन संयुगे। आददेन्यद्धनुर्घोरं भास्वद्वेगवत्तरं। ततस्तान्सायकांस्तत्र द्रोण
मुक्तान्सहस्रशः॥ चिच्छेद समरे वीरस्तदद्भुतमिवाभवत्। छित्वा तु तांश्छरान्राजन्शरैरेव युधिष्ठिरः॥ शक्तिं जग्राह समरे गिरीणामपि दारणीं। स्व
र्णदंडां महाघोरामष्टघंटां भयावहां। समुत्क्षिप्य च तां हृष्टो ननाद बलवद्बली। नादेन सर्वभूतानि त्रासयन्निव भारत। शक्तिं समुद्यतां दृष्ट्वा धर्मराजे
न संयुगे। स्वस्ति द्रोणाय सहसा सर्वभूतान्यथाब्रुवन्। सा राजभुजनिर्मुक्ता निर्मुक्तोरगसंनिभा। प्रज्वालयंती गगनं दिशः सप्रदिशस्तथा। द्रो
णांतिकमनुप्राप्ता दीप्तास्या पन्नगी यथा। तामापतंतीं सहसा प्रेक्ष्य द्रोणो विशांपते। प्रादुश्चक्रे ततो ब्राह्ममस्त्रं विदांवरः। तदस्त्रं भस्मसात्कृत्वा तां
शक्तिं घोरदर्शनां। जगाम स्यंदनं तूर्णं पांडवस्य यशस्विनः॥ ततो युधिष्ठिरो राजा द्रोणास्त्रं तत्समुद्यतं। अशामयन्महाप्राज्ञो ब्रह्मास्त्रेणैव मारिष।
विद्ध्वा च रणे द्रोणं पंचभिर्नतपर्वभिः॥ क्षुरप्रेण सुतीक्ष्णेन चिच्छेदास्य महद्धनुः॥ तदपास्य धनुश्छिन्नं द्रोणः क्षत्रियमर्दनः॥ गदां चिक्षेप सह
सा धर्मपुत्राय मारिष। तामापतंतीं सहसा गदां प्रेक्ष्य युधिष्ठिरः॥ गदामेवाग्रहीत्क्रुद्धश्चिक्षेप च परंतपः॥ ते गदे सहसा मुक्ते समासाद्य परस्परं।
संघर्षात्पावकं मुक्त्वा समेयातां महीतले। ततो द्रोणो भृशं क्रुद्धो धर्मराजस्य मारिष। चतुर्भिर्विमलैस्तीक्ष्णैर्हयान्हत्वा नरोत्तमः॥ धनुश्चैकेन बाणेन ध
नुश्चेंद्रध्वजोपमं। छत्रमेकेन चिच्छेद पांडवं चार्दयत्त्रिभिः॥ हताश्वात्तु रथात्तूर्णमवप्लुत्य युधिष्ठिरः। तस्थावूर्ध्वभुजो राजा व्यायुधो भरतर्षभ। विर

म॰स्व
राम
९३

ध्वंचसमालोक्यव्यायुधंचविशेषतः। द्रोणाश्वाभ्युहनच्छूरःसर्वसैन्यानिचाभिभो। तुंवन्हिभुवरांतीस्थ्यांल्लघुहस्तोऽदृष्टद्युतः। अभिदुद्राववाव्य
ग्रः क्रोधात्सिंहइवोल्बणः। तमभिद्रुतमालोक्यद्रोणेनामित्रघातिना। हाहेतिससहसाशब्दः पांडूनांसमजायत। हतोराजाहतोराजाभार
द्वाजेनभारत। इत्यासीत्सुमहाशब्दः पांडुसैन्यस्यभारत। ततस्त्वरितमारुह्यसहदेवरथंनृपः। अपायाज्जवनैरश्वैः कुंतीपुत्रोयुधिष्ठिरः।
॥ ॥इतिद्रोणपर्वणिजयद्रथवधे। ७ ॥संजयउ॥ ॥बृहत्क्षत्रमथायांतंकेकेयंदृढविक्रमं। क्षेमधूर्तिर्महाराजविव्याधोरसिमार्गणैः।
बृहत्क्षत्रस्तुतंराजानवत्यानतपर्वणां। आजघ्नेत्वरितोयुद्धेद्रोणानीकबिभित्सया। क्षेमधूर्तिस्तुसंक्रुद्धः केकेयस्यमहात्मनः। धनुश्चिच्छेद
पीतेनभल्लेननिशितेनच। अथैनंछिन्नधन्वानंशरेणानतपर्वणा। विव्याधहृदयेतूर्णंप्रवरंसर्वधन्विनां। अथान्यद्धनुरादायबृहत्क्षत्रोहस
न्निव। व्यश्वसूतध्वजंचक्रेक्षेमधूर्तिंमहारथं। ततःपरेणभल्लेनपीतेननिशितेनच। जहारनृपतेःकायाच्छिरोज्वलितकुंडलं। तच्छिन्नंसहसा
तस्यशिरःकुंचितमूर्धजं। सकिरीटंमहींप्राप्यबभौज्योतिरिवांबरात्। तंनिहत्यरणेहृष्टोबृहत्क्षत्रोमहारथः। सहसाऽभ्यपतत्सैन्यंतावकं
पांडवप्रियः। धृष्टकेतुमथायांतंद्रोणहेतोःपराक्रमी। वीरधन्वामहेष्वासोवारयामासभारत। तौपरस्परमासाद्यशरदंष्ट्रौतरस्विनौ। शरैरने
कसाहस्रैरन्योन्यमभिजघ्नतुः। तावुभौनरशार्दूलौयुयुधातेपरस्परं। महावनेतीव्रवेगौवारणाविवयूथपौ। गिरिगह्वरमासाद्यशार्दूलावि
वरोषितौ। युयुधातेमहावीर्यौपरस्परजिघांसया। तद्युद्धमासीत्तुमुलंप्रेक्षणीयंविशांपते। सिद्धचारणसंघानांविस्मयाद्भुतदर्शनं। वीरधन्वा
ततःक्रुद्धोधृष्टकेतोःशरासनं। द्विधाचिच्छेदभल्लेनप्रहसन्निवभारत। तदुत्सृज्यधनुश्छिन्नंचेदिराजोमहारथः। शक्तिंजग्राहविपुलांरुक्म
दंडामयस्मयीं। तांतुशक्तिंमहावीर्यांदोर्भ्यामायम्यभारत। चिक्षेपसहसायत्तोवीरधन्वरथंप्रति। तयासवीरघातिन्याशक्त्यात्यभिहतोभृशं।

निर्भिन्नहृदयस्तूर्णं निपपात रथान्महीं। तस्मिन्विनिहते शूरे त्रिगर्त्तानां महारथे। बलं ते भज्यत विभो पांडवेयैः समंततः। सहदेवस्ततः क्रुद्धो
दुर्मुखेन समागतः। सहदेवं ततः षष्ट्या सायकान्दुर्मुखो क्षिपत्। ननाद च महानादं तर्जयन्पांडवं रणे। माद्रेयस्तु ततः क्रुद्धो दुर्मुखं दश
भिः शरैः। भ्राता भ्रातरमायांतं विव्याध प्रहसन्निव। तं रणे रभसं दृष्ट्वा सहदेवं महाबलं। दुर्मुखो नवभिर्बाणैस्ताडयामास भारत। दुर्मुखस्य तु भ
ल्लेन छित्वा केतुं महाबलः। जघान चतुरो वाहांश्चतुर्भिर्निशितैः शरैः। अथापरेण भल्लेन पीतेन परवीरहा। चिच्छेद सारथेः कायाच्छिरो ज्वलितकुं
डलं। क्षुरप्रेण च तीक्ष्णेन कौरव्यस्य महद्धनुः। सहदेवो रणे छित्वा तं च विव्याध पंचभिः। हताश्वं तु रथं त्यक्त्वा दुर्मुखो विमनास्तथा। आरुरोह
रथं राजन्निरमित्रस्य भारत। सहदेवस्ततः क्रुद्धो निरमित्रं महाहवे। जघान पृतनामध्ये भल्लेन परवीरहा। स पपात रथोपस्थान्निरमित्रो
जनेश्वरः। त्रिगर्त्तराजस्य सुतो व्यथयंस्तव वाहिनीं। तं तु हत्वा महाबाहुः सहदेवो व्यरोचत। यथा दाशरथी रामः खरं हत्वा महाबलं। हाहा
कारो महानासीत्त्रिगर्त्तानां जनेश्वर। राजपुत्रं हतं दृष्ट्वा निरमित्रं महारथं। नकुलस्ते सुतं राजन्विकर्णं पृथुलोचनं। मुहूर्त्ताज्जितवान्संख्ये
तदद्भुतमिवाभवत्। सात्यकिं व्याघ्रदत्तस्तु शरैः सन्नतपर्वभिः। चक्रेऽदृश्यं साश्वसूतं सध्वजं पृतनांतरे। तान्निवार्य शराञ्छूरः शैनेयः
कृतहस्तवत्। साश्वसूतध्वजं बाणैर्व्याघ्रदत्तमपातयत्। कुमारे निहते तस्मिन्मागधस्य सुते प्रभो। मागधाः सर्वतो यत्ना युयुधानमुपाद्रवन्।
विसृजंतः शरांश्चैव तोमरांश्च सहस्रशः। भिंडिमालांस्तथा प्रासान्मुद्गरान्मुशलानिव। अयोधयन्रणे शूराः सात्वतं युद्धदुर्मदं। तांस्तु
सर्वान्स बलवान्सात्यकिर्युद्धदुर्मदः। नातिकृच्छ्राद्धसन्नेव विजिग्ये पुरुषर्षभः। मागधान्द्रवतो दृष्ट्वा हतशेषान्समंततः। बलं ते भज्यत विभो
युयुधानशरार्दितं। नाशयित्वा रणे सैन्यं त्वदीयं माधवोत्तमः। विधुन्वानो धनुःश्रेष्ठं व्यभ्राजत महारथः। भज्यमानं बलं राजन्सात्वतेन म

हात्मना। नाभ्यवर्त्तत युद्धाय चासितं दीर्घबाहुना। ततो द्रोणो भृशं क्रुद्धो सहसोद्धृत्य चक्षुषी। सात्यकिं सत्यकर्माणं स्वयमेवाभिदुद्रुवे॥ ॥इ
ति द्रोणपर्वणि जयद्रथवधे॥४॥ संजय उ०॥ ॥ द्रौपदेया महेष्वासाः सौमदत्तिं महायशाः। एकैकं पंचभिर्विद्ध्वा पुनर्विव्याध सप्तभिः॥ ते
पीडिता भृशं तेन द्रोणेन सहसा विभो। विमूढा नैव विविदुर्मृधे कृत्यं स्म किंचन। नाकुलिश्च शतानीकः सौमदत्तिं नरर्षभं। द्वाभ्यां विद्ध्वा नदद्धृष्टः
शराभ्यां शत्रुकर्षणः। तथेतरे रणे यत्तास्त्रिभिस्त्रिभिरजिह्मगैः। विव्यधुः समरे तूर्णं सौमदत्तिममर्षणं। स तान्प्रति महाराज चिक्षेप पंच सा
यकान्। एकैकं हृदि राजभ्रूए कैकेन महायशाः। ततस्ते भ्रातरः पंच शरैर्विद्धा महारथाः। परिवार्य रथे वीरं विव्यधुः सायकैर्भृशं। आर्जुनि
स्तु हयांस्तस्य चतुर्भिर्निशितैः शरैः। प्रेषयामास संक्रुद्धो यमस्य सदनं प्रति। भैमसेनिर्धनुश्छित्वा सौमदत्तेर्महात्मनः। ननाद बलव
न्नादं विव्याध च शितैः शरैः। यौधिष्ठिरिर्ध्वजं तस्य छित्वा भूमावपातयत्। नाकुलिश्चाथ यंतारं रथनीडादपातयत्। साहदेविस्तु तं ज्ञात्वा
भ्रातृभिर्विरथीकृतं। क्षुरप्रेण शिरो राजन्निचकर्त्त महामनाः। तच्छिरो न्यपतद्भूमौ तपनीयविभूषितं। भ्राजयत्तद्रणोद्देशं बालसूर्यस
मप्रभं। सोमदत्तेः शिरो दृष्ट्वा निपतत्तन्महात्मनः। वित्रस्तास्तावका राजन्प्रदुद्रुवुरनेकधा। तस्मिन्निपतिते राजन्वीरे भूरिश्रवोनुजे। अलंबु
सस्तु समरे भीमसेनं महाबलं। योधयामास संक्रुद्धो लक्ष्मणं रावणिर्यथा। संप्रयुद्धौ रणे दृष्ट्वा तावुभौ नरराक्षसौ। विस्मयः सर्वभूतानां
प्रहर्षश्चाभवत्तदा। आर्ष्यशृंगिं ततो भीमो नवभिर्नतपर्वभिः। विव्याध प्रहसन्राजन्राक्षसेंद्रममर्षणं। तद्रक्षः समरे विद्धं कृत्वा नादं भयावहं।
अभ्यद्रवत्ततो भीमं ये च तस्य पदानुगाः। स भीमं पंचभिर्विद्ध्वा शरैः सन्नतपर्वभिः। भैमान्परिजघानाशु रथांस्त्रिंशदरिंदमान्। पुनश्चतुःश

तान्हत्वा भीमं विव्याध पत्रिणा। सोतिविद्धस्तदा भीमो राक्षसेन महाबलः। निषसाद रथोपस्थे मूर्छयाभिपरिप्लुतः। प्रतिलभ्य ततः संज्ञां मारु
तिः क्रोधमूर्छितः। विकृष्य कार्मुकं घोरं भारसाधनमुत्तमं। अलंबुसं शरैस्तीक्ष्णैरर्दयामास सर्वतः। स विद्धो बहुभिर्बाणैर्नीलांजनचयोपमः।
शुशुभे सर्वतो राजन्प्रफुल्ल इव किंशुकः। स वध्यमानः समरे भीमचापच्युतैः शरैः। स्मरन्भ्रातृवधं चैव पांडवेन महात्मना। घोरं रूपमथो कृत्वा भीम
सेनमभाषत। तिष्ठेदानीं रणे पार्थ पश्य मेद्य पराक्रमं। बको नाम सुदुर्धर्षो राक्षसप्रवरो बली। परोक्षं मम तद्वृत्तं यद्भ्राता मे हतस्त्वया। एवमु
क्त्वा ततो भीमं अंतर्धानगतस्तदा। महता शरवर्षेण भृशं तं समवाकिरत्। भीमस्तु समरे राजन्नदृश्ये राक्षसे तदा। व्योमाकाशं पूरयामास शरैः स
न्नतपर्वभिः। स वध्यमानो भीमेन निमेषाद्रथमास्थितः। जगाम धरणीं क्षुद्रः खं चैव सहसागमत्। उच्चावचानि रूपाणि चकार सुबहूनि च।
उच्चावचास्तथा वाचो व्याजहार समंततः। निपेतुर्गगनाच्चैव शरधाराः समंततः। शक्तयः कणपाः प्रासाः शूलपट्टिशतोमराः। शतघ्न्यः परिघा
श्चैव भिंडिमालाः परश्वधाः। खड्गाः शिलास्तुलाश्चैव ऋष्ट्यश्चक्राणि चैव ह। सा राक्षसविसृष्टा तु शस्त्रवृष्टिः सुदारुणा। जघान पांडुपुत्रस्य सैनि
कान्नृपान्मृधे। ते न पांडवसैन्यानां मर्दिता युधि वारणाः। हयाश्च बहवो राजन्पत्तयश्च तथा पुनः। रथेभ्यो रथिनः पेतुस्तस्य नुन्नाः स्म सायकैः। शो
णितोदां रथावर्तां हस्तिग्राहसमाकुलां। छत्रहंसां कर्दमिनीं बाहुपन्नगसंकुलां। नदीं प्रावर्तयामास रक्षोगणसमाकुलां। वहंतीं बहुधा राजंश्चेदि
पांचालसृंजयान्। तं तथा समरे राजन्विचरंतमभीतवत्। पांडवा भृशसंविग्नाः प्रापश्यंस्तस्य विक्रमं। तावकानां तु सैन्यानां प्रहर्षः समजायत। वा
दित्रनिनदश्चोग्रः सुमहाल्लोमहर्षणः। तं श्रुत्वा निनदं घोरं तव सैन्यस्य पांडवः। नामृष्यत यथा नागस्तलशब्दं समीरितं। ततः क्रोधाभिताम्राक्षो नि
र्दहन्निव पांडवः। संदधे त्वाष्ट्रमस्त्रं स स्वयं त्वष्टेव मारिष। ततः शरसहस्राणि प्रादुरासन्समंततः। तैः शरैस्तव सैन्यस्य विद्रावः सुमहानभूत्। नर

ग्धं प्रेषितं तेन भीमसेनेन संयुगे। राक्षसस्य महामायां हत्वा राक्षसमर्दयत्। स वध्यमानो बहुधा भीमसेनेन राक्षसः। संत्यज्य सं
युगे भीमं द्रोणानीकमुपाद्रवत्। तस्मिंस्तु निर्जिते राजन् राक्षसेंद्रे महात्मनाः। अनादयन् सिंहनादैः पांडवाः सर्वतो दिशं। अपूजयन्
मारुतिं च संहृष्टास्ते महाबलाः। प्रल्हादं समरे जित्वा यथा शक्रं मरुद्गणाः॥ ॥इति श्रीद्रोणपर्वणि जयद्रथवधे॥५॥ संजय उ॥ ॥अ
लंबुसं तथा युद्धे विचरंतमभीतवत्। हैडिंबिः प्रययौ राजन् विव्याध निशितैः शरैः। तयोः प्रतिभयं युद्धमासीद्राक्षससिंहयोः। कुर्वतोर्वि
विधा माया शक्रशंबरयोरिव। अलंबुसोभृशं क्रुद्धो घटोत्कचमताडयत्। तयोर्युद्धं समभवद्राक्षसग्रामणिमुख्ययोः। यादृगेव
पुरा वृत्तं रामरावणयोः प्रभो। घटोत्कचस्तु विंशत्या नाराचानां स्तनांतरे। अलंबुसमथो विद्ध्वा सिंहवद्व्यनदन्मुहुः। तथैवालंबुसो राज
न्हैडिंबं युद्धदुर्मदं। विद्ध्वा विद्ध्वानदद्धृष्टः पूरयन् खं समंततः। तथा तौ भृशसंक्रुद्धौ राक्षसेंद्रौ महाबलौ। निर्विशेषमयुध्येतां मायाभिरि
तरेतरं। मायाशतसृजौ दीप्तौ मोहयंतौ परस्परं। मायायुद्धेषु कुशलौ माया युद्धमयुध्यतां। यां यां घटोत्कचो युद्धे मायां दर्शयते नृप
तां तामलंबुसो युद्धे माययेव निजघ्निवान्। तं तथा युध्यमानं तु मायायुद्धविशारदं। अलंबुसं राक्षसेंद्रं दृष्ट्वाक्रुध्यंत पांडवाः। त एनं भृ
शसंक्रुद्धाः सर्वतः प्रवरा रथाः। अभ्यद्रवंत संक्रुद्धा भीमसेनादयो नृप। तएनं कोष्ठकीकृत्य रथवंशेन मारिष। सर्वतो व्यकिरन् बाणै
रुल्काभिरिव कुंजरं। स तेषामस्त्रवेगं तं प्रतिहत्यास्त्रमायया। तस्मान्मुमोच रथव्रजात्सुक्तो वनदाहादिव द्विपः। स विस्फार्य धनुर्घोर
मिंद्रायुधसमस्वनं। मारुतिं पंचविंशत्या भैमसेनिं च पंचभिः। युधिष्ठिरं त्रिभिर्विद्ध्वा सहदेवं च सप्तभिः। नकुलं च त्रिसप्तत्या द्रौप
देयांश्च मारिष। पंचभिः पंचभिर्विद्ध्वा घोरं नादं ननाद ह। तं भीमसेनो नवभिः सहदेवश्च पंचभिः। युधिष्ठिरः शतेनैव राक्षसं प्रत्ययुध्य

ता। नकुलस्तु चतुःषष्ट्या द्रौपदेयास्त्रिभिस्त्रिभिः। हैडंबो राक्षसं विद्ध्वा युद्धे पंचशतैः शरैः। पुनर्विव्याध सप्तत्या ननाद च महाबलः। तस्य नादे
न महता कंपितेव वसुंधरा। सपर्वतवना राजन्सपादपजलाशया। सोतिविद्धो महेष्वासैः सर्वतस्तैर्महारथैः। प्रतिविव्याध तान्सर्वा
न्पंचभिः पंचभिः शरैः। तं क्रुद्धं राक्षसं युद्धे प्रतिक्रुद्धस्तु राक्षसः। हैडंबो भरतश्रेष्ठ शरैर्विव्याध सप्तभिः। सोतिविद्धो बलवता राक्षसें
द्रो महाबलः। ततस्ते पांडवा राजन्समंतात्परिवारितं। व्यसृजंत्सायकांस्तूर्णं रुक्मपुंखांछिलाशितान्। ते शरा नतपर्वाणो विविशू राक्ष
सं तदा। रुषिताः पन्नगा यद्वद्गिरिशृंगं महाबलाः। ततस्ते पांडवा राजन्समंतान्निशितान्शरान्। प्रेषयामासुरुद्विग्ना हैडिंबश्च घटोत्कचः।
स वध्यमानः समरे पांडवैर्जितकाशिभिः। मर्त्यधर्ममनुप्राप्तः कर्तव्यं नान्वपद्यत। ततः समरशौंडो वै भैमसेनिर्महाबलः। समीक्ष्य तदवस्थं
तं वधायास्य मनो दधे। वेगं चक्रे महाराज राक्षसेंद्ररथं प्रति। दग्धाद्रिकूटशृंगाभं भिन्नांजनचयोपमं। रथाद्रथमभिद्रुत्य क्रुद्धो हैडिंबि
क्षिपत्। उद्बबर्ह रथाच्चापि पन्नगं गरुडो यथा। समुत्क्षिप्य च बाहुभ्यामाविध्य च पुनः पुनः। निष्पिपेष क्षितौ क्षिप्रं पूर्णकुंभमिवाश्मनि।
बललाघवसंपन्नः संपन्नो विक्रमेण च। भैमसेनी रणे क्रुद्धः सर्वसैन्यान्यभीषयत्। स विस्फारितसर्वांगश्चूर्णितास्थिर्विराबभौ। घटो
त्कचेन वीरेण हतः शालकटंकटः। ततः सुमनसः पार्था हते तस्मिन्निशाचरे। चुक्रुशुः सिंहनादांश्च वासांस्यादुधुवुश्च ह। तावकाश्च हतं
दृष्ट्वा राक्षसेंद्रं महाबलं। अलंबुसं तथा वीरं विशीर्णमिव पर्वतं। हाहाकारमकार्षुश्च सैन्यानि भरतर्षभ। जनाश्च तद्ददृशिरे रक्षः कौतूहला
न्विताः। यदृच्छया निपतितं भूमावंगारकं यथा। घटोत्कचस्तु तं हत्वा रक्षो बलवतां वरः। मुमोच बलवान्नादं बलं हत्वेव वासवः। स पूज्यमा
नः पितृभिः सबांधवैर्घटोत्कचः कर्मणि दुष्करे कृते। रिपुं निहत्याभिननंद वै तदा सलंबुसं पक्वमलंबुसं यथा। ततो निनादः सुमहान्समु

ल्छितः सशंखनानाविधबाणघोषवान्। निशम्य तं प्रत्यहरंस्तु कौरवास्ततो ध्वनिर्भुवनमुपास्पृशद्भृशं॥ ॥इति द्रोणपर्वण्य
लंबुसवधः॥९॥ धृतराष्ट्र उ॥ ॥भारद्वाजं कथं युद्धे युयुधानो न्यवारयत्। संजयाचक्ष्व तत्वेन परं कौतूहलं हि मे॥ ॥सं
जय उ॥ ॥शृणु राजन्महाप्राज्ञ संग्रामं लोमहर्षणं। द्रोणस्य पांडवैः सार्द्धं युयुधानपुरोगमैः। वध्यमानं बलं दृष्ट्वा यु
युधानेन मारिष। अभ्यद्रवत्स्वयं द्रोणः सात्यकिं सत्यविक्रमं। तमापतंतं सहसा भारद्वाजं महारथं। सात्यकिः पंचविं
शत्या क्षुद्रकाणां समार्पयत्। द्रोणोपि युधि विक्रांतो युयुधानं समाहितः। अविध्यत्पंचभिस्तूर्णं हेमपुंखैः शिलाशि
तैः। ते वर्म भित्वा सुदृढं द्विषत्पिशितभोजनाः। अभ्यगुर्द्धरणीं राजन् श्वसंत इव पन्नगाः। दीर्घबाहुरभिक्रुद्धस्तोत्रार्दित
इव द्विपः। द्रोणं पंचाशता विध्यन्नाराचैरग्निसंनिभैः। भारद्वाजो रणे विद्धो युयुधानेन सत्वरं। सात्यकिं बहुभिर्बाणै
र्यतमानमविध्यत। ततः क्रुद्धो महेष्वासो भूय एव महाबलः। सात्वतं पीडयामास शरेणानतपर्वणा। स वध्यमानः
समरे भारद्वाजेन सात्यकिः। नाभ्यपद्यत कर्तव्यं किंचिदेव विशांपते। विषण्णवदनश्चासीद्युयुधानो भवन्नृप। भा
रद्वाजं रणे दृष्ट्वा विसृजंतं सितान्शरान्। तं तु संप्रेक्ष्य ते पुत्राः सैनिकाश्च विशांपते। प्रहृष्टमनसो भूत्वा सिंहव
द्व्यनदन्मुहुः। तं श्रुत्वा निनदं घोरं पीड्यमानं च माधवं। युधिष्ठिरोब्रवीद्राजन्सर्वसैन्यानि भारत। एष वृष्णिवरो
वीरः सात्यकिः सत्यविक्रमः। ग्रस्यते युधि वीरेण भानुमानिव राहुणा। अभिद्रवत गच्छध्वं सात्यकिर्यत्र युध्यते।

धृष्टद्युम्नं च पांचाल्यमिदमाहजनाधिप। अभिद्रवद्रुतं द्रोणं किमु तिष्ठसि पार्षत। न पश्यसि भयं घोरं द्रोणादस्मानुपस्थितं। असौ द्रोणो महेष्वासो युयुधानेन संयुगे। क्रीडते सूत्रबद्धेन पक्षिणा बालको यथा। अत्रैव सर्वे गच्छंतु भीमसेनमुखा रथाः। त्वयैव सहिता यत्ता युयुधानरथं प्रति। पृष्ठतोनुगमिष्यामि त्वामहं सहसैनिकं। सात्यकिं मोक्षयाद्य त्वं यमदंष्ट्रांतरं गतं। एवमुक्त्वा ततो राजा सर्वसैन्येन पांडवः। अभ्यद्रवद्रणे द्रोणं युयुधानस्य कारणात्। अथारावो महानासीद्द्रोणमेकं युयुत्सतां। पांडवानां च भद्रं ते सृंजयानां च सर्वशः। ते समेत्य नरव्याघ्रा भारद्वाजं महारथं। अभ्यवर्षच्छरैस्तीक्ष्णैः कंकबर्हिणवाजितैः। स्मयन्नेव तु तान्वीरान्द्रोणः प्रत्यग्रहीत्स्वयं। अतिथीनागतान्यद्वत्सलिलेनासनेन च। तर्पितास्ते शरैस्तेन भारद्वाजेन धन्विनः। आतिथेयं गृहं प्राप्य नृपतेतिथयो यथा। भारद्वाजं च संवीक्ष्य नशेकुः प्रतिवीक्षितुं। मध्यंदिनमनुप्राप्तं सहस्रांशुमिव प्रभुं। तांस्तु सर्वान्महेष्वासान्द्रोणः शस्त्रभृतां वरः। अपातयच्छरव्रातैर्गभस्तिभिरिवांशुमान्। वध्यमाना महाराज पांडवाः सृंजयास्तथा। त्रातारं नाभ्यगच्छंत पंकमग्ना इव द्विपाः। द्रोणस्य च व्यदृश्यंत विसर्पंतो महाशराः। गभस्तय इवार्कस्य प्रतपंतः समंततः। तस्मिन्द्रोणेन निहताः पांचालाः पंचविंशतिः। महारथा महाख्याता धृष्टद्युम्नस्य संगताः। पांडूनां सर्वसैन्येषु पांचालानां तथैव च। द्रोणं स्म ददृशुः शूरं विनिघ्नंतं वरान्वरान्। केकयानां शतं हत्वा विद्राव्य च समंततः। द्रोणस्तस्थौ महाराज व्यादितास्य इवांतकः। पांचालान्केकयान्मत्स्यान्सृंजयांश्च नराधिप। द्रोणोजयन्महाराज शतशोथ सहस्रशः। तेषां समभवच्छब्दो विध्यतां द्रोणसायकैः। वनौकसामिवारण्ये दह्यतां धूमकेतुना। तत्र देवाः सगंधर्वाः पितरश्चाब्रुवन्नृप। एते द्रवंति पांचालाः पांडवाश्च स

सैनिकाः। तंतथासमरेद्रोणं निघ्नंतंसोमकान्रणे। नचाप्यभिययुःकेचिदपरेनैवविव्यधुः। वर्त्तमानेतथारौद्रेतस्मिन्वीरवरक्ष
ये। धूतदोषेमहाराज तवदुर्मंत्रितेनच। अश्रृण्णोत्सहसापार्थः पांचजन्यस्यनिस्वनं। पूरितोवासुदेवेनशंखराट्स्वनतेभृशं। ततोनिनादःसुम
हान्समुत्थितःसशंखस्वनानाविधबाणघोषवान्। निशाम्यतंप्रत्यनंदन्समंततोकौरवास्ततोध्वनिर्भुवनंततलंस्पृशादिवं॥ ॥इतिद्रोणपर्वणिजयद्र
थवधे॥ ७॥ संजयउ॥ ॥वर्त्तमानेषुवीरेषुसैंधवस्याभिरक्षिषु। नदत्सुधार्त्तराष्ट्रेषुविजयस्यरथंप्रति। गांडीवस्यचनिर्घोषेविप्रणष्टेसमंततः।
कश्मलाभिहतोराजा। चिंतयामासपांडवः। ननूनंस्वस्तिपार्थस्ययथानर्दतिशंखराट्। कौरवाश्चतथाहृष्टाविनदंतिमुहुर्मुहुः। एवंसंचिंतयित्वातु
व्याकुलेनांतरात्मना। अजातशत्रुःकौंतेयःसात्वतंप्रत्यभाषत। बाष्पगद्गदयावाचामुह्यमानोमुहुर्मुहुः। पार्थस्यानंतरापेक्षीशैनेयंकुरुपुंगवः।
॥ ॥युधिष्ठिरः॥ ॥यःसधर्मःपुरादृष्टःसद्भिःशैनेयशाश्वतः। सांपरायेसुहृत्कृत्येतस्यकालोयमागतः। सर्वेष्वपिचयोधेषुचिंतयन्शिनिपुं
गव। त्वत्तःसुहृत्तमंकंचिन्नाभिजानामिसात्यके। योहिप्रीतमनानित्यंयश्चनित्यमनुव्रतः। सकार्येसांपरायेतुनियोज्यइतिमेमतिः। यथाच
केशवोनित्यंपांडवानांपरायणं। तथात्वमपिवार्ष्णेयकृष्णतुल्यपराक्रमः। सोहंभारंसमाधास्येत्वयितंवोढुमर्हसि। अभिप्रायंचमेनित्यंनवृथा
कर्त्तुमर्हसि। सत्वंभ्रातुर्वयस्यास्यगुरोरपिचसंयुगे। कुरुकृच्छ्रंसहायार्थमर्जुनस्यनरर्षभ। त्वंहिसत्यव्रतःशूरोमित्राणामभयंकरः। लोकेवि
ख्यायसेवीरकर्मभिःसत्यवानिति। योहिशैनेयमित्रार्थेयुध्यमानस्त्यजेत्तनुं। पृथिवींवाद्विजातिभ्योयोदद्यात्ससमंभवेत्। श्रुताश्चबहवोस्मा
भिराजानोयेदिवंगताः। दत्वेमांपृथिवींकृत्स्नांब्राह्मणेभ्योयथाविधि। एवंत्वामपिधर्मात्मन्प्रयाचेहंकृतांजलिः। पृथिवीदानतुल्यंस्याद्धि
कंचफलंविभो। एकएवसदाकृष्णोमित्राणामभयंकरः। रणेसंत्यजतिप्राणान्द्वितीयस्त्वंचसात्यके। विक्रांतस्यचवीरस्ययुद्धप्रार्थयतोय
तोयत्राः। शूरएवसहायःस्यान्नेतरःप्राकृतोजनः। ईदृशेत्वपरामर्देवर्त्तमानेचमाधव। त्वदन्योहिरणेगोप्ताविजयस्यनविद्यते। श्लाघन्ने

द्रो० प०
९८

वहिकर्माणिशातशास्तवपांडवः।ममसंजनयन्हर्षंपुनःपुनरकीर्तयत्।लघ्वस्त्रश्चित्रयोधीचतथालघुपराक्रमः।प्राज्ञःसर्वास्त्रविच्छूरोमुह्यतेनचसं
युगे।महास्कंधोमहोरस्कोमहाबाहुर्महाधनुः।महाबलोमहावीर्यःसमहात्मामहारथः।शिष्योममसखाचैवप्रियोस्याहंप्रियश्चमे।युयुधानः
सहायोमेप्रमथिष्यतिकौरवान्।अस्मदर्थेनराजेंद्रसन्नह्येद्यदिकेशवः।रामोवाप्यनिरुद्धोवाप्रद्युम्नोवामहारथः।गदोवासारणोवापिसां
बोवासहवृष्णिभिः।सहायार्थंमहाराजसंग्रामोत्तममूर्द्धनि।तथाप्यहंनरव्याघ्रंशैनेयंसत्यविक्रमं।साहाय्येविनियोक्ष्यामिनास्तिमेन्यो
हितत्समः।इतिद्वैतवनेतातमामुवाचधनंजयः।परोक्षंत्वद्गुणान्संख्येकथयन्नार्यसंसदि।तस्यत्वमेनसंकल्पंनवृथाकर्तुमर्हसि।धनंज
यस्यवार्ष्णेयममभीमस्यचोभयोः।यच्चापितीर्थानिचरन्नगमंद्वारकांप्रति।तत्राहमपितेभक्तिमर्जुनंप्रतिदृष्टवान्।ततःसौहृदमन्येषुभ
यात्वेवोपलक्षितं।यथात्वमस्मान्भजसेवर्त्तमानानुपप्लवे।सोपिजात्याचभक्त्याचसत्यस्याचार्यकस्यच।सौहृदस्यचवीर्यस्यकुलीनत्वस्य
माधव।सत्यस्यचमहाबाहोअनुकंपार्थमेवच।अनुकंप्यमहेष्वासकर्मत्वंकर्तुमर्हसि।दुर्योधनोहिसहसायातोद्रोणेनसंसदि।पूर्वमेवतु
यातास्तेकौरवाणांमहारथाः।सुमहान्निनदश्चैवश्रूयतेविजयंप्रति।सशैनेयजवेनाशुगंतुमर्हसिमानद।भीमसेनोवयंचैवसंयत्ताःसह
सैनिकाः।द्रोणमावारयिष्यामोयदित्वांप्रतियास्यति।पश्यशैनेयसैन्यानिद्रवमाणानिसंयुगे।महांतंचरणेशब्दंदीर्यमाणांचभारतीं।महा
मारुतवेगेनसमुद्रमिवपर्वणि।धार्त्तराष्ट्रबलंतातविक्षिप्तंसव्यसाचिना।रथैर्विपरिधावद्भिर्मनुष्यैश्चहयैस्तथा।सैन्यंरजःसमुद्भूतमेतत्
संपरिवर्त्तते।संवृतःसिंधुसौवीरैर्नखरप्रासयोधिभिः।अत्यंतोपचितैःशूरैःफाल्गुनःपरवीरहा।नैतद्बलमनावार्यशक्योहंतुंजयद्र
थः।एतेहिसैंधवस्यार्थेसर्वेसंत्यक्तजीविताः।शरशक्तिध्वजरैथैवरंहययानरथाकुलं।पश्यैतद्धार्त्तराष्ट्राणामनीकंसुदुरासदं।शृणुदुंदु
भिनिर्घोषंशंखशब्दांश्चपुष्कलान्।सिंहनादरवांश्चैवरथनेमिस्वनांस्तथा।नागानांशृणुशब्दंचपत्तीनांचसहस्रशः।सादिनांद्रवतांचैवशृ

राम
९८

णुकंपयंतांमही।पुरस्तात्सैंधवानीकंद्रोणानीकस्यपृष्ठतः।बहुत्वाद्धिनरव्याघ्रदेवेंद्रमपिपीडयेत्॥अपर्यंतेबलेमग्नोजह्यादपिहिजीवितं।त
स्मिंश्चनिहतेयुद्धेकथंजीवेतमादृशः।सर्वथासमनुप्राप्तःकृच्छ्रंतातजीवितं।श्यामोयुवागुडाकेशोदर्शनीयश्चपांडवः।लघ्वस्त्रश्चित्रयोधीचप्रवि
ष्टस्तातवाहिनीं।सूर्योदयेमहाबाहुर्दिवसश्चातिवर्तते।तन्नजानामिवार्ष्णेययदिजीवतिवानवा।कुरूणांचापितत्सैन्यंसागरप्रतिमंमहत्॥ए
कएवचबीभत्सुःप्रविष्टस्तातवाहिनीं।तामसह्यांमहाबाहुःसुरैरपिमहामृधे।नचमेवर्ततेबुद्धिरद्ययुद्धेकथंचन।द्रोणोपिरभसोयुद्धेमम
पीडयतेबलं।प्रत्यक्षंतेमहाबाहोयथासौचरतेद्विजः।युगपच्चसमेतानांकार्याणांत्वंविचक्षणः।महार्थंलघुसंयुक्तंकर्तुमर्हसिमाधव।तदस्य
सर्वकार्येषुकार्यमेतन्मतंमम।अर्जुनस्यपरित्राणंकर्तव्यमितिसंयुगे।नाहंशोचामिदाशार्हंगोप्तारंजगतःप्रभुं।सहिशक्तोरणेतातत्रीन्लो
कानपिसंगतान्।विजेतुंपुरुषव्याघ्रसत्यमेतद्ब्रवीमिते।किंपुनर्धार्तराष्ट्रस्यबलमेतत्सुदुर्बलं।अर्जुनस्त्वेषवार्ष्णेयपीडितोबहुभिर्युधि।प्रज
ह्यात्समरेप्राणांस्तस्माद्विंदामिकश्मलं।तस्यत्वंपदवींगच्छगच्छेयुस्त्वादृशायथा।तादृशस्येदृशेकालेमादृशेनाभिनोदितः।रणेवृष्णिप्रवीराणांद्वा
वेवातिरथौस्मृतौ।प्रद्युम्नश्चमहाबाहुस्त्वंचसात्वतविश्रुतः।अस्त्रेनारायणसमःसंकर्षणसमोबले।वीरतायांनरव्याघ्रधनंजयसमोह्यसि।
भीष्मद्रोणावतिक्रम्यसर्वयुद्धविशारदं।त्वामद्यपुरुषव्याघ्रंलोकेसंतःप्रचक्षते।नासाध्यंविद्यतेलोकेसात्यकेरितिमाधव।तत्त्वायदभि
वक्ष्यामितत्कुरुष्वमहाबल।संभावनाहिलोकस्यतवपार्थस्यचोभयोः।नान्यथातांमहाबाहोसंकर्तुमिहार्हसि।परित्यज्यप्रियान्प्राणान्रणे
चरत्वमभीतवत्।नहिशैनेयदाशार्हायुद्धेरक्षंतिजीवितं।अयुद्धमनवस्थानंसंग्रामेचापलायनं।भीरूणामसतांमार्गोनैषदाशार्हसेवि
तः।तवार्जुनोगुरुस्तातधर्मात्माशिनिपुंगव।वासुदेवोगुरुश्चापितवपार्थस्यचोभयोः।कारणद्वयमेतद्धिजानानस्त्वाहमब्रुवं।मावमंस्था
वचोमह्यंगुरुस्तवगुरोरहं।वासुदेवमतंचैतन्ममचैवार्जुनस्यच।सत्यमेतन्मयाप्रोक्तंयाहियत्रधनंजयः।एतद्वचनमाज्ञायममसत्यपरा

क्रम।अविरोतद्बलंतातधार्त्तराष्ट्रस्यदुर्मतेः।अविश्यचयथान्यायंसंगम्यचमहारथैः।यथाहमात्मनःकर्मरणेसात्वतदर्शये॥ ॥इतिद्रोणपर्वणि
सात्यकिप्रवेशेयुधिष्ठिरवाक्यं॥८॥ संजयउ॥ ॥प्रीतियुक्तंचहृद्यंचमधुराक्षरमेवच।कालयुक्तंविचित्रंचस्नेहयाभिभाषितं।धर्मराजस्यतद्वा
क्यंनिशम्यशिनिपुंगवः।सात्यकिर्भरतश्रेष्ठप्रत्युवाचयुधिष्ठिरं।श्रुतंतेगदतोवाक्यंसर्वमेतन्मयाच्युत।न्याययुक्तंचचित्रंचफाल्गुनार्थेयशस्क
रं।एवंविधेतथाकालेमादृशंप्रेक्ष्यसंमतं।वक्तुमर्हसिराजेंद्रयथापार्थंतथैवमां।नमेधनंजयस्यार्थेप्राणारक्ष्याःकथंचन।त्वत्प्रयुक्तःपुनरहंकिं
न्नकुर्यांमहाहवे।लोकत्रयंयोधयेयंसदेवासुरमानुषं।त्वत्प्रयुक्तोनरेंद्रेंद्रकिमुतैतत्सुदुर्बलं।सुयोधनबलंत्वद्ययोधयिष्येसमंततः।विजेष्ये
चरणेराजन्सत्यमेतद्ब्रवीमिते।कुशल्यहंकुशलिनंसमासाद्यधनंजयं।हतेजयद्रथेराजन्पुनरेष्यामितेंतिकं।अवश्यंतुमयासर्वंविज्ञाप्यस्त्वं
नराधिप।वासुदेवस्ययद्वाक्यंफाल्गुनस्यचधीमतः।दृढंत्वभिपरीतोहमर्जुनेनपुनःपुनः।मध्येसर्वस्यसैन्यस्यवासुदेवस्यशृण्वतः।अद्य
माधवराजानमप्रमत्तोनुपालय।आर्यांयुद्धेमतिंकृत्वायावद्धन्मिजयद्रथं।त्वयिवाहंमहाबाहोप्रद्युम्नेवामहारथे।नृपंनिक्षिप्यगच्छेयंनिर
पेक्षोजयद्रथं।जानीषेहिरणेद्रोणंरभसंश्रेष्ठसंमतं।प्रतिज्ञानंहितंतेनदंश्रुतंद्रोणेनमाधव।ग्रहणेधर्मराजस्यभारद्वाजोभिगृध्यति।शक्त
श्चापिरणेद्रोणोनिग्रहीतुंयुधिष्ठिरं।एवंत्वयिसमाधायधर्मराजंनरोत्तमं।अहमद्यगमिष्यामिसैंधवस्यवधायहि।जयद्रथमहंहत्वाध्रु
वमेष्यामिमाधव।धर्मराजंयथाद्रोणोनगृह्णीयाद्यथाबलात्।निगृहीतेनरश्रेष्ठेभारद्वाजेनमाधव।सैंधवस्यवधोनस्यान्ममाप्रीतिस्तथा
भवेत्।एवंगतेनरश्रेष्ठपांडवेसत्यवादिनि।अस्माकंगमनंयुक्तंवनंप्रतिभवेत्पुनः।सोयंजयोममव्यक्तंव्यर्थएवभविष्यति।यथाद्रोणोरणे
क्रुद्धोनगृह्णीयाद्युधिष्ठिरं।सत्वमद्यमहाबाहोप्रियार्थंममामाधव।जयार्थंचयशोर्थंचरक्षराजानमाहवे।सभवान्ममनिक्षेपोनिक्षिप्तःसव्य
साचिना।भारद्वाजभयंनित्यंमन्यमानेनवैविभो।तस्मादपिमहाबाहोनित्यंपश्यामिसंयुगे।नान्यंहिप्रतियोद्धारंरौक्मिणेयादृतेविभो।मांत्वा

ऽपिमन्यतेयुद्धेभारद्वाजस्यधीमतः।सोहंसंभावनांचैतामाचार्यवचनंचतत्।दृष्टतोनोत्सहेकर्तुंत्वांवात्यक्तुंमहीपते।आचार्योलघुहस्तत्वादभे
द्यकवचावृतः।उपलभ्यरणेक्रीडेद्यथाशकुनिनाशिशुः।यदिवार्ष्णिर्धनुःपाणिरिहस्यान्मकरध्वजः।तस्मैत्वांविसृजेयंवैसत्वांरक्षेद्यथार्जुनः।कुरुत्व
मात्मनोगुप्तिंकस्तेगोप्तागतेमयि।यःप्रतीयाद्रणेद्रोणंयावद्गच्छामिपांडवं।मोचत्तेभयमद्यास्तुराजन्नर्जुनसंभवं।नसजातुमहाबाहुर्भारमु
द्यम्यसीदति।येचसौवीरकायोधास्तथासैंधवपौरवाः।उदीच्यादाक्षिणात्याश्चयेचान्येपिमहारथाः।येचकर्णमुखाराजन्रथोदाराःप्रकीर्तिताः।
एतेर्जुनस्यक्रुद्धस्यकलांनार्हंतिषोडशीं।उद्युक्ताःपृथिवीसर्वाससुरासुरमानुषा।सराक्षसगणाराजन्सकिन्नरमहोरगा।जंगमैःस्थावरैःसार्द्धं
नालंपार्थस्यसंयुगे।एवंज्ञात्वामहाराजव्येतुतेभीर्धनंजयात्।यत्रवीरौमहेष्वासौकृष्णौसत्यपराक्रमौ।नतत्रकर्मणोव्यापत्कथंचिदपिविद्यते।
दैवंकृतास्त्रतांयोगममर्षमपिचाहवे।कृतज्ञतांदयांचैवभ्रातुस्त्वमनुचिंतय।मयिचाप्यपयातेवैगच्छमानेर्जुनंप्रति।द्रोणचित्रास्त्रतांसंख्ये
राजंस्त्वमनुचिंतय।आचार्योहिभृशंराजन्निग्रहेतववगृध्यति।प्रतिज्ञामात्मनोरक्षन्सत्यांकर्तुंचभारत।कुरुष्वाद्यात्मनोगुप्तिंकस्तेगोप्तागतेमयि।
यस्याहंप्रत्ययात्पार्थगच्छेयंफाल्गुनंप्रति।नह्यहंत्वांमहाराजविनिक्षिप्यमहाहवे।क्वचिद्यास्यामिकौरव्यसत्यमेतद्ब्रवीमिते।एतद्विचार्यबहुशो
बुध्याबुद्धिमतांवर।दृष्ट्वाश्रेयःपरंबुध्यात्ततोराजन्प्रशाधिमां॥ ॥युधिष्ठिरउ॥ ॥एवमेतन्महाबाहोयथावदसिमाधव।नतुमेशुध्यतेभावः
श्वेताश्वंप्रतिमारिष।करिष्येपरमंयत्नमात्मनोरक्षणंप्रति।गच्छत्वंसमनुज्ञातोयत्रयातोधनंजयः।आत्मसंरक्षणंसंख्येगमनंचार्जुनंप्रति।
विचार्यतत्स्वयंबुध्यागमनंतत्ररोचये।सत्वमातिष्ठयानाययत्रयातोधनंजयः।ममापिरक्षणंभीमःकरिष्यतिमहाबलः।पार्षतश्चससोदर्यः
पार्थिवाश्चमहाबलाः।द्रौपदेयाश्चमांतातरक्षिष्यंतिनसंशयः।केकयाभ्रातरःपंचराक्षसश्चघटोत्कचः।विराटोद्रुपदश्चैवशिखंडीचमहाब
लः।धृष्टकेतुश्चबलवान्कुंतिभोजश्चवीर्यवान्।नकुलःसहदेवश्चपांचालाःसृंजयास्तथा।एतेसमाहितास्तातरक्षिष्यंतिनसंशयः।नद्रोणःस

हसैन्येन कृतवर्मा च संयुगे। समासादयितुं शक्तो न च मां धर्षयिष्यति। धृष्टद्युम्नश्च समरे द्रोणं क्रुद्धं परंतपः। वारयिष्यति विक्रम्य वेलेव मकरालयं।
यत्र स्थास्यति संग्रामे पार्षतः परवीरहा। द्रोणानीकं न सैन्यं बलवान् क्रामेत्तत्र कथंचन। एष द्रोणविनाशाय समुत्पन्नो हुताशनात्। कवची सशरी खड्गी धन्वी च वरभूषणः। विश्रब्धो गच्छ कौन्तेय मा कार्षीर्मयि विभ्रमं। धृष्टद्युम्नो रणे क्रुद्धो द्रोणमावारयिष्यति॥ ॥इति द्रोणपर्वणि॥ ९॥ संजयः॥
धर्मराजस्य तद्वाक्यं निशम्य शिनिपुंगवः। पार्थाच्च भयमाशंसन्परित्यागान्महीपतेः। अपवादं ह्यात्मनश्च लोकात्पश्यन्विशेषतः। न मां भीत इति ब्रूयुरायान्तं फाल्गुनं प्रति। निश्चित्य बहुधैवं स सात्यकिर्युद्धदुर्मदः। धर्मराजमिदं वाक्यमब्रवीत्पुरुषर्षभः। कृतां चेन्मन्यसे रक्षां स्वस्ति तेऽस्तु विशांपते। अनुयास्यामि बीभत्सुं करिष्ये वचनं तव। न हि मे पांडवात्कश्चित्त्रिषु लोकेषु विद्यते। यो वै प्रियतरो राजन्सत्यमेतद्ब्रवीमि ते। तस्याहं पदवीं यास्ये संदेशात्तव मानद। त्वत्कृते च न मे किंचिदकर्तव्यं कथंचन। यथा हि मे गुरोर्वाक्यं विशिष्टं द्विपदां वर। तथा तवापि वचनं विशिष्टतरमेव मे। प्रिये हि तव वर्तेते भ्रातरौ कृष्णपांडवौ। तयोः प्रियहितं चैव विद्धि मां राजपुंगव। द्रोणानीकं विशाम्येष क्रुद्धो झषवद्र्णवं। तत्र यास्यामि यत्रासौ राजन्राजा जयद्रथः। यत्र सेनां समाश्रित्य भीतस्तिष्ठति पांडवात्। गुप्तो रथवरश्रेष्ठैर्द्रौणिकर्णकृपादिभिः। इतस्त्रियोजनं मन्ये तमध्वानं विशांपते। यत्र तिष्ठति पार्थोऽसौ जयद्रथवधोद्यतः। त्रियोजनगतस्यापि तस्य यास्याम्यहं पदं। आसैन्धववधाद्राजन्सुदृढेनान्तरात्मना। अनादिष्टस्तु गुरुणा को नु युध्येत मादृशः। अभिजानामि तं देशं यत्र यास्याम्यहं प्रभो। हलशक्तिगदाप्रासखड्गचर्मर्ष्टितोमरं। इष्वस्त्रबलसंबाधं क्षोभयिष्ये बलार्णवं।
यदेतत्कुंजरानीकं साहस्रमनुपश्यसि। कुलमांजनकं नाम यत्रैते वीर्यशालिनः। आस्थिता बहुभिर्म्लेच्छैर्युद्धशौंडैः प्रहारिभिः। नाना मेघनिभा राजन्क्षरन्त इव तोयदाः। नैते जातु निवर्तेरन्प्रेषिता हस्तिसादिभिः। अन्यत्र हि वधादेषां नास्ति राजन्पराजयः। अथ यो रथिनो वीरान्साहस्रमनुपश्यसि। एते रुक्मरथा नाम राजपुत्रा महारथाः। रथेष्वस्त्रेषु निपुणा नागेषु च विशांपते। धनुर्वेदे गताः पारं मुष्टियुद्धेषु कोविदाः। गदा

युद्धविशेषज्ञा नियुद्धकुशलास्तथा। खड्गप्रहरणे युक्ताः संपाते त्वसिचर्मिणोः। शूराश्च कृतविद्याश्च स्पर्द्धंते च परस्परं। नित्यं हि समरे राजन्विजिगीषं
तिमानवान्। कर्णेन विजिता राजन्दुःशासनमनुव्रताः। एतांस्तु वासुदेवोपि रथोदारान्प्रशंसति। सततं प्रियकामाश्च कर्णस्यैते वशे स्थिताः। तस्य
वचैवेन नाद्राजन्निर्दृशाः श्वेतवाहनात्। ते न क्षतानव श्रांता दृढावरणकार्मुकाः। मदर्थे धिष्ठितानूनं धार्तराष्ट्रस्य शासनात्। एतान्प्रमथ्य संग्रामे
प्रियार्थं तव कौरव। प्रयास्यामि ततः पश्चात्पदवीं सव्यसाचिनः। यांस्त्वेतानपरान्राजन्नागान्नीलान्शतानिह। प्रेक्षसे वर्मसंछन्नान्किरातैः समधि
ष्ठितान्। किरातराजो यान्प्रादाद्द्विजैरदान्सव्यसाचिनः। अलंकृतांस्तथा प्रेष्यान्निच्छन्जीवितमात्मनः। आसन्नेते पुरा राजंस्तव कर्मकरा दृढाः। त्वा
मेवाद्य युयुत्संते पश्य कालस्य पर्ययं। तेषामेते महामात्राः किराता युद्धदुर्मदाः। हस्तिशिक्षाविदश्चैव सर्वे चैवाग्नियोनयः। एते विनिर्जिताः सर्वे सं
ग्रामे सव्यसाचिना। मदर्थमद्य संयत्ता दुर्योधनवशानुगाः। एतान्हत्वा शरै राजन्किरातान्युद्धदुर्मदान्। सैंधवस्य वधे यत्तमनुयास्यामि पांडवं।
ये त्वेते सुमहानागा अंजनस्य कुलोद्भवाः। कर्कशाश्चाविनीताश्च प्रभिन्नकरटामुखाः। जांबूनदमयैः सर्वैर्वर्मभिः सुविभूषिताः। लब्धलक्ष्या रणे रा
जन्नैरावणसमा युधि। उत्तरात्पर्वतादेते भीमैर्दस्युभिरास्थिताः। कर्कशैः प्रवरैर्योधैः कार्ष्णायसतनुच्छदैः। संति गोपानयश्चात्र संति वानरयोनयः
अनेकयोनयश्चान्ये तथा मानुषयोनयः। अनीकं समवर्णानां धूम्रवर्णमुदार्यते। म्लेच्छानां पापकर्तृणां हिमवद्दुर्गवासिनां। एतद्दुर्योधि
नो लब्ध्वा समग्रं राजमंडलं। कृपं च सोमदत्तं च द्रोणं च रथिनां वरं। सिंधुराजं तथा कर्णमवमन्यत पांडवं। कृतार्थमथ चात्मानं मन्यते कालनोदितः। ते
च सर्वे ह्यनुसंप्राप्ता मम नाराचगोचरं। न विमोक्ष्यंति कौरव्य यद्यपि स्युर्मनोजवाः। तेन संभाविता नूनं परवीर्येपि जीविना। विनाशमुपयास्यंति मच्छरो
घनिपीडिताः। ये त्वेते रथिनो राजन्दृश्यंते कांचनध्वजाः। एते दुर्वारणा नाम कांबोजा यदि ते श्रुताः। शूराश्च कृतविद्याश्च धनुर्वेदपरायणाः। संह
ताश्च भृशं त्वेते अन्योन्यस्य हितैषिणः। अक्षौहिण्यश्च संरब्धा धार्तराष्ट्रस्य भारत। यत्ता मदर्थं तिष्ठंति कुरुवीराभिरक्षिताः। अप्रमत्ता महाराज

द्रो०प०
२०१

मामेवप्रत्युपस्थिताः।तांस्त्वहं प्रमथिष्यामि तृणानीव हुताशनः।तस्मात्सर्वानुपासंगान्सर्वोपकरणानि च।रथे कुर्वंतु मे राजन्यथावदुपक
ल्पकाः।अस्मिन्सत्किकिल संमर्दे ग्राह्यं विविधमायुधं।यथोपदिष्टमाचार्यैः कार्यः पंचगुणो रथः।कांबोजैर्हि समेष्यामि तीक्ष्णैराशीविषोपमैः।नानाशस्त्र
समावायैर्विविधायुधयोधिभिः।किरातैश्च समेष्यामि विषकल्पैः प्रहारिभिः।लालितैः सततं राज्ञा दुर्योधनहितैषिभिः।शकैश्चापि समेष्यामि शक्र
तुल्यपराक्रमैः।अग्निकल्पैर्दुराधर्षैः प्रदीप्तैरिव पावकैः।तथान्यैर्विविधैर्योधैः कालकल्पैर्दुरासदैः।समेष्यामि रणे राजन्बहुभिर्युद्धदुर्मदैः।तस्माद्वै वा
जिनो मुख्या विश्रांताः शुभलक्षणाः।उपावृत्ताश्च पीताश्च पुनर्युज्यंतु मे रथे।तस्य सर्वानुपासंगान्सर्वोपकरणानि च।रथे चास्थापयद्राजा शस्त्राणि वि
विधानि च।ततस्तान्सर्वतो युक्तान्सदश्वांश्चतुरो जनाः।रसवत्पाययामासुः पानं मदसमीरणं।पीतान्स्नातांश्च जग्ध्वान्नान्समलंकृतान्।विनी
तशल्यांस्तुरगांश्चतुरो हेममालिनः।तान्युक्तान्रूप्यवर्णाभान्विनीतान्शीघ्रगामिनः।संहृष्टमनसोऽव्यग्रान्विधिवत्कल्पितान्रथे।महाध्वजेन सिंहेन
हेमकेसरमालिना।वृतेन केतुना हैमैर्मणिविद्रुमचित्रितैः।पांडुराभ्रप्रकाशाभिः पताकाभिरलंकृतं।हेमदंडोच्छ्रितछत्रं बहुशस्त्रपरिच्छदं।योजयामा
स विधिवद्धेमभांडविभूषितं।दारुकस्यानुजो भ्राता सूतस्तस्य प्रियः सखा।न्यवेदयद्रथं युक्तं वासवस्येव मातलिः।ततः स्नातः शुचिर्भूत्वा कृतकौतुक
मंगलः।स्नातकानां सहस्रस्य स्वर्णनिष्कान्यवेदयत्।आशीर्वादैः परिष्वक्तः सात्यकिः श्रीमतां वरः।ततः समधुपर्कार्हः पीत्वा कैलावतं मधु।लोहि
ताक्षो बभौ तत्र मदविह्वललोचनः।आलभ्य वीरकांस्यं च हर्षेण महतावृतः।द्विगुणीकृततेजा हि प्रज्वलन्निव पावकः।उत्संगे धनुरादाय सशरं रथिनां
वरः।कृतस्वस्त्ययनो विप्रैः कवची समलंकृतः।लाजैर्गंधैस्तथा माल्यैः कन्याभिश्चाभिनंदितः।युधिष्ठिरस्य चरणावभिवाद्य कृतांजलिः।तेन मूर्द्धन्युपाघ्रा
तः आरुरोह रथोत्तमं।ततस्ते वाजिनो हृष्टाः सपुष्टा वातरंहसः।अवायजैत्रमुक्तं तं विकुर्वंतः स सैंधवाः।तथैव भीमसेनोपि धर्मराजेन पूजितः।आया
सात्यकिना सार्द्धमभिवाद्य युधिष्ठिरं।तौ दृष्ट्वा प्रविविक्षंतौ तव सेनामरिंदमौ।सपत्नास्तावकाः सर्वे तस्थुर्द्रोणपुरोगमाः।सन्नद्धमनुगच्छंतं दृष्ट्वा भी
मंससात्यकिः।अभिनंद्य प्रहृष्टात्मा ततो हर्षकरं वचः।अथ हर्षपरीतांगः सात्यकिर्भीममब्रवीत्।त्वं भीम रक्ष राजानमेतत्कार्यतमं हि ते।अहंभि

राम
२०१

त्वांप्रवेक्ष्यामि कालपक्वमिदं बलं ।आयत्यां च तदात्वे च श्रेयो राज्ञो ऽभिरक्षणं ।जानीषे मम वीर्यं त्वं तव चाहमरिंदम ।तस्माद्भीम निवर्तस्व मम चेदिच्छसि
प्रियं ।तथोक्तः सात्यकिं प्राह व्रजत्वं कार्यसिद्धये ।अहं राज्ञः करिष्यामि रक्षां पुरुषसत्तम ।एवमुक्तः प्रत्युवाच भीमसेनं स माधवः ।गच्छ गच्छ द्रुतं पा
र्थ ध्रुवं हि विजयो मम ।यन्मे स्निग्धोनुरक्तश्च त्वमद्य वशगः स्थितः ।निमित्तानि च धन्यानि यथा भीम वदंति मां ।निहते सैंधवे पापे पांडवेन महात्मना ।
परिष्वजिष्ये राजानं धर्मात्मानं न संशयः ।एतावदुक्त्वा भीमं तु विसृज्य च महायशाः ।संप्रैक्षत्तावकं सैन्यं व्याघ्रो मृगगणानिव ।तं दृष्ट्वा प्रविवक्षंतं
सैन्यं तव जनाधिप ।दिदृक्षमर्जुनं राजन्धर्मराजस्य शासनात् ।भूय एवाभवन्मूढं भृशं चाप्यवेक्षत ।ततः प्रयातः सहसा सैन्यं तव स सात्यकिः ।
दिदृक्षुरर्जुनं राजन्धर्मराजस्य शासनात् ॥ ॥इति द्रोणपर्वणि जयद्रथवधे सात्यकिप्रवेशे ॥९॥ संजय उ॥ ॥प्रयाते तव सैन्यं तु युयुधाने युयुत्स
या ।धर्मराजो महाराज ते नानीकेन संवृतः ।प्रायाद्द्रोणरथं प्रेप्सुर्युयुधानस्य पृष्ठतः ।ततः पांचालराजस्य पुत्रः समरदुर्मदः ।प्राक्रोशत्पांडवानीके व
सुदानश्च पार्थिवः ।आगच्छत प्रहरत द्रुतं विपरिधावत ।यथा सुखेन गच्छेत सात्यकिर्युद्धदुर्मदः ।महारथा हि बहवो यतिष्यंत्यस्य निर्जये ।इति ब्रु
वंतो वेगेन निपेतुस्ते महारथाः ।वयं प्रतिजिगीषंतस्तत्र तान्प्रति संगताः ।ततः शब्दो महानासीद्युयुधानरथं प्रति ।आकीर्यमाणा महती तव पु
त्रस्य वाहिनी ।सात्वतेन महाराज शतधा भिव्यशीर्यत ।तस्यां विशीर्यमाणायां शिनेः पौत्रो महारथः ।सप्त वीरान्महेष्वासानग्रानीकेष्वपोथयत् ।
अथान्यानपि राजेंद्र नानाजनपदेश्वरान् ।शरैरनलसंकाशैर्निन्ये यमक्षयं ।शतमेकेन विव्याध शतेनैकं च पत्रिणा ।द्विपारोहान्द्विपांश्चैव
हयारोहान्हयांस्तथा ।रथिनः साश्वसूतांश्च जघान शिनिपुंगवः ।तं तथाद्भुतकर्माणं शरसंघातवर्षिणं ।न केचनाभ्यधावन्वै सात्यकिं तव सैनिकाः ।
ते भीता मृद्यमानाश्च प्रमृष्टा दीर्घबाहुना ।आयोधनं जहुर्वीरा दृष्ट्वा तमतिमानिनं ।तमेकं बहुधापश्यन्मोहितास्तस्य तेजसा ।संग्रामकोविदं वीरं
विचरंतमभीतवत् ।रथैर्विमथिताक्षैश्च भग्ननीडैश्च मारिष ।चक्रैर्विमथितैश्चैव छिन्नैर्ध्वजैश्च विनिपातितैः ।अनुकर्षैः पताकाभिः शिरस्त्राणैः
सकांचनैः ।बाहुभिश्चंदनादिग्धैः सांगदैश्च विशांपते ।हस्तिहस्तोपमैश्चापि भुजगाभोगसन्निभैः ।ऊरुभिः पृथिवी छन्ना मनुजानां नरोत्तम ।शशां

कसन्निभैश्चैव वदनैश्चारुकुंडलैः। पतितैर्ऋषभाक्षाणां संबभावतिमेदिनी। गजैश्च बहुधा छिन्नैः शयानैः पर्वतोपमैः। रराजातिभृशं भूमिर्विकीर्णै
रिव पर्वतैः। तपनीयमयैश्चित्रैर्मुक्ताजालविभूषितैः। उरश्छदैर्विचित्रैश्च व्यशोभंत तुरंगमाः। गतसत्वा महीं प्राप्य प्रमृष्टा दीर्घबाहुना। नानाविधानि
सैन्यानि तव हत्वा तु सात्वतः। प्रविष्टस्तावकं सैन्यं द्रावयित्वा चमूं भृशं। ततस्तेनैव मार्गेण येन यातो धनंजयः। इयेष सात्यकिर्गंतुं ततो द्रोणेन वारि
तः। भारद्वाजं समासाद्य युयुधानः स सात्यकिः। नात्यवर्तत संक्रुद्धो वेलामिव जलाशयः। न्यवारयत्तं रणे द्रोणो युयुधानं महारथं। विव्याध निशितैर्बा
णैः पंचभिर्मर्मभेदिभिः। सात्यकिस्तु रणे द्रोणं राजन्विव्याध सप्तभिः। हेमपुंखैः शिलाधौतैः कंकबर्हिणवाजिभिः। तं षड्भिः सायकैर्द्रोणः साश्वयंतार
मर्दयत्। स तं न ममृषे द्रोणं युयुधानो महारथः। सिंहनादं ततः कृत्वा द्रोणं विव्याध सात्यकिः। दशभिः सप्तभिश्चान्यैः षड्भिरष्टभिरेव च। युयुधानः पु
नर्द्रोणं विव्याध दशभिः शरैः। एकेन सारथिं तस्य चतुर्भिश्चतुरो हयान्। ध्वजं चैकेन बाणेन विव्याध युधि मारिष। तं द्रोणः साश्वयंतारं सरथध्वजमा
शुगैः। त्वरं छादयामास शलभानामिव व्रजैः। तथैव युयुधानोपि द्रोणं बहुभिराशुगैः। आच्छादयदसंभ्रांतस्ततो द्रोण उवाच ह। तवाचार्यो रणं हित्वा
गतः कापुरुषो यथा। वध्यमानं हि मां हित्वा प्रदक्षिणमवर्तत। त्वं हि मे युध्यतो नाद्य जीवन्मोक्ष्यसि माधव। यदि मां त्वं रणे हित्वा न यास्याचार्यवद्द्रुतं।
॥ ॥सात्यकिरु॥ ॥धनंजयस्य पदवीं धर्मराजस्य शासनात्। गच्छामि स्वस्ति ते ब्रह्मन्न मे कालात्ययो भवेत्। आचार्यानुगतो मार्गः शिष्यैरन्वास्यते स
दा। तस्मादेवं प्रयास्यामि यथा मे स गुरुर्गतः॥ ॥संजय उ॥ ॥एतावदुक्त्वा शैनेय आचार्यं परिवर्जयन्। अयात्सहसा राजन्सारथिं चेदमब्रवीत्।
द्रोणः करिष्यते यत्नं सर्वथा मम धारणे। यत्तो याहि रणे सूत शृणु चेदं वचः परं। इदमालोक्यते सैन्यमावंत्यानां महाप्रभं। अस्यानंतरतस्त्वेतद्दाक्षि
णात्यं महद्बलं। तदनंतरमेतच्च बाह्लीकानां महद्बलं। बाह्लीकाभ्याशतो युक्तं कर्णस्य च महद्बलं। अन्योन्येन हि सैन्यानि भिन्नान्येतानि सारथे। अ
न्योन्यं समुपाश्रित्य न त्यक्ष्यंति रणाजिरं। एतदंतरमासाद्य चोदयाश्वान्प्रहृष्टवत्। मध्यमं जवमास्थाय वह मामत्र सारथे। बाह्लीका यत्र दृश्यंते ना
नाप्रहरणोद्यताः। दाक्षिणात्याश्च बहवः सूतपुत्ररताः सदा। हस्त्यश्वरथसंबाधं यच्चानीकं विलोक्यते। नानादेशसमुत्थैश्च पदातिभिरधिष्ठितं। ए

तावदुक्त्वायंतारंब्राह्मणंपरिवर्जयन्। सव्यतोयात्सयत्तोयंकर्णस्यसुमहद्बलं। तंद्रोणोनुययौक्रुद्धोविकिरन्सायकान्बहून्। युयुधानंमहाबाहुंगच्छं
तमरिमर्दनं। कर्णस्यसैन्यंसुमहदभिहत्यशितैःशरैः। प्राविशद्भारतीसेनामपर्यंतांससात्यकिः। प्रविष्टेयुयुधानेतुसैनिकेषुद्रुतेषुच। अमर्षीकृतवर्माचि
सात्यकिंप्रत्यवारयन्। तमापतंतंविशिखैःषड्भिराहत्यसात्यकिः। चतुर्भिश्चतुरोवाहानाजघानसवीर्यवान्। ततःपुनःषोडशभिर्नतपर्वभिराशुगैः। सा
त्यकिःकृतवर्माणंप्रत्याविध्यस्तनांतरे। सतुद्यमानोविशिखैर्बहुभिस्तिग्मतेजसैः। सात्वतेनमहाराजकृतवर्मानचक्षमे। सवत्सदंतंसंधायजिह्मग
मनलसन्निभं। आकृष्यराजन्नाकर्णंविव्याधोरसिसात्यकिं। सतत्स्यदेहावरणंभित्वादेहंचसायकः। सपत्रपुंखःपृथिवींविवेशारुधिरोक्षितः। अथास्य
बहुभिर्बाणैरछिनत्परमास्त्रवित्। सभागणिगणंराजन्कृतवर्माशिरासनं। विव्याधचरणेराजन्सात्यकिंसत्यविक्रमं। दशभिर्विशिखैस्तीक्ष्णैरतिक्रुद्ध
स्तनांतरे। ततोपतद्धनुस्तस्यकराद्रूमविभेदिनः। निमीलिताक्षःसुचिरंस्थाणुवत्सुचिरंस्थितः। लब्धसंज्ञोमुहूर्त्ताच्चिक्रोधमाहारयत्तदा। ततःशरांणिध
नुषिशाश्यासाक्रिमतांवरः। जघानदक्षिणंबाहुंसात्यकिःकृतवर्मणः। ततोन्यत्सुदृढंवीरोधनुरादायसात्यकिः। व्यसृजद्विशिखांस्तूर्णंशतशोथसह
स्त्रशः। सरथंकृतवर्माणंसमंतात्पर्यवारयन्। छादयित्वारणेत्यर्थंहार्दिक्यंतुससात्यकिः। अथास्यभल्लेनाशिरःसारथेःसमकृंतत। सपपातहतःसूतोहा
र्दिक्यस्यमहारथात्। ततस्तेयंतरिहतेप्राद्रवस्तुरगाभृशं। अथभोजस्तुसंभ्रांतोजग्राहतुरगान्स्वयं। तस्थौवीरोधनुःपाणिस्तंसैन्यान्यभ्यपूजयन्। समुहू
र्तमिवाश्वस्यसदश्वान्समनोदयन्। व्यपतभीरमित्राणामावहन्सुमहद्भयं। सात्यकिश्चाभ्यगात्तस्मात्सतुभीमसुपाद्रवत्। युयुधानोपिराजेंद्रभोजानीका
द्विनिःसृतः। प्रययौत्वरितस्तूर्णंकांबोजस्यमहाचमूं। सतत्रबहुभिःशूरैःसन्निरुद्धोमहारथः। नचचालतदाराजन्सात्यकिःसत्यविक्रमः। संभाव्यचचमूं
द्रोणोभोजेभारंनिवेश्यच। अन्वधावद्रणेयत्तोयुयुधानंयुयुत्सया। तथातमनुधावंतंयुयुधानस्यपृष्ठतः। अवारयंतसंक्रुद्धाःपांडुसैन्येषुहृत्तमाः।
समासाद्यतुहार्दिक्यंरथानांप्रवरंरणे। पांचालाविगतोत्साहाभीमसेनपुरोगमाः। विक्रम्यवारिताराजन्वीरेणकृतवर्मणा। यतमानास्तुतांस्तेवनिष
ण्णतचेतसः। अभितस्तांश्छरौघेणक्लांतवाहानवारयन्। निगृहीतास्तुभोजेनभोजानीकेप्सवोरणे। अतिष्ठन्नार्यवद्वीराःप्रार्थयंतोमहद्यशः॥ ॥

॥ इतिद्रोणपर्वणिसात्यकिप्रवेशे॥ ९९॥ धृतराष्ट्रउ॥ ॥ एवंबहुविधंसैन्यमेवंप्रविदितंवरं। व्यूढमेवंयथान्यायमेवंबहुत्वसंजय। नित्यंपूजितमस्माभिरभि
कामंचसर्वदा। प्रौढमत्यद्भुताकारंपुरस्ताद्दृष्टविक्रमं। नातिवृद्धमबालंचनकृशंनचपीवरं। लघ्ववृत्तायतप्राणंसारगात्रमनामयं। आत्तसन्नाहसंपन्नं
बहुशस्त्रपरिच्छदं। शस्त्रग्रहणविद्यासुबह्वीषुपरिनिष्ठितं। आरोहेपर्यवस्कंदेसरणेसांतरप्लुते। सम्यक्प्रहरणेयानेव्यपयानेचकोविदं। नागेष्वश्वेषु
बहुशोरथेषुचपरीक्षितं। परीक्ष्यचयथान्यायंवेतनेनोपपादितं। नगोष्ठ्यानोपचारेणनसंबंधनिमित्ततः। नानाहूतोनचभृतोममसैन्येबभूवह। कुली
नार्यजनोपेतंतुष्टपुष्टमनुद्धतं। कृतमानोपचारंचयशस्विचमनस्विच। सचिवैश्चापरैर्मुख्यैर्बहुभिःपुण्यकर्मभिः। लोकपालोपमैस्तातपालितंनरसत्तमैः
बहुभिःपार्थिवैर्गुप्तमस्मत्प्रियचिकीर्षुभिः। अस्मानभिसृतैःकामात्सबलैःसपदानुगैः। महोदधिमिवापूर्णमापगाभिःसमंततः। अपक्षैःपक्षिसंकाशैरथै
रश्वैश्चसंवृतं। योधाक्षय्यजलंभीमंवाहनोर्मितरंगिणं। क्षेपण्यसिगदाशक्तिशरप्रासझषाकुलं। ध्वजभूषणसंबाधंरत्नपट्टेनसंचितं। वाहनैरभिधावद्भि
र्वायुवेगैर्विकंपितं। द्रोणगंभीरपातालंकृतवर्ममहाह्रदं। जलसंधमहाग्राहंकर्णचंद्रोदयोद्धतं। गतेसैन्यार्णवंभित्वातरसापांडवर्षभे। संजयैकरथेनेवयु
युधानेचमामकं। तत्रशेषंनपश्यामिप्रविष्टेसव्यसाचिना। सात्वतेचरथोदारेममसैन्यस्यसंजय। तौतत्रसमतिक्रांतौदृष्ट्वाभीतौतरस्विनौ। सिंधुराजंचसंप्रे
क्ष्यगांडीवस्यचगोचरं। किंतदाकुरवःकृत्यंविदधुःकालनोदिताः। दारुणेकायनेकालेकथंवाप्रतिपेदिरे। ग्रस्तान्हिकौरवान्मन्येमृत्युनातातसंगतान्। विक्र
मोहिरणेतेषांनतथादृश्यतेद्यवै। अक्षतौसंयुगेतत्रप्रविष्टौकृष्णपांडवौ। नचवारयिताकश्चित्तयोरस्तीहसंजय। भृताश्चबहवोयोधाःपरीक्ष्यैवमहारथाः।
वेतनेनयथायोग्यंप्रियवादेनचापरे। अकारणभृतस्तातममसैन्येनविद्यते। कर्मणाप्रतिरूपेणलभ्यतेभक्तवेतनं। नचयोधोऽभवत्कश्चिन्ममसैन्येतु
संजय। अल्पदानभृतस्ताततथावाभृतकोनरः। पूजिताहियथाशक्त्यादानमानासनैर्मया। तथापुत्रैश्चमेतातज्ञातिभिश्चसबांधवैः। तेचप्राप्यैवसंग्रा
मेनिर्जिताःसव्यसाचिना। शैनेयेनपरामृष्टाः किमन्यद्भागधेयतः। रक्ष्यतेयश्चसंग्रामेयेचसंजयरक्षिणः। एकःसाधारणःपंथाःरक्ष्यस्यसहरक्षिभिः।
अर्जुनंसमरेदृष्ट्वासैंधवस्याग्रतःस्थितं। पुत्रोममभृशंमूढः किंकार्यंप्रत्यपद्यत। सात्यकिंचरणेदृष्ट्वाप्रविशंतमभीतवत्। किंनुदुर्योधनःकृत्यंप्राप्त

पुरायदुच्यसे प्राज्ञैः सुहृद्भिर्विदुरादिभिः। माहार्षीः पांडवान्राजन्निति तन्नत्वया श्रुतं। सुहृदां हितकामानां वाक्यं यो न शृणोति ह। समहद्व्यसनं प्राप्य शोचते वै यथा भवान्। याचितोसि पुरा राजन्दाशार्हेण शमं प्रति। न च तं लब्धवान्कामं त्वत्तः कृष्णो महायशाः। ११

कालमंमन्यता सर्वशस्त्रास्त्रसंपन्नो प्रविष्टो रथमुत्तमो। दृष्ट्वा कां वै मतिं युद्धे प्रत्यपद्यंत मामकाः। दृष्ट्वा कृष्णं तु दाशार्हमर्जुनार्थे व्यवस्थितं। शिनीनामृषभं चैव मन्ये शोचंति पुत्रकाः। दृष्ट्वा सेनामतिक्रांतौ सात्वतेनार्जुनेन च। पलायमानांश्च कुरून्मन्ये शोचंति पुत्रकाः। विद्रुतान्रथिनो दृष्ट्वा निरुत्साहान्द्विषज्जये। पलायने कृतोत्साहान्मन्ये शोचंति पुत्रकाः। शून्यान्कृतान्रथोपस्थान्सात्वतेनार्जुनेन च। हतांश्च योधान्संदृश्य मन्ये शोचंति पुत्रकाः। व्यश्वनागरथान्दृष्ट्वा तत्र वीरान्सहस्रशः। धावमानान्रणे व्यग्रान्मन्ये शोचंति पुत्रकाः। विवीरांश्च कृतानश्वान्विरथांश्च कृतान्नरान्। तत्र सात्यकिपार्थाभ्यां मन्ये शोचंति पुत्रकाः। महानागान्विद्रवतो दृष्ट्वार्जुनशराहतान्। पतितान्पततश्चान्यान्मन्ये शोचंति पुत्रकाः। संमूढोस्मि भृशं तात श्रुत्वा कृष्णधनंजयौ। प्रविष्टौ मामकं सैन्यं मन्ये शोचंति पुत्रकाः। पत्तिसंघान्बहून्दृष्ट्वा धावमानांश्च सर्वशः। निराशा विजये सर्वे मन्ये शोचंति पुत्रकाः। द्रोणस्य समतिक्रांतावनीकमपराजितौ। क्षणेन दृष्ट्वा तौ वीरौ मन्ये शोचंति पुत्रकाः। संमूढोस्मि भृशं तात श्रुत्वा कृष्णधनंजयौ। प्रविष्टौ मामकं सैन्यं सात्वतेन सहाच्युतौ। तस्मिन्प्रविष्टे पृतनां शिनीनां प्रवरे रथे। भोजानीकमतिक्रांते कथमासन्हि कौरवाः। तथा द्रोणेन समरे निगृहीतेषु पांडुषु। कथं युद्धमभूत्तत्र तन्ममाचक्ष्व संजय। द्रोणो हि बलवाञ्शूरः कृतास्त्रो दृढविक्रमः। पांचालास्तं महेष्वासं प्रत्यविध्यंत मद्द्रुहः। कृतवैरास्तथा द्रोणो धर्मराजजयैषिणः। भारद्वाजस्ततस्तेषु दृढवैरो महारथः। अर्जुनश्चापि तच्चक्रे सिंधुराजवधं प्रति। तन्मे सर्वं समाचक्ष्व कुशलो ह्यसि संजय॥ ॥ इति द्रोणपर्वणि ॥ ॥ संजय उ॰॥ ॥ आत्मापराधसंपन्नं व्यसनं भरतर्षभ। आप्य प्राकृतवद्वीर न त्वं शोचितुमर्हसि। तव निर्गुणतां शौलापक्षपातं कृतेषु ते। द्वैधीभावं तथा सर्वं पांडवेषु च मत्सरं। आर्तप्रलापांश्च बहून्मनुजाधिपसत्तम। सर्वलोकस्य तत्त्वज्ञः सर्वलोकेश्वरः प्रभुः। वासुदेवस्ततो युद्धं कुरूणामकरोन्महत्। आत्मापराधेन महान्प्राप्तस्ते विपुलः क्षयः। निहतैः सकले क्षत्रे आदिमध्येषु भारत। दृश्यते पृष्ठतश्चैव त्वन्मूलो हि पराजयः। तस्माद्भव स्थिरो भूत्वा ज्ञात्वा लोभस्य निर्णयं। श्रुत्वा चैव यथा वृत्तं युद्धं देवासुरोपमं। प्रविष्टे तव सैन्यं तु शैनेये सत्यविक्रमे। भीमसेनमुखाः पार्थाः प्रतीयुर्वाहिनीं तव। समागतांस्तान्सहसा क्रुद्धरूपान्महारथान्। दधारैको रणे पांडून्कृतवर्मा महारथः। यथाब्धिं संधारयते वेला वै सलिलार्णवं। पांडुसैन्यं तथा संख्ये हार्दिक्यः समधारयत्। तत्राद्भुतममन्यंत हार्दिक्यस्य पराक्रमं। यदेनं सहिताः पार्था ना

नहि तेसुकृतं किंचिदादौ ४

तव जिह्मभिप्रायविहितापांडवान्प्रति। नैनं दुर्येधिने दोषं वक्तुमर्हसि मानद ।

तिचक्रमुराहवे।ततोभीमस्त्रिभिर्विद्ध्वाकृतवर्माणमाशुगैः।शंखंदध्मौमहाराँबाहूर्हर्षयन्सर्वपांडवान्।सहदेवस्ततोविंशत्याधर्मराजश्चपंचभिः।
शतेननकुलश्चापिहार्दिक्यंसमविध्यत।द्रौपदेयास्त्रिसप्तत्यासप्तभिश्चघटोत्कचः।धृष्टद्युम्नस्त्रिभिश्चापिकृतवर्माणमर्दयत्।विराटोद्रुपदश्चै
वयाज्ञसेनिश्चपंचभिः।शिखंडीचैवहार्दिक्यंविद्ध्वापंचभिराशुगैः।पुनर्विव्याधविंशत्यासायकानांहसन्निव।कृतवर्मात्ततोराजन्सर्वतस्तान्म
हारथान्।एकैकंपंचभिर्विद्ध्वाभीमंविव्याधसप्तभिः।धनुर्ध्वजं=चास्ययत्तोरथाद्भूमावपातयत्।=अथैनंछिन्नधन्वानंत्वरमाणोमहारथः।आ
जघानोरसिक्रुद्धःसप्तत्यानिशितैःशरैः।सगाढविद्धोबलवान्हार्दिक्यस्यशरोत्तमैः।चचालरथमध्यस्थःक्षितिकंपेयथाचलः।भीमसेनंतथा
दृष्ट्वाधर्मराजपुरोगमाः।विसृजंतःशरान्घोरान्कृतवर्माणमार्दयन्।तंतथाकोष्ठकीकृत्यरथवंशेनमारिष।विव्यधुःसायकैर्हृष्टारक्षार्थंमारु
तेर्मृधे।प्रतिलभ्यततःसंज्ञांभीमसेनोमहाबलः।शक्तिंजग्राहसमरेरुक्मदंडामयस्मयीं।चिक्षेपसरथात्तूर्णंकृतवर्मरथंप्रति।साभीमभु
जनिर्मुक्तानिर्मुक्तोरगसन्निभा।कृतवर्माणमभितःप्रजज्वालसुदारुणा।सानिःपतंतीसहसायुगांताग्निसमप्रभां।द्वाभ्यांशराभ्यांहार्दि
क्योनिजघानद्विधातदा।साभिन्नापतिताभूमौशक्तिःकनकभूषणा।द्योतयंतीदिशोराजन्महोल्केवनभश्च्युता।शक्तिंविनिहतांदृष्ट्वाभीम
श्चक्रोधवैभृशं।ततोन्यद्धनुरादायवेगवद्यत्सुमहास्वनं।भीमसेनोरणेक्रुद्धोहार्दिक्यंसमवारयत्।=अथैनंपंचभिर्बाणैराजघानस्तनां
तरे।भीमोभीमबलोराजंस्तवदुर्मंत्रितेनह।भोजस्तुक्षतसर्वांगोभीमसेनेनमारिष।रक्ताशोकइवोत्फुल्लोव्यभ्राजतरणाजिरे।ततःक्रुद्ध
स्त्रिभिर्बाणैर्भीमसेनंहसन्निव।=अभिहत्यदृढंयुद्धेतान्सर्वान्प्रत्ययुध्यत।त्रिभिस्त्रिभिर्महेष्वासोयतमानान्महारथान्।तेपितंप्रत्यविध्यं
तसप्तभिःसप्तभिःशरैः।शिखंडिनस्ततःक्रुद्धःक्षुरप्रेणमहारथः।धनुश्चिच्छेदसमरेप्रहसन्निवभारत।शिखंडीतुततःक्रुद्धःछिन्नेधनुषि
सत्वरः।=असिंजग्राहसमरेशतचंद्रंचभास्वरं।भ्रामयित्वामहाखड्गंचामीकरविभूषितं।तमसिंप्रेषयामासकृतवर्मरथंप्रति।सतस्यस

शरंचापंछित्वाराजन्महानसिः। अभ्यगाद्रथीराजन्स्रुतंज्योतिरिवांबरात्। एतस्मिन्नेवकालेतुत्वरमाणामहारथाः। विव्यधुःसायकैर्गा
ढंकृतवर्माणमाहवे। अथान्यद्धनुरादायत्यक्त्वातच्चमहद्धनुः। विशीर्णंभरतश्रेष्ठहार्दिक्यःपरवीरहा। विव्याधपांडवान्युद्धेत्रिभिस्त्रिभि
रजिह्मगैः। शिखंडिनंचविव्याधत्रिभिःपंचभिरेवच। धनुरन्यत्समादायशिखंडीतुमहायशाः। अवारयत्कूर्मनखैराशुगैर्हृदिकात्मजं।
ततःक्रुद्धोरथश्लाघीहृदिकस्यात्मसंभवः। अभिदुद्राववेगेनयाज्ञसेनिंमहारथं। भीष्मस्यसमरेराजन्मृत्योर्हेतुंमहात्मनः। विदर्शयि
न्बलंशूरोशार्दूलइवकुंजरं। तौदिशागजसंकाशौज्वलिताविवपावकौ। समासेदतुरन्योन्यंशरसंघैररिंदमौ। विन्वानौधनुःश्रेष्ठेसंदधा
नौचसायकान्। विसृजंतौचशतशोगभस्तीनिवभास्करौ। तापयंतौशरैस्तीक्ष्णैरन्योन्यंतौमहारथौ। युगांतप्रतिमौवीरौरेजतुर्भास्करावि
वा। कृतवर्मातुरभसंयाज्ञसेनिंमहारथं। विध्वेषूणांत्रिसप्तत्यापुनर्विव्याधसप्तभिः। सगाढविद्धोव्यथितोरथोपस्थउपाविशत्। विसृज्यसश
रंचापंमूर्छयाभिपरिप्लुतः। तंविध्वेषूणांरथेदृष्ट्वातावकाभरतर्षभ। हार्दिक्यंपूजयामासुर्वासांस्याडुधुवुश्चह। शिखंडिनंरथेदृष्ट्वाहार्दिक्य
शरपीडितं। अपोवाहद्ध्याद्यंतात्वरमाणोमहारथं। सादितंतुरथोपस्थेदृष्ट्वापार्थाःशिखंडिनं। परिवव्रुरथैस्तूर्णंकृतवर्माणमाहवे। तत्रा
द्भुतंपरंचक्रेकृतवर्मामहारथः। यदेकःसमरेपार्थान्वारयामाससानुगान्। पार्थान्निर्जित्वाजयच्चेदीन्पांचालान्सृंजयानपि। केकयांश्चमहा
वीर्यान्कृतवर्मामहारथः। तेवध्यमानाःसमरेहार्दिक्येनमहात्मना। इतश्चेतश्चधावंतोनैवचक्रुर्धृतिंरणे। जित्वापांडुसुतान्युद्धेभीमसेन
पुरोगमान्। हार्दिक्यःसमरेतिष्ठद्विधूमइवपावकः। तेद्राव्यमाणाःसमरेहार्दिक्येनमहारथाः। विमुखाःसमपद्यंतशरवृष्टिभिरर्दिताः॥ ॥
॥ ॥इतिद्रोणपर्वणिजयद्रथवधेसात्यकिप्रवेशे॥ ९३॥ संजयउ.॥ ॥शृणुष्वैकमनाराजन्यन्मांत्वंपरिपृच्छसि। द्राव्यमाणेबलेतस्मिन्
हार्दिक्येनमहात्मना। लज्जयावनतेचापिप्रहृष्टैश्चापितावकैः। द्वीपायआसी त्पांडूनामगाधेगाधमिच्छतां। श्रुत्वातुनिनदंभीमंतावका

नांमहाहवे। शैनेयस्त्वरितोराजन्कृतवर्माणमभ्ययात्। उवाचसारथिंतत्रक्रोधामर्षसमन्वितः। हार्दिक्याभिमुखंसूतकुरुमेरथमुत्तमं।
क्रूरंतेकदनंपत्र्यपांडुसैन्येत्वमर्षणाः। एनंजित्वापुनःसूतयास्यामिविजयंप्रति। एवमुक्तेतुवचनेसूतस्तस्यमहामतेः। निमेषांतरमात्रेण
कृतवर्माणमभ्ययात्। कृतवर्मातुहार्दिक्यःशैनेयंनिशितैःशरैः। अवाकिरत्सुसंक्रुद्धस्ततोयुध्यत्तसात्यकिः। ततःसुनिशितंभल्लंशै
नेयःकृतवर्मणः। प्रेषयामाससमरेशरांश्चचतुरोपरान्। ततस्यजघ्निरेवाहान्भल्लेनाभ्याछिनद्धनुः। पृष्ठरक्षंतथासूतमवध्यान्निशितैः
शरैः। ततस्तंविरथंकृत्वासात्यकिःसत्यविक्रमः। सेनामभ्यर्दयामासशरैःसन्नतपर्वभिः। साभज्यथपृतनाशैनेयशरपीडिता। ततःप्रा
याद्धैत्वरितःसात्यकिःसत्यविक्रमः। शृणुराजन्यदकरोत्तवसैन्येषुवीर्यवान्। अतीत्यसहसा ×ता× राजन्द्रोणानीकंमहाहवे। पराजि
त्यसुसंहृष्टःकृतवर्माणमाहवे। यंतारमब्रवीच्छूरंशैनेयहित्यसंभ्रमं। दृष्ट्वातुतवतत्सैन्यंरथाश्वद्विपसंकुलं। पदातिजनसंपूर्णम
ब्रवीत्सारथिंपुनः। यदेतन्मेघसंकाशंद्रोणानीकस्यपृष्ठतः। सुमहत्कुंजरानीकंयस्यरुक्मरथोमुखे। एतेहिबहवःसूतदुर्निवार्याश्चसं
युगे। दुर्योधनसमादिष्टामदर्थेत्यक्तजीविताः। राजपुत्रामहेष्वासाःसर्वेविक्रांतयोधिनः। त्रिगर्तानांरथोदाराःसुवर्णविकृतध्वजाः।
मामेवाभिमुखावीरायोत्स्यमानाव्यवस्थिताः। अत्रमांप्रापयक्षिप्रमश्वान्नोदयसारथे। त्रिगर्तैःसहयोत्स्यामिभारद्वाजस्यपश्यतः। ततः
प्रायाच्छनैःसूतःसात्वतस्यवशेस्थितः। रथेनादित्यवर्णेनभास्वरेणपताकिना। तमूहुःसारथेर्वश्यावल्गमानाहयोत्तमाः। वायुवेगसमाः
संख्येकुंदेंदुरजतप्रभाः। आपतंतंरथंतत्रशंखवर्णैर्हयोत्तमैः। परिवव्रुस्ततःशूराःगजानीकेनसर्वशः। किरंतोविविधांस्तीक्ष्णान्साय
कान्लघुवेगिनः। सात्वतोनिशितैर्बाणैर्गजानीकमयोधयत्। पर्वतानिववर्षेणतपांतेजलदोमहान्। तेशशानिसमस्पर्शैर्वध्यमा
नाःशरैर्गजाः। प्राद्रवन्रणमुत्सृज्यशिनिवीर्यसमीरितैः। शीर्णदंताविरुधिराभिन्नमस्तकपिंडकाः। विशीर्णकर्णास्यकराविनियंतृप

ताकिनः। संभिन्नवर्मघंटाश्च सन्निवृत्तमहाध्वजाः। हतारोहा दिशो राजनूजलदोपमनिस्वनाः। नाराचैर्वत्सदंतैश्च सात्वतेन विदारिताः। तस्मि
न्नगजानीके भग्ने जलसंधो महारथः। यत्तः संप्रापयन्नागं रजताश्वरथं प्रति। रुक्मवर्मरथः शूरस्तपनीयांगदः शुचिः। कुंडली मुकुटी खड्गी
रक्तचंदनभूषितः। शिरसा धारयन्दीप्तां तापनीयमयीं स्रजं। उरसा धारयन्निष्कं कंठसूत्रं च भास्वरं। चापं च रुक्मविकृतं विधुन्वन्नाग
मूर्द्धनि। अशोभत महाराज सविद्युदिव तोयदः। तमापतंतं सहसा मागधस्य गजो त्तमं। सात्यकिर्वारयामास वेलेवोद्धूतमर्णवं। ना
गं निवारितं दृष्ट्वा शैनेयस्य शरोत्तमैः। अक्रुध्यत रणे राजनूजलसंधो महारथः। ततः क्रुद्धो महेषासो मार्गणैर्भारसाधनैः। अविध्यत
शिनेः पौत्रं जलसंधो महोरसि। ततोऽपरेण भल्लेन पीतेन निशितेन च। पश्यतो वृष्णिवीरस्य निचकर्त शरासनं। सात्यकिः छिन्नधन्वा तं प्र
हसन्निव भारत। ततो रुक्मांगदं चापं विधुन्वानो महारथः। अविध्यन्माधवो वीरः पंचभिर्निशितैः शरैः। आविद्धो बहुभिर्बाणैर्जलसं
धेन वीर्यवान्। नाकंपत महाबाहुस्तदद्भुतमिवाभवत्। अचिंतयन्वै सत्वारमत्यर्थं संभ्रमाद्बली। धनुरन्यत्समादाय तिष्ठ तिष्ठेत्युवाच ह।
एतावदुक्त्वा शैनेयो जलसंधं महारथं। विव्याध षष्ट्या सुभृशं शराणां प्रहसन्निव। क्षुरप्रेणासुतीक्ष्णेन मुष्टिदेशे महद्धनुः। जलसंधस्य
चिच्छेद विव्याध दशभिः शरैः। जलसंधस्ततस्त्यक्त्वा सशरं वै शरासनं। तोमरं व्यसृजत्तूर्णं सात्यकिं प्रति मारिष। स निर्भिद्य भुजं सव्यं
माधवस्य महारणे। अभ्यगाद्धरणीं घोरः श्वसन्निव महोरगः। निर्भिन्ने तु भुजे सव्ये सात्यकिः सत्यविक्रमः। त्रिंशद्भिर्विशिखैस्तीक्ष्णैर्ज
लसंधमताडयत्। प्रत्यगृह्णात्ततः खड्गं जलसंधो महाबलः। आर्षभं चर्म च महच्छतचंद्रमलंकृतं। तत आविध्य तं खड्गं सात्वतायोत्सस
र्ज ह। शैनेयस्य धनुश्छित्वा स खड्गोऽन्यपतद्भुवि। अलातचक्रवच्चैव व्यरोचत महीगतः। अथान्यद्धनुरादाय सर्वकायावदारणं। शा

लस्कंधप्रतीकाशमिंद्राशनिसमस्वनं।विस्फार्यविव्याधकुद्धोजलसंधंशरेणह।ततःसाभरणौबाहूक्षुराभ्यांमाधवोत्तमः।सांगदौजलसंधस्य
चिच्छेदप्रहसन्निव।तौबाहूपरिघप्रख्यौपेततुर्गजसत्तमात्।वसुंधराधराद्भ्रष्टौपंचशीर्षाविवोरगौ।ततःसुदंष्ट्रंसुहनुचारुकुंडलमुन्नमं।क्षु
रेणास्यतृतीयेनशिरश्चिच्छेदसात्यकिः।तंत्याजितशिरोबाहुकवचंभीमदर्शनं।द्विरदंजलसंधस्यरुधिरेणाभ्यषिंचत।जलसंधंनिहत्या
जौत्वरमाणस्तुसात्वतः।विमानंपातयामासगजस्कंधाद्विशांपते।रुधिरेणावसिक्तांगोजलसंधस्यकुंजरः।विलंबमानमवहत्तंश्लिष्टपरमा
सनं।शरार्दितःसात्वतेननर्दमानश्चवाहिनीं।घोरमार्तस्वरंकृत्वाविदुद्रावमहागजः।हाहाकारोमहानासीत्तवसैन्यस्यमारिष।जलसंधं
हतंदृष्ट्वावृष्णीनांप्रवरेणतु।विमुखाश्चाभिधावंततवयोधाःसमंततः।पलायनकृतोत्साहानिरुत्साहाद्विषज्जये।एतस्मिन्नंतरेराजन्
द्रोणःशस्त्रभृतांवरः।अभ्ययाज्जवनैरश्वैर्युयुधानंमहारथं।तमुदीर्णंतथादृष्ट्वाशैनेयंकुरुपुंगवाः।द्रोणेनैवसहकुद्धाःसात्यकिंपर्यवा
रयन्।ततःप्रववृतेयुद्धंकुरूणांसात्वतस्यच।द्रोणस्यचरणेराजन्घोरंदेवासुरोपमं॥ ॥संजयउ०॥ ॥तेकिरंतःशरव्रातान्सर्वेयत्ताः
प्रहारिणः।त्वरमाणामहाराजयुयुधानमयोधयन्।तंद्रोणःसप्तसप्तत्यानिजघानशितैःशरैः।दुर्मर्षणोद्वादशभिर्दुःसहोदशभिःश
रैः।विकर्णश्चापिनिशितैस्त्रिंशद्भिःकंकपत्रिभिः।विव्याधसव्येपार्श्वेतुस्तनाभ्यामंतरेतथा।दुर्मुखोदशभिर्बाणैस्तथादुःशासनस्त्रि
भिः।चित्रसेनश्चशैनेयंद्वाभ्यांविव्याधमारिष।दुर्योधनश्चमहताशरवर्षेणमाधवं।अपीडयद्रणेराजञ्छूराश्चान्येमहारथाः।सर्वतः
प्रतिविद्धस्तुतवपुत्रैर्महारथैः।तान्प्रत्यविध्यद्वार्ष्णेयःपृथक्पृथगजिह्मगैः।भारद्वाजंत्रिभिर्बाणैर्दुःसहंनवभिःशरैः।विकर्णंपंचविं
शत्या।चित्रसेनंचसप्तभिः।दुर्मर्षणंद्वादशभिश्चतुर्भिश्चविविंशतिं।सत्यव्रतंचनवभिर्विजयंदशभिःशरैः।ततोरुक्मांगदंचापंवि

धुन्वानोमहारथः। अभ्ययात्सात्यकिस्तूर्णंतवपुत्रंमहारथं। राजानंसर्वलोकस्यसर्वलोकमहारथं। शरैरभ्याहनद्गाढंततोयुद्धमभूत्तयोः।
विमुंचंतौशरांस्तीक्ष्णान्संदधानौचसायकान्। अदृश्यंसमरेन्योन्यंचक्रतुस्तौमहारथौ। सात्यकिःकुरुराजेननिर्विद्धोबह्वशोभत। अ
स्रवद्रुधिरंभूरिस्वरसंचंदनोयथा। सात्वतेनचबाणौघैराविद्धस्तनयस्तव। शातकौंभमयापीडोबभौयूपइवोच्छ्रितः। माधवस्तुरणे
राजन्कुरुराजस्यधन्विनः। धनुश्चिच्छेदसमरेक्षुरप्रेणहसन्निव। अथैनंछिन्नधन्वानंशरैर्बहुभिराचिनोत्। निर्भिन्नश्चशरैस्ते
नद्विषताक्षिप्रकारिणा। नामृष्यतरणेराजाशत्रोर्विजयलक्षणं। अथान्यद्धनुरादायहेमपृष्ठंदुरासदं। विव्याधसात्यकिंतूर्णंसाय
कानांशतेनह। सोतिविद्धोबलवतापुत्रेणतवधन्विना। अमर्षवशमापन्नस्तवपुत्रमपीडयत्। पीडितंनृपतिंदृष्ट्वातवपुत्रामहा
रथाः। सात्वतंशरवर्षेणछादयामासुरंजसा। सछाद्यमानोबहुभिस्तवपुत्रैर्महारथैः। एकैकंपंचभिर्विद्ध्वापुनर्विव्याधसप्तभिः। दुर्यो
धनंसत्वरितोविव्याधाष्टभिराशुगैः। प्रहसंश्चास्यचिच्छेदकार्मुकंरिपुभीषणं। नागंमणिमयंचैवशरैर्ध्वजमपातयत्। हत्वाचच
तुरोवाहांश्चतुर्भिर्निशितैःशरैः। सारथिंपातयामासक्षुरप्रेणमहायशाः। एतस्मिन्नंतरेचैवकुरुराजंमहारथं। अवाकिरच्छरैर्हृष्टो
बहुभिर्मर्मभेदिभिः। सविध्यमानःसमरेशैनेयस्यशरोत्तमैः। प्राद्रवत्समहाराजपुत्रोदुर्योधनस्तव। आप्लुतश्चततोयानंचि
त्रसेनस्यधन्विनः। हाहाभूतंजगच्चासीद्दृष्ट्वाराजानमाहवे। ग्रस्यमानंसात्यकिनाखेसोममिवराहुणा। तंतुशब्दंमहच्छ्रुत्वाकृत
वर्मामहारथः। अभ्ययात्सहसातत्रयत्रास्तेमाधवःप्रभुः। विधुन्वानोधनुःश्रेष्ठंनोदयंश्चैववाजिनः। भर्त्सयन्सारथिंचाग्रयाहि

याहीति सत्वरं। तमापतंतं संप्रेक्ष्य व्यादितास्यमिवांतकं। युयुधानो महाराज यंतारमिदमब्रवीत्। कृतवर्मा तिथैवेष हृत्तमापतते शरी। प्रत्युद्याहि र
थेनैवं प्रवरं सर्वधन्विनां। ततः प्रजविताश्वेन विधिवत्कल्पितेन च। आससाद रणे भोजं प्रतिमानं धनुष्मतां। ततः परमसंक्रुद्धौ ज्वलिताविव पा
वकौ। समेयातां नरव्याघ्रौ व्याघ्राविव तरस्विनौ। कृतवर्मा तु शैनेयं षड्विंशत्या समर्पयत्। निशितैः सायकैस्तीक्ष्णैर्यंतारं चास्य सप्तभिः।
चतुरश्चतुरो वाहान् चतुर्भिः परमेषुभिः। अविध्यत्साधुदांतान्वै सैंधवान्सात्वतस्य हि। रुक्मध्वजो रुक्मपृष्ठं महद्विस्फार्य कार्मुकं। रुक्मां
गदो रुक्मवर्मा रुक्मपुंखानवाकिरत्। ततोशीतिं शिनेः पौत्रः सायकान्कृतवर्मणः। आहिणोत्त्वरया युक्तो द्रष्टुकामो धनंजयं। सोतिवि
द्धो बलवता शत्रुणा शत्रुतापनः। समकंपत दुर्धर्षः क्षितिकंपे यथाचलः। त्रिषष्ट्या चतुरोस्याश्वान्सप्तभिः सारथिं शरैः। विव्याध निशितैस्तू
र्णं सात्यकिः कृतवर्मणः। रुक्मपुंखं विशिखं समादाय स सात्यकिः। व्यसृजत्तं महाज्वालं संक्रुद्धमिव पन्नगं। सोविशत्कृतवर्माणं यमदं
डोपमः शरः। जांबूनदविचित्रं हि वर्म निर्भिद्य भानुमत्। अभ्यगाद्धरणीमुग्रो रुधिरेण समुक्षितः। संजातरुधिरस्त्वाजौ सात्वतेषुभिर
र्दितः। प्रचलंश्चापि संभ्रांतो न्यपतत्स्यंदनोत्तमे। स सिंहदंष्ट्रो जानुभ्यामापन्नोमितविक्रमः। शरार्दितः सात्यकिना रथोपस्थे नरर्षभः।
सहस्रबाहुसदृशमक्षोभ्यमिव सागरं। निवार्य कृतवर्माणं सात्यकिः प्रययौ ततः। शरवरशक्तिधनुःकीर्णं गजाश्वरथसंकुलं। प्रवर्तिताग्र
रुधिरं शतशः क्षत्रियर्षभैः। प्रेक्ष्यतां सर्वसैन्यानां मध्येन शिनिपुंगवः। अभ्यगाद्वाहिनीं भित्वा वृत्रघ्नो दैत्यपुरीमिव। समाश्वस्य च हार्दि
क्यो गृह्य चान्यन्महद्धनुः। तस्थौ तत्र बलवान्वारयन्युधि पांडवान्॥ ॥इति द्रोणपर्वणि सात्यकिप्रवेशे॥१९॥ संजय उ०॥ ॥काल्यमा
नेषु सैन्येषु शैनेयेन ततस्ततः। भारद्वाजः शरव्रातैर्महद्भिश्छत्रमवाकिरत्। स संप्रहारस्तुमुलो द्रोणमाधवयोरभूत्। पश्यतां सर्वसैन्यानां

वृत्रवासवयोरिव।ततोद्रोणःशिनेःपौत्रंचित्रंसंधायवीर्यवान्।त्रिभिराशीविषाकारैर्ललाटेसमविध्यत।तैर्ललाटार्पितैर्बाणैर्युयुधानस्त्वजि
ह्मगैः।व्यरोचतमहाराजत्रिशृंगइवपर्वतः।ततोस्यबाणानपरानिंद्राशनिसमस्वनान्।भारद्वाजोंतरप्रेक्षीप्रेषयामाससंयुगे।द्रोणचापवि
निर्मुक्तान्दाशार्हःपततःशरान्।द्वाभ्यांद्वाभ्यांसुपुंखाभ्यांबिभेदपरमास्त्रवित्।तामस्यलघुतांद्रोणःसमवेक्ष्यविशांपते।प्रहस्यसहसा
विध्यद्विंशत्याशिनिपुंगवं।पुनःपंचाशतेषूणांशतेनचसमर्पयन्।लघुतांयुयुधानस्यलाघवेनविशेषयन्।समुत्पतंतिहियथाश
लभानांहिपंक्तयः।तस्माद्द्रोणरथाद्राजन्नुत्पतंतितनुच्छिदः।तथैवयुयुधानेनसृष्टाःशतसहस्रशः।अवाकिरद्रोणरथंशरारुधिर
भोजनाः।लाघवात्द्विजमुख्यस्यसात्वतस्यचमारिष।विशेषंनाधिगच्छामःसमावास्तांनरर्षभौ।सात्यकिस्तुततोद्रोणंनवभिर्न
तपर्वभिः।आजघानभृशंक्रुद्धोध्वजंचनिशितैःशरैः।सारथिंचशतेनैवभारद्वाजस्यपश्यतः।लाघवंयुयुधानस्यदृष्ट्वाद्रोणोमहा
रथः।सप्तत्यासात्यकिंविध्वातुरगांश्चत्रिभिस्त्रिभिः।ध्वजमेकेनविव्याधमाधवस्यरथेस्थितं।अथापरेणभल्लेनहेमपुंखेनपत्रिणा।
धनुश्चिच्छेदसमरेमाधवस्यमहात्मनः।सात्यकिस्तुततःक्रुद्धोधनुस्त्यक्त्वामहारथः।गदांजग्राहमहतींभारद्वाजायचाक्षिपत्।ता
मापतंतींसहसापट्टनद्धामयस्मयीं।न्यवारयच्छरैर्द्रोणोबहुभिर्बहुरूपिभिः।अथान्यद्धनुरादायसात्यकिःसत्यविक्रमः।विव्याधब
हुभिर्वीरंभारद्वाजंशिलाशितैः।सविद्ध्वासमरेद्रोणंसनिनादममुंचत।नचैनंममृषेद्रोणःसर्वशस्त्रभृतांवरः।ततःशक्तिंगृहीत्वातु
रुक्मदंडामयस्मयीं।तरसाप्रेषयामासमाधवस्यरथंप्रति।अनासाद्यतुशैनेयंसाशक्तिःकालसन्निभा।भित्वारथंजगामोग्राध
रणींदारुणस्वना।ततोद्रोणंशिनेःपौत्रोराजन्विव्याधपत्रिणा।दक्षिणंभुजमासाद्यापीडयद्भरतर्षभ।द्रोणोपिसमरेराजन्माधवस्य

महद्धनुः॥ अर्द्धचंद्रेण चिच्छेद रथशक्त्या च सारथिं॥ मुमोह सारथिस्तस्य रथशक्त्या समाहतः॥ स रथोपस्थमासाद्य मुहूर्त्तं संन्यषीदत॥ चकार सात्यकी
राजन्तत्र कर्मातिमानुषं॥ अयोधयत्तनो द्रोणं रश्मीञ्जयाह च स्वयं॥ ततः शरशतेनैव युयुधानो महारथः॥ अविध्यद्ब्राह्मणं संख्ये हृष्टरूपो
विशांपते॥ ततो द्रोणः शरान्पंच प्रेषयामास भारत॥ ते घोराः कवचं भित्वा पपुः शोणितमाहवे॥ निर्विद्धः स शरैस्तीक्ष्णैरक्रुध्यत्सात्यकिर्भृशं॥
सायकान्व्यसृजच्चापि वीरो रुक्मरथं प्रति॥ ततो द्रोणस्य यंतारं निपात्यैकेषुणा नरः॥ अश्वान्व्यद्रावयद्बाणैर्हतसूतांस्ततस्ततः॥ स रथः प्रद्रुतः सं
ख्ये मंडलानि सहस्रशः॥ चचार जवनो राजन्भ्राजमान इवांशुमान्॥ अभिद्रवत गृह्णीत हयान्द्रोणस्य धावत॥ इति स्म चुक्रुशुः सर्वे राजपुत्राः स
राजकाः॥ ते सात्यकिमपास्याशु राजन्युधि महारथाः॥ यतो द्रोणस्ततः सर्वे सहसा समुपाद्रवन्॥ तान्दृष्ट्वा प्रद्रुतान्संख्ये सात्वतेन शरार्द्दितान्॥
प्रभग्नं पुनरेवासीत्तव सैन्यं समाकुलं॥ व्यूहस्यैव पुनर्द्वारं गत्वा द्रोणो व्यतिष्ठत॥ वातायमानैस्तैरश्वैर्हृतो वृष्णिशरार्द्दितैः॥ पांडुपांचालसंभग्नं
व्यूहमालोक्य वीर्यवान्॥ शैनेयेनाकरोद्यत्नं व्यूहस्यैवाभिरक्षणे॥ विनिवार्य च पांचालान्द्रोणाग्निः प्रदहन्निव॥ तस्थौ क्रोधाग्निवद्दीप्तः काल
सूर्य इवोदितः॥ ॥ इति द्रोणपर्वणि द्रोणपराजयः॥ ९५॥ संजय उ॰॥ ॥ द्रोणं स जित्वा पुरुषप्रवीरस्तथैव हार्द्दिक्यमुखांस्त्वदीयान्॥ प्रहस्य स
तं वचनं बभाषे शिनिप्रवीरो यदुपुंगवाग्र्यः॥ निमित्तमात्रं वयमत्र सूत दग्धारयः केशवफाल्गुनाभ्यां॥ हतान्निहन्मोद्य नरर्षभेण वयं सुरेश
त्मसमुद्भवेन॥ तमेवमुक्त्वा शिनिपुंगवस्तदा महामृधे सोग्र्यधनुर्द्धरोरिहा॥ किरन्समंतात्सहसा शरान्बली समापतच्छ्येन इवामिषाशया॥
तं यांतमश्वैः शशिशंखवर्णैर्विगाह्य सैन्यं पुरुषप्रवीराः॥ नाशक्नुवन्वारयितुं समंतादादित्यरश्मिप्रतिमं नराग्र्यं॥ असह्यविक्रांतमदीनस
त्त्वं सर्वात्मिना भारत दुर्विषह्यं॥ सहस्रनेत्रप्रतिमप्रभावं दिवीव सूर्यं जलदव्यपाये॥ अमर्षपूर्णस्त्वतिचित्रयोधी शरासनी कांचनवर्मधा

री॥सुदर्शनः सात्यकिमापतंतंन्यवारयद्राजवरः प्रसह्य। तयोरभूद्भारत संप्रहारः सुदारुणस्तंसमभिव्यद्रासन्।योधास्त्वदीयाः सहसोमका
श्चवृत्रेंद्रयोर्युद्ध मिवामरौघाः। शरैः सुतीक्ष्णैः शतशोभ्यविध्यन् सुदर्शनः सात्वतमुख्यमाजौ। अनागतांस्तानथबाणसंघान् चिच्छेदश
जन्शिनिपुंगवोपि। तथैवशक्रप्रतिमोपिसात्यकिः सुदर्शनेयान् क्षिपतिस्मसायकान्। द्विधात्रिधातानकरोत्सुदर्शनः शरोत्तमैः स्य
दनवर्यमास्थितः। संप्रेक्ष्यबाणान्निहतांस्तदानीसुदर्शनः सात्यकिबाणवेगैः। क्रोधाद्दिधक्षन्निवतिग्मतेजाः शरानमुंचत्तपनीयपुंख
न्। पुनः सबाणैस्तपनीयचित्रैराकर्णमुक्तैस्त्रिभिरग्निकल्पैः। विव्याधदेहावरणं विभिद्यते सात्यकेराविविशुः शरीरं। तथैवतस्यावनि
पालपुत्रः संधायबाणैरपरैर्ज्वलद्भिः। आजघ्निवांस्तान् रजतप्रकाशान् चतुर्भिरश्वांश्चतुरः प्रसह्य। तथातुतेनाभिहतस्तरस्वीनप्तःशिनेरिं
द्रसमानकल्पः। सुदर्शनस्येषुगणैः सुतीक्ष्णैर्हयान्निहत्याशुननाद धीरः। अथास्यसूतस्यशिरोनिकृत्यभल्लेनशक्राशनिसन्निभे
न। सुदर्शनस्यापिशिनिप्रवीरः क्षुरेणकालानलसन्निभेन। सकुंडलंपूर्णशशिप्रकाशं भ्राजिष्णुवक्त्रंनिचकर्तदेहात्। यथापुरावज्रध
रःप्रसह्यबलस्यसंख्येतिरथस्यराजन्। निहत्यतंपार्थिवपुत्रपौत्रंरणेयदूनामृषभस्तरस्वी। मुदासमेतः परयामहात्मा रराजराजन्
सुरराजकल्पः। ततोययावर्जुनएवयेननिवार्यसैन्यंतवमार्गणौघैः। सदश्वयुक्तेनरथेनराजन् लोकान्विसिस्मापयिषुर्नृवीरः। तत्तस्य
विस्मापयनंतमग्र्यमपूजयन्योधवराः समेताः। यद्वर्तमानानिषुगोचरेशत्रून ददाहबाणैर्हुतभुग्यथैधः॥ ॥इतिद्रोणपर्वणिसा
त्यकिप्रवेशेसुदर्शनवधः॥३९॥ संजयउ०॥ ॥ततः ससात्यकिर्धीमान् महात्मावृष्णिपुंगवः। सुदर्शनं निहत्याजौयंतारंपुनरब्रवीत्।
रथाश्वनागकलितंशरशक्त्यूर्मिमालिनं। खड्गमत्स्यंगदाग्राहंशूरयोधमहास्वनं। प्राणापहारिणंरौद्रंवादित्रोत्क्रुष्टनादिनं। योधा

नामस्करवस्यपंदुर्द्धर्षंचजयैषिणां।तीर्णास्मिदुस्तारंतातद्रोणानीकमहार्णवं।जलसंधबलेनाजौपुरुषादैरिवाहतं।अतोन्यत्पृतनाशेषंमन्येकुनदिका
मिव।तर्त्तव्यामल्पसलिलांनादयाश्वानसंभ्रमः।हतत्राप्तमहंमन्येसांप्रतंसव्यसाचिनं।निर्जित्यदुर्द्धरंद्रोणंसपदानुगमाहवे।हार्दिक्यंयो
धवर्यंचमन्येप्राप्तंधनंजयं।नहिमेजायतेत्रासोदृष्ट्वासैन्यान्यनेकशः।वह्नेरिवप्रदीप्तस्यग्रीष्मेशुष्कंतृणोलपं।पश्यपांडवमुख्येनचिताभू
मिःकिरीटिना।पत्यश्वरथनागौघैःपतितैर्विषमीकृता।द्रवतत्वतथासैन्यंतेनभग्नंमहात्मना।रथैर्विपरिधावद्भिर्गजैरश्वैश्चसारथे।कौशे
यारुणसंकाशमेतदुद्धूयतेरजः।अभ्याशस्थमहंमन्येश्वेताश्वंकृष्णसारथिं।सएषश्रूयतेशब्दोगांडीवस्यामितौजसः।यादृशानिनिमित्तानि
ममप्रादुर्भवंतिवै।अनस्तंगतआदित्येहंतासैंधवमर्जुनः।शनैर्विश्रंभयन्नश्वान्याहियत्तोरिवाहिनीं।यत्रैतेसतनुत्राणाःदुर्योधनपुरोगमाः।
मामेवाभिमुखाःसर्वेतिष्ठंतिसमराथिनः।एतान्सरथनागाश्वान्निहत्याजौसपत्तिनः।इदंदुर्गंमहाघोरंतीर्णमिवोपधारय॥ ॥सूतउ०॥ ॥
संभ्रमोमेनवार्ष्णेयविद्यतेसत्यविक्रम।यद्यपिस्यात्सुसंक्रुद्धोजामदग्न्योग्रतःस्थितः।द्रोणोवारथिनांश्रेष्ठःकृपोमद्रेश्वरोपिवा।तथापिसंभ्र
मोनस्यात्त्वामाश्रित्यमहाभुज।त्वयासुबहवोयुद्धेनिर्जिताःशत्रुसूदन।दंशिताःक्रूरकर्माणःकांबोजायुद्धदुर्मदाः।शरबाणासनधरायवना
श्चप्रहारिणः।शकाःकिरातादरदाबर्बरास्ताम्रलिप्तकाः।अन्येचबहवोम्लेच्छाविविधायुधपाणयः।नचमेसंभ्रमःकश्चिद्भूतपूर्वःकदाचन।
किमुतैतत्समासाद्यवीरसंयुगगोष्पदं।आयुष्मन्कतरेणत्वांप्रापयामिधनंजयं।केषांक्रुद्धोसिवार्ष्णेयकेषांमृत्युरुपस्थितः।केषांसंयमनीम
द्यगंतुमुत्सहतेमनः।केत्वांयुधिपराक्रांतंकालांतकयमोपमं।दृष्ट्वाविक्रमसंपन्नंविद्रविष्यंतिसंयुगे।केषांवैवस्वतोराजास्मरतेद्यमहाभु
ज॥ ॥सात्यकिरु०॥ ॥मुंडानेतान्हनिष्यामिदानवानिववासवः।प्रतिज्ञांपालयिष्यामिकांबोजानेवमांवह।अद्यैषांकदनंकृत्वाक्षि

येयास्यामिपांडवं।अद्यद्रक्ष्यंतिमेवीर्यंकौरवाःससुयोधनाः।पार्थवासस्यविधिवन्ममास्त्रस्यप्रयोजनं।मकरध्वज – – मुष्टिःकुलाहूरे
सुपातनं।दृढप्रहारोहलिनःप्रद्युम्नाल्लक्ष्यवेधनं।गदामसंभ्रमोयुद्धेमोक्षःशूरात्मजान्मयः।पुंड्रानीकेहतेसूतसर्वसैन्यप्रवासकृत्।अद्यकौ
रवसैन्यस्यदीर्यमाणस्यसंयुगे।श्रुत्वाविरावंबहुधासंतप्स्यतिसुयोधनः।अद्यपांडवमुख्यस्यश्वेताश्वस्यमहात्मनः।आचार्यदर्शितिंमा
र्गंदर्शयिष्यामिसंयुगे।अद्यमद्बाणनिहतान्योधमुख्यान्सहस्रशः।दृष्ट्वादुर्योधनोराजापश्चात्तापंकरिष्यति।अद्यमेक्षिप्रहस्तस्यक्षिपतः
सायकोत्तमान्।अलातचक्रप्रतिमंधनुर्द्रक्ष्यंतिकौरवाः।मत्सायकचितांगानांरुधिरंस्रवतांबहु।सैनिकानांबधंदृष्ट्वासंतप्स्यतिसुयोध
नः।अद्यमेकुद्धरूपस्यनिघ्नतःप्रवरान्वरान्।द्विरर्जुनमिमंलोकंमंस्यतेद्यसुयोधनः।अद्याश्वानांसहस्राणिनिहतानिमयारणे।दृष्ट्वा
दुर्योधनोराजासंतप्स्यतिमहारणे।अद्यस्नेहंचभक्तिंचपांडवेषुमहात्मसु।हत्वागजसहस्राणियादर्शयिष्यामिराजसु॥ ॥संजयउ॰॥॥
एवमुक्तस्तदासूतःशिक्षितःसबहुश्रुतः।शशांकसंनिकाशान्वैवाजिनोनूनुदेद्द्रुतं।तेपिबंतइवाकाशंयुयुधानंहयोत्तमाः।प्रापयन्यवना
न्शीघ्रंमनःपवनरंहसः।सात्यकिंतेसमासाद्यपृतनास्वनिवर्तिनं।बहवोलघुहस्ताश्चशरवर्षैरवाकिरन्।तेषामिषूनथास्त्राणिशरैःस
न्नतपर्वभिः।अच्छिनत्सात्यकीराजन्नैनंतेप्राप्नुवन्शराः।रुक्मपुंखैःसुनिशितैर्गार्द्धपत्रैरजिह्मगैः।उच्चकर्तशिरांस्युग्रोयवनानांभुजान
पि।शैक्यायसानिवर्माणिकांस्यानिचसमंततः।भित्वादेहांस्तथातेषांशराजग्मुर्महीतलं।तेहन्यमानावीरेणम्लेंच्छाःसात्यकिनारणे।शतशो
न्यपतंस्तत्रवसुधांवसुधाधिपाः।संपूर्णायतमुक्तैस्तान्व्यधमच्छिनिपुंगवः।पंचषट्सप्तचाष्टौचबिभेदयवनान्शरैः।कांबोजानांसहस्रैश्च
शकानांचविशांपते।शबराणांकिरातानांबर्बराणांतथैवच।अगम्यरूपांपृथिवींमांसशोणितकर्दमां।कृतवांस्तत्रशैनेयःक्षपयंस्तावकंबलं।

दस्यूनां सशिरस्त्राणैः शिरोभिर्लूनमूर्द्धजैः। तत्रतत्र मही कीर्णा विबर्हैरंडजैरिव। रुधिरोक्षितसर्वांगैस्तैस्तदायोधनं बभौ। कबंधैः संवृतं
सर्वं ताम्राभ्रैः खमिवावृतं। वज्राशनिसमस्पर्शैः सुपर्वभिरजिह्मगैः। ते साश्वयाना निहताः समावव्रुर्वसुंधरां। अल्पावशिष्टाः संविग्नाः
कृच्छ्रप्राणा विचेतसः। जिताः संख्ये महाराज युयुधानेन दंशिताः। पार्ष्णिभिश्च कशाभिश्च ताडयंतस्तुरंगमान्। जवमुत्तममास्थाय सर्व
तः प्राद्रवन् भयात्। कांबोजसैन्यं विद्राव्य दुर्जयं युधि भारत। यवनानां च तत्सैन्यं शकानां च महद्बलं। ततः स पुरुषव्याघ्रः सात्यकिः प्रह
सन्निव। प्रहृष्टस्तावकान् जित्वा सूत याहीत्यनोदयत्। तं यांतं पृष्ठगोप्तारमर्जुनस्य विशांपते। प्रेक्ष्य हृष्टास्तु कौशेनेयं त्वदीयाश्चाभ्य
पूजयन्॥ ॥इति द्रोणपर्वणि सात्यकिप्रवेशे॥ ५॥ संजय उ॰॥ ॥जित्वा यवनकांबोजान् युयुधानस्ततोऽर्जुनं। जगाम तव सैन्यस्य
मध्येन रथिनां वरः। शरदंष्ट्रो नरव्याघ्रो विचित्रकवचध्वजः। मृगान् व्याघ्र इवाजिघ्रंस्तव सैन्यान्यभीषयन्। स रथेन चरन् मार्गान् ध
नुरभ्रामयद्भृशं। रुक्मपृष्ठं महावेगं रुक्मचंद्रार्कसन्निभं। रुक्मांगदशिरस्त्राणो रुक्मवर्मसमावृतः। रुक्मध्वजवरः शूरो मेरुशृंग
मिवाबभौ। स धनुर्मंडलः संख्ये शरभास्कररश्मिमान्। शरदीवोदितः सूर्यो नृसूर्यो विरराज ह। वृषभस्कंधविक्रांतो वृषभाक्षो न
रर्षभः। तावकानां ययौ मध्यं गवां मध्यं यथा वृषः। मत्तद्विरदसंकाशं मत्तद्विरदगामिनं। प्रभिन्नमिव मातंगं यूथमध्ये व्यवस्थितं।
व्याघ्रा इव जिघांसंतस्त्वदीयाभ्यद्रवन् रणे। द्रोणानीकमतिक्रांतं भोजानीकं च दुस्तरं। जलसंधार्णवं तीर्त्वा कांबोजानां च वाहिनीं।
हार्दिक्यमकरान्मुक्तं तीर्णं वै सैन्यसागरं। परिवव्रुः सुसंक्रुद्धास्त्वदीयाः सात्यकिं रथाः। दुर्योधनश्चित्रसेनो दुःशासनविविंशती।
शकुनिर्दुःसहश्चैव युवा दुर्मर्षणः क्रथः। अन्ये च बहवः शूराः शस्त्रवंतो दुरासदाः। पृष्ठतः सात्यकिं यांतमभ्यधावन्नमर्षिताः।

अथशब्दोमहानासीत्तवसैन्यस्यमारिष।मारुतोद्धूतवेगस्यसागरस्येवपर्वणि।तानभिद्रवतःसर्वान्समीक्ष्यशिनिपुंगवः।शनैर्या
हीतियंतारमब्रवीत्प्रहसन्निव।इदमेतत्समुद्भूतंधार्तराष्ट्रस्ययद्बलं।मामेवाभिमुखंतूर्णंगजाश्वरथपत्तिमत्।नादयद्वैदिशःसर्वारथघो
षेणसारथे।पृथिवींचांतरिक्षंचकंपयत्सागरानपि।एतद्बलार्णवंतातवारयिष्येमहारणे।पौर्णमास्यामिवोद्धूतंवेलेवसलिलाशयं।पश्यमे
सूतविक्रांतमिंद्रस्येवमहाहवे।अद्यसैन्यानिशत्रूणांविधमामिशरैःशितैः।निहतानाहवेपश्यपदात्यश्वरथद्विपान्।मच्छरैरग्निसंकाशै
र्विदेहान्सहस्रशः।इत्येवंब्रुवतस्तस्यसात्यकेरमितौजसः।समीपंसैनिकास्तेतुशीघ्रमीयुर्युयुत्सवः।जहिद्रवाध्येतिष्ठस्वपश्यपश्य
तिवादिनः।तानेवंब्रुवतोवीरान्सात्यकिर्निशितैःशरैः।जघानत्रिशतानश्वान्कुंजरांश्चचतुःशतं।ससंप्रहारस्तुमुलस्तस्यतेषांचभारत।
यथादेवासुरेयुद्धेमहानादस्सुदारुणः।तथातस्यचतेषांचसंग्रामःसमपद्यत।देवासुररणप्रख्यःआवर्त्तितैर्जनक्षयः।मेघजालनिभंसै
न्यंतवपुत्रस्यमारिष।प्रत्यगृह्णाच्छिनेःपुत्रःशरैराशीविषोपमैः।प्रच्छाद्यमानःसमरेशरजालैःसवीर्यवान्।असंभ्रमंमहाराजतांव
कानवधीद्बहून्।आश्चर्यंतत्रराजेंद्रसुमहद्दृष्टवानहं।नमोघःसायकःकश्चित्सात्यकेरभवत्प्रभो।रथनागाश्वकलितःपदात्यूर्मिसमा
कुलः।शैनेयवेलामासाद्यस्थितःसैन्यमहार्णवः।संभ्रांतरथनागाश्वमावर्त्ततमुहुर्मुहुः।तत्सैन्यमिषुभिस्तेनवध्यमानंसमंततः।बभ्रामतत्र
तत्रैवगावःशीतार्दिताइव।पदातिनंरथंनागंसादिनंतुरगंतथा।अविद्धंतत्रनाद्राक्षंयुयुधानस्यसायकैः।नचतादृक्कदनंराजन्कृतवांस्त
त्रफाल्गुनः।यादृक्क्षयमनीकानामकरोत्सात्यकिर्नृप।अत्यर्जुनंशिनेःपौत्रोयुध्यतेपुरुषर्षभ।ततोदुर्योधनोराजासात्वतस्यत्रिभिःशरैः
विव्याधसूतंनिशितैश्चतुर्भिश्चतुरोहयान्।सात्यकिंचत्रिभिर्विद्ध्वापुनरष्टभिरेवच।दुःशासनःषोडशभिर्विव्याधशिनिपुंगवं।शकुनिः

पंचविंशत्याचित्रसेनश्चसप्तभिः।दुःसहः पंचदशभिर्विव्याधोरसिसात्यकिं।उत्स्मय॰न्वृष्णिशार्दूलस्तथाबाणैः समाहतः।तानविध्यन्महाराज
सर्वानेवत्रिभिस्त्रिभिः।गाढविद्धान्नरीन्कृत्वामार्गणैः सोतितेजनैः।शैनेयः श्येनवत्संख्येव्यचरल्लघुविक्रमः।सौबलस्यधनुश्छित्वाहस्ता
वापंनिकृत्यच।दुर्योधनंत्रिभिर्बाणैरभ्यविध्यत्स्तनांतरे।चित्रसेनंशतेनैवदशभिर्दुःसहंतथा।दुःशासनंचविंशत्याविव्याधशिनिपुंगवः।
अथान्यद्धनुरादायश्यालस्तवविशांपते।अष्टभिः सात्यकिंविध्वापुनर्विव्याधसप्तभिः।दुःशासनश्चदशभिर्दुःसहश्चत्रिभिः शरैः।दुर्मुखश्च
द्वादशभीराजन्विव्याधसात्यकिं।दुर्योधनस्त्रिसप्तत्याविध्वाभारतमाधवं।ततोस्यनिशितैर्बाणैस्त्रिभिर्विव्याधसारथिं।तान्सर्वान्संहतान्
शूरान्यतमानान्महारथान्।पंचभिः पंचभिर्बाणैः पुनर्विव्याधसात्यकिः।ततः सरथिनांश्रेष्ठस्तवपुत्रस्यसारथिं।आजघानाशुभल्लेनस
हतोन्यपतद्भुवि।पातितेसारथौरश्मीस्तवपुत्ररथ॰प्रभो।वातायमानैस्तैरश्वैरपनीयतसंगरात्।ततस्तवसुताराजन्सैनिकाश्चविशांपते।
राज्ञोरथमभिप्रेक्ष्यविद्रुताः शतशोभवन्।विद्रुतंतत्रतत्सैन्यंदृष्ट्वाभारतसात्यकिः।अवाकिरच्छरैस्तीक्ष्णैरुक्मपुंखैः शिलाशितैः।विद्रा
व्यसर्वसैन्यानितावकानिसमंततः।प्रययौसात्यकीराजन्श्वेताश्वस्यरथंप्रति।तंशरानाददानंचरक्षमाणंचसारथिं।आत्मानंपालया
नंचसैनिकाः समपूजयन्॥ ॥इतिद्रोणपर्वणिसात्य॰कौरवपराजयः॥९१॥धृतराष्ट्र उ॰॥ ॥संप्रमृद्यमहत्सैन्यंयांतंशैनेयमर्जुनं।निर्ह्री
काममत्तपुत्राः किमकुर्वतसंजय।कथंचैषांतथायुद्धमाविरासीन्मुमूर्षतां।शैनेयचरितंदृष्ट्वायादृशंसव्यसाचिनः।किंनुवक्ष्यंतितेक्षत्रंसै
न्यमध्येपराजिताः।कथंनुसात्यकिर्युद्धेव्यतिक्रांतोमहायशाः।कथंचममपुत्राणांजीवतांतत्रसंजय।शैनेयोभिययौयुद्धेतन्ममाचक्ष्वपृच्छ
तः।अत्यद्भुतमिदंतातत्वत्सकाशाच्छृणोम्यहं।एकस्यबहुभिः सार्द्धंसंबभूवमहारथाः।विपरीतमहंमन्येमंदभाग्यान्सुतान्प्रति।यत्रावध्यंतस

मरेद्रौनेयेनमहात्मना। एकस्यहिनपर्याप्तंयत्सैन्यंतत्स्यसंजय। हार्दिक्यस्ययुयुधानस्यसर्वेतिष्ठंतुपांडवाः। निर्जित्यसमरेद्रोणंहृतिनंचित्रयो
धिनं। यथापशुगणान्सिंहोमृद्नन्हंतासुतान्मम। कृतवर्मादिभिःशूरैर्यत्तैर्बहुभिराहवे। युयुधानोनशक्यतोहंतुंयत्पुरुषर्षभः। नैतदीदृ
शंकंयुद्धंकृतवांस्तत्रफाल्गुनः। यादृशंकृतवान्युद्धंशिनेर्नप्तामहायशाः॥ ॥संजयउ०॥ ॥तववुर्मंत्रितेराजन्दुर्योधनकृतेनच। श्रु
त्वावहितोभूत्वायत्तेवक्ष्यामिभारत। तेपुनःसंन्यवर्तंतभूत्वासंसप्तकामिथः। पुरायुद्धमतिंक्रूरांपुत्रस्यतववशासनात्। त्रीणिसादि
सहस्राणिदुर्योधनपुरोगमाः। शकाबाह्लीककांबोजायवनाःशूरतास्तथा। कुणिदास्तंगणाअंबष्ठाःकोशलाश्चसबर्बराः। अभ्यद्रवंतशै
नेयंशलभाःपावकंयथा। युक्ताश्चपार्वतीयानांरथाःपाषाणयोधिनां। शूराःपंचशताराजन्शैनेयंसमुपाद्रवन्। तेपार्वतीयाराजानो
यावभिःसर्वतोभृशं। अभ्यद्रवंतशैनेयमसंख्येयाश्चपत्तयः। तांश्चसंनोदयन्सर्वान्महारथवरर्षभः। दुःशासनोमहाराजसात्यकिंप
र्यवारयन्। तत्राद्भुतामपश्यामशैनेयचरितांमही। यदेकोबहुभिःसार्धमसंभ्रांतमयुध्यत। अवधीच्चरथानीकंद्विरदानांचतद्बलं।
सादिनश्चैवतान्सर्वान्दस्यूनपिचसर्वशः। तत्रचक्रेविमथितैर्भग्नैश्चपरमायुधैः। अक्षैश्चबहुधाभग्नैरीषादंडकबंधुरैः। कुंजरैर्म
थितैश्चापिध्वजैश्चविनिपातितैः। वर्मभिश्चतथानैकैरवकीर्णावसुंधरा। स्रग्भिराभरणैर्वस्त्रैरनुकर्षैश्चमारिष। संछन्नावसुधातत्र
द्यौर्ग्रहैरिवभारत। गिरिरूपनिभाश्चापिपतिताःकुंजरोत्तमाः। अंजनस्यकुलेजातावामनस्यचभारत। सुप्रतीककुलेजातामहापद्मकु
लेतथा। जातादंतिवराराजन्रपोत्तबहवोहताः। वनायुजाःपार्वतीयाःकांबोजारट्टजाअपि। तथाहयवरान्राजन्निजघ्नेतत्रसात्यकिः। ना
नादेशसमुत्थांश्चनानादेश्यांश्चदंतिनः। निजघ्नेतत्रशैनेयःशतशोथसहस्रशः। तेषुप्रकाल्यमानेषुदस्यून्दुःशासनोब्रवीत्। निवर्त्त

ध्वमधर्मज्ञायुध्यध्वंकिंद्रुतेनवः। तांश्चापिसर्वान्संप्रेक्ष्यपुत्रोदुःशासनस्तव। पाषाणयोधिनःशूरान्पार्वतीयानचोदयन्। अश्मयुद्धेषुकु
शलान्नैतज्जानातिसात्यकिः। अश्मयुद्धमजानंतंघ्नतेनंयुद्धकामुकं। तथैवकुरवःसर्वेनाश्मयुद्धविशारदाः। समाद्रवतमाभैष्टनवः
प्राप्स्यतिसात्यकिः। ततोगजकरप्रख्यैःप्रस्तरैःशैलवासिनः। उद्यतैर्युयुधानस्यस्थिताःसमरकांक्षिणः। क्षेपणीयैस्तथासंख्येसात्वतस्य
वधैषिणः। नोदितास्तवपुत्रेणरुरुधुःसर्वतोदिशः। तेषामापततामेवशिलायुद्धंचिकीर्षतां। सात्यकिःप्रतिसंधायत्रिंशतान्प्राहिणोच्छ
रान्। तामश्मवृष्टिमतुलांपार्वतीयैःसमीरितां। बिभेदोरगसंकाशैर्नाराचैःशिनिपुंगवः। तैरश्मचूर्णैर्दीप्यद्भिःखद्योतानामिवव्रजैः
प्रायःसैन्यान्यवध्यंतहाहाभूतानिमारिष। ततःपंचशताःशूराःसमुद्यतमहाशिलाः। निकृत्तबाहवोराजन्निपेतुर्धरणीतले। पुनर्द
शशताश्चान्येशतसाहस्रमेवच। सोपलैर्बाहुभिःछिन्नैःपेतुरप्राप्यसात्यकिं। पाषाणयोधिनःशूरान्यतमानान्युधिस्थितान्। अ
वधीद्बहुसाहस्रांस्तदद्भुतमिवाभवत्। ततःपुनर्वस्तमुखैरश्मवृष्टिंसमंततः। अयोहस्तैःशूलहस्तैर्दरदैःपरतंगणैः। अंबष्ठैश्चकुलिं
दैश्चक्षिप्तांक्षिप्तांससात्यकिः। नाराचैःप्रतिविव्याधप्रेक्ष्यमाणोमहाबलः। अद्रीणांभिद्यमानानामंतरिक्षेशितैःशरैः। शब्देनप्राद्र
वन्राजन्गजाश्वरथपत्तयः। अश्मचूर्णैःसमाकीर्णामनुष्याश्चवयांसिच। नाशक्नुवन्नवस्थातुंभ्रमरैरिवदंशिताः। हतशिष्टाविरु
धिराभिन्नमस्तकपिंडकाः। कुंजराःसन्न्यवर्तंतयुयुधानरथंप्रति। ततःशब्दःसमभवत्तवसैन्यस्यमारिष। माधवेनार्द्यमानस्यसागर
स्येवदारुणः। तंशब्दंतुमुलंश्रुत्वाद्रोणोयंतारमब्रवीत्। एषसूतरणेक्रुद्धःसात्वतानांमहारथः। दारयन्बहुधासैन्यंरणेचरतिकालव
त्। यत्रैषशब्दस्तुमुलस्तत्रसूतरथंनय। पाषाणयोधिभिश्चापियुयुधानसमागमः। तथाहिरथिनःसर्वेभिद्यंतेविद्रुतैर्हयैः। वि

शस्त्रकवचारुग्णास्तत्रतत्रपतंतिच। नत्राक्रुवंतियंतारः संयंतुंतुमुलेहयान्। इत्येवंब्रुवतोराजन्भारद्वाजस्यधीमतः। प्रत्युवाचततोराजन्सूतःशाख
भृतांवरं। आयुष्मन्द्रवते सैन्यंकौरवेयंसमंततः। पश्ययोधान्रणेभिन्नान्धावमानानूततस्ततः। एतेचसहिताःशूराः पांचालाः पांडवैः सह। त्वामेवा
भिजिघांसंत आद्रवंतेसमंततः। अत्रकार्यंसमाधत्स्वप्राप्तकालमरिंदम। स्थानेवागमनेवापिदूरंयातश्चसात्यकिः। तथैववदतस्तस्य भारद्वाज
स्यमारिष। प्रत्यदृश्यतशैनेयोनिघ्नन्बहुविधान्नरान्। तेवध्यमानाः समरेयुयुधानेनतावकाः। युयुधानरथंत्यक्त्वाद्रोणानीकाययुद्रुवुः। येस्तुदुः
शासनः सार्द्धंरथंपर्यभ्यवर्त्तत। तेपुनःपर्यधावंतसर्वेद्रोणरथंप्रति॥ ॥इतिद्रोणपर्वणिसात्यकिप्रवेशे॥१९॥ संजयउ०॥ ॥दुःशासनरथंदृ
ष्ट्वासमीपेपर्यवस्थितं। भारद्वाजस्ततोवाक्यंदुःशासनमथाब्रवीत्। दुःशासनरथाःसर्वेकस्मादेतेप्रविद्रुताः। कच्चित्क्षेमंतुनृपतेःकच्चिज्जीव
तिसैंधवः। राजपुत्रोभवान्नत्रराजभ्रातामहारथः। किमर्थंद्रवसेभूयःयौवराज्यमवाप्यहि। स्वयंवैरंमहत्कृत्वापांचालैः पांडवैः सह। एकंसात्यकि
मासाद्यकथंभीतोसिसंयुगे। नजानीषेपुरात्वंतुगृह्णन्नक्षान्दुरोदरे। शराह्येतेभविष्यंतिदारुणाशीविषोपमाः। अप्रियाणांहिवचसांपां
डवेषुविशेषतः। द्रौपद्याश्चपरिक्लेशात्तन्मूलोह्यभवत्पुरा। दासीभूतासिद्यूतेत्वंयथाकामंचराभव। पादसंवाहिकाराज्ञोभ्रातुर्ज्येष्ठस्यमेभ
व। नसंतिपतयस्तेद्यसर्वेषंढतिलोपमाः। दुःशासनैवमुक्त्वात्वंपूर्वंकस्मात्पलायसे। कृतेमानश्चदर्पश्चकृतद्वीर्यंक्वगर्जितं। आशीविष
समान्पार्थान्कोपयित्वाक्वयास्यसि। शोच्येयंभारतीसेनाराजाचैवसुयोधनः। यस्यत्वंकर्कशोभ्राताऽपलायनपरायणः। ननुनाम्नात्वयावी
र्यमाणाभयान्विता। स्वबाहुबलमाश्रित्यरक्षणीयाह्यनीकिनी। सत्वमद्यरणंत्यक्त्वाभीतोहर्षयसेरिपून्। विद्रुतेत्वयिसैन्यस्यनायकेश
त्रुसूदन। कोन्यःस्थास्यतिसंग्रामेभीतोभीतेव्यपाश्रये। एकेनसात्वतेनाद्ययुध्यमानस्यतेनघ। पलायनेतवमतिः संग्रामेहिप्रवर्त्तते। यदागां
डीवधन्वानंभीमसेनंचकौरव। यमौचयुधिद्रष्टासितदात्वंकिंकरिष्यसि। युधिफाल्गुनबाणानांसूर्याग्निसमतेजसां। नतुल्याःसात्यकि

शरायेभ्योभीतः पलायसे। त्वरितोवीरगच्छत्वंगां धार्युदरमाविश॥ पृथिव्यांधावमानस्यनान्यंपश्यामितेशमं। यदितातकृताबुद्धिः पलायनपरा
यणा॥ पृथिवीधर्मराजस्यशमेनैवप्रदीयतां॥ यावत्फाल्गुनबाणास्ते निर्मुक्तोरगसन्निभाः। नाविशंतिशरीरंतेतावत्संशाम्यपांडवैः॥ यावत्ते
पृथिवींपार्थहत्वाभ्रातृशतंरणे। नक्षपंतिमहात्मानस्तावत्संशाम्यपांडवैः॥ यावन्नक्रुध्यतेराजाधर्मपुत्रोयुधिष्ठिरः। कृष्णश्चसमरश्लाघी ता
वत्संशाम्यपांडवैः॥ यावद्भीमोमहाबाहुर्विगाह्यमहतींचमूं। सोदरांस्तेनगृह्णातितावत्संशाम्यपांडवैः॥ पूर्वमुक्तश्चतेभ्राताभीष्मेणासौसुयो
धनः। अजेयाः पांडवाः संख्येसौम्यसंशाम्यपांडवैः॥ नचतत्कृतवान्मंदस्तवभ्रातासुयोधनः। नवापिशोणितंभीमः पास्यतीतिमयाश्रुतं। तच्चा
प्यवितथंतस्यतत्तथैवभविष्यति॥ किंभीमस्यनजानासिविक्रमंत्वंसुबालिश॥ येनत्वैरमारब्धंसंयुगेप्रपलायिना॥ सयुद्धधृतिमास्थायय
त्रायुधस्वभारत। गच्छतूर्णंरथेनैवयत्रतिष्ठतिसात्यकिः॥ त्वयाहीनंबलंह्येतद्विद्रविष्यतिभारत। आत्मानंयोधयरणेसात्यकिंसत्यविक्र
मं। एवमुक्तस्तवसूतोनाब्रवीत्किंचिदप्यसौ॥ श्रुतंचाश्रुतवत्कृत्वाप्रायाद्येनससात्यकिः। सैन्येनमहतायुक्तोम्लेच्छानामनिवर्तिनां॥ आसा
द्यचरणेयत्तोयुयुधानमयोधयत्॥ द्रोणोपिरथिनांश्रेष्ठः पांचालान्पांडवांस्तथा॥ अभ्यद्रवतसंक्रुद्धोजवमास्थायमध्यमं॥ प्रविश्यचरणेद्रो
णः पांचालानांवरूथिनीं। द्रावयामासयोधान्वैशतशोथसहस्रशः॥ ततोद्रोणोमहाराजनामविश्राव्यचात्मनः। पांडुपांचालमत्स्यानांप्रचक्रे
कदनंमहत्॥ तंजयंतमनीकानिभारद्वाजंततस्ततः॥ पांचालपुत्रोबलवान्वीरकेतुः समभ्ययात्॥ सद्रोणंपंचभिर्विद्ध्वाशरैः सन्नतपर्वभिः॥ ध्व
जमेकेनविव्याधसारथिंचास्यसप्तभिः। तत्राद्भुतंमहाराजदृष्टवानस्मिसंयुगे॥ यावद्द्रोणोतिसंक्रुद्धः पांचाल्यंनाभ्यवर्तत॥ संनिरुद्धंरणेद्रोणं
पांचालावीक्ष्यभारत॥ आवव्रुः सर्वतोराजन्धर्मपुत्रजयैषिणः॥ तेशरैरग्निसंकाशैस्तोमरैश्चमहाधनैः॥ शस्त्रैश्चविविधैराजन्द्रोणमेकमवा
किरन्॥ निहत्यतान्बाणगणान्द्रोणोराजन्समंततः॥ यथाजलधरान्व्योम्निमातरिश्वेवधन्विनं॥ ततः शरंमहावेगंसूर्यपावकसन्निभं। संदधे

परवीरघ्नोवीरकेतुरथंप्रति। सभित्वातुशरोराजन्पांचालकुलनंदनं। अभ्यगाद्धरणींतूर्णंलोहितार्द्रोज्वलन्निव। ततोपतद्रथात्तूर्णं
पांचालकुलनंदनः। पर्वताग्रादिवमहान्चंपकोवायुपीडितः। तस्मिन्हतेमहेष्वासेराजपुत्रेमहाबले। पांचालास्त्वरिताराजन्द्रोणंसमं
तात्पर्यवारयन्। चित्रकेतुः सुधन्वाचचित्रवर्माचभारत। तथाचित्ररथश्चैवभ्रातृव्यसनकर्षिताः। अभ्यद्रवंतसहिताभा
रद्वाजंयुयुत्सवः। मुंचंतः शरवर्षाणितपांतेजलदाइव। सवध्यमानोबहुधाराजपुत्रैर्महारथैः। व्यश्वसूतरथांश्चक्रेकुमा
रान्कुपितोरणे। तथापरैः सुनिशितैर्भल्लैस्तेषांमहायशाः। पुष्पाणीवविचिन्वन्हिसोत्तमांगान्यपातयत्। तेरथेभ्योहताः
पेतुः क्षितौराजन्सुवर्चसः। देवासुरेपुरायुद्धेयथादैतेयदानवाः। तान्निहत्यरणेराजन्भारद्वाजः प्रतापवान्। कार्मुकंभ्रामया
मासहेमपृष्ठंदुरासदं। पांचालान्निहतान्दृष्ट्वादेवकल्पान्महारथान्। धृष्टद्युम्नोभृशोद्विग्नोनेत्राभ्यांपातयञ्जलं। अभ्यवर्ततसं
ग्रामेक्रुद्धोद्रोणरथंप्रति। ततोहाहेतिसहसानादः समभवन्नृप। पांचाल्येनरणेदृष्ट्वाद्रोणमावारितंशरैः। सछाद्यमानोब
हुधापार्षतेनमहात्मना। नविव्यथेततोद्रोणः स्मयन्नेवान्वयुध्यत। ततोद्रोणंमहाराजपांचाल्यः क्रोधमूर्छितः। आजघानोर
सिक्रुद्धोनवत्यानतपर्वणां। सगाढविद्धोबलिनाभारद्वाजोमहायशाः। निषसादरथोपस्थेकश्मलंचजगामह। तंवैतथाग
तंदृष्ट्वाधृष्टद्युम्नः पराक्रमी। समुत्सृज्यधनुस्तूर्णमसिंजग्राहवीर्यवान्। अवप्लुत्यरथाच्चापित्वरितः समहारथः। आरुरो
हरथंतूर्णंभारद्वाजस्यमारिष। हर्तुमैच्छच्छिरः कायात्क्रोधसंरक्तलोचनः। प्रत्याश्वस्तस्ततोद्रोणोधनुर्गृह्यमहाबलः। अ

सन्नमागतंदृष्ट्वाधृष्टद्युम्नंजिघांसया॥शरैर्वैतस्तिकैराजन्नित्यमासन्नयोधिभिः।योधयामाससमरेधृष्टद्युम्नंमहारथं।ते
हिवैतस्तिकानामशरा आसन्नयोधिनः।द्रोणेनविहिताराजन्धृष्टद्युम्नमताडयन्।सवध्यमानःसमरेसायकैस्तैर्महा
बलः।अवप्लुत्यरथात्तूर्णंभग्नवेगःपराक्रमी।आकृत्यस्वरथंवीरःप्रगृह्यचमहद्धनुः।विव्याधसमरेद्रोणंधृष्टद्युम्नोम
हारथः।राजन्स्तुमुलंयुद्धंभूतसंघावपूजयन्।क्षत्रियाश्चमहाराजयेचान्येतत्रसैनिकाः।अपश्यन्समरेद्रोणंधृष्ट
द्युम्नेनसंगतं।वशमेष्यतिनोराजन्पांचालाइतिचुक्रुशुः।द्रोणस्त्वरितोयुद्धेधृष्टद्युम्नस्यसारथेः।शिरःप्रपातया
मासफलंपक्वंतरोरिव।ततस्तेप्रद्रुतावाहाराजंस्तस्यमहात्मनः।तेषुप्रद्रवमाणेषुपांचालान्सृंजयैःसह।अयोधयत्त
थाद्रोणस्तत्रतत्रपराक्रमी॥विसृज्यपांडुपांचालान्भारद्वाजःप्रतापवान्।स्वंव्यूहंपुनरास्थायस्थिरोभवदरिंदमः।
नचैनंपांडवायुद्धेजेतुमुत्सेहिरेप्रभो॥ ॥इतिमहाभारतेद्रोणपर्वणिजयद्रथवधेसात्यकिप्रवेशेद्रोणपांचाल
पांडवयुद्धं॥२०॥संजयउ०॥ ॥ततोदुःशासनोराजन्शैनेयंसमुपाद्रवत्।किरन्शरसहस्राणिपर्जन्यइववृष्टिमान्।
सविध्वासात्यकिंषष्ट्यातथाषोडशभिःशरैः।नाकंपयत्स्थितंयुद्धेमैनाकमिवपर्वतं।सतुदुःशासनंशूरःसायकै
रावृणोद्भृशं।आसन्नंतमनुप्राप्तमूर्यनाभिमिवार्यया॥दृष्ट्वादुःशासनंराजातथाशरतैराचितं।त्रिगर्तान्नोदया
मासयुयुधानरथंप्रति।तेगत्वायुयुधानस्यसमीपंक्रूरकारिणः।त्रिगर्तानांत्रिसाहस्रारथायुद्धविशारद =

दाः। ते तु तं रथवंशेन महता पर्यवारयन्। स्थिरां कृत्वा मतिं युद्धे भूत्वा संसप्तका मिथः। ते वांश्रयततां संख्ये शरवर्षाणि मुंचतां। योधान्पंचशतान्मु
मुख्यानग्रानीके व्यपोथयत्। ते पतंतस्तदा तूर्णं शिनिप्रवरसायकैः। महामारुतवेगेन भग्ना इव नगद्रुमाः। रथैश्च बहुधा छिन्नैर्ध्वजैश्चैव विशां
पते। हयैश्च कनकापीडैः पतितैस्तत्र मेदिनी। शैनेयशरसंकृत्तैः शोणितौघपरिप्लुतैः। अशोभत महाराज पुष्पितैरिव किंशुकैः। ते वध्यमा
नाः समरे युयुधानेन तावकाः। त्रातारं नाध्यगच्छंत पंकमग्ना इव द्विपाः। ततस्ते पर्यवर्तंत सर्वे द्रोणरथं प्रति। भयात्त्रिगर्तराजस्य गत्वानिव महोर
गाः। हत्वा पंच शतान्योधान् शरैराशीविषोपमैः। प्रायात्स शनकैर्वीरो धनंजयरथं प्रति। तं प्रयांतं नरश्रेष्ठं पुत्रो दुःशासनस्तव। विव्याध नवभिस्तू
र्णं शरैः सन्नतपर्वभिः। स तु तं प्रतिविव्याध पंचभिर्निशितैः शरैः। रुक्मपुंखैर्महेष्वासो गार्ध्रपत्रैरजिह्मगैः। सात्यकिं तु महाराज प्रहसन्निव भा
रत। दुःशासनस्त्रिभिर्विद्ध्वा पुनर्विव्याध पंचभिः। शैनेयस्तव पुत्रं तु विद्ध्वा पंचभिराशुगैः। धनुश्चास्य रणे छित्वा विस्मयन्नर्जुनं ययौ। ततो दुः
शासनः क्रुद्धो वृष्णिवीराय गच्छते। सर्वपारशवीं शक्तिं विससर्ज जिघांसया। तां तु शक्तिं तदा घोरां पुत्रस्य तव सात्यकिः। चिच्छेद शतधा
राजन्निशितैः कंकपत्रिभिः। अथान्यद्धनुरादाय पुत्रस्तव जनेश्वर। सात्यकिं दशभिर्विद्ध्वा सिंहनादं ननाद च। सात्यकिस्तु ततः क्रुद्धो मोहयित्वा
सुतं तव। शरैरग्निशिखाकारैराजघान स्तनांतरे। सर्वायसैस्तीक्ष्णवक्त्रैरष्टभिर्विव्यधे पुनः। दुःशासनस्तु विंशत्या सात्यकिं प्रत्यविध्यत। सा
त्वतोपि महाराज तं विव्याध स्तनांतरे। त्रिभिरेव महाराज शरैः सन्नतपर्वभिः। ततोस्य वाहान्निशितैः शरैर्जघ्ने महारथः। सारथिं च सुसंक्रु
द्धः शरैः सन्नतपर्वभिः। धनुरेकेन भल्लेन हस्तावापं च पंचभिः। ध्वजं च रथशक्तिं च भल्लाभ्यां परमास्त्रवित्। चिच्छेद विशिखैस्तीक्ष्णैस्तथोभौ
पार्ष्णिसारथी। स छिन्नधन्वा विरथो हताश्वो हतसारथिः। त्रिगर्तसेनापतिना स्वरथेनापवाहितः। तमभिद्रुत्य शैनेयो मुहूर्तमिव भारत। न

जघान महाबाहुर्भीमसेनवचः स्मरन्। भीमसेनेन तु वधः कृतो नांतव भारत। प्रतिज्ञातः सभामध्ये सर्वेषामेव संयुगे। तथा दुःशासनं जित्वा
सात्यकिः संयुगे प्रभो। जगाम त्वरितो राजन्येन यातो धनंजयः॥ ॥इति द्रोणपर्वणि सात्यकिप्रवेशे दुःशासनपराजयः॥१२६॥ धृतराष्ट्र उ॥ ॥
किं तस्यां मम सेनायां नासन्केचिन्महारथाः। ये तथा सात्यकिं यांतं नैव युद्धे न्यवारयन्। एको हि समरे कर्म कृतवान्सत्यविक्रमः। शक्रतुल्यब
लो युद्धे महेंद्रो दानवेष्विव। अथवा शून्यमेवासीत्सैन्यमर्जुनसंगमात्। हतभूयिष्ठमेवाथ येन यातः स सात्यकिः। एको हि बहुलाः सेनाः प्रम
द्य पुरुषर्षभः। कथं च युध्यमानानामपक्रांतो महात्मनां। एको बहूनां शैनेयस्तन्ममाचक्ष्व संजय॥ ॥संजय उ॥ ॥राजन्सेनासमुद्योगो र
थनागाश्वपत्तिनां। तुमुलस्तव सैन्यानां युगांतसदृशोभवत्। आह्निकेषु समूहेषु तव सैन्यस्य मानद। नास्ति लोके समः कश्चित्समूह इति मे
मतिः। तत्र देवाश्च भाषंत चारणाश्च समागताः। नैवेदृशाः समूहा वै भविष्यंति महीतले। न चैव तादृशः कश्चिद्व्यूह आसीद्विशांपते। यादृ
ग्जयद्रथवधे द्रोणेन विहितोभवत्। चंडवातविभिन्नानां समुद्राणामिव स्वनः। रणेभवद्बलौघानामन्योन्यमभिधावतां। पार्थिवानां समेता
नां बहून्यासन्नरोत्तम। त्वद्बले पांडवानां च सहस्राणि शतानि च। संरब्धानां प्रवीराणां समरे दृढकर्मणां। तत्रासीत्सुमहान्शब्दस्तुमुलो लोम
हर्षणः। अथाक्रंदद्भीमसेनो धृष्टद्युम्नश्च पार्षतः। नकुलः सहदेवश्च धर्मराजश्च पांडवः। आगच्छत प्रहरत बलवंतोभिधावत। प्रविष्टावरि
सेनां हि वीरौ माधवपांडवौ। यथा सुखेन गच्छेतां जयद्रथवधं प्रति। तथा प्रकुरुत क्षिप्रमिति सैन्यान्यनोदयन्। तयोरभावे कुरवः कृतार्थाः स्युर्व
यं जिताः। ते यूयं संहिताभूत्वा तूर्णमेव बलार्णवं। क्षोभयध्वं महावेगाः पवनः सागरं यथा। भीमसेनेन ते राजन्पांचाल्येन च नोदिताः। आजघ्नुः
कौरवान्संख्ये त्यक्त्वासूनात्मनः प्रियान्। इच्छंतो निधनं युद्धे शस्त्रैरुत्तमतेजसः। स्वर्गार्थं मित्रकार्यार्थं नाभ्यरक्षंत जीवितं। तथैव तावका राजन्

पार्थयंतोमहद्धरः।आर्यंयुक्तमतिंकृत्वायुद्धेवावतस्थिरे।तस्मिंस्तुमुलेयुद्धेवर्तमानेमहाभये।हत्वासैन्यानिसर्वाणिआयात्सात्यकिर
र्जुनं।कवचानांप्रभास्तत्रसूर्यरश्मिविचित्रिताः।दृष्टाःसंख्येसैनिकानांप्रतिजघ्नुःसमंततः।तथाप्रयतमानेषुपांडवेयेषुनिर्दयं।दुर्योध
नोमहाराजव्यगाहतमहद्बलं।ससन्निपातस्तुमुलस्तेषांतस्यचभारत।अभवत्सर्वसैन्यानामभावकरणोमहान्॥ ॥धृतराष्ट्रउ०॥
तथागतेषुसैन्येषुतथाकृच्छ्रगतःस्वयं।कच्चिद्दुर्योधनःसूतनाकार्षीत्पृष्ठतोरणं।एकस्यचबहूनांचसन्निपातोमहान्रणे।विशेषतोन
पतेर्नोविषमःप्रतिभातिमे।सोत्यंतसुखसंवृद्धोलक्ष्म्यालोकस्यचेश्वरः।एकोबहून्समासाद्यकच्चिन्नासीत्पराङ्मुखः॥ ॥संजयउ०॥
राजन्संग्राममाश्चर्यंतवपुत्रस्यभारत।एकस्यचबहूनांचशृणुष्वगदतोद्भुतं।दुर्योधनेनसहसापांडवीपृतनारणे।नलिनीद्विरदेनेव
समंताद्विप्रलोडिता।तथासेनांकृतांदृष्ट्वातवपुत्रेणभारत।भीमसेनपुरोगास्तेपांचालाःसमुपाद्रवन्।सभीमसेनंदशभिर्माद्रीपुत्रौ
त्रिभिस्त्रिभिः।विराटद्रुपदौषड्भिःशतेनचशिखंडिनं।धृष्टद्युम्नंचविंशत्याधर्मपुत्रंचसप्तभिः।केकयान्दशभिर्विध्वाद्रौपदेयांस्त्रिभि
स्त्रिभिः।शतशश्चापरान्योधान्सद्विपांश्चरथान्रणे।शरैरवचकर्तोग्रैःक्रुद्धोंतकइवप्रजाः।नसंदधन्विमुंचन्वामंडलीकृतकार्मुकः
अदृश्यतरिपून्निघ्नन्शिक्षयास्त्रबलेनच।तस्यतान्निघ्नतःशत्रून्हेमपृष्ठंमहद्धनुः।भल्लाभ्यांपांडवोज्येष्ठस्त्रिधाचिच्छेदभारत।वि
व्याधचैनंबहुभिःसम्यगस्तैःशितैःशरैः।मर्माण्यस्युसमासाद्यतेभित्त्वाक्षितिमाविशन्।ततःप्रमुदिताःपार्थाःपरिवव्रुर्युधिष्ठिरं।यथा
हंत्रवधेदेवाःमुदाशक्रंसहर्षिभिः।अथदुर्योधनोराजादृढमादायकार्मुकं।तिष्ठतिष्ठेतिराजानंब्रुवन्पांडवमभ्ययात्।तंतथावादि
नंराजन्तवपुत्रंमहामृधे।प्रत्युद्ययुःप्रमुदिताःपांचालाजयगृद्धिनः।तान्द्रोणःप्रतिजग्राहपरीप्सन्युधिपार्थिवं।चंडवातोद्धतान्मे

घान्सजलानचलोयथा। तत्रराजन्महानासीत्संग्रामोभूरिवर्द्धनः। रुद्रस्याक्रीडसंकाशः संहारः सर्वदेहिनां॥ ॥इतिद्रोणपर्वणि॥२॥
॥ ॥संजयउ०॥ ॥अपराह्णेमहाराजसंग्रामः समपद्यत। पर्जन्यसमनिर्घोषः पुनर्द्रोणस्यसोमकैः। शोणाश्वोरथमास्थायनरवीर
समाहितः। समरेभ्यद्रवत्पांडून्जवमास्थायमध्यमं। तवप्रियहितेयुक्तोमहेष्वासोमहाबलः। चित्रपुंखैः प्रसन्नाग्रैः कलशोत्तमसं
भवः। वरान्वरान्हियोधानांविचिन्वन्निवभारत। अक्रीडत्रणेराजन्भारद्वाजः प्रतापवान्। तमभ्ययाद्बृहत्क्षत्रः कैकेयानांम
हारथः। भ्रातॄणांवीरपंचानांज्येष्ठः समरकर्कशः। विमुंचन्विशिखांस्तीक्ष्णानाचार्यंछादयन्भृशं। महामेघोयथावर्षंविमुंचन्गं
धमादनं। तस्यद्रोणोमहाराजस्वर्णपुंखाञ्शिलाशितान्। प्रेषयामाससंक्रुद्धः सायकान्दशसप्तच। तांस्तुद्रोणविनिर्मुक्तान्क्रु
द्धानाशीविषानिव। एकैकंदशभिर्बाणैर्युधिचिच्छेदहृष्टवत्। तस्यतल्लाघवंदृष्ट्वाप्रहसन्द्विजसत्तमः। प्रेषयामासविशिखानष्टौ
सन्नतपर्वणः। तान्दृष्ट्वापततः शीघ्रंद्रोणचापच्युतान्शरान्। अवारयच्छरैरेवतावद्भिर्निशितैश्चसः। ततोभवन्महाराजतवपु
त्रस्यविस्मयः। दृष्ट्वाबृहत्क्षत्रेणतत्कर्मकृतंदृष्ट्वासुदुष्करं। ततोद्रोणोमहाराजकैकेयंवैविशेषयन्। प्रादुश्चक्रेततोदिव्यंब्राह्ममस्त्रं
महातपाः। तदस्यराजन्कैकेयः प्रत्यवारयदच्युतः। ब्राह्मेणैवमहाबाहुराहवेसमुदीरितं। प्रतिहत्यतदस्त्रंतुभारद्वाजस्यसंयुगे।
विव्याधब्राह्मणंषष्ट्यास्वर्णपुंखैःशिलाशितैः। तंद्रोणोद्विपदांश्रेष्ठोनाराचेनसमार्पयत्। सतस्यकवचंभित्वाप्राविशद्धरणीतलं।
कृष्णसर्पोयथामुक्तोवल्मीकंनृपसत्तम। ततोभ्यगान्महीबाणोभित्वाकैकेयमाहवे। सोतिविद्धोमहाराजद्रोणेनास्त्रविदाभृशं।
क्रोधेनमहताविष्टोव्यादायनयनेशुभे। द्रोणंविव्याधसप्तत्यास्वर्णपुंखैःशिलाशितैः। सारथिंचास्यभल्लेनबाहोरुरसिचार्पयत्।

द्रोणस्तु बहुधा विद्धो बृहत्क्षत्रेण मारिष। असृजद्विशिखांस्तीक्ष्णान्कैकेयस्य रथं प्रति। व्याकुलीकृत्य तं द्रोणो बृहत्क्षत्रं
महारथं। व्यसृजत्सायकं तीक्ष्णं कैकेयं प्रति भारत। स गाढविद्धस्तेनाशु महाराज स्तनांतरे। रथात्पुरुषशार्दूलः संभि
न्नहृदयोपतत्। बृहत्क्षत्रे हते राजन्कैकेयानां महारथे। शैशुपालिः सुसंक्रुद्धो यंतारमिदमब्रवीत्। सारथे याहि य
त्रैष द्रोणस्तिष्ठति दंशितः। विनिघ्नन्कैकेयान्सर्वान्पांचालानां च वाहिनीं। तस्य तद्वचनं श्रुत्वा सारथी रथिनां वरं। द्रो
णाय प्रापयामास कांबोजैर्जवनैर्हयैः। धृष्टकेतुश्च चेदीनां वृषभोतिबलोदितः। सहसा प्रापतद्द्रोणं पतंग इव पाव
कं। सोभ्यविध्यत्ततो द्रोणं षष्ट्या च सरथध्वजं। पुनश्चान्यैः शरैस्तीक्ष्णैः सुप्तं व्याघ्रं तुदन्निव। तस्य द्रोणो धनुर्मध्ये क्षु
रप्रेण शितेन ह। चिच्छेद राज्ञो बलिनो यतमानस्य संयुगे। अथान्यद्धनुरादाय शैशुपालिर्महारथः। विव्याध सायकैर्द्रो
णं पुनः सुनिशितैर्दृढैः। तस्य द्रोणो हयान्हत्वा सारथिं च महाबलः। अथैनं पंचविंशत्या सायकानां समार्पयत्।
विरथो विधनुष्कश्च चेदिराजोपि संयुगे। गदां चिक्षेप संक्रुद्धो भारद्वाजरथं प्रति। तामापतंतीं सहसा घोररूपां भया
वहां। अश्मसारमयीं गुर्वीं तपनीयविभूषितां। शरैरनेकसाहस्रैर्भारद्वाजोन्यवारयत्। सा पपात गदा भूमौ

भारद्वाजेनसादिता। रक्तमाल्यांबरधरात्तारेवनभसस्तलात्॥ गदांविनिहतांदृष्ट्वा धृष्टकेतुरमर्षणः। तोमरंव्यसृज
त्तूर्णंशक्तिंचकनकोज्वलां। तोमरंतुत्रिभिर्बाणैर्द्रोणश्छित्वामहामृधे। शक्तिंचिच्छेदसहसाकृतहस्तोमहाबलः।
ततोस्यविशिखंतीक्ष्णंवधार्थंवधकांक्षिणः। प्रेषयामाससमरेभारद्वाजःप्रतापवान्॥ सतस्यकवचंभि
त्वाहृदयंचामितौजसः। अभ्यगाद्धरणींबाणोहंसःपद्मसरोयथा। सगाढविद्धस्तेनासौशुहृदिराजन्
महायशाः। पपातचरथात्तूर्णंधृष्टकेतुर्महारथः। पतंगंहियसद्वाग्निर्यथाराजन्बुभुक्षितः। तथाद्रोणो
ग्रसच्छूरोधृष्टकेतुंमहामृधे। निहतेचेदिराजेतुतत्सैन्यंपित्र्यमाविशत्। अमर्षवशमापन्नःपुत्रोस्यप
रमास्त्रवित्। तमपिप्रहसन्द्रोणःशरैर्निन्येयमक्षयं। महाव्याघ्रोमहारण्येमृगशावंयथाबली॥ ते
षुप्रक्षीयमाणेषुपांडवेयेषुभारत। जरासंधसुतोवीरःस्वयंद्रोणमुपाद्रवत्। सतुद्रोणंमहा
राजाछादयत्सायकैःशितैः। अदृश्यमकरोत्तूर्णंजलदोभास्करंयथा। तस्यतल्लाघवंदृष्ट्वाद्रोणः
क्षत्रियमर्दनः। व्यसृजत्सायकांस्तूर्णंशतशोथसहस्रशः। छादयित्वारणेद्रोणोरथस्थंरथिनांव

रःज्ञात्वासंधिमथाजघ्नेमिषतांसर्वधन्विनां। योयस्मलीयतेद्रोणंतत्तंद्रोणोंतकोपमः।३। आदत्तसर्वभूता
निप्राणेकाळेयथांतकः। ततोद्रोणोमहेष्वासोनामविश्राव्यसंयुगे। शरैरनेकसाहस्रैः पांडवेयान्व्यमो
हयत्। तेतुद्रोणंकिरात्ताबाणाः स्वपपुंरवाः शिलाशिताः। नरनागान्हयांश्चैवनिजघ्नुःसर्वतोरणे। तेवध्य
मानाद्रोणेनशक्रेणेवमहासुराः। समकंपंतपांचालाः गावःशीतार्दिताइव। ततोनिष्ठानकोघोरःपांड
वानामजायत। द्रोणेनवध्यमानेषुसैन्येषुभरतर्षभ। मोहिताःशरवर्षेणभारद्वाजस्यसंयुगे। उरुग्रा
हगृहीताहिपांचालानांमहारथाः। चेदयश्चमहाराजसंजयाःसोमकास्तथा। अभ्यद्रवंतसंहृष्टाभार
द्वाजंयुयुत्सया। ब्रुवंतश्चरणान्योन्यंचेदिपांचालसंजयाः।८। घ्नतद्रोणंघ्नतद्रोणमितितेद्रोणमभ्ययुः।

द्रो॰प
११८

यतंतः पुरुषव्याघ्राः सर्वशात्र्या महायुधि। निनीषंतोरणेद्रोणंयमस्यसदनंप्रति। यतमानांस्तुतान्वीरान्भार
द्वाजः शिलीमुखैः। यमायप्रेषयामासचेदिमुख्यान्विशेषतः। तेषुप्रक्षीयमाणेषुचेदिमुख्येषुभारत। पांचा
लाः समकंपंतद्रोणसायकपीडिताः। प्राक्रोशन्भीमसेनंते धृष्टद्युम्नरथंप्रति। दृष्ट्वाद्रोणस्यकर्माणितथारूपा
णिमारिष। ब्राह्मणेनतपोनूनंचरितंदुश्चरंमहत्। तथाहियुद्धसंक्रुद्धोदहतिक्षत्रियर्षभान्। धर्मोयुद्धंक्षत्रिय
स्यब्राह्मणस्यपरंतपः। तपस्वीकृतविद्यश्चप्रेक्षितेनापिनिर्दहेत्। द्रोणास्त्रमग्निसंस्पर्शंप्रविष्टाःक्षत्रियर्षभाः।
बहवोदुस्तरंघोरंयत्रादह्यंतभारत। यथाबलंयथोत्साहंयथासत्वंमहाद्युतिः। मोहयन्सर्वभूतानिद्रोणो
हंतिबलानिनः। तेषांतद्वचनंश्रुत्वाक्षत्रधर्माव्यवस्थितः। अर्द्धचंद्रेणचिच्छेदद्रोणस्यसशरंधनुः। ससंर
ब्धतरोभूत्वाद्रोणःक्षत्रियमर्दनः। अन्यत्कार्मुकमादायभास्वरंवेगवत्तरं। तत्राधायशरंतीक्ष्णंभारघ्नंवि
मलंदृढं। आकर्णपूर्णमाचार्योबलवानभ्युपास्त्रत्। जत्रु। सहत्वाक्षत्रधर्माणंजगामधरणीतलं।
सभिन्नहृदयोवेगादपतन्मेदिनीतले। ततः सैन्यान्यकंपंत धृष्टद्युम्नसुते हते। अ

राम
११८

यद्रोणं समारोहच्चेकितानो महारथः। स द्रोणं दशभिर्बाणैः प्रत्यविध्यत्स्तनांतरे। स सप्तभिः सारथिं चास्य चतुर्भिश्चतुरो हयान्। तस्याचार्यः षो
डशभिरविध्यद्दक्षिणं भुजं। ध्वजं षोडशभिर्बाणैर्यंतारं चास्य सप्तभिः। तस्य सूते हते तेश्वा रथमादाय विद्रुताः। समरे शरसंवीता भारद्वाजे
न मारिष। चेकितानरथं दृष्ट्वा चेदिपांचालसृंजयान्। समंताद्द्रावयद्द्रोणो बहु षोडशवर्षवत्। अथ द्रोणं महाराज विचरंतमभीतवत्। कुरू
न्हंतं ममन्यंत राजानः शत्रुसूदनं। ततोब्रवी महाराज द्रुपदो बुद्धिमान्नृप। लुब्धायुं संवियान्हंति व्याघ्रः क्षुद्रमृगानिव। कृच्छ्रान्दुर्योधनो लो
कान्पापः प्राप्स्यति दुर्मतिः। यस्य लोभाद्विनिहताः समरे क्षत्रियर्षभाः। शतशः शेरते भूमौ निकृत्ता गोवृषा इव। रुधिरेण परीतांगाः श्व
शृगालादनीकृताः। एवमुक्त्वा महाबाहुर्द्रुपदोक्षौहिणीपतिः। पुरस्कृत्य रणे पार्थान्द्रोणमभ्यद्रवद्द्रुतं॥ ॥इति द्रोणपर्वणि जयद्रथव
धे सात्यकिप्रवेशः समाप्तः॥ १२७ ॥ संजय उवाच॥ ॥ व्यूहेष्वालोड्यमानेषु पांडवानां समंततः। सुदूरमन्वयुः पार्थाः पांचालाः सह सोमकैः।
वर्तमाने तथा रौद्रे संग्रामे लोमहर्षणे। संक्षये जगतस्तीव्रे युगांत इव भारत। द्रोणे युधि पराक्रांते नर्दमाने मुहुर्मुहुः। पांचालेषु च क्षीणेषु वध्य
मानेषु पांडुषु। नापश्यच्छरणं किंचिद्धर्मराजो युधिष्ठिरः। चिंतयामास राजेंद्रः कथमेतद्भविष्यति। तत्रावेक्ष्य दिशः सर्वाः सव्यसाचिदिदृक्षया।
युधिष्ठिरो ददर्शाथ नैव पार्थं न माधवं। सोपश्यन्नरशार्दूलं वानरर्षभलक्षणं। गांडीवस्य च निर्घोषमशृण्वन्व्यथितेंद्रियः। अपश्यन्सात्यकिं चा
पि वृष्णीनां प्रवरं रथं। चिंतयाभिपरीतांगो धर्मराजो युधिष्ठिरः। नाध्यगच्छत्तदा शांतिं तावपश्यन्नरोत्तमौ। लोकोपक्रोशभीतत्वाद्धर्मराजो म
हामनाः। अचिंतयन्महाबाहुः शैनेयस्य रथं प्रति। पदवीं प्रेषितश्चैव फाल्गुनस्य मया रणे। शैनेयः सात्यकिः सत्यो मित्राणामभयंकरः। तदिदं
ह्येकमेवासीद्द्विधाजातं मे माधवे। सात्यकिश्चैव विज्ञेयः पांडवश्च धनंजयः। सात्यकिं प्रेषयित्वा तु पांडवस्य पदानुगं। सात्वतस्यापि कं पुनः प्रेष

द्रो०पृ०
११२

यिष्येपदानुगं। करिष्यामि प्रयत्नेन भ्रातुरन्वेषणं यदि। युयुधानमनन्विष्य लोको मां गर्हयिष्यति। भ्रातुरन्वेषणं कृत्वा धर्मपुत्रो युधिष्ठि
रः। परित्यजति वार्ष्णेयं सात्यकिं सत्यविक्रमं। लोकापवादभीतस्य सोहं पार्थं वृकोदरं। पदवीं प्रेषयिष्यामि माधवस्य महात्मनः। यथैव च
मम प्रीतिरर्जुने शत्रुसूदने। तथैव वृष्णिवीरेपि सात्वते युद्धदुर्मदे। सहायोनाभिकेश्चितेन विंदामिकश्मलं। तस्यैकश्चोरणे नूनं युध्यते
युद्धदुर्मदः। यस्य वीर्यवतो वीर्यमुपजीवंति पांडवाः। अतिभारे नियुक्तश्च मया शैनेयनंदनः। स तु भिन्नोपरोधेन गौरवाच्च महाबलः। भवि
ष्टो भारतीं सेनां मकरः सागरं यथा। असौ हि श्रूयते शब्दः शूराणामनिवर्तिनां। मिथः संयुध्यमानानां वृष्णिवीरेण युध्यतां। प्राप्तकालं सु
बलवन्निश्चितं प्रतिभाति मे। तत्र वै पांडवेयस्य भीमसेनस्य धन्विनः। गमनं रोचते मह्यं यत्र यातो महारथौ। न चाप्यसह्यं भीमस्य विद्यते
भुवि किंचन। शक्तो ह्येष रणे यत्तान् पृथिव्यां सर्वधन्विनः। स्वबाहुबलमास्थाय प्रतिव्यूहितुमोजसा। यस्य बाहुबलं सर्वे समाश्रित्य महा
त्मनः। वनवासान्निवृत्ताः स्म न च युद्धेषु निर्जिताः। इतो गते भीमसेने सात्वतं प्रति पांडवे। सनाथौ भवितारौ हि युधि सात्वतफाल्गुनौ। कथं
तु शोचनीयौ तौ रणे सात्वतफाल्गुनौ। रक्षितौ वासुदेवेन स्वयं शस्त्रविशारदौ। अवश्यं तु मया कार्यमात्मनः शोकनाशनं। तस्माद्भीमं नि
योक्ष्यामि सात्वतस्य पदानुगं। ततः प्रतिकृतं मन्ये विधानं सात्वतं प्रति। एवं निश्चित्य मनसा धर्मपुत्रो युधिष्ठिरः। यंतारमब्रवीद्राजन् भीमं प्रति नयस्व
मां। धर्मराजवचः श्रुत्वा सारथिर्हयकोविदः। रथं हेमपरिष्कारं भीमांतिकमुपानयत्। भीमसेनमनुप्राप्य प्राप्तकालमचिंतयत्। कश्मलं प्राविश
द्राजा बहु तत्र स्म आदिशत्। स बलं च समाविष्टो भीममाहूय पांडवः। अब्रवीद्वचनं राजन् कुंतीपुत्रो युधिष्ठिरः। यः स देवान् सगंधर्वान् दैत्यांश्चैके
रथोजयत्। तस्य लक्ष्म न पश्यामि भीमसेनानुजस्य ते। ततोब्रवीद्धर्मराजं भीमसेनस्तथागतं। नैवाद्राक्षं न चाश्रौषं तव कश्मलमीदृशं। पुरा

राम
११२

हिदुःखदीर्णानां भवान्गतिरभूद्विभः। उत शिष्टोग्निष्ठराजेंद्र शाधि किंकरवाणिते। नत्यसाध्यमकार्यं वा विद्यते मम मानद। आज्ञापय कुरुश्रेष्ठ मा च शोके म
नः कृथाः। तमब्रवीदश्रुपूर्णः कृष्णसर्प इव श्वसन्। भीमसेनमिदं वाक्यं प्रम्लानवदनो नृपः। यथा शंखस्य निर्घोषः पांचजन्यस्य श्रूयते। पूरितो वासु
देवेन संरब्धेन यशस्विना। नूनमद्य हतः शेते तव भ्राता धनंजयः। तस्मिन्विनिहते नूनं युध्यतेसौ जनार्दनः। यस्य सत्ववतो वीर्यमुपजीवंति पांड
वाः। यं भयेष्वभिगच्छंति सहस्राक्षमिवामराः। स शूरः सैंधवं प्रेप्सुरन्वयाद्भारतीं चमूं। तस्य वै गमनं विद्मो भीम नावर्तनं पुनः। श्यामो युवा गुडा
केशो दर्शनीयो महाभुजः। व्यूढोरस्को महाबाहुर्मत्तद्विरदविक्रमः। चकोरनेत्रस्ताम्राक्षो द्विषतामघवर्द्धनः। तदिदं मम भद्रं ते शोकस्थानमरिंदम।
अर्जुनार्थं महाबाहो सात्वतस्य च कारणात्। वर्द्धते हविषेवाग्निरिध्यमानः पुनः पुनः। तस्य लक्ष्म न पश्यामि तेन विंदामि कश्मलं। तं विद्धि पुरुषव्या
घ्रं सात्वतं च महारथं। स तं महारथं पश्चादनुयातस्तवानुज। तमपश्यन्महाबाहुमहं पश्यामि कश्मलं। पार्थे तस्मिन्हते चैव [illegible]ध्यते नूनमच्युतः। सह
यो नास्ति वै कश्चित्तेन विंदामि कश्मलं। तस्मात्कृष्णो रणे नूनं युध्यते युद्धकोविदः। न हि शुध्यंति मे भावस्तयोरेव परंतपः। त्वं तत्र गच्छ कौंतेय यत्र या
तो धनंजयः। सात्यकिश्च महावीर्यः कर्तव्यं यदि मन्यसे। वचनं मम धर्मज्ञ ज्येष्ठो भ्राता भवामि ते। न ते र्जुनस्तथा ज्ञेयो ज्ञातव्यः ज्ञातव्यः सात्यकि
र्यथा। चिकीर्षुर्मत्प्रियं पार्थ स यातः सव्यसाचिनः। पदवीं दुर्गमां घोरामगम्यामकृतात्मभिः। दृष्ट्वा कुशलिनौ कृष्णौ सात्यकिं चैव सात्वतं। संविधं म
म चक्षीथाः सिंहनादेन पांडव॥ ॥इति द्रोणपर्वणि जयद्रथवधे॥ श्री भीमसेन उ०॥ ॥ब्रह्मेशानेंद्रवरुणानवहद्यः पुरा रथः। तमास्थाय गतौ कृष्णौ न त
योर्विद्यते भयं। आज्ञां तु शिरसा बिभ्रन्नेष गच्छामि मा शुचः। समेत्य तान्नरव्याघ्रांस्तव दास्यामि संविदं॥ ॥संजय उ०॥ ॥एतावदुक्त्वा वचनं परिहाय यु
धिष्ठिरं। धृष्टद्युम्नाय बलवान्सुहृद्भ्यश्च पुनः पुनः। धृष्टद्युम्नं चेदमाह भीमसेनो महाबलः। विदितं ते महाबाहो यथा द्रोणो महारथः। ग्रहणे धर्म

द्रो०प० राज्ञस्यसर्वैर्यायिनवर्त्तते। तवमेगमनेकृत्यंताहगस्यार्थंनविद्यते। यादृशंरक्षणेराज्ञःकार्यमत्ययिकंहिनः। एवमुक्तोस्मिपार्थेनप्रतिवक्तुंनचोत्सहे।
१२० सयास्येतत्रयत्रासौमुमूर्षुःसैंधवस्थितः। धर्मराजस्यवचनेस्थातव्यमविशंकया। यास्यामिपदवींभ्रातुःसात्वतस्यचधीमतः। सोद्ययत्तोरणेपा
र्थंपरिरक्षयुधिष्ठिरं। एतद्धिसर्वकार्याणांपरमंकृत्यमाहवे। तमब्रवीन्महाराजधृष्टद्युम्नोवृकोदरं। ईप्सितेनमहाबाहोगच्छपार्थविचारयन्। ना
हत्वासमरेद्रोणोधृष्टद्युम्नंकथंचन। निग्रहंधर्मराजस्यप्रकरिष्यतिसंयुगे। ततोनिक्षिप्यराजानंधृष्टद्युम्नायपांडवः। अभिवाद्यगुरुंज्येष्ठंप्रय
योयत्रफाल्गुनः। परिष्वक्तस्तुकौंतेयोधर्मराजेनभारत। आघ्रातश्चतथामूर्द्ध्निश्रावितश्चाशिषःशुभाः। कृत्वाप्रदक्षिणान्विप्रानर्चितांस्तुष्टमा
नसान्। आलभ्यमंगलान्यष्टौपीत्वाकैरातकंमधु। द्विगुणाढ्यविशेषावीरोमदरक्तांतलोचनः। विप्रैःकृतस्वस्त्ययनोविजयोत्पातसूचितः। पश्यन्ने
वात्मनोबुद्धिंविजयानंदकारिणीं। अनुलोमानिलैश्चाशुप्रदर्शितजयोदयः। भीमसेनोमहाबाहुःकवचीशुभकुंडली। [illegible]गदःसतलत्राणःसरथो
रथिनांवरः। तस्यकार्ष्णायसंवर्महेमचित्रंमहर्द्धिमत्। विबभौसर्वतःश्लिष्टंसविद्युदिवतोयदः। पीतरक्तासितसितैर्वासोभिश्चसुवेष्टितः। कंठ
त्राणेनचबभौसेंद्रायुधइवांबुदः। प्रयातेभीमसेनेतुतवसैन्यंयुयुत्सया। पांचजन्यरवोघोरःपुनरासीद्विशांपते। तंश्रुत्वानिनदंघोरंत्रैलोक्य
त्रासनंमहत्। पुनर्भीमंमहाबाहुर्धर्मपुत्रोभ्यभाषत। एषवृष्णिप्रवीरेणध्मातःसलिलजोभृशं। पृथिवींचांतरिक्षंचविनादयतिशंख
राट्। नूनंव्यसनमापन्नेसुमहत्सव्यसाचिनि। कुरुभिर्युध्यतेसार्द्धंसर्वैश्चक्रगदाधरः। अहोकुंतीनूनमार्यापापमद्यनिदर्श राम
नं। द्रौपदीचसुभद्राचपश्यंतेसहबंधुभिः। सभीमत्वरयायुक्तोयाहियत्रधनंजयः। ० ० ० ० ० ० ० ० ० ० १२०

मुखं तीव हि मे सर्वं धनंजयदिदृक्षया। दिशः सप्रदिशः पार्थ सात्वतं स्वंव कारणात्। गच्छ गच्छेति च पुनर्भीमसेनमभाषत। भ्रातुः सप्रहितो भी
माभ्रोता भ्रातुः प्रियंकरः। आहत्य दुंदुभिं भीमः शंखं चाध्माय चासकृत्। विनद्य सिंहनादं च ज्यां विकर्षन्पुनः पुनः। दर्शयन्घोरमात्मानं भू
मित्रान्सहसाभ्ययात्। तमुग्रजवनादंतं ताविरवं तो हयोत्तमाः। विशोकेनाभिसंयत्ता मनोमारुतरंहसः। आरुजन्विरुजन्पार्थो ज्यां विकर्षन्मनो
नुगः। प्रसंभ्रकर्षन्विकर्षन्स सेनायं समलोडयत्। तं प्रयांतं महाबाहुं पांचालाः सहसोमकाः। पृष्ठतोनुययुः शूरा मघवंतमिवामराः। तं
समेता महाराज तावकाः पर्यवारयन्। दुःशलश्चित्रसेनश्च कुंडभेदी विविंशतिः। दुर्मुखो दुःसहश्चैव विकर्णश्च शलस्तथा। विंदानुविंदौ सुमु
खो दीर्घबाहुः सुदर्शनः। वृंदारकः सुहस्तश्च सुषेणो दीर्घलोचनः। अभयो रौद्रकर्मा च सुवर्मा दुर्विमोचनः। शोभंतो रथिनां श्रेष्ठाः सहसैन्य
पदानुगाः। संयत्ताः समरे शूरा भीमसेनमुपाद्रवन्। तान्समीक्ष्य स कौंतेयो भीमसेनः पराक्रमी। अभ्यधावत वेगेन सिंहः क्षुद्रमृगानिव।
ते महास्त्राणि दिव्यानि तत्र वीराः प्रदर्शयन्। वारयंतः शरैर्भीमं मेघाः सूर्यमिवोदितं। स तानतीत्य वेगेन द्रोणानीकमुपाद्रवत्। तमधारयद्द्रो
णो वेलेवोद्धृतमर्णवं। ललाटेताडयच्चैनं नाराचेन स्मयन्निव। ऊर्ध्वरश्मिरिवादित्यो विबभौ तत्र पांडवः। समन्यमानस्त्वाचार्यो ममायं फाल्गुनो
यथा। भीमः करिष्यते पूजामित्युवाच वृकोदरं। भीमसेन न ते शक्यं प्रवेष्टुमरिवाहिनीं। मामनिर्जित्य समरे शत्रुमध्ये महाबल। यदि ते सानु
जः कृष्णः प्रविष्टोनुमते मम। अनीकं तु न शक्यं मे प्रवेष्टुमिह वै त्वया। अथ भीमस्तु तच्छ्रुत्वा गुरोर्वाक्यमपेतभीः। क्रुद्धः प्रोवाच वै द्रोणं रक्तता
म्रेक्षणः स्मयन्। तवार्जुनो नानुमते ब्रह्मबंधो रणाजिरं। प्रविष्टः स हि दुर्धर्षः शक्रस्यापि विशेद्बलं। येन वै परमां पूजां कुर्वता मानितो
ह्यसि। नार्जुनोहं घृणी द्रोण भीमसेनोस्मि ते रिपुः। पिता नस्त्वं गुरुर्बंधुस्तथा पुत्रा हि ते वयं। इति मन्यामहे सर्वे भवंतं प्रणताः स्थिताः। अद्य तद्विप

द्रो॰प॰
१२९

रातं ते वदतो स्मास्कंदयते। यदि शत्रुं त्वमात्मानं मन्यसे रतत्तथास्त्विह। एतत्ते सदृशं शत्रोः कर्म भीमं करोम्यहं। अथोद्यम्य गदां भीमः कालदंड
मिवांतकः। द्रोणाय व्यसृजद्राजन्स रथो वेदेपु प्लुवे। साश्वसूतध्वजं यानं द्रोणस्यापोथयत्तदा। पार्थस्त्वांश्च बहून्योधान्वायुर्वृक्षानिवौजसा। तं
पुनः परिवव्रुस्ते तव पुत्रा रथोत्तमं। अन्यं तु रथमास्थाय द्रोणः प्रहरतां वरः। व्यूहद्वारं समासाद्य युद्धाय समवस्थितः। ततः क्रुद्धो महाराज भीमसे
नः पराक्रमी। अग्रतः स्यंदनानीकं शरवर्षैरवाकिरत्। ते वध्यमानाः समरे तव पुत्रा महारथाः। भीमं भीमबला युद्धे योधयंतो जयैषिणः। ततो
दुःशासनः क्रुद्धो रथशक्तिं समाक्षिपत्। सर्वपारसवीं तीक्ष्णां जिघांसुः पांडुनंदनं। आपतंती महाशक्तिं तव पुत्रप्रणोदितां। द्विधा चिच्छेद तां भी
मस्तदद्भुतमिवाभवत्। अथान्यैर्विविधैर्बाणैः संक्रुद्धः कुंडभेदिनं। सुषेणं दीर्घनेत्रं च त्रिभिस्त्रीनवधीद्बली। ततो वृंदारकं वीरं कुरूणां कीर्तिवर्ध
नं। पुत्राणां तव वीराणां युध्यमानमवधीत्पुनः। अभयं रौद्रकर्माणं दुर्विमोचनमेव च। त्रिभिस्त्रीनवधीद्भीमः पुनरेव सुतांस्तव। युध्यमाना महा
राज पुत्रास्तव बलीयसः। भीमं प्रहरतां श्रेष्ठं समंतात्पर्यवारयन्। विंदानुविंदसहितं सुवर्माणं च नेसुते। अहसन्निव कौंतेयः शरैर्निन्ये
यमक्षयं। ततः सुदर्शनं वीरं पुत्रं ते भरतर्षभ। विव्याध समरे तूर्णं स पपात ममार च। सोऽचिरेणैव कालेन तद्रथानीकमाशुगैः। दिशः सर्वाः स
मालोक्य व्यधमत्पांडुनंदनः। ततो वै रथघोषेण गर्जितेन मृगा इव। वध्यमानाश्च समरे पुत्रास्तव विशांपते। प्राद्रवन्सहसा सर्वे भीमसेनभया
र्दिताः। अनुयाय तु कौंतेयः पुत्राणां ते महद्बलं। विव्याध समरे राजन्कौरवेयान्समंततः। वध्यमाना महाराज भीमसेनेन तावकाः। त्यक्त्वा भीमं
रणे योधांस्ति चोदयंतो हयोत्तमान्। तांस्तु निर्जित्य समरे भीमसेनो महाबलः। सिंहनादरवं चक्रे बाहुशब्दं च पांडवः। तलशब्दं च सुमहत्कृत्वा भी
मो महाबलः। व्यतीत्य रथिनश्चापि द्रोणानीकमुपाद्रवत्॥ ॥इति द्रोणपर्वणि भीमसेनप्रवेशो॥२५॥ संजय उ॥ ॥ तमुत्तीर्णं रथानीका

राम
१२९

तमसो भास्करं यथा। निवारयिषुराचार्यः शरवर्षैरवाकिरत्॥ पिबन्निव शरौघांस्तान् द्रोणचापवरातिगान्। सोऽभ्यवर्त्तत सोदर्यान्मायया मोह
यन्बलं॥ तं मृधे वेगमास्थाय परं परमधन्विनः। नोदिताः स्तव पुत्रैश्च सर्वतः पर्यवारयन्॥ स तथा संवृतो वीरः प्रहसन्निव भारत। उदयच्छ
दांतेभ्यो घोरां तां सिंहवन्नदन्॥ अथास्य जवेगेन ततस्तां पांडवो बळी। सेंद्राशनिरिवेंद्रेण प्रविद्धा संहतात्मनो। घोषेण महता राजन्पूर
यंती व मेदिनीं॥ ज्वलंती तेजसा भीमा त्रासयामास ते सुतान्। तां पतंतीं महावेगां दृष्ट्वा तेजोभिसंवृतां॥ प्राद्रवंस्तावकाः सर्वे रवंतो भैरवान्
रवान्॥ तं च शब्दमसह्यं वै तस्याः संलक्ष्य मारिष। प्रापतन्मनुजास्तत्र रथेभ्यो रथिनस्तथा॥ स तान्विद्राव्य कौंतेयः संख्ये मित्रान्दुरासदः। सुप
र्ण इव वेगेन पक्षिराडभ्यगाच्चमूं। तथा त्वं विप्रकुर्वाणं रथयूथपयूथपं। भारद्वाजो महाराज भीमसेनं समभ्ययात्॥ द्रोणस्तु समरे भीमं वारयि
त्वा शरोर्मिभिः। अकरोत्सहसा नादं पांडूनां भयमादधन्॥ तद्युद्धमासीत्सुमहद्घोरं देवासुरोपमं। द्रोणस्य च महाराज भीमस्य च महात्मनः।
यदा तु विशिखैस्तीक्ष्णैर्द्रोणचापविनिःसृतैः। वध्यंते समरे वीराः शतशोऽथ सहस्रशः। ततो रथादवप्लुत्य वेगमास्थाय पांडवः। निमील्य नयने
राजन्पदातिर्द्रोणमभ्ययात्॥ स्कंधे शिरो भीमसेनः करौ कृत्वोरसि स्थितौ। वेगमास्थाय बलवान्मनोऽनिलगरुत्मतां॥ आकांक्षन्शरवर्षाणि ज
वं विद्धि प्रदर्शयन्। यथा हि गोवृषो वर्षं प्रतिगृह्णाति लीलया। तथा भीमो नरव्याघ्रः शरवर्षं समग्रहीत्॥ स वध्यमानः समरे रथं द्रोणस्य मारि
षईषायां पाणिना गृह्य प्रचिक्षेप महाबलः। द्रोणस्तु सत्वरं राजन्क्षिप्तो भीमेन संयुगे। दृश्यते तावके योधैर्विस्मयोत्फुल्ललोचनैः। परित्यज्य र
थं द्रोणस्तूर्णं तस्मान्महीतले। रथमन्यं समारुह्य व्यूहद्वारमधाययौ। परां प्रभुरंवत्तथायांत भग्नोत्साहं गुरुं तदा। गत्वा वेगेन तं भीमो धुरं ग्र
ह्य रथस्य तु। तमप्याजौ रथं भीमः चिक्षेप भृशरोषितः। एवमष्टौ रथाः क्षिप्ताः गुरोर्भीमेन लीलया। व्यदृश्यत निमेषांतात्पुनः स्वरथमास्थि

द्रो.प.
१२२

ततःतस्मिन्क्षणेतस्ययंतातूर्णमश्वाननोदयत्।भीमसेनस्यकौरव्यतदद्भुतमिवाभवत्।ततःसरथमास्थायभीमसेनोमहाबलः।अभ्यवर्त्ततवेगे
नपुत्रस्यतववाहिनीं।समृद्नन्क्षत्रियानाजौवायुर्वृक्षानिवोद्धतः।आगच्छद्दारयन्सेनांसिंधुवेगानगामिव।भोजानीकंसमासाद्यहार्दिक्येना
भिरक्षितं।प्रमथ्यबहुधाराजन्भीमसेनःसमभ्ययात्।सत्रासयन्ननीकानितलशब्देनमारिष।अजयत्सर्वसैन्यानिशार्दूलइवगोवृषा
न्।भोजानीकमतिक्रम्यकांबोजानांचवाहिनीं।तथाम्लेच्छगणांश्चान्यान्बहून्युद्धविशारदान्।सात्यकिंचापिसंप्रेक्ष्ययुध्यमानंनरर्षभं।
रथेनयत्तःकौंतेयोवेगेनप्रययौतदा।भीमसेनोमहाराजद्रष्टुकामोधनंजयं।अतीत्यसमरेयोधांस्तावकान्पांडुनंदनः।सोपश्यदर्जुनंतत्र
युध्यमानंनरर्षभं।सैंधवस्यवधार्थायपराक्रांतंपराक्रमी।अर्जुनंतत्रदृष्ट्वाथचुक्रोशमहतोरवान्।तंतुतस्यमहानादंपार्थःशुश्रावनर्दतः।
ततःपार्थोमहानादंमुंचन्वैमाधवश्चहि।अभ्ययातांमहाराजनर्दंतौगोवृषाविव।वासुदेवार्जुनौश्रुत्वानिनदंतस्यशुष्मिणः।पुनःपुनःप्र
णदतांदिदृक्षंतौवृकोदरं।भीमसेनरवंश्रुत्वाफाल्गुनस्यचधन्विनः।अप्रीयतमहाराजधर्मपुत्रोयुधिष्ठिरः।विशोकश्चाभवद्राजाश्रुत्वातं
निनदंमहत्।धनंजयस्यसमरेजयमाशास्तवान्विभुः।तथातुनर्दमानेवैभीमसेनेरणोत्कटे।स्मितंकृत्वामहाबाहुर्धर्मपुत्रोयुधिष्ठिरः।हृ
द्गतंमनसाप्राप्यध्यात्वाधर्मभृतांवरः।दत्ताभीमत्वयासंवित्कृतंगुरुवचस्तथा।नहितेषांजयोयुद्धेयेषांद्वेष्टासिपांडव।दिष्ट्याजयतिसंग्रा
मेसव्यसाचीधनंजयः।दिष्ट्याचकुशलीवीरःसात्यकिःसत्यविक्रमः।दिष्ट्याशृणोमिगर्जंतौवासुदेवधनंजयौ।याभ्यांशत्रून्रणेजित्वातर्पि
तोहव्यवाहनः।सहंताद्विषतांसंख्येदिष्ट्याजीवतिफाल्गुनः।यस्यबाहुबलंसर्वेवयमाश्रित्यजीविताः।सहंतारिपुसैन्यानांदिष्ट्याजीवतिफा
ल्गुनः।निवातकवचायेनदेवैरपिदुरासदाः।निर्जितारथिनैकेनदिष्ट्यापार्थःसजीवति।कौरवान्सहितान्सर्वान्गोग्रहार्थेसमागमे।योज

राम
१२२

यन्मत्स्यनगरे दिष्ट्या पार्थः सजीवति। कालकेयसहस्राणि चतुर्दश महारणे। योवधीद्भुजवीर्येण दिष्ट्या पार्थः सजीवति। गंधर्वराजं बलिनं दुर्योधनकृ
तेनवै। जितवान्योस्त्रवीर्येण दिष्ट्या पार्थः सजीवति। किरीटमाली बलवान्श्वेताश्वः कृष्णसारथिः। ममप्रियश्चसततं दिष्ट्या जीवति फाल्गुनः। पुत्रशो
काभिसंतप्तश्चिकीर्षुः कर्मदुष्करं। जयद्रथवधान्वेषी प्रतिज्ञां कृतवान्हि सः। कच्चित्स सैंधवं संख्ये हनिष्यति धनंजयः। कच्चित्तीर्णप्रतिज्ञं हि वा
सुदेवेन रक्षितः। अनस्तमित आदित्ये समेष्याम्यहमर्जुनं। कच्चित्स सैंधवो राजा दुर्योधनहितेरथतः। नंदयिष्यन्नमित्रान्हि फाल्गुनेन नि
पातितः। कच्चिद्दुर्योधनो राजा फाल्गुनेन निपातितं। दृष्ट्वा सैंधवकं युद्धे शमम स्मासु धास्यति। दृष्ट्वा विनिहतान्भ्रातॄन्भीमसेनेन संयुगे। क
च्चिद्दुर्योधनो मंदः शमम स्मासु धास्यति। दृष्ट्वा चान्यान्बहून्योधान्पतितान्धरणीतले। दृष्ट्वा दुर्योधनो मंदः पश्चात्तापं नुयास्यति। कच्चिद्भीष्मे
णनो वैरमेकेनैव प्रशाम्यति। शेषस्य रक्षणार्थं च संधास्यति सुयोधनः। एवं बहुविधं तस्य चिंतयानस्य पार्थिव। कृपयाभिपरीतस्य घोरं युद्ध
मवर्तत॥ ॥द्रोणपर्वणि जयद्रथवधे भीमसेनप्रवेशे॥ १२०॥ धृतराष्ट्र उ०॥ ॥तथा तु नर्दमानं तु भीमसेनं महाबलं। मेघस्तनितनिर्घोषं के वीराः
पर्यवारयन्। नहि पश्याम्यहं तं वै त्रिषु लोकेषु संजय। क्रुद्धस्य भीमसेनस्य यस्तिष्ठेदग्रतो रणे। रथं रथेन यो हन्यात्कुंजरे णातु कुंजरं। अश्वमश्वेन
समरे मनुजं मनुजेस्तथा। कस्तस्य समरे स्थाता साक्षादपि पुरंदरः। क्रुद्धस्य भीमसेनस्य मम पुत्रान्जिघांसतः। दुर्योधनहिते युक्ताः समतिष्ठंत के
ग्रतः। भीमसेनदवाग्निस्त्र मम पुत्रतृणोलपं। प्रधक्ष्यतो रणमुखे के तिष्ठन्नग्रतो नराः। काल्यमानान्हि मे पुत्रान्भीमेनावेक्ष्य संयुगे। कालेनेव
प्रजाः सर्वाः के भीमं पर्यवारयन्। न मेर्जुनाद्भयं तादृक्न कृष्णान्न च सात्यकेः। गदाहस्ताच्च मे सूत यादृक्भीमाद्भयं मम। भीमं वह्निः प्रदीप्तस्य मम
पुत्रान्प्रधक्ष्यतः। के शूराः पर्यवर्तंत तन्ममाचक्ष्व संजय॥ ॥संजय उ०॥ ॥तथा तु नर्दमानं तु भीमसेनं महारवान्। कर्णोप्यभ्यपतद्भीमं तु

मुलेनरवेराच। व्याक्षिपद्दलवच्चापमतिमात्रममर्षणः। कर्णस्तु युद्धमाकांक्षन्दर्शयिष्यन्बलीबलं। रुरोध मार्गं भीमस्य वातस्येव महीधरः। भीमो
पि दृष्ट्वा सावेगं पुरो वैकर्तनं स्थितं। चुकोप बलवद्वीरश्चिक्षेपास्य शिलाशितान्। तान्प्रत्यगृह्णात्कर्णोपि प्रतीपं प्रेषयंच्छरान्। ततस्तु सर्वयोधानां पुर
तः प्रेक्षतां तदा। अवेपंतीव गात्राणि कर्णभीमसमागमे। रथिनां सादिनां चैव तयोः श्रुत्वा तलस्वनं। भीमसेनस्य निनदं घोरं श्रुत्वा रणाजिरे। खंच
भूमिं च संबद्धां मेनिरे क्षत्रियर्षभाः। पुनर्घोरेण नादेन पांडवस्य महात्मनः। समरे सर्वयोधानां धनूंष्यभ्यपतन्क्षितौ। विस्रस्तानि च वमणि
शकृन्मूत्रं प्रसुस्रुवुः। वाहनानि महाराज बभूवुर्विमनांसि च। प्रादुरासन्निमित्तानि घोराणि च बहूनि च। तस्मिंस्तु तुमुले राजन्भीमकर्णसमाग
मे। ततः कर्णस्तु विंशत्या शराणां भीममर्दयत्। विव्याध चास्य त्वरितः सूतं पंचभिराशुगैः। प्रहस्य भीमसेनस्तु कर्णं प्राकंपयद्रणे। सायकानां
चतुःषष्ट्या क्षिप्रकारी महाबलः। तस्य कर्णो महाराज सायकांश्चतुरो क्षिपत्। असंप्राप्तांस्तु तान्भीमः सायकैर्नतपर्वभिः। चिच्छेद बहुधा राज
न्दर्शयन्पाणिलाघवं। तं कर्णश्छादयामास शरव्रातैरनेकशः। संछाद्यमानः कर्णेन बहुधा पांडुनंदनः। चिच्छेद चापं कर्णस्य मुष्टिदेशे महार
थः। विव्याध चैनं बहुभिः सायकैर्नतपर्वभिः। अथान्यद्धनुरादाय सज्यं कृत्वा च सूतजः। विव्याध समरे भीमं भीमकर्मा महारथः। तस्य भी
मो भृशं क्रुद्धः त्रीन्शरान्नतपर्वणः। निचखानोरसि तदा सूतपुत्रस्य वेगिनः। तैः कर्णोभ्राजत शरैरुरोमध्यगतैस्तदा। महीधर इवोदग्रस्त्रिशृं
गो भरतर्षभ। सुस्राव चास्य रुधिरं विद्धस्य परमेषुभिः। धातुप्रस्यंदिनः शैलाद्यथा गैरिकधातवः। किंचिद्विचलितः कर्णः प्रहाराभिनिपीडितः।
स सायकं धनुः कृत्वा भीमं विव्याध मारिष। चिक्षेप च पुनर्बाणान्शतशोथ सहस्रशः। संछाद्यमानः सहसा कर्णेन दृढधन्विना। धनुर्ज्यामि
छिनत्तूर्णं विस्मयन्पांडुनंदनः। सारथिं चास्य भल्लेन प्राहिणोद्यमसादनं। वाहांश्च चतुरः संख्ये व्यसूंश्चक्रे महारथः। हताश्वात्तु रथात्तूर्णं स

माप्लुत्य विशांपते। स्यंदनं वृषसेनस्य समारोहन्महारथः। निर्जित्य तु रणे कर्णं भीमसेनः प्रतापवान्। ननाद सुमहानादं पर्जन्य निनदोपमं।
तस्य तं निनदं श्रुत्वा प्रहृष्टो भूद्युधिष्ठिरः। कर्णं तु निर्जितं ज्ञात्वा भीमसेनेन संयुगे। समंतात् शंखनिनदं पांडुसेनाकरोत्तदा। शत्रुसेनाध्वनिं
श्रुत्वा तावका अपि नानदन्। गांडीवं प्राक्षिपत्पार्थः कृष्णोप्यब्जमवादयत्। उपर्युपरि नादांश्च ध्वनिर्भीमस्य नर्दतः। अश्रूयत महाराज
सर्वसैन्येषु मारिष। ततो व्यायच्छतामस्त्रैः पृथक्पृथगजिह्मगैः। मृदुपूर्वं च राधेयो दृढपूर्वं च पांडवः॥ ॥ द्रोणपर्वणि भीमसेनप्रवेशे॥ ॥
॥१२७॥ संजय उ०॥ ॥ तस्मिन्विलुलिते सैन्ये सैंधवायार्जुने गते। सात्वते भीमसेने तु पुत्रस्ते द्रोणमभ्ययात्। त्वरन्नेकरथेनैव बहुकृत्यं विचिं
तयन्। सरथस्तव पुत्रस्य त्वरया परया युतः। तूर्णमभ्यद्रवद्द्रोणं मनोमारुतवेगवान्। उवाचेदं च पुत्रस्ते संरंभाद्रक्तलोचनः। अर्जुनो भीम
सेनश्च सात्यकिश्चापराजिताः। विजित्य सर्वसैन्यानि सुमहांति महारथाः। संप्राप्ताः सिंधुराजस्य समीपमरिकर्षिणः। व्यायच्छंति च तत्रापि
सर्व एव महारथाः। यदि तावद्रणे पार्थो व्यतिक्रांतो महाबलः। कथं सात्यकिभीमाभ्यां व्यतिक्रांतोसि मानद। नाशाय एव तु मे नूनं मंदभाग्य
स्य दृश्यते। आश्चर्यभूतं लोकेस्मिन्समुद्रस्येव शोषणं। निर्जयं तव विप्राग्र्य सात्वतेनार्जुनेन च। तथैव भीमसेनेन लोकः संवदते भृशं। क
थं द्रोणो जितः संख्ये धनुर्वेदस्य पारगः। नाशायैव तु नूनं मे मंदभाग्यस्य संयुगे। यत्र त्वां पुरुषव्याघ्र व्यतिक्रांतास्त्रयो रथाः। एवं गते तु
कृत्येस्मिन्ब्रूहि यत्ते विवक्षितं। यद्गतं गतमेवेदं शेषं चिंतय मानद। यत्कृत्यं सिंधुराजस्य प्राप्तकालमनंतरं। तद्ब्रवीतु भवान् क्षिप्रं साधु
तत्संविधीयतां॥ ॥ द्रोण उ०॥ ॥ चिंत्यं बहु महाराज कृत्यं यत्तत्तु मे शृणु। त्रयो हि समतिक्रांताः पांडवानां महारथाः। यावत्तेषां भयं प
श्चात्तावत्तेषां पुरःसरं। तद्गरीयस्तरं मन्ये यत्र कृष्णधनंजयौ। सा पुरस्ताच्च पश्चाच्च गृहीता तव भारती। तत्र कृत्यमहं मन्ये सैंधवस्याभि

रक्षणं। सनोरक्ष्येत्तन स्तात क्रुद्धाद्गीमाद्धनंजयात्। गतो हि सैंधवं वीरो युयुधानवृकोदरौ। संप्राप्तं तदिदं द्यूतं यत्र तच्छकुनिर्बुद्धिजं। न सभा
यां जयो तत्रो नापि राजन्पराजयः। यत्र ते बहवस्तात कुरवः पर्यवस्थिताः। इह वो ग्लहमानानामद्य तात जयाजयो। यांस्मतानू ग्लहते घोरांश
कुनिः कुरुसंसदि। अक्षान्समन्यमानः सन्प्राक्शरास्ते दुरासदाः। नते क्षौणि शिता घोराः शरायुष्मत्तनुछिदः। सेनांदुरोदरं विद्धि शरानक्षा
न्विशांपते। ग्लहं च सैंधवं राजन् तत्र द्यूतस्य निश्चयं। सैंधवे हि महाद्यूतमासक्तं नापरैः सह। अत्र सर्वे महाराज त्यक्त्वा जीवितमात्मनः।
सैंधवस्य रणे रक्षां विधिवत्कर्तुमर्हथ। तत्र नो ग्लहमानानां ध्रुवं तात जयाजयो। यत्र ते परमेष्वासा यत्ता रक्षंति सैंधवं। तत्र याहि स्वयं
शीघ्रं यत्तो रक्षस्व सैंधवं। इहैव त्वह मास्थाय प्रेषयिष्यामि चापरान्। निरोत्स्यामि च पांचालान् सहितान्पांडुसृंजयैः। ततो दुर्योधनः प्रा
यात्तूर्णमासाधं शासनं। उधम्यायुधमुग्रायकर्मणे सपदानुगः। चक्ररक्षौ तु पांचाल्यौ युधामन्यूत्तमौजसौ। बाह्येन सेनामभ्येत्य जग्म
तुः सव्यसाचिनं। तौ हि पूर्वं महाराज वारितौ कृतवर्मणा। प्रविष्टे चार्जुने राजन् सवसैन्यं युयुत्सया। पार्श्वेन सैन्यमायांतौ कुरुराजो
ददर्श ह। ताभ्यां दुर्योधनः सार्द्धमैघट्टयुद्धमुत्तमं। त्वरितस्त्वरमाणाभ्यां भ्रातृभ्यां भारतो बली। तावभ्यद्रवत्तामिनमुभावुद्यत्तकार्मुको
महारथौ समाख्यातौ क्षत्रियप्रवरौ युधि। तमविध्यद्युधामन्युर्विंशत्या निशितैः शरैः। विंशत्या सारथिं चापि चतुर्भिश्चतुरो हयान्।
दुर्योधनो युधामन्योर्ध्वजमेकेषुणाछिनत्। इषुधा कार्मुकं चास्य सन्निकृत्य रथोत्तमे। सारथिं चास्य भल्लेन रथनीडादपाहरत्। ततो वि
ध्यद्धरैस्तीक्ष्णैश्चतुर्भिश्चतुरो हयान्। युधामन्युस्तु संक्रुद्धो दुस्तरां स्त्रिंशतिं शरान्। व्यसृजत्तवपुत्रस्य त्वरमाणस्तनांतरे। तथोत्तमौ
जाः संक्रुद्धः शरैर्हेमविभूषितैः। अविध्यत्सारथिं चास्य प्राहिणोद्यमसादनं। दुर्योधनोपि राजेंद्र पांचाल्यस्योत्तमौजसः। जघान चतु

रोस्याश्वांस्तथातोपार्ष्णिसारथी। उत्तमौजा हताश्वश्च हतसूतश्च संयुगे। आरुरोह रथं भ्रातुर्युधामन्योरभित्वरन्। स रथं प्राप्य तं भ्रा
तुर्दुर्योधनहयान्शरैः। बहुभिस्ताडयामास ते हताः प्रापतन्भुवि। हयेषु पतितेष्वस्य स्य चिच्छेद परमेषुणा। युधामन्युर्धनुः शीघ्रं हस्ता
वापं च संयुगे। हताश्वसूतात्स रथादवप्लुत्य महारथः। गदामादाय ते पुत्रः पांचाल्यावभ्यधावत। तमापतंतं संप्रेक्ष्य क्रुद्धं परपुरंज
यं। अवप्लुत्य रथोपस्थाद्युधामन्यूत्तमौजसौ। ततः स हेमचित्रं तं स्यंदनप्रवरं गदी। गदया पोथयामास साश्वसूतध्वजं रणे। हत्वा
चैवं स पुत्रस्ते हताश्वो हतसारथिः। मद्रराजरथं तूर्णमारुरोह परंतपः। पांचालानां तु मुख्यौ तौ राजपुत्रौ महाबलौ। रथमन्यं समारु
ह्य धनंजयमुपेयतुः॥ ॥ द्रोणपर्वणि जयद्रथवधे भीमसेनप्रवेशे ॥१२८॥ धृतराष्ट्र उ० ॥ ॥ यौ तौ कर्णश्च भीमश्च संप्रयुद्धौ महाब
लौ। अर्जुनस्य रथोपांते कीदृशः सोभवद्रणः। पूर्वं हि निर्जितः कर्णो भीमसेनेन संयुगे। कथं भूयस्तु राधेयो भीममागान्महारथं। भी
मो वा सूततनयं प्रत्युद्यातः कथं रणे। महारथं समाख्यातं पृथिव्यां प्रवरं रथं। भीष्मद्रोणावतिक्रम्य धर्मपुत्रो युधिष्ठिरः। नान्यतो भय
मादत्त विना कर्णं धनुर्धरं। भयान्न रोते सततं चिंतयन्वै महारथं। तं कथं सूतपुत्रं हि भीमो युध्यत संयुगे। यौ तौ समीयतुर्वीरावर्जुनस्य
रथं प्रति। कथं नु तावयुध्येतां सूतपुत्रवृकोदरौ। भ्रातृत्वं दर्शितं पूर्वं घृणी चापि स सूतजः। कथं भीमेन युयुधे कुंत्या वाक्यमनुस्मरन्।
भीमो वा सूतपुत्रेण स्मरन्वैरं पुराकृतं। अयुध्यत कथं वीरः कर्णेन सह संयुगे। आशास्ते च सदा सूतपुत्रो दुर्योधनो मम। कर्णो जेष्य
ति संग्रामे सहितान्पांडवानिति। जयाशा यत्र वीरस्य मम पुत्रस्य संयुगे। स कथं भीमकर्माणं भीमसेनमयुध्यत। यं समाश्रित्य पु
त्रैर्मे कृतं वैरं महारथैः। तं सूततनयं तात कथं भीमोत्ययोधयत्। अनेकान्विप्रकारांश्च सूतपुत्रसमुद्भवान्। स्मरमाणः कथं

भीमो युयुधे सूतसूनुना। यो जयत्पृथिवीं सर्वां रथेनैकेन वीर्यवान्॥ तं सूततनयं युद्धे कथं भीमो ह्ययोधयत्। यो जातः कुंडलाभ्यां च कवचेन स
हैव च॥ तं सूततनयं युद्धे कथं भीमो ह्ययोधयत्। यथा तयोर्युद्धमभूद्यथासीद्विजयस्तयोः॥ तन्ममाचक्ष्व तत्वेन कुशलो ह्यसि संजय॥ ॥
॥ ॥संजय उ॰॥ ॥भीमसेनस्तु राधेयमुत्सृज्य रथिनां वरं। इयेष गंतुं यत्रासौ वीरौ कृष्णधनंजयौ॥ तं प्रयांतमभिद्रुत्य राधेयः कंकपत्रि
भिः। अभ्यवर्षन्महाराज मेघो वृष्ट्येव पर्वतं॥ फुल्लता पंकजेनेव वक्त्रेणाभ्युत्स्मयन्बली। आजुहाव रणे यांतं भीममाधिरथिस्तदा॥ भी
मा हि ते त्वया वरं शेर थो यात्यनिवारितः। न दृश्यसि कस्मान्मे पृष्ठं पार्थ दिदृक्षया॥ कुंत्याः पुत्रस्य सदृशं नेदं पांडवनंदन। तेन मामभितः
स्थित्वा शरवर्षैरवाकिर॥ भीमसेनस्तथाह्वानं कर्णान्नामर्षयद्युधि। अर्धमंडलमाश्रित्य सूतपुत्रमयोधयत्॥ अवक्रगामिभिर्बाणैर
भ्यवर्षन्महायशाः। द्वैरथे दंशितं यांतं सर्वशस्त्रविशारदं॥ विधित्सुः कलहस्यांतं जिघांसुः कर्णमाक्षिपोत्॥ हत्वा तस्यानुगांस्तं वा न्भी
मसेनो महारथः। तस्मै प्रासृजदुग्राणि विविधानि परंतपः॥ अमर्षः पांडवः क्रुद्धः शरवर्षाणि मारिष। तस्य तानीषुवर्षाणि मत्तद्विरदगा
मिनः। सूतपुत्रोऽस्त्रमायाभिरग्रसत्स महायशाः॥ स यथावन्महाराज विद्यया वै सुपूजितः। आचार्यवन्महेष्वासः कर्णः पर्यपतद्रणे॥ संरंभे
णानुयुध्यंतं भीमसेनं स्मयन्निव। अवमन्य ततो राधेयः स चामर्षी वृकोदरः॥ तन्नामृष्यत कौंतेयः कर्णस्य स्मितमाहवे। युध्यमानेषु वीरेषु
युध्यत्सु च समंततः॥ तं भीमसेनः संप्राप्तं वत्सदंतैस्तनांतरे। विव्याध बलवान्क्रुद्धस्तोत्रैरिव महाद्विपं॥ पुनश्च सूतपुत्रं तु स्वर्णपुंखैः सुनिशि
तैः शरैः। सुमुक्तैश्चित्रवर्माणं निर्बिभेद त्रिसप्तभिः॥ कर्णो जांबूनदैर्जालैः संच्छन्नान्वातरंहसः। विव्याध चतुरो वीरः पंचभिः पंचभिः
शरैः॥ ततो बाणमयं जालं भीमसेनरथं प्रति। कर्णेन विहितं राजन्निमेषार्धाददृश्यत॥ सरथः सध्वजस्तत्र ससूतः पांडवस्तदा। प्राच्छाद्य

तंमहाराजकर्णचापच्युतैःशरैः। तस्यकर्णःचतुःषष्ट्याव्यधमत्कवचंदृढं। क्रुद्धश्चाभ्यहनत्पार्थैर्नाराचैर्मर्मभेदिभिः। ततोभित्वामहावेगान्
कर्णचापविनिसृतान्। समाश्लिष्यदसंभ्रांतःसूतपुत्रंवृकोदरः। सकर्णचापंचिच्छेद भीमसेनोमहाबलः। त्रासयित्वामहाराजजगामामि
तविक्रमः। ततोद्वात्रिंशताभल्लैःनिशितैस्तिग्मतेजसैः। विव्याधसमरेकर्णंभीमसेनःप्रतापवान्। अयत्नेनैवतंकर्णःशरैःकोपात्स
माकिरत्। भीमसेनंमहाबाहुंसैंधवस्यवधेषिणं। मृदुपूर्वंचराधेयोभीमभाजावयोधयत्। क्रोधपूर्वंतथाभीमःपूर्ववैरमनुस्मरन्।
तंभीमसेनोनामृष्यदवमानममर्षणः। सतस्मैव्यसृजत्तूर्णंशरवर्षममित्रजित्। तेशराःप्रेषिताराजन्भीमसेनेनसंयुगे। निपेतुःसर्व
तोमार्गेगिर्जंतइवपक्षिणः। हेमपुंखामहाराजभीमसेनधनुश्च्युताः। अभ्यद्रवंतराधेयंवृकाःक्षुद्रमृगंयथा। कर्णस्तुरथिनांश्रेष्ठःछा
द्यमानःसमंततः। राजन्व्यसृजदुग्राणिशरवर्षाणिसंयुगे। तस्यतानशनिप्रख्यानिषून्परमशोभिनः। चिच्छेदबहुभिर्भल्लैस्तानप्रा
तान्वृकोदरः। पुनश्चशरवर्षेणछादयामासभारत। कर्णोवैकर्तनोयुद्धेभीमसेनंमहारथं। तत्रभारतभीमंतुदृष्टवंतस्मसायकैः। स
माचिततनुसंख्येघ्वाविदिनंशलभैरिव। हेमपुंखान्शिलाधौतान्कर्णचापच्युतान्शरान्। दधारसमरेभीमःस्वरश्मीनिवभास्करः। रु
धिरोक्षितसर्वांगोभीमसेनोव्यराजत। तपनीयनिभैःपुष्पैःपलाशइवकानने। तत्तुभीमोमहाराजकर्णस्यचरितंरणे। नामृष्यतमहे
ष्वासःक्रोधादुद्वृत्यचक्षुषी। सकर्णंपंचविंशत्यानाराचानांसमार्पयत्। महीधरमिवश्वेतंगूढपादैर्विषोल्बणैः। तंविव्याधपुनर्भीमःषड्भि
रष्टाभिरेवच। मर्मस्वमरविक्रांतःसूतपुत्रंमहारणे। ततःकर्णस्यसंक्रुद्धोभीमसेनःप्रतापवान्। चिच्छेदकार्मुकंतूर्णंस्मिवेपिकरणानिच।
जघानचतुरोस्याश्वान्सूतंचत्वरितैःशरैः। नाराचैरर्करश्म्याभैःकर्णंविव्याधचोरसि। तेजग्मुर्धरणींसर्वेकर्णंभित्वात्वमारिष। यथा

हिजलदान्विलाराजन्नूर्यस्यरवमयः। सवैकल्यंमहत्प्राप्यछिन्नधन्वाशरार्दितः। तथापुरुषमानीचप्रत्यपायाद्रथांतरं॥ ॥द्रोणपर्वणि
भीमसेनप्रवेशे॥१९॥ धृतराष्ट्र उ॰॥ ॥स्वयंशिष्योभूतपतेर्भृगूत्तमधनुर्द्धरः। शिष्यत्वंप्राप्तवान्कर्णस्तिस्यतुल्योस्त्रमायया। तद्विशिष्टो
पिवाकर्णःशिष्यःशिष्यगुणैर्युतः। कालांतकयमोयद्वद्भीमसेनेननिर्जितः। ममपुत्रेणभीमेननिर्जितःसतुलीलया। यस्मिन्जया
शासततंपुत्राणांममसंजय। तंदृष्ट्वाविमुखंसंख्येकिंतुदुर्योधनोब्रवीत्। कथंचयुयुधेभीमोवीर्यश्लाघीमहाबलः। कर्णोवासम
रेतातकिमकार्षीत्ततःपरं॥ ॥संजय उ॰॥ ॥भीमसेनंरथोदृष्ट्वाज्वलंतमिवपावकं। रथमन्यंसमास्थायविधिवत्कल्पितंपुनः। अ
भ्ययात्पांडवंकर्णोवातोद्धूतमिवार्णवं। तवापराधाद्राजेंद्रपुनर्युद्धमवर्त्तत। क्रुद्धमाधिरथिंदृष्ट्वापुत्रास्तवविशांपते। भीमसेनममंन्यं
तवैवस्वतमुखेहुतं। भीमसेनोभिसमरेराधेयंप्रत्यमर्षत। बाणवर्षंमहत्कृत्वातलशब्दंचभैरवं। अभ्यवर्षतराधेयोभीमसेनरथंप्र
ति। पुनरेवततोराजन्महानासीत्सुदारुणः। विमर्दःसूतपुत्रस्यभीमस्यचविशांपते। संरब्धौहिमहाबाहूपरस्परवधैषिणौ।
अन्योन्यमीक्षांचक्रातेदहंताविवलोचनैः। क्रोधरक्तेक्षणौक्रुद्धौनिश्वसंतौयथोरगौ। युद्धेन्योन्यंसमासाद्यततक्षतुररिंदमौ। व्याघ्रा
विवसुसंरब्धौश्येनाविवचशीघ्रगौ। शरभाविवचक्रुद्धौयुयुधातेपरस्परं। ततोभीमःस्मरन्क्लेशानक्षद्यूतेवनेपिच। विराटनगरे
चैवप्राप्तंदुःखमरिंदमः। राज्ञांश्रीस्फीतरत्नानांहरणंचतवात्मजैः। सततंचपरिक्लेशान्सपुत्रेणत्वयाकृतान्। दग्धुमैच्छत्त्वयंकुं
तींसपुत्रांतामनागसं। कृष्णायाश्चपरिक्लेशंसभामध्येदुरात्मभिः। केशपक्षग्रहंचैवदुःशासनकृतंतदा। परुषाणिचवाक्यानिक
र्णेनोक्तानिभारत। पतिमन्यंपरीप्सस्वनसंतिपतयस्तव। नरकंपतिताःपार्थाःसर्वेषंढतिलोपमाः। समक्षंतवकौरव्यायामूचुःकु

रवस्तादा। दासी भोगेन कृष्णां च भोक्तुकामाः स्मृता स्त्वया। यच्चापि तान्प्रव्रजतः कृष्णाजिन निवासिनः। परुषाण्युक्तवान्कर्णः सभायां सन्निधौ तव। द
णीकृत्य च यत्पार्थं स्त्वत्पुत्रो वत्सलो ह। विषमस्थान्समस्थो हि संरंभाद्गतचेतसः। बाल्यात्प्रभृति चारिघ्नस्तानि दुःखानि चिंतयन्। निर्विण्या
श्चैव धर्मात्माजी वितेन वृकोदरः। ततो विस्फार्य सुमहद्धेमपृष्ठं दुरासदं। चापं भरतशार्दूल त्यक्त्वात्मा कर्णमभ्ययात्। स सायकमयैर्जालैर्भृशम
कर्णरथं प्रति। भानुमद्भिः शिलाधौतैर्भानोः प्राच्छादयत्प्रभाः। ततः प्रहस्याधिरथिस्तूर्णमिस्य शितैः शरैः। व्यधमद्भीमसेनस्य शरजालानि पत्रि
भिः। महारथो महाबाहुर्महावेगैर्महाबलः। विव्याधाधिरथिर्भीमं नवभिर्निशितैः शरैः। स तोत्रैरिव मातंगो वार्यमाणः पतत्रिभिः। अभ्यधा
वत्संभ्रांतः सूतपुत्रं वृकोदरः। तमापतंतं वेगेन रभसात्पांडवर्षभं। कर्णः प्रत्युद्ययौ योद्धुं मत्तो मत्तमिव द्विपं। ततः प्रध्माप्य निनदं भेरीशत
निनादितं। अक्षुभ्यत बलं हर्षादुद्धूत इव सागरः। तदुद्धूतं बलं दृष्ट्वा रथनागाश्वपत्तिमत्। भीमः कर्णं समासाद्य छादयामास सायकैः।
अश्वान्दृक्षसवर्णांस्तु हंसवर्णैर्हयोत्तमैः। व्यामिश्रयद्रणे कर्णः पांडवं छादयन्शरैः। ऋक्षवर्णान्हयान्कैर्मिश्रान्मारुतरंहसः। निरीक्ष्य
तव पुत्राणां हाहाकृतमभूद्बलं। ते हया बह्वशोभंत मिश्रिता वातरंहसः। सितासिता महाराज यथा व्योम्नि बलाहकाः। संरब्धौ क्रोधत
म्राक्षौ प्रेक्ष्य कर्णवृकोदरौ। संत्रस्ताः समकंपंत त्वदीयानां महारथाः। नालक्ष्यं जयं व्यक्तमेकैकस्य निवारणे। तयोः प्रेक्षंत संमर्दं सन्नि
कृष्ट महास्त्रयोः। तद्युद्धमभवद्राजन्स्तपुत्रस्य विक्रांपते। छादयंतो हि शत्रुघ्नावन्योन्यं सायकैः सितैः। शरजालावृतं व्योम चक्रातेशरवृ
ष्टिभिः। तावन्योन्यं जिघांसंतौ शरैस्तीक्ष्णैर्महाबलौ। रथौ प्रेक्षणीयतरावास्तां वृष्टिमंताविवांबुदौ। स्वर्णविकृतान्बाणान्प्रमुंचंतौ म
हाबलौ। भास्वरं व्योम चक्राते घुल्काभिरिव च प्रभो। ताभ्यां मुक्ताः प्रकाशंते कंकबर्हिणवाससः। पंक्तयः शरदि रक्तानां सारसानामिवं।

द्रो॰प॰
१२७

वेरोसंसक्तंसूतपुत्रेणदृष्ट्वाभीममरिंदमं। अतिभारमहंमन्येतंभीमेकृष्णधनंजयो। तत्राधिरथिभीमाभ्यांशरैर्मुक्तैःस्वभावतः। इषुपातमतिक्रम्यपेतुरश्वरथद्विपाः। पतद्भिःपतितैश्चान्यैर्गतासुभिरनेकशः। कृतोमहान्महाराजपुत्राणांतेजनक्षयः। मनुष्याश्वगजानांचशरीरैर्गतजीवितैः। क्षणेनभूमिःसंजज्ञेसंवृताभरतर्षभ॥ ॥द्रोणपर्वणिभीमसेनप्रवेशे॥ ॥धृतराष्ट्र उ॰॥ ॥अत्यद्भुतमहंमन्येभीमसेनस्यविक्रमं। यत्कर्णंयोधयामाससमरेलघुविक्रमं। त्रिदशानपिचोद्युक्तान्सर्वशस्त्रधरान्युधि। वारयेद्योरणेकर्णःसयक्षासुरमानवान्। सकथंपांडवंयुद्धेभ्राजमानमिवश्रिया। नातरत्संयुगेपार्थंतन्ममाचक्ष्वसंजय। कथंचयुद्धंभूयोभूत्तन्ममाचक्ष्वतत्वतः। अत्रमन्येसमायत्तोजयोवाजयएववा। कर्णंप्राप्यरणेसूतममपुत्रःसुयोधनः। जेतुमुत्सहतेपार्थान्सगोविंदान्ससात्वतान्। श्रुत्वातुनिर्जितंकर्णमसकृद्भीमकर्मणा। भीमसेनेनसमरेमोहमाविशतीवमां। विनष्टान्कौरवान्मन्येममपुत्रस्यदुर्नयात्। नहिकर्णोमहेष्वासान्पार्थान्जेष्यतिसंयुगे। कृतवान्यानियुद्धानिकर्णःपांडुसुतैःसह। सर्वत्रपांडवाःकर्णमजयंतरणाजिरे। अजय्याःपांडवास्तातदेवैरपिसवासवैः। नचतद्बुध्यतेमंदःपुत्रोममसुयोधनः। धनंधनेश्वरस्येवहृत्वापार्थस्यमेसुतः। मधुप्रेप्सुरिवाबुद्धिःप्रपातंनावबुध्यते। निकृत्यानिकृतिप्रज्ञोहृत्वाराज्यंमहात्मनां। जितमित्येवमन्वानःपांडवानवमन्यत। पुत्रस्नेहाभिभूतेनमयाचाप्यकृतात्मना। धर्मेस्थितामहात्मानोनिकृताःपांडुनंदनाः। शामकामःसदापार्थोदीर्घप्रेक्षीयुधिष्ठिरः। अशक्तइतिमन्वानैःपुत्रैर्ममनिराकृतः। तानिदुःखान्यनेकानिविप्रकारांश्चसर्वशः। हृदिकृत्वामहाबाहुर्भीमोयुध्यतसूतजं। तस्मान्मेसंजयब्रूहिकर्ण

राम
१२७

भीमोयथार्त्स्यो। अयुध्येतांयुधिश्रेष्ठौपरस्परवधैषिणौ॥ ॥संजयउवाच॥ ॥शृणुराजन्यथावृत्तः संग्रामः कर्णभीमयोः। परस्परवधप्रेप्सोर्व
नेकुंजरयोरिव। राजन्वैकर्त्तनंभीमः क्रुद्धः क्रुद्धमरिंदमं। पराक्रांतंपराक्रम्यविव्याधत्रिंशताशरैः। महावेगैः प्रसन्नाग्रैः शातकुंभविभूषि
तैः। अहनद्भरतश्रेष्ठभीमंवैकर्त्तनिः शरैः। तस्यास्यतोधनुर्भीमश्चकर्त्तनिशितैः शरैः। रथनीडाच्चयंतारंभल्लेनापातयत्क्षितौ। सकांक्षन्भी
मसेनस्यवधंवैकर्त्तनोवृषः। शक्तिंकनकवैडूर्यचित्रदंडांपरामृशत्। प्रगृह्यचमहाशक्तिंकालरात्रिमिवापरां। समुत्क्षिप्यचराधेयः पु
रंदरइवाशनिं। ननादसुमहानादंबलवान्सूतनंदनः। तंनादंचततः श्रुत्वापुत्रस्तेहर्षितोभवत्। तांकर्णभुजनिर्मुक्तामर्कवैश्वानरप्रभां।
शक्तिंतांप्रतिचिच्छेदभीमः सप्तभिराशुगैः। छित्वाशक्तिंततोभीमोनिर्मुक्तोरगसन्निभां। मार्गमाणइवप्राणान्सूतपुत्रस्यमारिष। प्राहि
णोन्नवसंरब्धः शरान्बर्हिणवाससः। स्वर्णपुंखान्शिलाधौतान्यमदंडोपमान्मृधे। कर्णोप्यन्यद्धनुर्गृह्यहेमपृष्ठंदुरासदं। विकृष्यचम
हातेजाव्यसृजत्सायकोत्तमान्। तान्पांडुपुत्रश्चिच्छेदनवभिर्नतपर्वभिः। वसुषेणेननिर्मुक्तान्नवराजन्महाशरान्। छित्वाभीमोमहा
राजनादंसिंहइवानदत्। तौवृषाविवनर्दंतौबलिनौवासितांतरे। शार्दूलाविवचान्योन्यमत्यर्थमभ्यगर्जतां। अन्योन्यंप्रजिगीषंताव
न्योन्यस्यांतरैषिणौ। अन्योन्यमभिवीक्षंतौगोष्ठेष्विवमहर्षभौ। महागजाविवासाद्यविषाणाग्रैः परस्परं। शरैः पूर्णायतोत्सृष्टैरन्योन्य
मभिजघ्नतुः। निर्दहंतौमहाराजशरवृष्ट्यापरस्परं। अन्योन्यस्यांतरप्रेप्सूरोषादुद्वृत्तलोचनौ। प्रहसंतौतथान्योन्यंभर्त्सयंतौमुहुर्मुहुः
शंखशब्दंचकुर्वाणौयुयुधातेपरस्परं। तस्यभीमः पुनश्चापंमुष्टौचिच्छेदमारिष। शंखवर्णांश्चतानश्वान्बाणैर्निन्येयमक्षयं। तथाकृ
च्छ्रगतंदृष्ट्वाकर्णंदुर्योधनोनृपः। वेपमानइवक्रोधाद्व्यादिदेशाथदुर्जयं। गच्छदुर्जयराधेयंपुराग्रसतिपांडवः। जहितंवरकंक्षिप्रंकर्ण

स्यबलमाददधन्॥ एवमुक्तस्तथेत्युक्त्वा तव पुत्रस्तवात्मजं। अभ्यद्रवद्भीमसेनं व्यासक्तं विकिरन्शरैः। सभीमंनवभिर्बाणैरश्वान्षष्ट्या
भिरर्दयत्। षड्भिः सूतं त्रिभिः केतुं पुनस्तं चापि सप्तभिः। भीमसेनोपि संक्रुद्धः साश्वयंतारमाशुगैः। दुर्जयं भिन्नमर्माणमनयद्यमसा
दनं। स्वलंकृतं क्षितौ क्षुण्णं चेष्टमानं यथोरगं। रुदन्नार्त्तस्तवस्कं तं कर्णश्चक्रे प्रदक्षिणं। समाचितोबाणवरैः शतघ्नीभिश्च सर्वशः। न
थाप्यतिरथः कर्णो भिद्यमानोस्य सायकैः। न जहौ समरे भीमं क्रुद्धरूपं परंतपः॥ ॥द्रोणपर्वणि भीमसेनप्रवेशे दुर्जयवधः॥३९॥
॥ ॥संजय उ॰॥ ॥ सतथाविरथः कर्णः पुनर्भीमेन निर्जितः। रथमन्यं समास्थाय सद्यो विव्याध पांडवं। महागजाविवासाद्य विषाणा
ग्रैः परस्परं। शरैः पूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः। अथ कर्णः शरव्रातैर्भीमं बलवदर्पयन्। ननाद बलवान्नादं पुनर्विव्याध
चोरसि। तं भीमो दशभिर्बाणैः प्रत्यविध्यदजिह्मगैः। पुनर्विव्याध विंशत्या शराणां नतपर्वणां। कर्णस्तु नवभिर्भीमं विध्वा राजन्स्तनां
तरे। ध्वजमेकेन चिच्छेद सायकेन शितेन ह। सायकानां ततः पार्थस्त्रिषष्ट्या नतपर्वणां। तोत्रैरिव महानागं कशाभिरिव वाजिनं। सो
ति विद्धो महाराज पांडवेन यशस्विना। सृक्किणी लेलिहन्वीरः कोपसंरक्तलोचनः। ततः शरं महाराज सर्वकायावदारणं। प्राहिणोद्भी
मसेनाय वधायेंद्र इवाशनिं। स निर्भिद्य रणे पार्थं सूतपुत्रधनुश्च्युतः। अगच्छद्दारयन्भूमिं चित्रपुंखः शिलीमुखः। ततो भीमो महाबा
हुः क्रोधसंरक्तलोचनः। सर्वशैक्यां चतुष्किष्कुं गुर्वीं रुक्मांगदां गदां। प्राहिणोत्सूतपुत्राय षडस्रामविचारयन्। तया जघानाधिर
थेः सदश्वान्साधुवाहिनः। गदया भारत क्रुद्धो वज्रेणेंद्र इवासुरान्। ततो भीमो महाबाहुः क्षुराभ्यां भरतर्षभ। ध्वजमाधिरथेश्छित्वा
सूतमभ्यहनत्तदा। हताश्वसूतमुत्सृज्य रथं संपतितध्वजं। विस्फारयन्धनुः कर्णस्तस्थौ भरत दुर्मनाः। तत्राद्भुतमपश्याम राधेयस्य

पराक्रमं। विरथोरथिनांश्रेष्ठोवारयामासपांडवं। विरथंतंनरश्रेष्ठंदृष्ट्वाधिरथिमाहवे। दुर्योधनस्ततोराजन्नभ्यभाषतदुर्मुखं। एषदु
र्मुखराधेयोभीमेनविरथीकृतः। तंरथेनरथश्रेष्ठंसंपादयनरर्षभं। दुर्योधनवचःश्रुत्वाततोभारतदुर्मुखः। त्वरमाणोभ्ययात्कर्णंभी
मंचावारयच्छरैः। दुर्मुखंप्रेक्ष्यसंग्रामेसूतपुत्रपदानुगं। वायुपुत्रःप्रहृष्टोभूत्सृक्किणीपरिसंलिहन्। ततःकर्णंमहाराजवारयित्वा
शिलीमुखैः। दुर्मुखायरथंशीघ्रंप्रेषयामासपांडवः। तस्मिन्क्षणेमहाराजनवभिर्नतपर्वभिः। सुपुंखैर्दुर्मुखंवीरःशरैर्निन्येयम
क्षयं। ततस्तमेवाधिरथिःस्यंदनंदुर्मुखेहते। आस्थितःप्रबभौराजन्दीप्यमानइवांशुमान्। शयानंभिन्नमर्माणंदुर्मुखंरुधि
रोक्षितं। दृष्ट्वाकर्णोश्रुपूर्णाक्षोमुहूर्तंनाभ्यवर्त्तत। तंगतासुमतिक्रम्यकृत्वाकर्णःप्रदक्षिणं। दीर्घमुष्णंश्वसन्वीरोनतुकिंचित्प्रपद्यत।
तस्मिन्क्षणेमहाराजनाराचान्गृध्रवाससः। प्राहिणोत्सूतपुत्रायभीमसेनश्चतुर्दश। तेतस्यकवचंभित्वास्वर्णपुंखामहौजसः।
हेमचित्रामहाराजद्योतयंतोदिशोदश। अपिबन्सूतपुत्रस्यशोणितंरक्तभोजनाः। क्रुद्धाइवमनुष्येंद्रभुजगाःकालनोदिताः। प्रसर्प
माणामेदिन्यांतेव्यरोचंतमार्गणाः। अर्द्धप्रविष्टाःसंरब्धाबिलानीवमहोरगाः। तंप्रत्यविध्यद्राधेयोजांबूनदविभूषितैः। चतुर्दश
भिरत्युग्रैर्नाराचैरविचारयन्। तेभीमसेनस्यभुजंसव्यंनिर्भिद्यपत्रिणः। प्राविशन्मेदिनींभीमाःक्रौंचंपत्ररथाइव। तेव्यरोचंतना
राचाःप्रविशंतोवसुंधरां। गच्छत्यस्तंदिनकरेदीप्यमानाइवांशवः। सनिर्भिन्नोरणेभीमोनाराचैर्मर्मभेदिभिः। सुस्रावरुधिरंभूरि
कैळासइवपर्वतः। सभीमस्त्रिभिरायत्तःसूतपुत्रंपतत्रिभिः। सुपर्णवेगैर्विव्याधसारथिंचास्यसप्तभिः। सविह्वलोमहाराजकर्णोभी

द्रो०प०
१२९

मबलार्द्दितः। आद्रवज्जवनैरश्वैरथंहित्वामहाभयात्। भीमसेनस्तुविस्फार्यचापंहेमपरिष्कृतं। आहवेतिरथोतिष्ठज्ज्वलन्निवहुता
शनः॥ ॥द्रोणपर्वणिभीम०दुर्मुखवधः कर्णपराजयः॥ ॥धृतराष्ट्रउ०॥ ॥दैवमेवपरंमन्येधिक्पौरुषमनर्थकं। यत्राधिरथिरायत्तो
नातरत्पांडवंरणे। कर्णःपार्थान्सगोविंदान्जेतुमुत्सहतेपुरा। नचकर्णसमंयोधंलोकेपश्यामिकंचन। इतिदुर्योधनस्याहमश्रो
षंजल्पतोमुहुः। कर्णोहिबलवान्शूरोदृढधन्वाजितक्लमः। इतिमामब्रवीत्सूतमंदोदुर्योधनःपुरा। वसुषेणसहायंमांनालंदेवापि
संयुगे। किंतुपांडुसुताराजन्गतसत्वाविचेतसः। नचतंनिर्जितंदृष्ट्वाभुजंगमिवनिर्विषं। युद्धात्कर्णमपक्रांतंकिंस्मदुर्योधनो
ब्रवीत्। अहोदुर्मुखमेवैकंयुद्धानामविशारदं। कोहिप्रवेशयेन्नूनमुत्क्रांतममपुत्रकं। अश्वत्थामामद्रराजःकृपःकर्णश्चसंग
ताः। जानंतोव्यवसायंचशूरान्माकृततेजसः। किमर्थंक्रूरकर्माणंकालांतकयमोपमं। बलसंरंभवीर्यज्ञाःकोपयिष्यंतिसंयुगे। कर्ण
स्त्वेकोमहाबाहुःस्वबाहुबलमाश्रितः। भीमसेनमनादृत्यरणेयुध्यतसूतजः। योऽजयत्समरेकर्णंपुरंदरइवासुरं। नसपांडुसु
तोजेतुंशक्यःकेनचिदाहवे। द्रोणंयःसंप्रमथ्यैकःप्रविष्टोममवाहिनीं। भीमोधनंजयान्वेषीकस्तमार्छेज्जिजीविषुः। कोहिसंज
यभीमस्यस्थातुमुत्सहतेग्रतः। उद्यताशनिवज्रस्यमहेंद्रस्येवदानवाः। प्रेतराजपुरंप्राप्यनिवर्त्तेतापिमानवः। नभीमसेनंसंप्राप्य
निवर्त्तेतकदाचन। पतंगाइववह्निंतेप्राविशन्नल्पचेतसः। येभीमसेनंसंक्रुद्धमभ्यधावन्विमोहिताः। यत्तत्सभायांभीमेनमम
पुत्रवधाश्रयं। शप्तंसंरंभिणोग्रेणकुरूणांशृण्वतांतदा। तन्नूनमभिसंचिंत्यदृष्ट्वाकर्णंविनिर्जितं। दुःशासनःसहभ्रात्राभयाद्भीमा

राम
१२९

उपाद्रवन्‌।यच्चसंजयदुर्बुद्धिरब्रवीत्समितौमुहुः।कर्णोदुःशासनोहंचजेष्यामोयुधिपांडवान्‌।सनूनंविरथंदृष्ट्वाकर्णंभीमेननिर्जि
तं।प्रत्याख्यानाच्चकृष्णस्यभृशंतप्यतिसंजय।दृष्ट्वाभ्रातॄन्हतान्संख्येभीमसेनेनदंशितान्‌।आत्मापराधेसुमहन्नूनंतप्यतिपु
त्रकः।कोहिजीवितमन्विच्छन्प्रतीपंपांडवंव्रजेत्‌।भीमंभीमाकृतिंदृष्ट्वासाक्षात्कालमिवोदितं।वडवामुखमध्यस्थोमुच्येतापिहिमानवः।
नभीममुखसंप्राप्तोमुच्यतेहिमतिर्मम।नपांडवानपांचालानचकेशवसात्यकी।जानंतियुधिसंरब्धाजीवितंपरिरक्षितुं।अहोम
मस्कृतानांहिविपन्नंपरिजीवितं॥ ॥संजयउ०॥ ॥यत्त्वंशोचसिकौरव्यवर्तमानेजनक्षये।त्वमस्यजगतोमूलंविनाशस्यनसंश
यः।स्वयंवैरंमहत्कृत्वापुत्राणांवचनेस्थितः।उच्यमानोनगृह्णीषेमर्त्यःपथ्यमिवौषधं।स्वयंपीत्वामहाराजकालकूटंसुदुर्जरं।त
स्येदानींफलंकृत्स्नमवाप्नुहिनरोत्तम।सुकृतस्यसुपुष्टस्यसुजातस्यमहामृधे।यत्तुकुत्सयसेयोधान्यतमानान्यथाबलं।अत्र
तेवर्तयिष्यामियथायुद्धमवर्तत।दृष्ट्वाकर्णंतुपुत्रास्तेभीमसेनपराजितं।नामृष्यंतमहेष्वासाःसोदर्याःपंचभारत।दुर्मर्षणोदुःसहश्च
दुर्मदोदुर्धरोजयः।पांडवंचित्रसन्नाहाःसंप्रतीपमुपाद्रवन्‌।तेसंगतामहाबाहुंपरिवार्यवृकोदरं।दिशःशरैःसमावृण्वन्शलभा
नामिवव्रजैः।आगच्छतस्तान्सहसाकुमारान्देवरूपिणः।प्रतिजग्राहसमरेभीमसेनोहसन्निव।तवदृष्ट्वातुतनयान्‌भीमसे
नसमीपगान्‌।अभ्यवर्ततराधेयोभीमसेनंमहाबलं।विसृजन्विशिखान्राजन्स्वर्णपुंखान्शिलाशितान्‌।तंचभीमोभया
न्नूर्ण्वियमाणःसुतैस्तव।कुरवस्ततःकर्णंपरिवार्यसमंततः।अवाकिरन्भीमसेनंशरैःसन्नतपर्वभिः।तान्बाणैःपंचवि

शात्यापंचराजन्नरर्षभान्। सस्तूतान्भीमधनुषोभीमोनिन्येयमक्षयं। आपतन्स्यंदनेभ्यस्तेसार्द्धसूतेर्गतासवः। चित्रपुष्पधराभग्नावातेने
वमहाद्रुमाः। तत्राद्भुतमपश्यामभीमसेनस्यविक्रमं। संवार्याधिरथिंबाणैर्यज्जघानतवात्मजान्। सवार्यमाणोभीमेनशितैर्बाणैःस
मंततः। सूतपुत्रोमहाराजभीमसेनमवैक्षत। तंभीमसेनःसंरंभात्क्रोधसंरक्तलोचनः। विस्फार्यतुमहच्चापंमुहुःकर्णमवैक्षत॥ ॥
॥ ॥द्रोणपर्वणिजय॰ भीमसेनद्र॰ पंचकुमारवधः॥ ॐ॥ संजयउ॰॥ ॥तवात्मजांस्तुपतितान्दृष्ट्वाकर्णःप्रतापवान्। क्रोधेनमहता
विष्टोनिर्विण्णोभूत्सजीवितात्। आगस्कृतमिवात्मानंमेनेचाधिरथिस्तदा। भीमसेनस्ततःक्रुद्धःसमारोहद्रसंभ्रमात्। सभीमंपंच
भिर्विध्वाराधेयःप्रहसन्निव। पुनर्विव्याधसप्तत्यास्वर्णपुंखैःशिलाशितैः। अवहासंतुतंपार्थोनामृष्यतवृकोदरः। ततोविव्याधराधे
यंशतेननतपर्वणां। पुनश्चविशिखैस्तीक्ष्णैर्विध्वापंचभिराशुगैः। धनुश्चिच्छेदभल्लेनसूतपुत्रस्यमारिष। अथान्यद्धनुरादायकर्णो
भारतसंयुगे। इषुभिश्छादयामासभीमसेनंसमंततः। तस्यभीमोहयान्हत्वाविनिहत्यचसारथिं। अजहासमहाहासंकृतेप्रतिकृते
पुनः। इषुभिःकार्मुकंचास्यचकर्तपुरुषर्षभ। तत्पपातमहाराजस्वर्णपृष्ठंमहास्वनं। अवारोहद्रथात्तस्मादथकर्णोमहारथः। गदांगृ
हीत्वासमरेभीमसेनायचाक्षिपत्। तामापतंतींसहसागदांदृष्ट्वावृकोदरः। शरैरवारयद्राजन्सर्वसैन्यस्यपश्यतः। ततोबाणसहस्रा
णिप्रेषयामासपांडवः। सूतपुत्रवधाकांक्षीत्वरमाणःपराक्रमी। तानिषूनिषुभिःकर्णोवारयित्वामहामृधे। कवचंभीमसेनस्यपात
यामाससायकैः। अथैनंपंचविंशत्याक्षुद्रकाणांसमार्पयत्। ततोभीमोमहाराजनवतिंनतपर्वणां। रथेप्रेषयतक्रुद्धःसूतपुत्रस्यमा

रिषात्तेतस्यकवचंभित्वातथाबाहुंचदक्षिणं।अन्वगुर्द्धरणींतीक्ष्णावल्मीकमिवपन्नगाः।राधेयंतुरथोदृष्ट्वापदातिंतमवस्थितं।भीम
सेनेनसंरब्धंराजादुर्योधनोब्रवीत्।त्वरध्वंसर्वतोयत्ताराधेयस्यरथंप्रति।ततस्तवसुताराजन्श्रुत्वाभ्रातुर्वचोद्भुतं।अभ्ययुःपां
डवंयुद्धेविसृजंतःशितान्शरान्।चित्रोपचित्रश्चित्राक्षश्चारुचित्रःशरासनः।चित्रायुधश्चित्रवर्मासमरेचित्रयोधिनः।आगच्छ
तस्तान्सहसाभीमोराजन्महारथः।साश्वसूतध्वजान्युत्तान्पातयामाससंयुगे।तेहतान्यपतन्भूमौवातभग्नाइवद्रुमाः।दृष्ट्वा
तुनिहतान्पुत्रांस्तवराजन्महारथान्।अश्रुपूर्णमुखःकर्णःकश्मलंसमपद्यत।रथमन्यंसमास्थायविधिवत्कल्पितंपुनः।अभ्य
भ्ययात्पांडवंयुद्धेत्वरमाणःपराक्रमी।तावन्योन्यंशरैर्विद्ध्वास्वर्णपुंखैःशिलाशितैः।अभ्राजेतांमहाराजपुष्पिताविवकिंशुकौ।षट्त्रिं
शद्भिस्ततोभल्लैर्निशितैस्तिग्मतेजनैः।व्यधमत्कवचंक्रुद्धस्तवपुत्रस्यपांडवः।रक्तचंदनदिग्धांगौशरैःकृतमहाव्रणौ।शोणिता
कौविराजेतांचंद्रसूर्याविवोदितौ।तौशोणितोक्षितगात्रैःशरैःछिन्नतनुच्छदौ।विवर्माणौव्यराजेतांनिर्मुक्ताविवपन्नगौ।व्याघ्रा
विवनरव्याघ्रौदंष्ट्राभिरितरेतरं।शरदंष्ट्रैर्विधुन्वानौततक्षतुररिंदमौ।वारणाविवसंसक्तौरंगमध्येविरेजतुः।तुदंतौविशिखैस्तू
र्णमत्तवारणविक्रमौ।प्रच्छादयंतौसमरेशरजालैःपरस्परं।रथाभ्यांनादयंतौचदिशःसर्वाविचेरतुः।तौरथाभ्यांमहाराजमंडलाव
र्तनादिषु।व्यरोचेतांमहात्मानौवृत्रवज्रधराविव।सहस्ताभरणाभ्यांचभुजाभ्यांविक्षिपन्धनुः।व्यरोचतरणेभीमःसविद्युदिवतो
यदः।सचापघोषस्तनितःशरधाराम्बुदोमहान्।महाघोषोमहाराजकर्णपर्वतमभ्ययात्।ततःशरसहस्रेणधनुर्मुक्तेनभा
रत।पांडवोव्यकिरत्कर्णंघनोद्रिमिववृष्टिभिः।तत्रावैक्षंतपुत्रास्तेभीमसेनस्यविक्रमं।सुपुंखैःकंकवासोभिर्यत्कर्णंछादयच्छरैः

द्रो॰प॰
१३१

सनंदयन्त्रेणपार्थंकेशवंचयशस्विनं। सात्यकिंचकरक्षोत्रभीमःकर्णमयोधयत्। विक्रमंभुजयोर्वीर्यंधैर्यंचविदितात्मनः। पुत्रास्तवमहाराजद
दृशुःपांडवस्यहि॥ ॥इतिद्रोणप॰जयद्रथयुद्धेभीमसेनप्र॰॥ऽ४॥ संजयउ॰॥ ॥भीमसेनस्यराधेयःश्रुत्वाज्यातलनिस्वनं। नामृष्यततयथाम
त्तोगजःप्रतिगजस्वनं। अपक्रम्यसभीमस्यमुहूर्तंशरगोचरात्। तवचाधिरथिर्दृष्ट्वास्यंदनेभ्यश्च्युतान्कृतान्। भीमसेनेननिहतान्विम
नादुःखितोभवत्। निःश्वसन्दीर्घमुष्णंचपुनःपांडवमभ्ययात्। आताम्रनयनःक्रोधात्श्वसन्निवमहोरगः। बभौकर्णःशरानस्यन्रश्मि
मानिवभास्करः। रश्मिजालैरिवार्कस्यविततैर्भरतर्षभ। कर्णचापच्युतैर्बाणैःप्राछाद्यतवृकोदरः। कर्णचापच्युताश्चित्राःशराबर्हिणवाससः।
विविशुःसर्वतःपार्थंवासायेवांडजाद्रुमं। कर्णचापच्युताबाणाःसंपतंतस्ततस्ततः। रुक्मपुंखाव्यराजंतहंसाःश्रेणीगताइव। चापध्वजोपस्क
रेभ्यःछत्रादीषामुखाद्युगात्। प्रभवंतोव्यराजंतराजन्नाधिरथेःशराः। खंपूरयन्महावेगान्खगमान्खगवाससः। स्वर्णविकृतांश्चित्रान्मु
मोचाधिरथिःशरान्। तमंतकमिवायत्तमापतंतंवृकोदरः। त्यक्त्वाप्राणानभिक्रम्यविव्याधनिशितैःशरैः। तस्यवेगमसंसह्यदृष्ट्वाकर्णस्य
पांडवः। महतश्चशरौघांस्तान्दृष्ट्वानैवाव्यथद्बली। ततोविधम्याधिरथेःशरजालानिपांडवः। विव्याधकर्णंविंशत्यापुनरन्यैःशिलाशितैः।
यथैवहिशरैःपार्थःसूतपुत्रेणछादितः। तथैवकर्णंसमरेछादयामासपांडवः। दृष्ट्वातुभीमसेनस्यविक्रमंयुधिभारत। अभ्यनंदंस्त्वदीयाश्च
संप्रहृष्टाश्चचारणाः। भूरिश्रवाःकृपोद्रौणिर्मद्रराजोजयद्रथः। उत्तमौजायुधामन्युःसात्यकिःकेशवार्जुनौ। कुरुपांडवानांप्रवरादशराजन्
महारथाः। साधुसाध्वितिवेगेनसिंहनादमथानदन्। तस्मिंस्तुतुमुलेयुद्धेप्रवृत्तेलोमहर्षणे। अभ्यभाषतपुत्रस्तेराजादुर्योधनस्त्वरन्।
राज्ञःसराजपुत्रांश्चसोदरांश्चविशेषतः। कर्णंगछतभद्रंवःपरीप्संतोवृकोदरात्। पुरानिघ्नंतिराधेयंभीमचापच्युताःशराः। तेयतध्वंम

राम
१३१

हेषासात्सूतपुत्रस्यरक्षणे। दुर्योधनसमादिष्टाः सोदर्याः सप्तमारिष। भीमसेनमभिद्रुत्यसंरब्धाः पर्यवारयन्। तेसमासाद्यकौंतेयमावृ
ण्वन्शरवृष्टिभिः। पर्वतंवारिधाराभिः प्रावृषीवबलाहकाः। तेपीडयन्भीमसेनंक्रुद्धाः सप्तमहारथाः। प्रजासंहरणेराजन्सोमंसप्तग्रहाइव।
ततोवामेनकौंतेयः पीडयित्वाशरासनं। मुष्टिनाकौरवोराजन्नृगत्यस्वर्णपरिष्कृतं। मनुष्यसमतान्ज्ञात्वासप्तसंधायसायकान्। ते
भ्योव्यसृजदायत्तः सूर्यरश्मिनिभान्प्रभो। निरस्यन्निवदेहेभ्यस्तनयानामसूंस्तव। भीमसेनोमहाराजपूर्ववैरमनुस्मरन्। तेक्षिप्ताभी
मसेनेनशराभारतभारतान्। विदार्यखंसमुत्पेतुः स्वर्णपुंखाः शिलाशिताः। तेषांविदार्यचेतांसिशराहेममविभूषिताः। व्यराजंतमहारा
जसुपर्णाः खचराइव। शोणितादिग्धवाजाग्रास्तसहेमपरिष्कृताः। पुत्राणांतवराजेंद्रपीत्वाशोणितमुद्गताः। तैः शरैर्भिन्नमर्माणोर
थेभ्यः प्रापतन्क्षितौ। गिरिसानुरुहाभग्नाद्विपेनेवमहाद्रुमाः। शत्रुंजयः शत्रुसहश्चित्रश्चित्रायुधोदृढः। चित्रसेनोविकर्णश्चसप्तैतेवि
निपातिताः। पुत्राणांतवसर्वेषांनिहतानांवृकोदरः। शोचत्यतिभृशंदुःखाद्विकर्णंपांडवप्रियं। प्रतिज्ञेयंमयादत्तानिहंतव्याःस्मसंयुगे।
विकर्णतिनासिहतः प्रतिज्ञारक्षतामया। त्वमागाः संगरंवीरक्षात्रधर्ममनुस्मरन्। अगाधबुद्धिर्गांगेयः क्षितौसुरगुरोः समः। विशेष
तश्चनृपतेस्तथास्माकंहितेरतः। त्याजितः समरेप्राणान्जयार्थेदृढोरपि। न्यायतोन्यायतोवापिहतः शेतेमहामतिः। युद्धधर्मेनसंब
धोभवंतिकुरुसत्तम॥ ॥संजयउ०॥ ॥तान्निहत्यमहाबाहूराधेयस्यैवपश्यतः। सिंहनादरवंघोरमसृजत्पांडुनंदनः। सरवस्तस्यशू
रस्यधर्मराजस्यपश्यतः। आचख्याविवतद्युद्धंविजयंचात्मनोमहत्। तंश्रुत्वातुमहानादंभीमसेनस्यधन्विनः। बभूवपरमाप्रीतिर्ध
र्मराजस्यसंयुगे। ततोहृष्टोमहाराजवादित्राणांचनिःस्वनैः। भीमसेनरवंप्रातंप्रतिजग्राहसर्वशः। अभ्ययाच्चैवसमरेद्रोणमस्त्र

विदांवरः। हर्षेणमहताविष्टः कृतसंज्ञे वृकोदरे। एकत्रिंशान्महाराज पुत्रांस्तव महारथान्। हतान्दुर्योधनो दृष्ट्वा क्षत्तुः सस्मार तद्वचः। तदिदं समनुप्राप्तं क्षत्तुर्हितकरं वचः। इति संचिंत्य राजा सो नोत्तरं प्रत्यपद्यत। यद्यूतकाले दुर्बुद्धिरब्रवीत्तनयं तव। यच्च कर्णोब्रवीत्कृष्णां सभायां परुषं वचः। प्रमुखे पांडुपुत्राणां तव चैव विशांपते। कौरवाणां च सर्वेषां आचार्यस्य च संन्निधौ। विनष्टाः पांडवाः कृष्णे शाश्वतं नरकं गताः। पतिमन्यं वृणीष्वेति तस्येदं फलमागतं। येस्मै तपरुषाण्याहुः सभामानाय्य द्रौपदीं। पांडवानुग्रधन्वानः कोपयंतस्तवात्मजाः। स भीमसेनः क्रोधाग्निं त्रयोदश्वासमास्थितं। विसृजंस्तव पुत्राणामंतं गच्छति कौरव। विलपंश्च बहु क्षत्ता शमं नालभतेत्वयि। सपुत्रो भरतश्रेष्ठ तस्य भुंक्ष्व फलोदयं। हतो विकर्णश्शिरिजिद्‌ चित्रसेनश्च वीर्यवान्। प्रवराश्चात्मजानां ते सुताश्चान्ये महारथाः। यान्यांश्च ददृशे भीमश्चक्षुर्विषयमागतान्। पुत्रांस्तव महाबाहो त्वरया तान्जघान ह। त्वत्कृते ह्यहमद्राक्षं दह्यमानां वरूथिनीं। सहस्रशः शरैर्मुक्तैः पांडवेन वृषेण च॥ ॥ इति द्रोण॰ भीमसेनप्र॰ सप्तकुमारवधः॥ ७४॥ धृतराष्ट्र उ॰॥ ॥ महानपनयः सूत ममैवात्र न संशयः। स इदानीमनुप्राप्तो मन्ये संजय शोचतः। तद्गतं तद्गतमिति ममासीन्मनसि स्थितं। इदानीमत्र किं कार्यं प्रकरिष्यामि संजय। यथा त्वेष क्षयो वृत्तो मम मापनयसंभवः। वीराणां तन्ममाचक्ष्व स्थिरीभूतोस्मि संजय॥ ॥ संजय उ॰॥ ॥ कर्णभीमौ महाराज पराक्रांतौ महाहवे। बाणवर्षाण्यवर्षेतां वृष्टिमंताविवांबुदौ। भीमसेनांकिता बाणाः स्वर्णपुंखाः शिलाशिताः। विविशुः कर्णमासाद्य भिंदंत इव जीवितं। तथैव कर्णनिर्मुक्तैः सविषैरिव पन्नगैः। आकीर्यत रणे भीमः शतशोथ सहस्रशः। तयोः शरैर्महाराज संपतद्भिः समंततः। बभूव तव सैन्यानां संक्षोभः सागरोपमः। भीमचापच्युतैर्बाणैस्तव सैन्यमरिंदम। अवध्यत चमूमध्ये घोरैराशीविषोपमैः। वारणैः पतितै राजन्वाजिभिश्च नरैः सह। अदृश्यत मही कीर्णा वातभग्नैरिव द्रुमैः। ते वध्यमानाः समरे भीमचापच्युतैः शरैः। प्राद्रवंस्तावका योधाः कि

मेतदिति चाब्रुवन्॥ ततो व्युदस्तं तत्सैन्यं सिंधुसौवीरकौरवं॥ प्रोत्सारितं महावेगैः कर्णपांडवयोः शरैः॥ तेशराहत भूयिष्ठा हताश्वनर
वाहनाः॥ उत्सृज्य कर्णभीमौ च प्राद्रवन्सर्वदिशं॥ नूनं पार्थार्थमेवास्मान् मोहयंति दिवौकसः॥ यत्कर्णभीमप्रभवैर्वध्यते नो बलं शरैः॥
एवं ब्रुवंतो योधास्ते तावका भयपीडिताः॥ शरपातं समुत्सृज्य स्थिता युद्धदिदृक्षवः॥ ततः प्रावर्त्तत नदी घोररूपा महाहवे॥ बभूव च विशेषे
ण भीरूणां भयवर्द्धिनी॥ वारणाश्वमनुष्याणां रुधिरौघसमुद्भवा॥ संवृता गतसत्वैश्च मनुष्यगजवाजिभिः॥ सानुकर्षपताकैश्च गजा
श्वरथभूषणैः॥ स्यंदनैरपि विद्धैश्च भग्नचक्राक्षकूबरैः॥ जातरूपपरिष्कारैर्धनुर्भिः सुमहाधनैः॥ सुवर्णविकृतैश्चापि गदामुशलपट्टि
शैः॥ वज्रैश्च विविधाकारैः शक्तिभिः परिघैरपि॥ शतघ्नीभिश्च चित्राभिर्बभौ भारत मेदिनी॥ कनकांगदकेयूरैः कुंडलैर्मणिभिः शुभैः॥
तनुत्रैः सतलत्रैश्च हारैर्निष्कैश्च भारत॥ वस्त्रैश्छत्रैश्च विध्वस्तैश्चामरव्यजनैरपि॥ गजाश्वमनुजैर्भिन्नैः शस्त्रैः स्यंदनभूषणैः॥ तैस्तै
श्च विविधैर्भावैस्तत्र तत्र वसुंधरा॥ पतितैरपि विद्धैश्च संबभौ द्यौरिव ग्रहैः॥ अचिंत्यमद्भुतं चैव तयोः कर्मातिमानुषं॥ दृष्ट्वा चारणसि
द्धानां विस्मयः समपद्यत॥ अग्नेर्वायुसहायस्य गतिः कक्ष इवाहवे॥ आसीद्भीमसहायस्य रौद्रमाधिरथेरणे॥ निपातितध्वजवरं ह
तवाजिनरद्विपं॥ गजाभ्यां संप्रयुक्ताभ्यां आसीन्नलवनं यथा॥ तथाभूतं महत्सैन्यमासीद्भारत संयुगे॥ विमर्दः कर्णभीमाभ्यामासीच्च परमो
रणे॥ ॥ इति द्रोणपर्वणि भीमसेनप्रवेशे॥ ७४॥ संजय उ०॥ ॥ ततः कर्णो महाराज भीमं विध्वा त्रिभिः शरैः॥ मुमोच शरवर्षाणि विचि
त्राणि बहूनि च॥ वध्यमानो महाराज सूतपुत्रेण पांडवः॥ न विव्यथे भीमसेनो भिद्यमान इवाचलः॥ स कर्णं कर्णिना कर्णे पीतेन निशि
तेन च॥ विव्याध युधि राजेंद्र भीमसेनः पतत्रिणा॥ सकुंडलं महत्कर्णात्कर्णस्यापातयद्भुवि॥ तापनीयं महाराज दीप्तं ज्योतिरिवांबरात्॥

गांगेयपुलिनान्मत्तश्चक्रवाकोनदन्निव।स्फुर भानुकृतभ्रुकुतिग्मतेजससन्निभं।गलदमृतोदकोत्तमरसंस्फुरच्छिल्पिनाकृतं।श्रव
णकुंडलंकर्णमिध्यत्तोन्यपतद्थास्यशुद्धमुत्तमं।अथापरेणभल्लेनसूतपुत्रंस्तनांतरे।आजघानभृशंभीमःस्मयन्निवमहाबलः।
पुनरन्यांस्त्वरन्भीमोनाराचान्दशभारत।रणेप्रैषीन्महावेगान्यमदंडोपमांस्तथा।तेललाटंसमासाद्यसूतपुत्रस्यमारिष।विविशु
र्नोदितास्तेनवल्मीकमिवपन्नगाः।ललाटस्थैस्ततैर्बाणैःसूतपुत्रोव्यरोचत।नीलोत्पलमयींमालांधारयन्सपुरायथा।ततःक्रुद्धो
रणेकर्णःपीडितोदृढधन्विना।वेगंचक्रेमहावेगोभीमसेनवधंप्रति।तस्मैकर्णःशतंराजन्निषूणांगृध्रवाससां।अमर्षीबल
वान्क्रुद्धःप्रेषयामासभारत।ततःप्रासृजदुग्राणिशरजालानिपांडवः।समरेतमनादृत्यनास्यवीर्यमचिंतयत्।ततःकर्णोमहा
राजपांडवंनवभिःशरैः।आजघानोरसिक्रुद्धःक्रुद्धरूपःपरंतप।जीमूताविवचान्योन्यंतौववर्षतुराहवे।तलशब्दरवैश्चैवत्रासये
तांपरस्परं।शरजालैर्महद्भिश्चछादयामासतुर्मृधे।अन्योन्यंसमरेक्रुद्धौकृतप्रतिकृतैषिणौ।ततोभीमोमहाबाहूराधेयस्यमहा
त्मनः।क्षुरप्रेणधनुश्छित्वाकर्णंविव्याधपत्रिणा।तच्चापास्यधनुश्छिन्नंसूतपुत्रोमहामनाः।अन्यत्कार्मुकमादत्तवेगघ्नंभारसा
धनं।तदप्यस्यनिमेषार्धाच्चिच्छेदास्यवृकोदरः।तृतीयंचचतुर्थंचपंचमंषष्ठमेवच।सप्तमंचाष्टमंचैवनवमंदशमंतथा।एका
दशंद्वादशंचत्रयोदशमथापिवा।चतुर्दशंपंचदशंषोडशंचवृकोदरः।तथासप्तदशंवेगादष्टादशमथापिवा।बहूनिभीम
श्चिच्छेदकर्णस्यैवधनूंषिच।निमेषार्धात्ततःकर्णोधनुर्हस्तोव्यतिष्ठत।दृष्ट्वाचकुरुसौवीरसैंधवानांबलक्षयं।सवर्मध्वजश
स्त्रैश्चपतितैःसंवृतांमहीं।हस्त्यश्वरथदेहांश्चगतासून्प्रेक्ष्यसर्वशः।सूतपुत्रस्यसंरंभाद्दीप्तंवपुरजायत।सविस्फार्यमहच्चा

पंकार्त्तस्वरविभूषितं । भीमं प्रैक्षत राधेयो राजन्घोरेण चक्षुषा । ततः क्रुद्धः शरानस्यन् सूतपुत्रो व्यराजत । मध्यंदिनगतोर्चिष्मान्शरदी
व दिवाकरः । मरीचिविकचस्येव राजन्भानुमतो वपुः । आसीदाधिरथेर्घोरं वपुः शरशताचितं । कराभ्यामाददानस्य संदधानस्य चाशु
गान् । विकर्षतो मुंचतो वा नांतरं ददृशू रणे । अग्निचक्रोपमं घोरं मंडलीकृतमायुधं । कर्णस्यासीन्महाराज सव्यदक्षिणमस्यतः । स्व
र्णपुंखाः सुनिशिताः कर्णचापच्युताः शराः । आछादयन्महाराज दिशः सूर्यस्य च प्रभां । ततः कनकपुंखानां शराणां नतपर्वणां । ध
नुश्च्युतानां वियति ददृशुर्बहुधा व्रजान् । शरासनादाधिरथेः प्रावर्त्तंत स्म सायकाः । श्रेणीभूता व्यराजंत राजन्क्रौंचा इवांबरे । गार्द्ध
पत्रान्शिलाधौतान्कार्त्तस्वरविभूषितान् । महावेगान्प्रदीप्ताग्रान्मुमोचाधिरथिः शरान् । ते तु चापबलोद्धूताः शातकुंभविभूषिताः ।
अजस्रमन्वकीर्यंत शराः पार्थरथं प्रति । ते व्योम्नि रत्नविकृता व्यकाशंत सहस्रशः । शलभानामिव व्राताः शराः कर्णसमीरिताः । चापा
दाधिरथेर्मुक्ताः प्रपतंति स्म सायकाः । एको दीर्घ इव प्रांशुः प्रभवन्दृश्यते शरः । पर्वतं वारिधाराभिश्छादयन्निव तोयदः । कर्णः आछाद
यत्क्रुद्धो भीमं सायकवृष्टिभिः । तत्र भारत भीमस्य बलवीर्यपराक्रमं । व्यवसायं च पुत्रास्ते प्रैक्षंत कुरुभिः सह । तां समुद्रमिवोद्धूतां शर
वृष्टिं समुत्थितां । अचिंतयित्वा भीमस्तु क्रुद्धः कर्णमुपाद्रवत् । रुक्मपुंखं महच्चापं भीमस्यासीद्विशांपते । कर्षतो मंडलीभूतं शक्रचा
पमिवापरं । तस्माच्छराः प्रादुरासन्पूरयंत इवांबरं । सुवर्णपुंखैर्भीमेन सायकैर्नतपर्वभिः । गगने रचिता माला कांचनीव व्यराजत ।
ततो व्योम्नि विषक्तानि शरजालानि भागशः । आहतानि व्यशीर्यंत भीमसेनस्य पत्रिभिः । कर्णस्य शरजालौघैर्भीमसेनस्य चोभयोः ।
अग्निस्फुलिंगसंस्पर्शैरंजोगतिभिराहवे । तैस्तैः कनकपुंखानां द्यौरासीत्संवृता व्रजैः । स भीमं छादयन्बाणैः सूतपुत्रः पृथग्विधैः ।

उपारोहद्रथात्तस्यतस्यवीर्यंमहात्मनः। तयोर्विसृजतोस्तूर्णंशरजालानिमारिष। वायुभूतान्यदृश्यंतसंसक्तानीतरेतरं। तस्यैकंयःशिता
न्बाणान्कर्मारपरिमार्जितान्। स्वकयाविहतान्क्रुद्धःआहितेयोद्ध्यकांक्षया। तानंतरिक्षेविशिखैस्त्रिधैकैकमवाछिनत्। विशेषयन्सू
तपुत्रंभीमस्तिष्ठेतिचाब्रवीत्। पुनश्चासृजद्द्रौणिःशरजालानिपांडवः। अमर्षीभगवान्क्रुद्धोदिधक्षन्निवपावकः। तस्यतान्याददेक
र्णःसर्वाण्यस्त्राण्यभीतवत्। युध्यतःपांडुपुत्रस्यसूतपुत्रोस्त्रमायया। तस्येषुधीधनुर्ज्यांचबाणैःसन्नतपर्वभिः। रश्मीन्योक्त्राणि
चाश्वानांकर्णोवैकर्तनोच्छिनत्। अथास्याश्वान्पुनर्हत्वात्रिभिर्विव्याधसारथिं। सोपासृत्यद्रुतंसूतोयुयुधानरथंययौ। उत्स्मयन्निव
भीमस्यक्रुद्धःकालानलप्रभः। ध्वजंचिच्छेदराधेयःपताकांचन्यपातयत्। सविधन्वामहाराजरथशक्तिंपरामृशत्। तामवासृजदा
विध्यक्रुद्धःकर्णरथंप्रति। तामाधिरथिरायत्तःशक्तिंहेमपरिष्कृतां। आपतंतींमहोल्काभांचिच्छेददशभिःशरैः। सापतद्दशधाराज
न्निकृत्ताकर्णसायकैः। अस्यतःसूतपुत्रस्यमित्रार्थेचित्रयोधिनः। सचर्मादत्तकौंतेयोजातरूपपरिष्कृतं। खड्गंचान्यत्तरंप्रेप्सुर्मृत्यो
र्ग्रेजयायवा। तमस्यसहसाकर्णोव्यधमत्प्रहसन्निव। सविचर्मामहाराजविरथःक्रोधमूर्छितः। असिंप्रासृजदाविध्यत्वरन्कर्ण
रथंप्रति। सधनुःसूतपुत्रस्यछित्वाज्यांचसुसंधितः। अपतद्भुविनिस्त्रिंशश्च्युतःसर्पमिवांबरात्। ततःप्रहस्याधिरथिरन्यदादत्त
कार्मुकं। शत्रुघ्नंसमरेक्रुद्धोदृढज्यंवेगवत्तरं। सभीमसेनःकुपितोबलवान्सत्यविक्रमः। विहायसंप्राक्रमद्वैकर्णस्यव्यथयन्मनः।
तस्यतच्चरितंदृष्ट्वासंग्रामेविजयैषिणः। लयमास्थायराधेयोभीमसेनमवंचयत्। तंचदृष्ट्वारथोपस्थेविलीनंव्यथितेंद्रियं। ध्व
जमस्यसमासाद्यतस्थौसधरणीतले। तदस्यकुरवःसर्वेचारणाश्चाभ्यपूजयन्। यदियेषरथात्कर्णंहंतुंतार्क्ष्यइवोरगं। सछि

न्धन्वाविरथः स्वधर्ममनुपालयन्। स्वरथं प्रस्थतः कलायुद्धायैवव्यतिष्ठत। तं निहत्यास्य राधेयस्ततएनं समभ्ययात्। संरंभात्पांडवं सं
ख्येयुद्धायसमवस्थितं। तौ समेतौ महारंगे स्पर्द्धमानौ महाबलौ। जीमूताविव घर्मांते गर्जमानौ नरर्षभौ। तयोरासीत्संप्रहारः क्रुद्ध
योर्नरसिंहयोः। अमृष्यमाणयोः संख्ये देवदानवयोरिव। क्षीयमाणस्त्रसकौंतेयः कर्णेन समभिद्रुतः। हस्त्यार्जुनहतान्नागान्पतिता
न्पर्वतोपमान्। रथमार्गविघातार्थं व्यायुधः प्रविवेशह। हस्तिनां व्रजमासाद्य रथदुर्गं प्रविश्यह। पांडवो जीविताकांक्षी राधेयं नाभ्यह
रयत्। व्यवधानमथाकांक्षन् धनंजयशरैर्हतं। उद्यम्य कुंजरं पार्थस्तस्थौ परपुरंजयः। तमस्य विशिखैः कर्णो व्यधमत्कुंजरं पुनः।
हस्त्यंगान्यथ कर्णाय प्राहिणोत्पांडुनंदनः। चक्राण्यश्वांस्तथा वाहान्यद्यत्पश्यति भूतले। तत्तदादाय चिक्षेप क्रुद्धः कर्णाय पांडवः। त
दस्य सर्वं चिच्छेद क्षिप्तं क्षिप्तं शितैः शरैः। व्यायुधं नावधीच्चैनं कर्णः कुंत्यावचः स्मरन्। धनुष्कोट्यग्र्यातं कर्णस्त्वभिद्रुत्य परामृशत्। उत्स्म
यन्निव राधेयो भीमसेनमुवाच ह। पुनः पुनस्तुवरक मूढ औदरिकेति च। अकृतास्त्रक मायोत्सी बालिसंग्रामकातर। यत्र भोज्यं ब
हुविधं भक्ष्यं पेयं च पांडव। तत्र त्वं दुर्मते योग्यो न युद्धेषु कथंचन। मुनिर्भूत्वाधुना चीरी फलान्यद्धि सुदुर्मते। वनाय व्रज कौंतेय न त्वं
युद्धविशारदः। फलमूलाशने युक्तस्त्वं तथातिथिपूजने। न तु शस्त्रसमुद्योगं योग्यं मन्ये वृकोदर। पुष्पमूलफलाहारो व्रतेषु नियमे
षु च। उचितस्त्वं वने भीम न त्वं युद्धविशारदः। क्व युद्धं क्व मुनित्वं च वनं गच्छ वृकोदर। न त्वं युद्धोचितस्तात वनवासरतिर्भव। सूदान्
भृत्यजनान्दासांस्त्वं गृहे त्वरयन्भृशं। योग्यस्ताडयितुं क्रोधाद्भोजनार्थं वृकोदर। कौमारे यच्च यान्यासंस्तव प्रियाण्यपि विश्रा म्यते। पू
र्वदृष्टानि वाप्येवं रूक्षाण्यश्रावयन्नृपः। अथैनं तत्र संलीनं संस्पृशन्धनुषा पुनः। प्रहसन्पुनर्वाक्यं भीममाह वृषस्तथा।

योद्धव्यंमारिषान्यत्रनयोद्धव्यंतुमादृशेः।मादृशैर्युध्यमानानांमितत्त्वान्यच्चविद्यते।गच्छवायत्रतौकृष्णौतौत्वांरक्षिष्यतोरणे।गृहंवागच्छ
कौंतेयकिंतेयुद्धेनबालक।भीमशास्त्रार्थसद्भावनिपुणस्त्वंहिमेमतः।मारुतिमल्लितस्मृतः।शास्त्रेघस्त्रेषुचोत्तमः।यज्ञशास्त्रार्थविद्यां
स्त्रधर्मप्रवचनेषुच।निपुणोसिसदाभीमनत्वंयुद्धविशारदः।तमुत्स्मयन्कंठदेशेपाणिनासंस्पृशन्नृपः।छत्रवज्रांकुशांकेनमातु
र्वाक्यमनुस्मरन्।भीमोपिरथिनांश्रेष्ठोधनदाघ्रापमात्तवान्।गतःपश्चापहरयोग्रमायांनाकरोत्पुरा।अनेनकारणेनैवकथाहि
लक्ष्यमात्तवान्।कर्णेनापितदोत्सृष्टोमातुर्वचनकारिणा।एवंतत्त्विरथंकृत्वाकर्णोराजन्विकथ्यच।प्रमुखेवृष्णिसिंहस्यपार्थस्यच
महात्मनः।ततोराजन्शिलाधौतान्शरान्शाखामृगध्वजः।प्राहिणोत्सूतपुत्रायकेशवेनप्रचोदितः।ततःपार्थभुजोत्सृष्टाःशराःकां
चनभूषणाः।गांडीवप्रभवाःकर्णंहंसाःक्रौंचमिवाविशन्।सभुजंगैरिवायस्तैर्गांडीवप्रेषितैःशरैः।भीमसेनादपावर्त्यसूतपुत्रंधनं
जयः।सच्छिन्नवर्माभीमेनधनंजयशराहतः।कर्णोभीमादपायासीद्रथेनमहताद्रुतं।भीमोपिसात्यकेर्वाहंसमारुह्यनरर्षभ।अभ्
ययात्पांडवंसंख्येभ्रातरंसव्यसाचिनं।ततःकर्णंसमुद्दिश्यत्वरमाणोधनंजयः।नाराचंक्रोधताम्राक्षोप्रैक्षीन्मृत्युमिवापरं।सगरु
त्मानिवाकाशेप्रार्थयन्भुजगोत्तमं।नाराचोभ्यपतत्तूर्णंकर्णंगांडीवनोदितः।तमंतरिक्षेनाराचंद्रौणिश्चिच्छेदपत्रिणा।धनंजयभ
यात्कर्णमुज्जिहीर्षुर्महारथं।ततोद्रौणिंचतुःषष्ट्याविव्याधकुपितोर्जुनः।शिलीमुखैर्महाराजमागास्तिष्ठेतिचाब्रवीत्।सतुमत्तग
जाकीर्णमनीकंरथसंकुलं।तूर्णमभ्याविशद्द्रौणिर्धनंजयशराहतः।ततःस्वर्णपृष्ठानांधनुषांकूजतांरणे।शार्ङ्गगांडीवघोषंयकौं
तेयोभ्यपतद्बली।धनंजयस्तथायांतंपृष्ठतोद्रौणिमभ्यगात्।नातिदीर्घमिवात्मानंशरैःसंभासयन्बलं।विदार्यदेहान्नाराचैर्नरवार

यावाजिनां। कंकबर्हिणवासोभिर्बलं व्यधमदर्जुनः॥ तद्बलं भरतश्रेष्ठ सर्वाजिद्विपवाहनं। पाकशासनिरायत्तः पार्थः सन्निजघान ह॥
॥ इति द्रोणपर्वणि जयद्रथवधे भीमसेनप्रवेशे ॥ ॥ धृतराष्ट्र उ० ॥ ॥ अहन्यहनि मे दीप्तं यशः पतति संजय। हता मे बहवो योधा म
न्ये कालस्य पर्ययं। धनंजयस्तु संक्रुद्धः प्रविष्टो मामकं बलं। रक्षितं द्रोणकर्णाभ्यामप्रवेश्यं सुरैरपि। ताभ्यामूर्जितवीर्याभ्याममप्या
यितपराक्रमः। सहितः कृष्णभीमाभ्यां शिनीनामृषभेन च। ततः प्रभृति शोको मां दहत्यग्निरिवाशयं। ग्रस्तान्हि प्रतिपश्यामि भूमि
पालान्ससैंधवान्। अप्रियं सुमहत्कृत्वा सिंधुराजः किरीटिनः। चक्षुर्विषयमापन्नः कथं मुच्येत जीवितात्। अनुमा मानाच्च
पश्यामि नास्ति सैंधव सैंधवः। युद्धं तु तद्यथावृत्तं तन्ममाचक्ष्व पृच्छतः। यच्च विक्षोभ्य महतीं सेनां संलोड्य चासकृत्। एकः प्रविष्टः
संक्रुद्धो नलिनीमिव कुंजरः। तस्य वृष्णिप्रवीरस्य ब्रूहि युद्धं यथा तथा। धनंजयसहायस्य कुशलो ह्यसि संजय॥ ॥ संजय उ० ॥ ॥
तथा तु वैकर्तनपीडितं तं भीमं प्रयांतं पुरुषप्रवीरं। समीक्ष्य राजन्नरवीरमध्ये शिनिप्रवीरोनुययौ रथेन। नदन्यथा वज्रधरस्तपां
ते ज्वलन्यथा जलदांते च सूर्यः। रिपून्निघ्नन्भृशमुग्रधन्वा प्रकंपयंस्तव पुत्रस्य सेनां। तं यांतमश्वै रजतप्रकाशैरायोधने नरवी
रं चरंतं। नाशक्नुवन्वारयितुं त्वदीयाः सर्वे रथा भारत माधवाग्र्यं। अमर्षपूर्णस्त्वनिवृत्तयोधी शरासनी कांचनवर्मधारी। अलं
बुसः सात्यकिं माधवाग्र्यमवारयद्राजवरोभिपत्य। तयोरभूद्भारत संप्रहारस्तथागतो नैव बभूव कश्चित्। प्रेक्षंत एवाहवशोभिनौ तौ
योधास्त्वदीयाश्च परे च सर्वे। अविध्यदेनं दशभिः पृषत्कैरलंबुसो राजवरः प्रसह्य। अनागतानेव तु तान्पृषत्कांश्चिच्छेद राजन्नृशि
निपुंगवोपि। पुनः स बाणैस्त्रिभिरग्निकल्पैराकर्णपूर्णैर्निशितैः सुपुंखैः। विव्याध देहावरणं विदार्य ते सात्यकेराविविशुः शरीरं।

तैःकायमस्याग्न्यनिलप्रभावैर्विदार्यबाणैरपरैर्ज्वलद्भिः॥ आजघ्निवांस्तान्त्रजनप्रकाशान् अष्टांश्चतुर्भिश्चतुरः प्रसह्य॥ तथा तु तेनाभि
हतस्तरस्वी नक्ताञ्चरेनाश्चकधरप्रभावः॥ अलंबुसस्योत्तरवेगवद्भिर्हयांश्चतुर्भिर्निजघान बाणैः॥ तथास्य सूतस्य शिरो निकृत्य भ
ल्लेन कालानलसन्निभेन॥ सकुंडलं पूर्णशशिप्रकाशं भ्राजिष्णुवक्त्रं निचकर्त देहात्॥ निहत्य तं पार्थिवपुत्रपौत्रं संख्ये मधूनामृषभः
प्रमाथी॥ ततोन्वयादर्जुनमेव वीरः सैन्यानि राजंस्तव सन्निवार्य॥ अथागतं वृष्णिवरं समीक्ष्य तथारिमध्ये परिवर्तमानं॥ घ्नंतं कु
रूणामिषुभिर्बलानि पुनः पुनर्वायुमिवाभ्रपूगं॥ ततोवहन्सैंधवाः साधुदांता गोक्षीरकुंदेंदुहिमप्रकाशाः॥ सुवर्णजालावतताः सदश्वाः
यतोयतः कामयते नृसिंहः॥ तवात्मजास्ते सहिता निपेतुरन्ये च योधास्त्वरितास्त्वदीयाः॥ कृत्वा मुखं भारत योधमुख्यं दुःशासनं
त्वत्सुतमाजमीढ॥ ते सर्वतः संपरिवार्य संख्ये शैनेयमाजघ्नुरनीकसाहाः॥ स चापि तान्प्रवरः सात्वतानां न्यवारयद्बाणजालेन वीरः॥ समे
तान्॥ निवार्य तांस्तूर्णममित्रघाती नक्ताञ्चरेनः सात्यकिरग्निकल्पः॥ दुःशासनस्याभिजघान बाणानुद्यम्य बाणासनमाजमीढ॥
॥ ॥इति द्रोणपर्वणि भीमसेनप्रवेशो अलंबुसराजपुत्रवधः॥ १७१॥ संजय उ॰॥ ॥ तमुद्यतं महाबाहुं दुःशासनरथं प्रति॥
त्वरितं त्वरणीयेषु धनंजयहितैषिणं॥ त्रिगर्तानां महेष्वासाः सुवर्णविकृतध्वजाः॥ सेनासमुद्रमाविष्टमनंतं पर्यवारयन्॥ अ
थैनं रथवंशेन सर्वतः सन्न्यवारयन्॥ अवाकिरन्शरव्रातैः क्रुद्धाः परमधन्विनः॥ अजयद्राजपुत्रांस्तान्यतमानान्महारणे॥ ए
कः पंचशतान्शत्रून्सात्यकिः सत्यविक्रमः॥ संप्राप्य भारतीमध्यं तलघोषसमाकुलं॥ असिशक्तिगदापूर्णमप्लवं सलिलं यथा॥
तथाद्भुतमपश्याम शैनेयचरितं रणे॥ पतीच्यां दिशि तान्दृष्ट्वा प्राच्यां पश्यामि लाघवात्॥ उदीचीं दक्षिणां प्राचीं प्रतीचीं प्रय

नस्तथा। नृत्यन्निवचरन्शूरोयथारथशतंतथा। तदृष्ट्वाचरितंतस्य सिंहविक्रांतगामिनः। त्रिगर्त्ताःसन्यवर्त्तंतसंत्रस्ताः स्वजनंप्रति। तथान्येशू
रसेनानांशूराःसंख्येन्यवारयन्। नियच्छंतःशरव्रातैर्मत्तंद्विपमिवांकुशैः। तानवारयदायातान्मुहूर्त्तादिवसात्यकिः। ततःकलिंगैर्युयुधे
सोचिंत्यबलविक्रमः। तांचसेनामतिक्रम्यकलिंगानांदुरत्ययां। अथोपार्थंमहाबाहुंधनंजयमुपासदत्। तरन्निवजलेश्रांतोयथास्थ
लमुपेयिवान्। तंदृष्ट्वापुरुषव्याघ्रंयुयुधानःसमाश्वसत्। तमायांतमभिप्रेक्ष्यकेशवोर्जुनमब्रवीत्। असावायातिशैनेयस्तवपार्थप
दानुगः। एषशिष्यःसखाचैवतवसत्यपराक्रमः। सर्वान्योधांस्तृणीकृत्यविजिग्येपुरुषर्षभः। एषकौरवयोधानांकृत्वाघोरमुपद्रवं।
तवप्राणैःप्रियतरःकिरीटिन्नेतिसात्यकिः। एषद्रोणंतथाभोजंकृतवर्माणमाहवे। कदर्थीकृत्यविशिखैःफाल्गुनाभ्येतिसात्यकिः। कृत्वा
सुदुःकरंकर्मसैन्यमध्येमहाबलः। तवदर्शनमन्विच्छन्पांडवाभ्येतिसात्यकिः। बहूनेकरथेनाजौयोधयित्वामहारथान्। आचार्यप्रमु
खान्पार्थप्रायात्येषहिसात्यकिः। स्वबाहुबलमाश्रित्यविदार्यचवरूथिनीं। प्रेषितोधर्मपुत्रेणपार्थैषोभ्येतिसात्यकिः। एषराजसहस्रा
णांवक्त्रैःपंकजसन्निभैः। आस्तीर्यवसुधांपार्थक्षिप्रमायातिसात्यकिः। एषदुर्योधनंजित्वाभ्रातृभिःसहितंरणे। निहत्यजलसंधंच
क्षिप्रमायातिसात्यकिः। रुधिरौघवतींकृत्वानदींशोणितकर्दमां। तृणवद्यस्यकौरव्याःसैषआयातिसात्यकिः। ततःप्रहृष्टःकौंतेयः
केशवंवाक्यमब्रवीत्। नमेप्रियंमहाबाहोयन्मामभ्येतिसात्यकिः। नहिजानामिवृत्तांतंधर्मराजस्यकेशव। सात्वतेनविहीनश्चयदि
जीवतिवानवा। एतेनहिमहाबाहोरक्षितव्यःसपार्थिवः। तमेषकथमुत्सृज्यममकृष्णपदानुगः। राजाद्रोणायचोत्सृष्टःसैंधवश्चा
निपातितः। प्रत्युद्यातश्चशैनेयमेषभूरिश्रवारणे। सोयंगुरुतरोभारःमाधवान्मेसमाहितः। ज्ञातव्यश्चहिमेराजारक्षितव्यश्चसा

द्रो॰प॰
१३७

त्यकिः। जयद्रथश्च हंतव्यो लंबते च दिवाकरः। श्रांतश्चैव महाबाहुरल्पप्रायाश्च सांप्रतं। परिश्रांता हयाश्चास्य हययंता च माधव। न च भूरि
श्रवाः श्रांतः ससहायश्च केशव। अपीदानीं भवेदस्य क्षेमम् अस्मिन्समागमे। कच्चिन्न सागरं तीर्त्वा सात्यकिः सत्यविक्रमः। गोष्पदं प्राप्य
सीदेत महौजाः शिनिपुंगवः। अपि कौरव्यमुख्येन कृतास्त्रेण महात्मना। समेत्य भूरिश्रवसा स्वस्तिमान्सात्यकिर्भवेत्। व्यतिक्रम
महं मन्ये धर्मराजस्य केशव। आचार्याद्भयमुत्सृज्य यः प्रेषयति सात्यकिं। ग्रहणं धर्मराजस्य खगः श्येन इवामिषं। नित्यमाशास
ते द्रोणः कच्चित्स्यात्कुशली नृपः॥ ॥इति द्रोणपर्वणि जयद्रथवधे ।३७। संजय उ॰॥ ॥तमापतंतं संप्रेक्ष्य सात्वतं युद्धदुर्मदं। क्रोधा
द्भूरिश्रवा राजन्सहसा समुपाद्रवत्। तमब्रवीन्महाबाहुः कौरव्यः शिनिपुंगवं। अद्य प्राप्तोसि दिष्ट्या मे चक्षुर्विषयगोचरं मित्यतः। चि
राभिलषितं कामम् अद्य प्राप्स्यामि संयुगे। न हि मे मोक्ष्यसे जीवन्यदि नोत्सृजसे रणं। अथ त्वां समरे हत्वा नित्यं शूराभिमानिनं। नं
दयिष्यामि दाशार्ह कुरुराजं सुयोधनं। अद्य मद्बाणनिर्दग्धं पतितं धरणीतले। द्रक्ष्यतस्त्वां रणे वीरौ सहितौ केशवार्जुनौ। अद्य
धर्मसुतो राजा श्रुत्वा त्वां निहतं मया। सव्रीडो भविता सद्यो येनासीह प्रवेशितः। अद्य मे विक्रमं पार्थो विज्ञास्यति धनंजयः। त्वयि
भूमौ विनिहते शयाने रुधिरोक्षिते। चिराभिलषितो ह्यद्य त्वया सह समागमः। पुरा देवासुरे युद्धे शक्रस्य बलिना यथा। अद्य यु
द्धं महाघोरं दास्यामि तव सात्वत। ततो ज्ञास्यसि तत्वेन मद्वीर्यबलपौरुषं। अद्य संयमिनीं याता मया त्वं निहतो रणे। यथा रामानु
जेनाजौ रावणिर्लक्ष्मणेन वै। अद्य कृष्णश्च पार्थश्च धर्मराजश्च माधव। हते त्वयि निरुत्साहा रणं त्यक्ष्यंत्यसंशयं। अद्य ते पचितिं
कृत्वा शितैर्माधव सायकैः। तत्स्त्रियो नंदयिष्यामि ये त्वया निहता रणे। चक्षुर्विषयसंप्राप्तो न त्वं माधव मोक्ष्यसे। सिंहस्य विष

राम
१३७

यंप्राप्तोयथाक्षुद्रमृगस्तथा। युयुधानस्ततंराजन्प्रत्युवाचस्मयन्निव। कौरवेयनसंत्रासोविद्यतेममसंयुगे। कामंनिहन्यात्संयामे
यामांकुर्यन्निरायुधं। समास्तुशाश्वतीनैवंनभविष्यतिसंयुगे। किंमृषाकत्थनेनबहुधाकर्मणानुसमाचर। शारदस्येवमेघस्यनिष्फलं
गर्जितंहिते। श्रुत्वैतद्गर्जितंवीरहास्यंहिममजायते। चिरकालेप्सितंलोकेयुद्धमद्यास्तुकौरव। त्वरतेमेमनिस्तातत्वयियुद्धाभिकांक्षिणः।
नाहंत्वाविनिवर्तिष्येत्वामद्यपुरुषाधम। अन्योन्यंतौतथावाग्भिःतक्षंतौनरपुंगवौ। जिघांसूपरमक्रुद्धावभिजग्मतुराहवे। तौसमे
तौनरव्याघ्रौशुष्मिणौस्पर्द्धिनौरणे। द्विरदाविवसंक्रुद्धौवासितार्थंमदोत्कटौ। भूरिश्रवाःसात्यकिश्चववर्षतुररिंदमौ। शरवर्षाणि
भीमानिमेघाविवपरस्परं। सोमदत्तिस्तुशैनेयंप्रच्छाद्येषुभिराशुगैः। जिघांसुर्भरतश्रेष्ठविव्याधनिशितैःशरैः। दशभिःसात्यकिंवि
द्ध्वासौमदत्तिरथापरान्। मुमोचनिशितान्बाणान्जिघांसुःशिनिपुंगवं। तानस्यविशिखांस्तीक्ष्णानंतरिक्षेविशांपते। अप्राप्ता
नस्त्रमायाभिरग्रसत्सात्यकिःप्रभो। तौपृथक्शरवर्षाभ्यामवर्षेतांपरस्परं। उत्तमाभिजनौवीरौकुरुवृष्णियशस्करौ। परस्परमयु
ध्येतांवारणाविवयूथपौ। शरशक्तिभिरन्योन्यंविशिखैश्चाप्यकृंततां। निर्भिदंतौहिगात्राणिविक्षरंभोचरंशोणितं। विधूनयंतावन्योन्यं
प्राणाद्यूताभिदेविनौ। एवमुत्तमकर्माणौकुरुवृष्णियशस्करौ। परस्परमयुध्येतांवारणाविवयूथपौ। तावदीर्घेणकालेनब्रह्मलोकपुर
स्कृतौ। जिगीषंतौपरंस्थानंअन्योन्यंसंजगर्जतुः। सात्यकिःसोमदत्तिश्चशरवृष्ट्यापरस्परं। हृष्टवद्धार्तराष्ट्राणांपश्यतामभ्यवर्षतां।
संप्रेक्षंतजनास्तत्रयुध्यमानौयुधांपती। यूथपौवासिताहेतोःप्रयुद्धाविवकुंजरौ। अन्योन्यस्यहयान्हत्वाधनुषीविनिकृत्यच। वि
रथावसियुद्धायसमेयातांमहारणे। आर्षभेचर्मणीचित्रेप्रगृह्यविपुलेशुभे। विकोशौचाप्यसीकृत्वासमरेतौविचेरतुः। चरंतौविवि

धान्मार्गान्मंडलानि च भागशः। मुहुराजघ्नतुः क्रुद्धावन्योन्यपरिमर्दिनौ। सखड्गौ चित्रकर्माणौ सनिष्कांगदभूषणौ। रणेरणोत्कटौ रा
जन्नन्योन्यं पर्यकर्षतां। मुहूर्तमिव राजेंद्र परिकृष्य परस्परं। पश्यतां सर्वसैन्यानां वीरावाश्वसतां पुनः। असिभ्यां वर्मणी चित्रे वि
मले बहुतारके। निकृत्य पुरुषव्याघ्रौ बाहुयुद्धं प्रचक्रतुः। व्यूढोरस्कौ दीर्घभुजौ नियुद्धकुशलावुभौ। बाहुभिः समसज्जेतां आयसैः
परिघैरिव। तयोरासन् भुजाघाता निग्रहप्रग्रहौ तथा। भुजयोश्चावबद्धे च शिरोभ्यां चावघट्टनैः। पादावकर्षसंधाने तोमरांकुश
लालनैः। वराहोद्धूननचलैः पृष्ठारोहणपातनैः। पादोदरविबंधैश्च भूतलभ्रामणैस्तथा। गतप्रत्यागताक्षेपैः पातनोन्मथनप्लुतैः।
शिक्षाबलसमुद्भूतौ सर्वयोधप्रकर्षिणौ। तयोर्नरवरयो राजन् समरे युध्यमानयोः। भीमोऽभवन्महाराज द्वावत्र पर्वतयोरिव। द्विपावि
व विषाणाग्रैः शृंगैरिव महर्षभौ। युयुधाते महात्मानौ कुरुसात्वतपुंगवौ। क्षीणायुधे सात्वते तु युध्यमाने ततोऽब्रवीदर्जुनं वासुदेवः।
पश्यस्वेनं विरथं युध्यमानं रणे केतुं सर्वधनुर्धराणां। प्रविष्टो भारतीं सेनां तव पांडव पृष्ठतः। योधितश्च महावीर्यैः सर्वैर्भारत भा
रतैः। परिश्रांतो युधां श्रेष्ठः संप्राप्तो भूरिदक्षिणः। युद्धाकांक्षिणमायांतं नैतत्सममिवार्जुन॥ ॥संजय उ०॥ ॥ततो भूरिश्रवाः
क्रुद्धः सात्यकिं युद्धदुर्मदं। उद्यम्याभ्यहनद्राजन् मत्तो मत्तमिव द्विपं। रथस्थयोर्द्वयोर्युद्धे क्रुद्धयोर्योधमुख्ययोः। केशवार्जुनयोरा
जन् समरे प्रेक्षमाणयोः। अथ कृष्णो महाबाहुरर्जुनं प्रत्यभाषत। पश्य वृष्ण्यंधकव्याघ्रं सौमदत्तिवशं गतं। परिश्रांतं गतं भूमौ कृ
त्वा कर्म सुदुष्करं। तवांतेवासिनं शूरं पालयार्जुन सात्यकिं। न वशं यज्ञशीलस्य गच्छेदेष वरारिहन्। त्वत्कृते पुरुषव्याघ्र तदाशु
क्रियतां विभो। अथाब्रवीद्धृष्टमना वासुदेवं धनंजयः। पश्य वृष्णिप्रवीरेण क्रीडंतं कुरुपुंगव। महाद्विपेनेव वने मत्तेन हरियू

थपं। इत्येवं भाषमाणेतु पांडवे वै धनंजये। हाहाकारो महानासीत्सैन्यानां भरतर्षभ। यदुद्यम्य महाबाहुः सात्यकिं न्यहनद्भुवि। सासिंह इव मातंगं विकर्षन्भूरिदक्षिणः। व्यरोचत कुरुश्रेष्ठः सात्वतप्रवरं युधि। अथ कोशाद्विनिःकृष्य खड्गं भूरिश्रवा रणे। मूर्द्धजेषु निजग्राह पादेनोरस्यताडयत्। ततोस्याहर्तुमारब्धः शिरः कायात्सकुंडलं। तावत्क्षणात्सात्वतोपि सव्यच्छिरो भ्रामयद्भुजं। यथा चक्रं तु कौलालं दंडाविद्धं तु विभ्रमत्। सहैव भूरिश्रवसो बाहुना केशधारिणा। गृहीन मति भीमिन पर्चास्येन वभोगिन। तथातु परिकृष्यंतं दृष्ट्वा सात्यकिमाहवे। वासुदेवस्ततो राजन्भूयोर्जुनमभाषत। पश्य वृष्ण्यंधकव्याघ्रं सोमदत्तिवशं गतं। तव शिष्यं महाबाहो धनुष्यनवरं त्वया। असत्यो विक्रमः पार्थ यत्र भूरिश्रवा रणे। विशेषयति वार्ष्णेयं कुरूणां कीर्तिवर्द्धनः। एवमुक्तो महाबाहुर्वासुदेवेन पांडवः। मनसा पूजयामास भूरिश्रवसमाहवे। विकर्षन्सात्वतां श्रेष्ठं क्रीडमान इवाहवे। संहर्षयति मां भूयः कुरूणां कीर्तिवर्द्धनः। प्रवरं वृष्णिवीराणां न्निहत्याद्य सात्यकिं। महाद्विपं महारण्ये मृगेंद्र इव कर्षति। एवं तु मनसा राजन्पार्थः संपूज्य केशवं। वासुदेवं महाबाहुरर्जुनः प्रत्यभाषत। सैंधवासक्तदृष्टित्वान्नैनं पश्यामि माधवं। एष त्वसुकरं कर्म यादवार्थे करोम्यहं। इत्युक्त्वा वचनं कुर्वन्वासुदेवस्य फाल्गुनः। सखड्गं यज्ञशीलस्य पृत्रिणा बाहुमच्छिनत्॥ ॥ इति द्रोणपर्वणि जयद्रथवधे॥ ४०॥ संजय उ०॥ ॥ स बाहुरपतद्भूमौ सखड्गः सशुभांगदः। आदधज्जीवलोकस्य दुःखमुत्तममुत्तमः। प्रहरिष्यन्हृतो बाहुरदृश्येन किरीटिना। वेगेनाभ्यपतद्भूमौ पंचास्य इव पन्नगः। समोघं कृतमात्मानं दृष्ट्वा पार्थेन कौरवः। उत्सृज्य सात्यकिं क्रोधाद्गर्हयामास पांडवं॥ ॥ भूरिश्रवोवाच॥ ॥ नृशंसं बत कौंतेय कर्मेदं कृतवानसि। अपश्यतो विषक्तस्य यन्मे बाहुमचिच्छिदः। किं तु वक्ष्यसि राजानं धर्मराजं युधिष्ठिरं। किं कुर्वाणो मया संख्ये हतो भू

द्रो॰प॰
१३९

रिश्रवा इति। इदमिंद्रेयते साक्षात् उपदिष्टं महात्मना। अस्त्वं रुद्रेयावा पार्थद्रोणेन च कृपेण वा। ननु नाम स्वधर्मज्ञस्त्वं लोके भ्यधिकः परैः।
अयुध्यमानस्य कथं रणे प्रहृतवानसि। न प्रमत्ताय भीताय विरथाय प्रयाचते। व्यसने वर्त्तमानाय प्रहरंति मनस्विनः। इदं तु नीचाच
रितं असत्पुरुषसेवितं। कथमाचरितं पार्थ त्वया कर्म सुदुष्करं। आर्येण सुकरं ह्याहुरार्यं कर्म धनंजय। अनार्यं कर्म त्वार्येण सुदुः
करतरं भुवि। येषु येषु नरः पार्थ यत्र यत्र च वर्त्तते। आशु तच्छीलतामेति तदिदं त्वयि दृश्यते। कथं च राजवंश्यस्त्वं कौरवेयो विशेषतः।
क्षत्रधर्माद्व्यतिक्रांतः सुव्रतश्चरितव्रतः। इदं तु यदतिक्षुद्रं वार्ष्णेयार्थे कृतं त्वया। वासुदेवमतं नूनं नैतत्त्वय्युपपद्यते। को हि नाम
प्रमत्ताय परेण सह युध्यते। ईदृशं व्यसनं दद्याद्यो न कृष्णसखो भवेत्। व्रात्याः संक्लिष्टकर्माणः प्रकृत्यैव हि गर्हिताः। वृष्ण्यंधकाः
कथं पार्थ प्रमाणं भवतः कृताः। एवमुक्त्वा महाबाहुर्यूपकेतुर्महायशाः। युयुधानं परित्यज्य रणे प्रायमुपाविशत्। शरा ४ नास्ती
र्य सव्येन प्राणिना पुण्यलक्षणः। यियासुर्ब्रह्मलोकाय प्राणान्प्राणेषु अथाजुहोत्। सूर्ये चक्षुः समाधाय प्रसन्नसलिले मनः। ध्याय
न्महोपनिषदं चैव योगयुक्तोऽभवन्मुनिः। ततः स सर्वसेनायां जनः कृष्णधनंजयौ। गर्हयामास तं चापि शशंस पुरुषर्षभं। निंद्यमा
नौ तथा कृष्णौ नोचतुः किंचिदप्रियं। प्रशस्यमानश्च तथा नाहृष्यद्यूपकेतनः। तांस्तथा वादिनो राजन् पुत्रांस्तव धनंजयः। अमृ
ष्यमाणो मनसा तेषां तस्य च भाषितं। असंक्रुद्धमना वाचा स्मारयन्निव भारत। उवाच पांडुतनयः संक्षेपमिव फाल्गुनः। मम सर्वे
च राजानो जानंत्येतन्महाव्रतं। न शक्यो मामको हंतुं यो मे स्याद्बाणगोचरे। यूपकेतो समीक्ष्य त्वं न मां गर्हितुमर्हसि। न हि धर्म
मविज्ञाय युक्तं गर्हयितुं परं। आत्तशस्त्रस्य हि रणे वृष्णिवीरं जिघांसतः। यदहं बाहुमच्छेत्सं न स धर्मो विगर्हितः। न्यस्तशस्त्रस्य

राम
१३९

बालस्यविरथस्यविवर्मणः।अभिमन्योर्वधंतातधार्मिकःकोनपूजयेत्।एवमुक्तस्तुपार्थेनशिरसाभूमिमस्पृशत्।पाणिनाचापि
सव्येनआहियोदस्यदक्षिणं।एतत्पार्थस्यतुवचस्तत्तश्रुत्वामहाद्युतिः।यूपकेतुर्महाराजतूष्णीमासीदवाङ्मुखः॥ ॥अर्जुनउ०॥ ॥
याप्रीतिर्द्धर्मराजेमेभीमेचवदतांवर।नकुलेसहदेवेचसामेत्वयिशलाग्रज।मयानुसमनुज्ञातःकृष्णेनचमहात्मना।गच्छपुण्यकृ
तान्लोकान्शिबिरौशीनरोयथा॥ ॥वासुदेवउवाच॥ ॥येलोकाममविमलाःसकृद्विहर्तुंब्रह्माद्यैःसुरवृषभैरपीष्यमाणाः।
तान्क्षिप्रंव्रजसततागिनहोत्रयाजिन्मत्तुल्योभवगरुडोत्तमांगयानः॥ ॥इतिद्रोणपर्वणिभूरिश्रवोबाहुछेदः॥४५॥संजयउ
वाच॥ ॥उत्थितस्तुससैनेयोविमुक्तःसौमदत्तिना।खड्गमादायचिच्छेदशिरस्तस्यमहात्मनः।निहतंपांडुपुत्रेणप्रमत्तंभूरिद
क्षिणं।इयेषसात्यकिर्हंतुंशलाग्रजमकल्मषं।निकृत्तभुजमासीनंछिन्नहस्तमिवद्विपं।क्रोशतांसर्वसैन्यानांनिंद्यमानःसुदुर्म
नाः।वार्यमाणःसकृष्णेनपार्थेनचमहात्मना।भीमेनचक्ररक्षाभ्यांअश्वत्थाम्नाकृपेणच।कर्णेनवृषसेनेनसैंधवेनतथैवच।
विक्रोशतांचसैन्यानामवधीत्तंयतव्रतं।प्रायोपविष्टायरणेपार्थेनछिन्नबाहवे।सात्यकिःकौरवेंद्रायखड्गेनापहरच्छिरः।नाभ्य
नंदंतसैन्यानिसात्यकिंतेनकर्मणा।अर्जुनेनहतंपूर्वंयज्जघानकुरूद्वहं।सहस्राक्षसमंतत्रसिद्धचारणमानवाः।भूरिश्रवस
मालोक्ययुद्धप्रायोगतंहतं।अपूजयंततंदेवाविस्मितास्तस्यकर्मभिः।पक्षवादांश्चबहुशःप्रवदंतस्वसैनिकाः।नवार्ष्णेयेपरा
धोस्तिभवितव्यंहितत्तथा।तस्मान्मन्युर्नमेकार्यःक्रोधोदुःखकरोनृणां।हंतव्यश्चैषवीरेणनात्रकार्याविचारणा।विहितोह्यस्यधा

द्रो॰प॰
१४०

चेषमृत्स्कः सात्यकिराहवे॥ ॥सात्यकिरुवाच॥ ॥नेहंतव्योनहंतव्यइतियन्मांप्रभाषथ। धर्मवादैरधर्मिष्ठा धर्मकंचुकमाश्रिताः।
यदाबालः सुभद्रायाः सुतः शस्त्रविनाकृतः। युष्माभिर्निहतोयुद्धे तदाधर्मः क्ववोगतः। मयात्वेतत्प्रतिज्ञातं क्षेपेकस्मिंश्चिदेवहि। शृ
णुध्वंसर्वएवेह श्रुत्वागर्हथमांनराः। योमांनिष्पिष्यसंग्रामेजीवन्हन्यात्पदारुषा। समेवध्योभवेच्छत्रुर्यद्यपिस्यान्मुनिव्रतः। चेष्ट
मानंप्रतीघातेः सभुजंमांसचक्षुषा। मन्यध्वंमृतमित्येवंएतद्वोबुद्धिलाघवं। युक्तोह्यस्यप्रतीघातः कृतोमेकुरुपुंगवाः। यत्तुपार्थे
नमत्स्नेहात्स्वप्रतिज्ञांचरक्षता। सखड्गोस्यहृतोबाहुरनेनैवास्मिवंचितः। भवितव्यंचयद्भाविदैवंचेष्टयतीवच। सोयंहतोविम
र्देस्मिन्किमत्राधर्मचेष्टितं। अपिचायंपुरागीतः श्लोकोवाल्मीकिनाभुवि। सर्वकालंमनुष्येणव्यवसायरतात्मना। नहंत
व्याः स्त्रियइतियद्ब्रवीषिप्लवंगम। पीडाकरममित्राणांयत्स्यात्कर्तव्यमेवतत्। अनुष्ठितंमयातच्चकस्माद्गर्हथमूढवत्॥ ॥
॥ ॥संजयउ॰॥ ॥एवमुक्तामहाराजसर्वेकौरवपांडवाः। नस्मकिंचिदभाषंतमनसासमपूजयन्। मंत्रैर्हिपूतस्यमहाध्वरेषु
यशस्विनोभूरिसहस्रदस्य। मुनेरिवारण्यगतस्यतस्यनतत्रकश्चिद्वधमभ्यनंदत्। सुनीलकेशंवरदस्यतस्यशूरस्यपाराव
तलोहिताक्षं। अश्वस्यमेध्यस्यशिरोनिकृत्यन्यस्तंहविर्धानमिवोत्तरेण। सतेजसाशस्त्रहतेनपूतो महाहवेदेहवरंविसृज्य।
आक्रामदूर्ध्वंवरदोवरार्हो व्यावृत्यधर्मेणपरेणरोदसी॥ ॥इतिद्रोणपर्वणिजयद्रथवधेभूरिश्रवसोवधः॥४३॥ धृत

गम
१४०

राष्ट्रउवाच॥ ॥अजितोद्रोणराधेयविकर्णकृतवर्मभिः। तीर्णःसैन्यार्णवंवीरः प्रतिश्रुत्ययुधिष्ठिरे। सकथंकौरवेयेणस

मेरघुनिवारितः। निगृह्यभूरिश्रवसाबळाद्भुविनिपातितः॥ ॥संजयउवाच॥ ॥शृणुराजन्यथोत्पत्तिंशैनेयस्ययथापुरा। यथाचभूरि
श्रवसोयत्रतत्संशयोन्नृप। अत्रेःपुत्रोभवत्सोमःसोमस्यतुबुधःस्मृतः। बुधस्यासीन्महेंद्राभःपुत्रएकःपुरूरवाः। पुरूरवसआयुस्तु
आयुषोनहुषःस्मृतः। नहुषस्ययायातिस्तुराजर्षिर्देवसम्मितः। ययातेर्देवयान्यांतुयदुर्ज्येष्ठोभवत्सुतः। यदोरभूदन्ववायेदेवमी
ढइतिश्रुतिः। यादवस्तस्यतत्सूनुःशूरस्त्रैलोक्यसम्मतः। शूरस्यशौरिर्नृवरोवसुदेवोमहायशाः। धनुष्यनवरःशूरःकार्तवीर्यसमोयु
धि। तद्वीर्यश्चैवतत्रैवकुलेशिनिरभून्नृप। एतस्मिन्नेवकालेतुदेवकस्यमहात्मनः। दुहितुःस्वयंवरेराजन्सर्वक्षत्रसमागमे। तत्रवैदे
वकींदेवीवसुदेवार्थमाप्तवान्। निर्जित्यपार्थिवान्सर्वान्रथमारोपयच्छिनिः। तांदृष्ट्वादेवकींशौरेरथस्थांपुरुषर्षभ। नामृष्यतमहाते
जाःसोमदत्तःशिनेर्नृप। तयोर्युद्धमभूद्राजन्दिनार्धंचित्रमद्भुतं। बाहुभिर्वसुबलिनोःशक्रप्रह्लादयोरिव। शिनिनासोमदत्तस्तु
प्रसह्यभुविपातितः। असिमुद्यम्यकेशेषुप्रगृह्यचपदाहतः। मध्येराजसहस्राणांप्रेक्षकाणांसमंततः। कृपयाचततस्तेनसजीवन्वि
विसर्जितः। दैतेवस्थःकृतस्तेनसोमदत्तोथमारिष। प्रसादयन्महादेवममर्षवशमास्थितः। तस्यतुष्टोमहादेवोवराणांवरदःप्रभुः।
वरेणाच्छंदयामाससचवव्रेवरंनृपः। पुत्रमिच्छामिभगवन्योनिहन्याच्छिनेःसुतं। मध्येराजसहस्राणांपदाहन्याच्चसंयुगे। तस्यत
द्वचनंश्रुत्वासोमदत्तस्यपार्थिव। एवमस्त्वितितत्रोक्त्वासदेवोंतरधीयत। सतेनवरदानेनलब्धवान्भूरिदक्षिणं। न्यपातयच्चसमरे
सोमदत्तिःशिनेःसुतं। एतत्तेकथितंराजन्यन्मांत्वंपरिपृच्छसि। नहिशक्यारणेजेतुंसात्वतामनुजर्षभ। लब्धलक्ष्याश्चसंग्रामेबहु
वश्चित्रयोधिनः। देवदानवगंधर्वविजेतारोह्यविस्मिताः। स्ववीर्यविजययुक्तानैतेपरपरिग्रहाः। नतुल्यंवृष्णिभिरिहदृश्यतेकिंचन

प्रभो। भूतंभव्यंभविष्यच्चबलेनभरतर्षभ। नज्ञातिमवमन्यंतेवृद्धानांशासनेरताः। नदेवासुरगंधर्वानयक्षोरगराक्षसाः। जेतारोवृष्णि
वीराणांकिंपुनमनुष्यारणे। ब्रह्मद्रव्येगुरुद्रव्येज्ञातिस्वेचाप्यहिंसकाः। एतेषांरक्षितारश्चयेस्युःकस्यांचिदापदि। अर्थवंतोनचोत्सि
क्ताब्रह्मण्याःसत्यवादिनः। समर्थान्नावमन्यंतेदीनानभ्युद्धरंतिच। नित्यंदेवपरादांतादातारश्चाविकत्थनाः। तेनवृष्णिप्रवीराणांच
क्रंनप्रतिहन्यते। अपिमेरुंवहेत्कश्चित्तरेद्वामकरालयं। नतुवृष्णिप्रवीराणांसमेतानांव्रजेन्नृप। शिनेर्दुहितृसंभूतएषवीरःससात्य
किः। एतत्तेसर्वमाख्यातंयत्रतेसंशयोमहान्। कुरुराजनरश्रेष्ठतवह्यपनयोमहान्॥ ॥द्रोणपर्वणिजयद्रथवधे॥४८॥ धृतराष्ट्र
उवाच॥ ॥तदवस्थेहतेतस्मिन्भूरिश्रवसिकौरवे। यथाभूयोभवद्युद्धंतन्ममाचक्ष्वसंजय॥ ॥संजयउ॰॥ ॥भूरिश्रवसिसंक्रांते
परलोकायभारत। वासुदेवंमहाबाहुरर्जुनःसमचूचुदत्। नोदयाश्वान्भृशंकृष्णयतोराजाजयद्रथः। प्रतिज्ञांसफलांचापिकर्तुमर्ह
सिमेनघ। अस्तमेतिमहाबाहोत्वरमाणोदिवाकरः। एतद्धिपुरुषव्याघ्रमहदभ्युद्यतंमया। कार्यंसंरक्ष्यतेचैवकुरुसेनामहारथैः। नो
स्तमेतियथासूर्योयथासत्यंभवेद्वचः। नोदयाश्वांस्तथाकृष्णयथाहन्यांजयद्रथं। ततःकृष्णोमहाबाहूरजतप्रतिमान्हयान्। हयज्ञोनो
दयामासजयद्रथवधंप्रति। तंप्रयांतममोघेषुमुत्पतद्भिरिवाशुगैः। त्वरमाणामहाराजसेनामुख्याःसमाव्रजन्। दुर्योधनश्चकर्णश्च
वृषसेनश्चमद्रराट्। अश्वत्थामाकृपश्चैवस्वयमेवजयद्रथः। समासाद्यतुबीभत्सुःसैंधवंप्रमुखेस्थितं। नेत्राभ्यांक्रोधपूर्णाभ्यामभ्ये
क्षन्निर्दहन्निव। ततोदुर्योधनोराजाराधेयंत्वरितोब्रवीत्। अर्जुनंवीक्ष्यसंयांतंजयद्रथरथंप्रति। अयंसवैकर्तनयुद्धकालोनिदर्श
यस्वात्मबलंमहात्मन्। यथानवध्येतरणेर्जुनेनजयद्रथःकर्णतथाकुरुष्व। अल्पावशिष्टंदिवसंनृवीरविघातयस्वाद्यरिपुंशरौघैः।

दिनक्षयंप्राप्यनरप्रवीर कृवंहिनः कर्णजयोभविष्यति। सैंधवेरक्ष्यमाणेतुसूर्यस्यास्तमनंप्रति। मिथ्याप्रतिज्ञः कौंतेयः प्रवेक्ष्यतिहु
ताशनं। अनर्जुनायांचभुविमुहूर्तमपिमानद। जीवितुंनोत्सहेरन्वैभ्रातरोस्यसहानुगाः। विनष्टैः पांडवेयैश्चसशैलवनकाननां।
वसुंधरामिमांकर्णभोक्ष्यामोहतकंटकां। दैवेनोपहतः पार्थोविपरीतश्चमानदः। कार्याकार्यमजानन्वैप्रतिज्ञांकृतवान्रणे। नूनमा
त्मविनाशायपांडवेनकिरीटिना। प्रतिज्ञेयंकृताकर्णजयद्रथवधंप्रति। कथंजीवतिदुर्धर्षेत्वयिराधेयफाल्गुनः। अनस्तंगतआ
दित्येहन्यात्सैंधवकंनृपं। रक्षितंमद्रराजेनकृपेणाचमहात्मना। जयद्रथंरणमुखेकथंहन्याद्धनंजयः। द्रोणिनारक्ष्यमाणंतुमयादुः
शासनेनच। कथंप्राप्स्यतिबीभत्सुः सैंधवंकालनोदितः। युध्यंतेबहवः शूरालंबतेचदिवाकरः। शंकेजयद्रथंपार्थोनैवंप्राप्स्यतिमा
नद। सत्वंकर्णमयासार्द्धंशूरैश्चान्यैर्महारथैः। युध्यस्वयत्नमास्थायपरंपार्थेनसंयुगे। एवमुक्तस्तुराधेयस्तवपुत्रेणमारिष। दुर्यो
धनमिदंवाक्यंप्रत्युवाचकुरूत्तमं। दृढलक्षणशूरेणभीमसेनेनधन्विना। भृशमुद्वेजितः संख्येशरजालैरनेकशः। स्थातव्यमिति
तिष्ठामिरणेसंप्रतिमानद। नैवांगमिंगतेकिंचित्संतप्तस्यशरेषुभिः। योत्स्यामितुतथाराजन्शक्त्याहंपरयारणे। यथापांडवमु
ख्यासौनहनिष्यतिसैंधवं। नहिमेयुध्यमानस्यसायकान्मुंचतः शितान्। सैंधवंप्राप्स्यतेवीरः सव्यसाचीधनंजयः। यत्तुभक्तिम
ताकार्यंसततंहितकांक्षिणा। तत्करिष्यामिकौरव्यजयोदैवेप्रतिष्ठितः। सैंधवार्थंपरंयत्नंकरिष्याम्यद्यसंयुगे। त्वत्प्रियार्थंमहाबा
होजयोदैवेप्रतिष्ठितः। अद्ययुद्धंकुरुश्रेष्ठममपार्थस्यचोभयोः। पश्यंतुसर्वसैन्यानिदारुणंरोमहर्षणं। कर्णकौरव्ययोरेवंसंज
ल्पंभाषमाणयोः। अर्जुनोनिशितैर्बाणैर्जघानतववाहिनीं। चिच्छेदतीक्ष्णाग्रमुखैः शूराणामनिवर्तिनां। भुजान्परिघसंकाशा।

न्हस्तिहस्तोपमान्वयो। शिरांसि च महाबाहुश्चिछेद निशितैः शरैः। हस्तिहस्तान्हयग्रीवाः रथाक्षांश्च समंततः। शोणिताक्तान्हयारोहान्
गृहीतप्रासतोमरान्। क्षुरैश्चिछेद बीभत्सुर्द्विधैकैकं त्रिधैव च। हयवारणमुख्याश्च प्रपतंतः सहस्रशः। ध्वजाश्छत्राणि चापानि चाम
राणि शिरांसि च। कक्षमग्निरिवोद्भूतः प्रादहत्तव वाहिनीं। अचिरेण महीं पार्थश्चकार रुधिरोत्तरां। हतभूयिष्ठयोधं तत्कृत्वा तव बलं ब
ली। आससाद दुराधर्षं सैंधवं सत्यविक्रमः। बीभत्सुर्भीमसेनेन सात्वतेन च रक्षितः। स बभौ भरतश्रेष्ठ ज्वलन्निव हुताशनः। तं तथा
वस्थितं दृष्ट्वा त्वदीया वीरसंमताः। नाव्यथंत महेष्वासाः फाल्गुनं पुरुषर्षभ। दुर्योधनश्च कर्णश्च वृषसेनोथ मद्रराट्। अश्वत्थामा कृप
श्चैव स्वयमेव च सैंधवः। संरब्धाः सैंधवस्यार्थे समावव्रुः किरीटिनं। नृत्यंतं रथमार्गेषु धनुर्ज्यातलनिस्वनं। संग्रामकोविदं पार्थं स
र्वे युद्धविशारदाः। अभीताः पर्यवर्त्तंत व्यादितास्यमिवांतकं। सैंधवं पृष्ठतः कृत्वा जिघांसंतोर्जुनं प्रति। सूर्यास्तमनमैछंत लोहितायति भा
स्करे। ते भुजैर्भोगिभोगाभैर्धनूंष्यायम्य सायकान्। मुमुचुः सूर्यरश्म्याभान् शतशः फाल्गुनं प्रति। तानस्तानस्यमानांश्च किरीटी युद्धदुर्म
दः। द्विधा त्रिधाष्टधैकैकं छित्वा विव्याध तान्वरान्। सिंहलांगूलकेतुश्च दर्शयिन्शक्तिमात्मनः। शारद्वतीसुतो राजन्नर्जुनं प्रत्यवारयत्।
स विध्वा दशभिः पार्थं वासुदेवं च सप्तभिः। अतिष्ठद्रथमार्गेषु सैंधवं परिपालयन्। अथ तं कौरवश्रेष्ठाः सर्व एव महारथाः। महता रथवं
शेन सर्वतः पर्यवारयन्। विस्फारयंतश्चापानि विसृजंतश्च सायकान्। सैंधवं पर्यरक्षंत शासनात्तनयस्य ते। तत्र पार्थस्य शूरस्य बा
ह्वोर्बलमदृश्यत। इषूणामक्षयत्वं च धनुषो गांडिवस्य च। अस्त्रैरस्त्राणि संवार्य द्रौणेः शारद्वतस्य च। एकैकं दशभिर्बाणैः सर्वानेव स
माक्षिपत्। तं द्रोणिः पंचविंशत्या वृषसेनश्च सप्तभिः। दुर्योधनश्च विंशत्या कर्णशल्यौ त्रिभिस्त्रिभिः। आमृद्नन्रथमार्गेषु कर्णश्च द

शभिः शरैः। तएनमभिगर्जंतो विव्यधुश्च पुनः पुनः। विधुन्वंतश्च चापानि सर्वतः पर्यवारयन्। श्लिष्टं तु सर्वतश्चक्रु रथमंडलमाशु
गैः। स्तूयस्तिमनमिषंतस्त्वरमाया महारथाः। तएनमभिनर्दंतो विधुन्वाना धनूंषि च। सिषिंचुर्मार्गणौघैस्तं गिरिं मेघाइवांबु
भिः। ते महास्त्राणि दिव्यानि तत्र राजन्व्यदर्शयन्। धनंजयस्य गात्रेषु शूराः परिघबाहवः। हतभूयिष्ठयोधं तत्कृत्वा तव
बलं बली। आससाद दुराधर्षं सैंधवं सत्यविक्रमं। तं कर्णः संयुगे राजन्प्रत्यवारयदाशुगैः। मिषतो भीमसेनस्य सात्वतस्य
च भारत। तं पार्थो दशभिर्बाणैः प्रत्यविध्यद्रणाजिरे। सूतपुत्रं महाबाहुः सर्वसैन्यस्य पश्यतः। सात्वतश्च त्रिभिर्बाणैः कर्णं
विव्याध मारिष। भीमसेनस्त्रिभिश्चैव पुनः पार्थश्च सप्तभिः। सत्तांश्च प्रति विव्याध षष्ट्या षष्ट्या महारथः। तद्युद्धमभवद्रा
जन्कर्णस्य बहुभिः सह। तत्राद्भुतमपश्याम सूतपुत्रस्य मारिष। यदेकः समरे क्रुद्धस्त्रीन्रथान्पर्यवारयत्। फाल्गुनश्च
महाबाहुः कर्णं वैकर्तनं तथा। सायकानां शतेनैव सर्वमर्मस्वताडयत्। रुधिरोक्षितसर्वांगः सूतपुत्रः प्रतापवान्। सायकै
रष्टसाहस्रैः छादयामास पांडवं। तां शस्त्रवृष्टिमतुलां कर्णचापसमुत्थितां। व्यधमत्सायकैः पार्थः शलभानिव मारुतः।
छादयामास च तदा सायकैरर्जुनो रणे। पश्यतां सर्वयोधानां दर्शयन्पाणिलाघवं। वधार्थं चास्य समरे सायकं सूर्यवर्चसं। वि
क्षेप त्वरया युक्तस्त्वराकाले धनंजयः। तमापतंतं वेगेन द्रौणिश्चिच्छेद सायकं। अर्धचंद्रेण बाणेन स छिन्नः प्रापतद्भुवि।
कर्णो विद्विषतां हंता छादयामास फाल्गुनं। सायकैर्बहुसाहस्रैः कृतप्रतिकृतेप्सया। तौ वृषाविव नर्दंतौ नरसिंहौ महारथौ।

सायकौघैः प्रतिच्छन्नं चक्रतुः खमजिह्मगैः। अदृश्यौ च शरौघैस्तौ निघ्नतामितरेतरं। पार्थोऽहमस्मि तिष्ठस्व कर्णोऽहं तिष्ठ फाल्गुनः।
इत्येवं तर्जयंतौ तौ वाक्शल्यैस्तुदतां स्म ह। युध्यतां समरे वीरौ चित्रं लघु च सुष्टु च। प्रेक्षणीयावभवतां सर्वयोधसमागमे।
प्रशस्यमानौ समरे सिद्धचारणपन्नगैः। अयुध्येतां महाराज परस्परवधैषिणौ। ततो दुर्योधनो राजंस्तावकानभ्यभाषत।
यत्ताद्रक्षत राधेयं नाहत्वा समरेऽर्जुनं। निवर्त्स्यति तिराधेय इति मामुक्तवान्वृषः। एतस्मिन्नंतरे राजन् दृष्ट्वा कर्णस्य विक्रमं।
आकर्णमुक्तैरिषुभिः कर्णस्य चतुरो हयान्। अनयन्मृत्युलोकाय चतुर्भिः सायकोत्तमैः। सारथिं चास्य भल्लेन रथनीडादपाहरत्।
छादयामास च शरैस्तव पुत्रस्य पश्यतः। संछाद्यमानः समरे हताश्वो हतसारथिः। मोहितः शरजालेन कर्तव्यं नाभ्यपद्यत।
तं तथा विरथं दृष्ट्वा रथमारोप्य च स्वकं। अश्वत्थामा महाराज भूयोऽर्जुनमयोधयत्। मद्रराजस्तु कौंतेयमविध्यत्त्रिंशता शरैः।
शारद्वतस्तु विंशत्या वासुदेवं समर्पयत्। धनंजयं द्वादशभिराजघान शिलीमुखैः। चतुर्भिः सिंधुराजश्च वृषसेनश्च सप्तभिः।
पृथक्पृथक् महाराज कृष्णपार्थौ विविध्यतां। तथैव तान्प्रत्यविध्यत्कुंतीपुत्रो धनंजयः। द्रोणपुत्रं चतुःषष्ट्या मद्रराजं शतेन हि।
सैंधवं दशभिर्भल्लैर्वृषसेनं त्रिभिः शरैः। शारद्वतं च विंशत्या विध्वा पार्थः समुन्नदत्। ते प्रतिज्ञाप्रतीघातमिच्छंतः सव्यसाचिनः।
सहितास्तावकास्तूर्णं अभिपेतुर्धनंजयं। अथार्जुनः सर्वतो धारमस्त्रं प्रादुश्चक्रे त्रासयन् धार्तराष्ट्रान्। तं प्रत्युदीयुः कुरवः पां
डुसूनुं रथैर्महार्हैः शरवर्षाण्यवर्षन्। ततस्तु तस्मिंस्तु मुले समुत्थिते सुदारुणे भारत मोहनीये। नामुह्यत प्राप्य

सराजपुत्रः। किरीटमालीविसृजन्पृषत्कान्। राज्यद्धेघ्नःसव्यसाचीकुरूणांस्मरन्क्लेशान्द्वादशवर्षवृत्तान्। गांडीवमुक्तैरिषुभिर्महात्मा
सर्वादिशोव्याप्तयोदप्रमेयः। प्रदीप्तोल्कमभवच्चांतरिक्षंमृतेषुदेहेषुपतन्वयांसि। यत्पिंगलज्योतिरिवांतवह्निः क्रुद्धोरिपूनाज
गवेनहंति। किरीटमाली महतामहायशाः शरासनेनास्यच्छराननीकजित्। हयप्रवेकोत्तमनागधूर्गतान्कुरुप्रवीरानिषु
भिर्व्यपातयत्। गदाश्चगुर्वीः परिघानयस्मयानसींश्चशक्तीश्चरणेनराधिपाः। महांतिशस्त्राणिचभीमदर्शनाः प्रगृह्यपा
र्थंसहसाभिदुद्रुवुः। तथाश्वसादीन्सरथांश्चवारयान्पदातिसंघांश्चमहाधनुर्द्धरः। विपन्नसर्वायुधजीवितान्रणेचकारवी
रायमराष्ट्रवर्द्धनः॥ ॥द्रोणपर्वणिजयद्रथवधे॥४॥ संजयउवाच॥ ॥सरथोव्यचरत्पार्थःप्रेक्षणीयोधनंजयः। युगपद्दि
क्षुसर्वासुचित्राण्यस्त्राण्यदर्शयत्। मध्यंदिनगतंसूर्यंप्रतपंतमिवांबरे। नशेकुःसर्वभूतानिपांडवंप्रतिवीक्षितुं। प्रसृतांस्तस्य
गांडीवाच्छरव्रातान्महात्मनः। संग्रामेसमपश्यामहंसपंक्तीरिवांबरे। विनिवार्यसवीयेया अस्त्रैरस्त्राणिसर्वशः। दर्शयन्रौद्रमा
मानमुग्रकर्मणिधिष्ठितः। सतान्रथवरान्राजन्नभ्यतिक्रामदर्जुनः। मोहयन्निवनाराचैर्जयद्रथवधेप्सया। विसृजन्दिक्षुसर्व
सुशरानसितसारथिः। सरथोव्यचरत्तूर्णंप्रेक्षणीयोधनंजयः। भ्रमंतइवशूरस्यशरव्रातामहात्मनः। अदृश्यंतांतरिक्षस्थाः शत
शोथसहस्रशः। आददानंमहेष्वासंसंदधानंचपांडवं। विसृजंतंचकौंतेयंनानुपश्यामहेतदा। तथासर्वादिशोराजन्सर्वांश्चरथि
नोरणे। आकुलीकृत्यकौंतेयोजयद्रथमुपाद्रवत्। विव्याधचचतुःषष्ट्याशराणांनतपर्वणां। सैंधवस्तुतथाविद्धःशरैर्गांडीवधन्व

द्रो॰प॰
१४४

नानवक्षमेससंक्रुद्धस्तोत्रार्दितइवद्विपः। सवराहध्वजस्तूर्णंगृध्रपत्रानजिह्मगान्। आशीविषसमप्रख्यान्कर्मारपरिमार्जि
तान्। मुमोचनिशितान्संख्येसायकान्सव्यसाचिनि। त्रिभिस्तुविध्वागांडीवंनाराचैःषड्भिरर्जुनं। अष्टाभिर्वाजिनोविध्यत् ध्वजंचैके
नपत्रिणा। सविक्षिप्यार्जुनस्तीक्ष्णान्सैंधवप्रच्युतान्शरान्। युगपत्तस्यचिच्छेदशराभ्यांसैंधवस्यहि। सारथेश्चशिरःकायात्ध्वजंचसम
लंकृतं। सछिन्नयष्टिःसुमहान्कीर्यमाणःशराहतः। वराहःसिंधुराजस्यपपाताभिमुखोरथात्। एतस्मिन्नेवकालेतुद्रुतंगछतिभास्करे।
अब्रवीत्पांडवंतत्रत्वरमाणोजनार्दनः। धनंजयशिरश्छिंधिसैंधवस्यदुरात्मनः। अस्तंमहीधरश्रेष्ठंयियासतिदिवाकरः। शृणु
चैवंवचमेवाक्यंजयद्रथवधंप्रति। वृद्धक्षत्रःसैंधवस्यपिताजगतिविश्रुतः। सकालेनेहमहतासैंधवंप्राप्तवान्सुतं। जयद्रथम
मित्रघ्नंतंचोवाचततोनृपं। अंतर्हितातततोवाणीमेघदुंदुभिनिस्वना। तवात्मजोयंमर्त्येषुकुलशीलदमादिभिः। गुणैर्भवि
ष्यतिविभोसदृशोवंशयोर्द्वयोः। क्षत्रियप्रवरोलोकेनित्यंशूराभिसत्कृतः। शत्रुभिर्युध्यमानस्यसंग्रामेत्वस्यधन्विनः। शिर
श्छेत्स्यतिसंक्रुद्धःशत्रुरालक्षितोभुवि। एतच्छ्रुत्वासिंधुराजोध्यात्वाचिरमरिंदम। ज्ञातीन्सर्वानुवाचेदंपुत्रस्नेहाभिपीडितः। सं
ग्रामेयुध्यमानस्यवहतोमहतींधुरं। धरण्यांममपुत्रस्यपातयिष्यतियःशिरः। तस्यापिशतधामूर्धाफलिष्यतिनसंशयः।
एवमुक्त्वाततोराज्येस्थापयित्वाजयद्रथं। वृद्धक्षत्रोवनंयातस्तपस्तेपेसमाहितः। सोयंतप्यतितेजस्वीतपोघोरंदुरासदं।
स्यमंतपंचकादस्माद्बहिर्वानरकेतन। तस्माज्जयद्रथस्यत्वंशिरश्छित्वामहाद्युते। दिव्येनास्त्रेणरिपुहन्घोरेणाद्भुतकर्म

राम
१४४

णा। सकुंडलं सिंधुपतेः प्रभंजनसुतानुज। उत्संगे पातयस्वाशु वृद्धक्षत्रस्य भारत। अथ त्वमस्य मूर्द्धानं पातयिष्यसि भूतले। तवापि शतधा मूर्द्धा फलिष्य
ति न संशयः। यथा चैतन्न जानीयात् स राजा पृथिवीपतिः। तथा कुरु कुरुश्रेष्ठ दिव्यमस्त्रमुपाश्रितः। न ह्यसाध्यमकार्यं वा विद्यते तव किंचन। समस्तेष्वपि लोकेषु
त्रिषु वासवनंदन। एतच्छ्रुत्वा तु वचनं सृक्किणी परिसंलिहन्। इंद्राशनिसमस्पर्शं दिव्यमंत्राभिमंत्रितं। सर्वभारसहं शश्वद्गंधमाल्यार्चितं शरं। विससर
र्जार्जुनस्तूर्णं सैंधवस्य वधे धृतः। स तु गांडीवनिर्मुक्तः शरः श्येन इवाशुगः। शकुंतमिव वृक्षाग्रात् सैंधवस्य शिरो हरत्। अहरत्तु ततस्त्वेवं शरैरूर्ध्वं
धनंजयः। दुर्हृदामप्रहर्षाय सुहृदां हर्षणाय च। शरैः कदंबकीकृत्य काले तस्मिंश्च पांडवः। स्यमंतपंचकाद्बाह्यं शिरस्तद्व्याहरत्ततः। एतस्मिन्नेव काले तु
वृद्धक्षत्रो महीपतिः। संध्यामुपास्ते तेजस्वी संबंधी तव मारिष। उपासीनस्य तस्याथ कृष्णकेशं सकुंडलं। सिंधुराजस्य मूर्द्धानमुत्संगे तदपातयत्। त
स्योत्संगे निपतितं शिरस्तच्चारुकुंडलं। वृद्धक्षत्रस्य नृपतेरलक्षितमरिंदम। कृतजप्यस्य तस्याथ वृद्धक्षत्रस्य धीमतः। उत्तिष्ठतस्तदुत्संगाच्छिरोगच्छद्धु
रातलं। ततस्तस्य नरेंद्रस्य पुत्रमूर्द्धनि भूतले। गते तस्यापि सहसा मूर्द्धागच्छदरिंदम। ततः सर्वाणि भूतानि विस्मयं जग्मुरुत्तमं। वासुदेवश्च बीभत्सुं
प्रशशंस महारथं। ततो दृष्ट्वा विनिहतं सिंधुराजं जयद्रथं। पुत्राणां तव नेत्रेभ्यो दुःखाद्बह्वपतज्जलं। भीमसेनोपि संग्रामे बोधयन्निव पांडवं। सिंहनादेन म
हता पूरयामास रोदसी। तं श्रुत्वा तु महानादं धर्मपुत्रो युधिष्ठिरः। सैंधवं निहतं मेने फाल्गुनेन महात्मना। ततो वादित्रघोषेण स्वान्योधानभिहर्षयन्। अ
भ्यवर्त्तत संग्रामे भारद्वाजं युयुत्सया। ततः प्रववृते राजन्नस्तं गच्छति भास्करे। द्रोणस्य सोमकैः सार्द्धं संग्रामो लोमहर्षणः। ते तु सर्वप्रयत्नेन भारद्वाजं जि
घांसवः। सैंधवे निहते राजन्नयुध्यंत महारथाः। पांडवास्तु जयं लब्ध्वा सैंधवं विनिहत्य च। अयोधयंस्ततो द्रोणं जयोन्मत्तास्ततस्ततः। अर्जुनोपि रणे यो
धांस्तावकान् रथसत्तमान्। अयोधयन्महाराज हत्वा सैंधवकं नृपं। स देवशत्रूनिव देवराजः किरीटमाली व्यधमत्सपत्नान्। यथा तमांस्यभ्युदितस्तमो

घ्नः पूर्णां प्रतिज्ञां समवाप्य वीरः॥ ॥इति द्रोणपर्वणि जयद्रथवधः समाप्तः॥४५॥ धृतराष्ट्र॥ ॥तस्मिन्विनिहते वीरे सैंधवे सव्यसाचिना। मामकाय
दकुर्वंस्तन्ममाचक्ष्व संजय॥ ॥संजय॥ ॥सैंधवं निहतं दृष्ट्वा रणे पार्थेन मारिष। अमर्षवशमापन्नः कृपः शारद्वतस्तदा। महता शरवर्षेण पांडवं
समवाकिरत्। द्रौणिश्चाभ्यद्रवत्पार्थं रथमास्थाय फाल्गुनं। तावेनं रथिनां श्रेष्ठौ रथाभ्यां रथसत्तमौ। उभावुभयतस्तीक्ष्णैर्विशिखैरभ्यवर्षतां। स तथा श
रवर्षाभ्यां सुमहद्भ्यां महारथः। पीड्यमानः परामार्तिमगमद्रथिनां वरः। सोजिघांसुर्गुरुं संख्ये गुरोस्तनयमेव च। चकाराचार्यकं कर्म कुंतीपुत्रो धनंजयः।
अस्त्रैरस्त्राणि संवार्य द्रौणेः शारद्वतस्य च। मंदवेगानिषूंस्ताभ्यामजिघांसुरवासृजत्। तेनातिभृशमभ्यघ्नन्विशिखा जयनोदिताः। बहुत्वाच्च परा
मार्तिं शराणां तावगच्छतां। अथ शारद्वतो राजन्कौंतेयशरपीडितः। अवासीदद्रथोपस्थे मूर्छामभिजगाम च। विह्वलं तमभिज्ञाय भर्तारं शरपीडितं। हतो
यमिति विज्ञाय सारथिस्तमपावहत्। तस्मिन्सन्ने महाराज कृपे शारद्वते युधि। अश्वत्थामाप्यपायासीत्पांडवेयाद्रथांतरं। दृष्ट्वा शारद्वतं पार्थो मूर्छितं
शरपीडितं। रथ एव महेष्वासः कृपणं पर्यदेवयत्। पश्यन्निदं महाप्राज्ञः क्षत्ता राजानमुक्तवान्। कुलांतकरणे पापे जातमात्रे सुयोधने। नीयतां परलोका
यसाध्वयं कुलपांसनः। अस्माद्धि कुरुमुख्यानां महदुत्पत्स्यते भयं। तदिदं समनुप्राप्तं वचनं सत्यभाषिणः। तत्कृते ह्यद्य पश्यामि शरतल्पगतं कृपं।
धिगस्तु क्षात्रमाचारं धिगस्तु बलमौरसं। को नु ब्राह्मणमाचार्यमभिद्रुह्येत मादृशः। ऋषिपुत्रो महाचार्यो द्रोणस्य दयितः सखा। एष शेते रथोपस्थे मद्बाणैरभि
पीडितः। अकामयानेन मया विशिखैरर्दितो भृशं। अवासीदद्रथोपस्थे प्राणान्पीडयतीव मे। शराभितप्तेन मया प्रेक्षणीयो महाद्युतिः। प्रत्यस्तो बहुभिर्बा
णैर्दशधर्मगतो ध्रुवं। शोचयत्येष नियतं भूयः पुत्रवधाद्धि मां। कृपणं स्वरथे सन्नं पश्य यत्कृपं यथा गतं। उपाकृत्य तु ये विद्यामाचार्येभ्यो नरर्षभाः। प्रयच्छं
ति हि ये कामान्देवत्वमुपयांति ते। ये तु विद्यामुपादाय गुरुभ्यः पुरुषाधमाः। घ्नंति तानेव दुर्वृत्तास्ते वै निरयगामिनः। तदिदं नरकायाद्य कृतं कर्म मया ध्रुवं।

आचार्यं शरवर्षेण रणे छादयतानघं। यत्नं नत्वेवमुपाकुर्वन्तस्त्वं मामब्रवीस्तपः। न कथं चन कौरव्य प्रहर्त्तव्यं गुराविति। तदिदं वचनं सर्वमाचार्यस्य
महात्मनः। नानुष्ठितं त्वया ज्यौ विविधैः खैराभिवर्षता। नमस्तस्मै सुपूज्याय गोतमायापलायिने। धिगस्तु मम वार्ष्णेय यो ह्यस्मै प्रहराम्यहं। तथा विलपमा
ने तु सव्यसाचिनि तं प्रति। सैंधवं निहतं दृष्ट्वा राधेयः समुपाद्रवत्। नमापतंतं राधेयमर्जुनस्य रथं प्रति। पांचाल्यौ सात्यकिश्चैव सहसा समुपाद्रु
वन्। नपायांतं तु राधेयं दृष्ट्वा पार्थो महारथः। प्रहसन्देवकीपुत्रमिदं वचनमब्रवीत्। एष प्रयात्याधिरथिः सात्यकेः स्यंदनं प्रति। नामृष्यत हतं नूनं
भूरिश्रवसमाहवे। यत्र यात्येष तत्र त्वं नोदयाश्वान् जनार्दन। मा सोमदत्तेः पदवीं गमयेत्सात्वतं वृषः। एवमुक्तो महाबाहुः केशवः सव्यसा
चिना। प्रत्युवाच महातेजाः कालयुक्तमिदं वचः। अलमेष महाबाहुः कर्णायैको हि पांडव। किं पुनर्द्रौपदेयाभ्यां सहितः सात्वतर्षभः। न च ता
वत्क्षमः पार्थ कर्णेन ते व संगरः। प्रज्वलंती महोल्केव तिष्ठत्यस्य हि वासवी। त्वदर्थं पूज्यमानैषा रक्षते परवीरहन्। न कर्णमाहृतं मन्ये तेन यु
द्धं नरोत्तम। कर्णो हि बलवानेकः शक्तोस्मान्नजेतुमोजसा। न कर्णं हि वृष्णिशार्दूलो जेतुं सबलवाहनः। कर्णस्यैष महादोषोयं ज्ञायेत पदे पदे। अमि
दार्वघृणि त्वाह्येतेन रोभ्यतमो मतः। अतः कर्णः प्रयासत्र सात्वतस्य यं। यथा तथा। अहं ज्ञास्यामि कौरव्य कालमस्य दुरात्मनः। योसौ का
लेन वीरस्य सात्वतस्य समागमः। आकांक्षितश्च कर्णेन सभवत्यमितौजसा॥ ॥धृतराष्ट्र॥ ॥योसौ कर्णेन वीरेण वार्ष्णेयस्य समागमः। हते
च भूरिश्रवसि सैंधवे च निपातिते। सात्यकिश्चापि विरथः कं समारूढवान्रथं। चक्ररक्षौ च पांचाल्यौ तन्ममाचक्ष्व संजय॥ ॥संजय॥ ॥हंत ते वर्त्तयिष्या
यथावृत्तं महारणे। शुश्रूषस्व स्थिरो भूत्वा दुराचरितमात्मनः। पूर्वमेव हि कृष्णस्य मनोगतमिदं प्रभो। विजेतव्यो यथा वीरः सात्यकिर्यूपकेतुना।
अतीतानागतं राजन्स हि वेत्ति जनार्दनः। ततः सूतं समाहूय दारुकं संदिदेश ह। रथो मे युज्यतां काल्यमिति राजन्महाबलः। न हि देवा न गंधर्वा

नयक्षोरगराक्षसाः।मानवाश्चापियोद्धारःकृष्णयोःसंनिकेतन।पितामहपुरोगाश्चदेवाःसिद्धाश्चतंविदुः।तयोःप्रभावमतुलंशृणुयुद्धंतुतद्यथा।
सात्यकिंविरथंदृष्ट्वाकर्णंचाभ्युद्यतंयुधि।दध्मौशंखंमहावेगमार्षभेणेवमाधवः।दारुकोवेक्ष्यसंदेशंश्रुत्वाशंखस्यचस्वनं।रथमन्वानयत्तस्मैसु
पर्णोच्छ्रितकेतनं।सकेशवस्यानुमतेरथंदारुकसंयुतं।आरुरोहशिनेःपौत्रोज्वलनादित्यसन्निभं।कामगैःसैन्यसुग्रीवमेघपुष्पबलाहकैः।हयोद
ग्रैर्महावेगैर्हेमभांडपरिच्छदैः।युक्तंसमारुह्यचतंविमानप्रतिमंरथं।अभ्यद्रवतराधेयंप्रदिशन्सायकान्बहून्।चक्ररक्षावपितदायुधामन्यूत्त
मौजसौ।धनंजयरथंहित्वाराधेयंप्रत्युदीयतां।राधेयोपिमहाराजशरवर्षंसमुत्सृजन्।अभ्यद्रवत्सुसंक्रुद्धोरणेशैनेयमच्युतं।नैवदेवंनगांध
र्वंनासुरोरगराक्षसं।तादृशंभुवियुद्धंदिविवाश्रुतमित्युत।उपारमततत्सैन्यंसनराश्वरथद्विपं।तयोर्दृष्ट्वामहाराजकर्मसंमूढचेतसः।सर्वेच
समपश्यंतनद्युद्धमतिमानुषं।तयोर्नृवरयोराजन्सारथ्यंदारुकस्यच।गतप्रत्यागतावृत्तैर्मंडलैःसन्निवर्तनैः।सारथ्येतुरथस्थस्यकाश्यपेयस्य
विस्मिताः।नभस्तलगताश्चैवदेवगंधर्वदानवाः।अतीवावहितादृष्टुंकर्णशैनेययोरणं।कर्णार्थेतौपराक्रांतौस्पर्द्धिनौशुष्मिणौरणे।कर्णश्चाम
रसंकाशोयुयुधानश्चसात्यकिः।अन्योन्यंतौमहाराजशरवर्षैरवर्षतां।प्रममाथशिनेःपौत्रंकर्णःसायकवृष्टिभिः।असृष्यमाणोनिधनं
कौरव्यजलसंधयोः।कर्णःशोकसमाविष्टोमहोरगइवश्वसन्।सशैनेयंरणेक्रुद्धःप्रदहन्निवचक्षुषा।अभ्यवर्षतवेगेनपुनःपुनररिंद
मं।तंतुसंप्रेक्ष्यसंक्रुद्धंसर्वपारसवैःशरैः।बिभेदशरवर्षेणगजःप्रतिगजंयथा।तौसमेत्यनरव्याघ्रौव्याघ्राविवतरस्विनौ।अन्योन्यंसंतत
क्षातेरणेनुपमविक्रमौ।ततःकर्णंशिनेःपौत्रःसर्वपारसवैःशरैः।बिभेदसर्वगात्रेषुपुनःपुनररिंदमः।सारथिंचास्यभल्लेनरथनीडादपा
हरत्।अश्वांश्चचतुरःश्वेतान्निजघ्नेनिशितैःशरैः।छित्वाध्वजंरथंचैवशतधापुरुषर्षभः।वृषसेनःकर्णसुतःशल्योमद्राधिपस्तथा।

द्रोणपुत्रस्तु द्रौणेयंसर्वतःपर्यवारयन्।ततःपर्याकुलंसर्वंनप्राज्ञायतकिंचन।तथासात्यकिनाकर्णेविरथेवैकृतेतदा।हाहाकारस्ततोराजन्सर्व
सैन्येषुचानवत्।कर्णोपिविह्वलोराजन्सात्वतेनार्दितःशरैः।दुर्योधनरथंराजन्आरुरोहविनिःश्वसन्।मानयंस्तवपुत्रस्यबाल्यात्प्रभृतिसौहृदं।कृतंराज्य
प्रदानेनप्रतिज्ञापरिपालयन्।तथानुविरथेकर्णेपुत्रांस्तवजयार्थिनः।दुःशासनमुखान्शूरान्नावधीत्सात्यकिर्वशी।रक्षन्प्रतिज्ञांचपुनर्भीमसेनकृतां
पुरा।विरथान्विह्वलांश्चक्रेनतुप्राणैर्व्ययोजयत्।भीमसेनेनतुवधःपुत्राणांतेप्रतिश्रुतः।पुनर्द्यूतेचपार्थेनवधःकर्णस्यसंश्रुतः।वधेत्वकुर्वन्
यत्नंतेतस्यकर्णमुखारथाः।नाशक्नुवंस्ततोहंतुंसात्यकिंप्रवरारथाः।द्रौणिश्चकृतवर्माचतथैवान्येमहारथाः।निर्जिताधनुषैकेनशतशःक्षत्रि
यर्षभाः।कांक्षतापरलोकंचधर्मराजस्यचप्रियं।कृष्णयोःसदृशोवीर्येसात्यकिःशत्रुतापनः।कृष्णोवाप्यभवल्लोकेपार्थोवापिधनुर्धरः।शैनेयो
वानरव्याघ्रश्चतुर्थोनोपपद्यते॥ ॥धृतराष्ट्र॥ ॥अजय्यंरथमास्थायवासुदेवस्यसात्यकिः।विरथंकृतवान्कर्णंसवासुदेवसमंयुवा।दारुके
नसमायुक्तःस्वबाहुबलदर्पितः।कच्चिदन्यंसमारूढःसरथंसात्यकिःपुनः।एतदिच्छाम्यहंश्रोतुंकुशलोह्यसिभाषितुं।असह्यंतमहंमन्येतन्म
माचक्ष्वतत्वतः॥ ॥संजय॥ ॥शृणुराजन्यथातस्यरथमन्यंमहामते।दारुकस्यानुजस्तूर्णंकल्पनाविधिकल्पितं।आयसैःकांचनैश्चापिपट्टैर्न
द्धंसकूबरं।तारासहस्रखचितंसिंहध्वजपताकिनं।अश्वैर्वातजवैर्युक्तंहेमभांडपरिच्छदैः।पांडुरैरिंदुसंकाशैःसर्वशब्दातिगैर्दृढैः।चित्रकांचन
सन्नाहैर्वाजिमुख्यैर्विशांपते।घंटामालाकुलंरथंशक्तितोमरविद्युतं।वृतंसांग्रामिकैर्द्रव्यैर्बहुशस्त्रपरिच्छदं।रथंसंपादयामासमेघगंभीरनादि
नं।समारूढस्तुशैनेयस्तवपुत्रसैन्यमुपाद्रवत्।दारुकोपियथाकामंप्रययौकेशवांतिकं।कर्णस्यापिततोराजन्शंखगोक्षीरपांडुरैः।चित्रकार्मुकसन्न
द्धैःसदश्वैर्हेमहायनैः।हेमकक्षध्वजोपेतंक्लृप्तयंत्रपताकिनं।अग्र्यंरथंसुयंतारंबहुशस्त्रपरिच्छदं।उपाजह्नुस्तमास्थायकर्णोप्यभ्यद्रवद्रिपून्।एतत्तेसर्वमाख्या
तंयन्मांत्वंपरिपृच्छसि।भूयश्चापिनिबोधत्वंतवापनयसंक्षयं।एकत्रिंशत्तवसुताभीमसेनेनपातिताः।दुर्मुखंप्रमुखेकृत्वासततंचित्रयोधिनः।शतशोनिहताः

शूराः सात्वतेनार्जुनेन च। भीष्मप्रमुखतः हत्वा भगदत्तं च मारिष। एवमेष क्षयो वृत्तो राजन्दुर्मंत्रितेन वै॥ ॥इति द्रोणपर्वणि कर्णसात्यकियुद्धं॥ ४९ ॥
॥ ॥धृतराष्ट्र॥ ॥तथागतेषु शूरेषु तेषां च मम संजय। किं वै भीमस्तदाकार्षीत्तन्ममाचक्ष्व संजय॥ ॥संजय उवाच॥ ॥विरथो भीमसेनो वै कर्णवाक्
शल्यपीडितः। अमर्षवशमापन्नः फाल्गुनं वाक्यमब्रवीत्। पुनः पुनस्तूवरक मूढ औदरिकेति च। अकृतास्त्रक मा योत्सीर्बाल संग्रामकातर। इति
मामब्रवीत्कर्णः पश्यतस्ते धनंजय। एवं वक्ता च मे वध्यस्तेन चोक्तोस्मि भारत। एतद्ब्रवीन्महाबाहो त्वया सह कृतं मम। यथैतन्मम कौंतेय तथा तव न सं
शयः। तत्पारय नरश्रेष्ठ स्मरैतद्वचनं मम। यथा भवति तत्सत्यं तथा कुरु धनंजय। तच्छ्रुत्वा वचनं तस्य भीमस्यामितविक्रमः। ततो ब्रवीर्जुनो
ब्रवीत्कर्णं किंचिदभ्येत्य संयुगे। कर्ण कर्ण वृथादृष्टे सूतपुत्रात्मसंस्तुते। अधर्मबुद्धे शृणु मे यत्त्वां वक्ष्यामि सांप्रतं। द्विविधं कर्म शूराणां यु
द्धे जयपराजयौ। तौ चाप्यनित्यौ राधेय वासवस्यापि युध्यतः। मुमूर्षुर्युयुधानेन विरथोऽसि विसर्जितः। यदृच्छया भीमसेनं विरथं कृतवान
सि। अधर्मस्त्वेष राधेय यत्त्वं भीममवोचथाः। युद्धधर्मं विजानन्वै युध्यंतमपलायिनं। पूरयंतं यथाशक्ति शूरं कर्म हवे तथा। पश्यतां सर्वसै
न्यानां केशवस्य ममैव च। विरथो भीमसेनेन कृतोऽसि बहुशो रणे। न च त्वां परुषं किंचिदुक्तवान्पांडुनंदनः। यस्मात्तु बहुरूक्षं च श्रावितस्ते वृको
दरः। परोक्षं यच्च सौभद्रो युष्माभिर्निहतो मम। तस्मादस्यावलेपस्य सद्यः फलमवाप्नुहि। त्वया तस्य धनुश्छिन्नमात्मनाशाय दुर्मते। तस्माद्ब
ध्योऽसि मे मूढ सभृत्यबलवाहनः। कुरु त्वं सर्वकृत्यानि महत्ते भयमागतं। हंतास्मि वृषसेनं ते प्रेक्षमाणस्य संयुगे। ये चान्येऽपि समेष्यंति बु
द्धिमोहेन मां नृप। तांश्च सर्वान्हनिष्यामि सत्येनायुधमालभे। त्वां च मूढ कृतप्रज्ञमभिमानिनमाहवे। दृष्ट्वा दुर्योधनो मन्येऽभिशांतं भुवि पा
तितं। अर्जुनेन प्रतिज्ञाते वधे कर्णसुतस्य तु। महान्सुतुमुलः शब्दो बभूव रथिनां तदा। तस्मिन्नाकुले संग्रामे वर्तमाने महाभये। मंदरश्मिः सहस्रां

भुरस्तं गिरिमुपागमत्। ततो राजन्हृषीकेशः संग्रामशिरसि स्थितं। तीर्णप्रतिज्ञं बीभत्सुं परिष्वज्येदमब्रवीत्। दिष्ट्या संपादिता जिष्णो प्रतिज्ञा मह
ती त्वया। दिष्ट्या च निहतः पापो वृद्धक्षत्रः सहात्मजः। धार्तराष्ट्रबलं प्राप्य देवसेनापि भारत। सीदेत समरे जिष्णो नात्र कार्या विचारणा। न तं पश्यामि लो
केषु चिंतयन्पुरुषं क्वचित्। त्वदृते पुरुषव्याघ्र य एतद्योधयेद्बलं। महाप्रभावा बहवस्त्वया तुल्याधिका पि वा। समेताः पृथिवीपाला धार्तराष्ट्रस्य कारणात्। ते त्वां
प्राप्य रणे क्रुद्धं नाभ्यवर्त्तंत दंशिताः। तव वीर्यं बलं चैव रुद्रशक्रांतकोपमं। नेदृशं शक्नुयात्कश्चित्रणे कर्तुं पराक्रमं। यादृशं कृतवानद्य त्वमेकः शत्रु
तापनः। एवमेव हते कर्णे सानुबंधे दुरात्मनि। वर्द्धयिष्यामि भूयस्त्वां विजितारिं हतद्विषां। तमर्जुनः प्रत्युवाच प्रसादात्तव माधव। प्रतिज्ञेयं मयोत्तीर्णा
विबुधैरपि दुस्तरा। अनाश्चर्यं जयस्तेषां येषां नाथोसि माधव। त्वत्प्रसादान्महीं कृत्स्नां संप्राप्स्यति युधिष्ठिरः। तवैव भारो वार्ष्णेय तवैव विजयः प्रभो।
वर्द्धनीयास्तवा विभो वयं प्रेष्याश्च मधुसूदन। एवमुक्तः स्मयन्कृष्णः शनकैर्वाहयन्हयान्। दर्शयामास पार्थाय क्रूरमायोधनं महत्॥ ॥कृष्ण उवाच॥ ॥
प्रार्थयंतो जयं युद्धे प्रथितं च यशो महत्। पृथिव्यां शेरते शूराः पार्थिवास्त्वच्छरैर्हताः। विकीर्णशस्त्राभरणा विपन्नाश्वरथद्विपाः। संछिन्नभि
न्नमर्माणो वैक्लव्यं परमं गताः। ससत्वा गतसत्वाश्च प्रभया परया युताः। सजीवा इव लक्ष्यंते गतसत्वा नराधिपाः। तेषां शरैः स्वर्णपुंखैः शस्त्रै
श्च विविधैः शितैः। वाहनैरायुधैश्चैव संपूर्णां पश्य मेदिनीं। वर्मभिश्चर्मभिर्हारैः शिरोभिश्च सकुंडलैः। उष्णीषैर्मुकुटैः स्रग्भिश्चूडामणि
भिरंबरैः। कंठसूत्रैरंगदैश्च निष्कैरपि च सुप्रभैः। अन्यैश्चाभरणैर्वस्त्रै भाति भारत मेदिनी। चामरैर्व्यजनैश्छत्रैर्ध्वजैश्चाश्वरथद्वि
पैः। विविधैश्च परिस्तोमैरश्वानां च प्रकीर्णकैः। कुथाभिश्च विचित्राभिर्वरूथैश्च महाधनैः। संकीर्णां पश्य वसुधां चित्रपट्टैरिवावृतां।
नागेभ्यः पतितानन्यान्कल्पितेभ्यो द्विपैः सह। सिंहानिव वज्रभग्नेभ्यो गिर्यग्रेभ्य इव च्युतान्। संस्यूतान्वाजिभिः सार्द्धं धरि

द्रो॰प॰
१४८

ण्यांपश्यन्नपरान्। पदातीन्सादिसंघांश्च क्षतजौघपरिप्लुतान्। एवं संदर्शयन् कृष्णो रणभूमिं किरीटिनः। स्वैः समेतश्च मुदितः पांचजन्यमवादयत्॥ ॥
॥ ॥द्रोणपर्वणि॥ ॥संजयउवाच॥ ॥ततो युधिष्ठिरो राजा रथादाप्लुत्य भारत। पर्यष्वजत्तदा कृष्णौ स्नेहादश्रुपरिप्लुतः। प्रमृज्य वदनं शुभ्रं पुंडरी
कसमप्रभं। अब्रवीद्वासुदेवं च पांडवं च धनंजयं। दिष्ट्या पश्यामि संग्रामात्तीर्णपारौ महारथौ। दिष्ट्या चानिहतः पापः सैंधवः पुरुषाधमः। कृष्ण दिष्ट्या
मम प्रीतिर्महती प्रतिपादिता। दिष्ट्या शत्रुगणाश्चैव निमग्नाः शोकसागरे। न तेषां दुष्करं किंचित्त्रिषु लोकेषु विद्यते। सर्वलोकगुरुर्येषां त्वं ना
थो मधुसूदन। तवप्रसादाद्गोविंद वयं जेष्यामहे परान्। यथापूर्वं प्रसादात्ते दानवान्पाकशासनः। पृथिवीविजयो वापि त्रैलोक्यविजयो
पि वा। ध्रुवं तेषां हि वार्ष्णेय येषां तुष्टोसि माधव। न तेषां विद्यते पापं संग्रामे वा पराजयः। त्रिदशेश्वरनाथस्त्वं येषां तुष्टोसि माधव। त्वत्प्र
सादाद्धृषीकेश शक्रः सुरगणेश्वरः। त्रैलोक्यविजयं श्रीमान्प्राप्तवान्रणमूर्द्धनि। तवैव च प्रसादेन त्रिदशास्त्रिदशेश्वर। अमरत्वं गताः
कृष्ण लोकान्प्राप्तास्तथाक्षयान्। त्वत्प्रसादाद्धृषीकेश जगत्स्थावरजंगमं। स्ववर्त्मनि स्थितं वीर जपहोमेषु वर्तते। एकार्णवमिदं पूर्वं जगदा
सीत्तमोमयं। त्वत्प्रसादात्प्रकाशत्वं पुनः प्राप्तं नरोत्तम। स्रष्टारं सर्वभूतानां परमात्मानमच्युतं। ये प्रपन्ना हृषीकेशं ते न मुह्यंति कर्हिचित्। पुराणं पर
मं देवं देवदेवं सनातनं। ये प्रपन्नाः सुरगुरुं न ते मुह्यंति कर्हिचित्। अनादिनिधनं देवं लोककर्तारमव्ययं। त्वद्भक्ता ये हृषीकेश दुर्गाण्यतितरंति
ते। परं पुराणं पुरुषं पुराणानां परं च यत्। प्रपद्यतस्तं परमं परा भूतिर्विधीयते। गायंति चतुरो वेदा यश्च वेदेषु गीयते। तं प्रपद्य महात्मानं भूतिमश्ना
त्यनुत्तमां। परमेशापरेशेशा तिर्यगीशानरेश्वर। सर्वेश्वरेश्वरेशेशान नमस्ते पुरुषोत्तम। त्वमीशेशेश्वरेशान प्रभो वर्द्धस्व भावन। प्रभवोव्ययस
र्वस्य सर्वात्मन्पृथुलोचन। २ धनंजयस्त हायं तं धनंजयहिते स्थितं। धनंजयस्य गोप्तारं प्रपद्य सुखमेधते। इत्युक्तौ तौ महात्मानौ उभौ

राम
१४८

केशवपांडवौ। तावब्रूतां तदा हृष्टौ राजानं पृथिवीपतिं। तवक्रोधाग्निनिर्दग्धः पापो राजा जयद्रथः। उदीर्णं चापि सुमहद्धार्तराष्ट्रबलं महत्। हन्यते नि
हतं चैव विनंक्ष्यति च भारत। तव क्रोधाद्धता श्चेमे कौरवाः शत्रुसूदन। त्वां हि चक्षुर्हणं वीर कोपयित्वा सुयोधनः। समित्रबंधुः समरे प्राणांस्त्य
क्ष्यति दुर्मतिः। तवक्रोधहतः पूर्वं दैवैरपि सुदुर्जयः। शरतल्पगतः शेते भीष्मः कुरुपितामहः। दुर्लभो हि जयस्तेषां संग्रामे रिपुसूदन। या
नां मृत्युर्वशां तेवै येषां क्रुद्धोसि पांडव। राज्यं प्राणाः श्रियः पुत्राः सौख्यानि विविधानि च। अचिरात्तस्य नंक्ष्यंति येषां क्रुद्धोसि मानद। विनष्टा
न्कौरवान्मन्ये सपुत्रपशुबांधवान्। राजन्धर्मपरे नित्यं त्वयि क्रुद्धे युधिष्ठिर। ततो भीमो महाबाहुः सात्यकिश्च महारथः। अभिवाद्य गुरुं ज्ये
ष्ठं मार्गणैः क्षतविक्षतौ। स्थितावास्तां महेष्वासौ पांचाल्यपरिवारितौ। तौ दृष्ट्वा मुदितौ वीरौ प्रांजली चाग्रतः स्थितौ। अभ्यनंदत कौंतेयस्तावुभौ भीमसा
त्यकी। दिष्ट्या पश्यामि वां वीरौ विमुक्तौ सैन्यसागरात्। द्रोणग्राहाद्दुराधर्षाद्धार्दिक्यमकरालयात्। दिष्ट्या च निर्जिताः संख्ये पृथिव्यां सर्वपार्थिवाः।
युवां विजयिनौ चापि दिष्ट्या पश्यामि संयुगे। दिष्ट्या द्रोणो जितः संख्ये हार्दिक्यश्च महाबलः। दिष्ट्या हि कर्णिभिः कर्णो रणे नीतः पराभवं। विमुखश्च कृतः
शल्यो युवाभ्यां पुरुषर्षभौ। दिष्ट्या युवां कुशलिनौ संग्रामात्पुनरागतौ। पश्यामि रथिनां श्रेष्ठावुभौ युद्धविशारदौ। मम वाक्यकरौ वीरौ मम गौरवयं
त्रितौ। सैन्यार्णवं समुत्तीर्णौ दिष्ट्या पश्यामि संयुगे। समरश्लाघिनौ वीरौ समरेष्वपलायिनौ। मम प्राणसमौ चैव दिष्ट्या पश्यामि वामहं। इत्युक्त्वा
पांडवो राजा युयुधानवृकोदरौ। सस्वजे पुरुषव्याघ्रौ हर्षाद्बाष्पं मुमोच ह। ततः प्रमुदितं सर्वं बलमासीद्विशांपते। पांडवानां जयं दृष्ट्वा युद्धाय च मनो द
धे॥ ॥इति द्रोणपर्वणि॥ ८ ॥संजय॥ ॥सैंधवे निहते राजंस्तव पुत्रः सुयोधनः। अश्रुक्लिन्नमुखो दीनो निरुत्साहो द्विषज्जये। अमन्यतार्जुन
समो योधो भुवि न विद्यते। न द्रोणो न च राधेयो नाश्वत्थामा कृपो न च। क्रुद्धस्य प्रमुखे स्थातुं पर्याप्त इति मारिष। निर्जित्य हि रणे पार्थः स सर्वान्भेमहा

रथान्। अवधीत्सैंधवं संख्ये नैनं कश्चिदवारयत्। सर्वथा हतमेवैतत्कौरवाणां महाबलं। न ह्यस्य विद्यते त्राता साक्षाद्देवपुरंदरः। यमुपाश्रित्य संग्रा
मे स्त्रतः शस्त्रसमुद्यमः। स कर्णो निर्जितः संख्ये हतश्चापि जयद्रथः। परुषाणि सभामध्ये प्रोक्तो वाक्यः स पांडवान्। वधो येन प्रतिज्ञातः संयुगे सव्य
साचिनः। यस्य वीर्यं समाश्रित्य शमं याचंतमच्युतं। तृणवत्तमहं मन्ये स कर्णो निर्जितो युधि। एवं क्लांतमना राजन्नुपायाद्द्रोणसंनिधौ। आ
गस्स्तत्सर्वं लोकस्य पुत्रस्ते भरतर्षभ। ततस्तत्सर्वमाचख्यौ कुरूणां वैशसं महत्। परान्विजयिनश्चापि धार्तराष्ट्रान्विनिर्जितान्॥ ॥दुर्योधन
उवाच॥ ॥पश्य मूर्द्धावसिक्तानामाचार्य कदनं कृतं। कृत्वा प्रमुखतः शूरं भीष्मं कुरुपितामहं। तं निहत्य प्रलुब्धोयं शिखंडी युद्धदुर्मदः। पांचा
लैः सहितः सर्वैः सेनाग्रमभिकर्षति। अपरश्चापि दुर्द्धर्षः शिष्यस्ते सव्यसाचिना। अक्षौहिणीः सप्त हत्वा हतो राजा जयद्रथः। अस्मद्विजय
कामानां सुहृदामुपकारिणां। गंतास्मि कथमानृण्यं गतानां यमसादनं। ये मदर्थं परीप्संति वसुधां वसुधाधिपाः। ते हित्वा वसु चैश्वर्यं वसुधा
मेव शेरते। सोहं कापुरुषः कृत्वा मित्राणां क्षयमीदृशं। नाश्वमेधसहस्रेषु गंतुमात्मानमुत्सहे। मम लुब्धस्य पापस्य तथा धर्मापचारिणः। व्यायच्छं
तो जिगीषंतः प्राप्ता वैवस्वतक्षयं। कथं वपापवृत्तस्य पृथिवी सुहृदद्रुहः। विवरं नाशकद्दातुं पृथिवी मम दुर्मतेः। योहं रुधिरसिक्तांगं राजमध्ये
पितामहं। शयानं नाशकं त्रातुं भीष्ममायोधने हतं। तन्मामनार्यपुरुषं मित्रद्रुहमधार्मिकं। किं वक्ष्यति दुर्द्धर्षः समेत्यामरलोकजित्। जलसंधं
महेष्वासं पश्य सात्यकिना हतं। मदर्थमुद्यतं शूरं प्राणांस्त्यक्त्वा महारथं। कांबोजं निहतं दृष्ट्वा तथा x हि x लंबुसमेव च। अन्यान्बहूंश्च सुहृदो
जीवितार्थोद्य को मम। व्यायच्छंतो हताः शूरा मदर्थेपि पराङ्मुखाः। यतमानाः परं शक्त्या विजेतुमहितान्मम। तेषां गत्वाहमानृण्यमद्य शक्त्या परंतप।
तर्पयिष्यामि तानेव जलेन यमुनामनु। सत्यं ते प्रतिजानामि सर्वशस्त्रभृतां वर। इष्टापूर्तेन च शपे वीर्येण च सुतैरपि। निहत्य तान् रणे सर्वान् पांचाला

न्पांडवैः सह। शयानिलश्चास्मि तेषां वारणे गंता सलोकतां॥ नहीदानीं सहाया मे परीप्सन्त्युपस्कृताः॥ श्रेयो हि पांडून्मन्यंते न तथास्मान्महाभु
ज। स्वयं हि मृत्युर्विहितः सत्यसंधेन संयुगे। भवाननुपेक्षां कुरुते सुशिष्यत्वाद्धनंजये। अतो विनिहताः सर्वे येऽस्मज्जयचिकीर्षवः। कर्ण
मेवानुपश्यामि संप्रत्यस्मज्जयैषिणं। यो हि मित्रमवज्ञाय याथातथ्येन मंदधीः। मित्रार्थे योजयत्येव तस्य सोऽर्थोऽवसीदति। तादृगूपमि
दं कार्यं कृतं मम सुहृद्ब्रुवैः। मोहाल्लुब्धस्य पापस्य जिह्माचारैस्ततस्ततः। हतो जयद्रथश्चैव सोमदत्तिश्च वीर्यवान्। अभीषाहाः शूरसे
नाः शिबयोऽथ वशातयः। सोऽहमद्य गमिष्यामि यत्र ते पुरुषर्षभाः। हता मदर्थं संग्रामे युध्यमानाः किरीटिना। नहि मे जीवितेनार्थस्ता
न्ते पुरुषर्षभान्। आचार्यः पांडुपुत्राणामनुजानातु मां भवान्॥ ॥इति द्रोणपर्वणि दुर्योधनसंतापः॥१४९॥ धृतराष्ट्र॥ ॥सिंधुराजे
हते तात समरे सव्यसाचिना। तथैव भूरिश्रवसि किमासीत्सूतनंदन। दुर्योधनेन च द्रोणस्तथोक्तः कुरुसंसदि। किमुक्तवान्परं तस्मात्त
न्ममाचक्ष्व संजय॥ ॥संजय॥ ॥निष्टानको महानासीत्सैन्यानां तव भारत। सैंधवं निहतं दृष्ट्वा भूरिश्रवसमेव च। मंत्रितं तव पुत्र
स्य ते सर्वमवमेनिरे। येन मंत्रेण निहताः शतशः क्षत्रियारणे। द्रोणस्तु तद्वचः श्रुत्वा पुत्रस्य तव दुर्मनाः। मुहूर्तमिव तत्ध्यात्वा भृशमार्त्तो
ऽभ्यभाषत॥ ॥द्रोणउ॥ ॥दुर्योधन किमेवं मां वाक्शरैरभिकृंतसि। अजय्यं समरे नित्यं ब्रुवाणं सव्यसाचिनं। एतेनैवार्जुनो ज्ञातु
मलं कौरव संयुगे। यच्छिखंड्यवधीद्भीष्मं पाल्यमानः किरीटिना। अवध्यं निहतं दृष्ट्वा संयुगे देवमानुषैः। तदैवाज्ञासिषं वीर नेयमस्ती
ति भारती। यः ख्यातः त्रिषु लोकेषु सर्वशस्त्रभृतामपि। तस्मिन्विनिहते शूरे किं शेषं पर्युपास्महे। यान्स्म तान्ग्लहते तात शकुनिः कुरुसं
सदि। अक्षान्न ते क्षा निशिताः शरास्ते शत्रुतापन। त एवं घ्नंति नस्तात विशिखा जयनोदिताः। यांस्तदा ख्याप्यमानांस्त्वं विदुरेण न बुध्यसे।

द्रो०प०
१५०

नास्त्राविलपतश्चापिविदुरस्यमहात्मनः।वीरस्यवाचोनाश्रौषीर्वधार्थंसर्वधन्विनां।नदिदंवर्त्ततेघोरमागतंवैशसंमहत्।तस्यावमानाद्वाक्यस्यदु
र्योधनद्भनेनतव।यच्चनःप्रेक्षमाणानांकृष्णामानाययःसभां।अनर्हंतींकुलेजातांसत्यधर्मानुचारिणीं।तस्यधर्मस्यगांधारेफलंप्राप्तमिदंत्वया।
नाचपापंपरेलोकेत्वमर्हैथास्ततोधिकं।यच्चतान्पांडवान्द्यूतेविषमेणविजित्यहि।प्राव्राजयस्तदारण्येरौरवाजिनवाससः।पुत्राणामिवचै
तेषांधर्ममाचरतांसदा।दुह्येत्कोनुनरोलोकेमदन्योब्राह्मणब्रुवः।पांडवानामयंकोपस्त्वयाशकुनिनासह।आहितोधृतराष्ट्रस्य
संमतेकुरुसंसदि।दुःशासनेनसंयुक्तःकर्णेनपरिवारितः।क्षत्तुर्वाक्यमनादृत्यत्वयाभ्यस्तःपुनःपुनः।यत्त्वंसर्वान्पराभूयपर्यवा
रयदर्जुनं।सिंधुराजंसमाश्रित्यसवोमध्येकथंहतः।कथंत्वयिचकर्णेचकृपेशल्येचजीवति।अश्वत्थाम्निचकौरव्यनिधनंसैंधवो
गमत्।यद्युद्धस्तसर्वराजानस्तेजस्तिग्ममुपासते।सिंधुराजंपरित्रातुंसवोमध्येकथंहतः।मय्येवहिविशेषेणतथादुर्योधनत्वयि।आशं
सतपरित्राणमर्जुनात्समहीपतिः।ततस्तस्मिन्परित्राणमलब्धवतिफाल्गुनात्।नकिंचिदनुपश्यामिजीवितत्राणमात्मनः।मज्जंतमिवचात्मा
नंधृष्टद्युम्नस्यकिल्बिषैः।पश्यामिहत्वापांचालान्सहतेनकिरीटिना।तन्मांकिमभिसंतप्तंवाक्शरैरुपहंतसि।अशक्तःसिंधुराजस्य
भूत्वात्राणायभारत।सौवर्णंसत्यसंधस्यध्वजमक्लिष्टकर्मणः।अपश्यन्युधिभीष्मस्यकथमाशंससेजयं।मध्येमहारथानांचयत्रा
हन्यतसैंधवः।हतोभूरिश्रवाश्चैवकिंशेषंतत्रमन्यसे।कृपएवतुदुर्द्धर्षोयदिजीवतिपार्थिव।योनागात्सिंधुराजस्यवर्त्मतंपूजयाम्यहं।यथाप
श्यंहतंभीष्मंपश्यतस्त्वनुजस्यते।दुःशासनस्यकौरव्यकुर्वाणंकर्मदुष्करं।अवध्यकल्पंसंग्रामेदेवैरपिसवासवैः।नतेवसुंधरास्तीतितदाहं
चिंतयन्नृप।इमानिपांडवानांचसृंजयानांचभारत।अनीकान्याद्रवंतेमांसहितान्यद्यमारिष।नाहत्वासर्वपांचालान्कवचस्यविमोक्षणं।

राम
१५०

कृतास्मिसमरेकर्मधार्त्तराष्ट्रहितंतव।राजन्ब्रूयाःसूतंमेत्वमश्वत्थामानमाहवे।नसोमकाःप्रमोक्तव्याजीवितंपरिरक्षता।यत्वंपित्रानुशिष्टोसित
त्वद्वचःपरिपालय।आनृशंस्येदमेसत्येचार्जवेवस्थितोभव।धर्मार्थकामकुशलोधर्मार्थावप्यपीडयन्।धर्मप्रधानकार्याणिकुर्याइतिपुनः
पुनः।चक्षुर्मनोभ्यांसंत्यायविप्राःसेव्यास्त्वयाशक्तितः।नतेषांविप्रियंकार्यंतेहिवह्निशिखोपमाः।एषत्वहमनीकानिप्रविशाम्यरिसूदन।रण
यमहतेराजंस्त्वयावाक्शल्यपीडितः।त्वंदुर्योधनबलंयदिशक्तोसिवारय।रात्रावपिहियोत्स्यंतिसंहिताःकुरुसंजयाः।एवमुक्त्वाततःप्र
याद्द्रोणःप्राग्वत्संजयान्।मुष्णन्क्षत्रियतेजांसिनक्षत्राणीवचांशुमान्॥ ॥इतिमाहाभारतेद्रोणपर्वणिद्रोणवाक्यं॥५०॥संजय॥ ॥
ततोदुर्योधनोराजाद्रोणेनैवंप्रणोदितः।अमर्षवशमापन्नोयुद्धायैवमनोदधे।अब्रवीच्चतदाकर्णंपुत्रोदुर्योधनस्तव।पश्यकृष्णसहायेनपांडवेनकि
रीटिना।आचार्यविहितंव्यूहंदेवैर्भिन्नंसुदुर्भिदं।तवव्यायच्छमानस्यद्रोणस्यचमहात्मनः।मिषतांसर्वयोधानांसैंधवोविनिपातितः।पश्य
राधेयराजानःपृथिव्यांप्रवरायुधि।पार्थेनैकेननिहताःसिंहेनेवेतरेमृगाः।ममव्यायच्छमानस्यसमरेशत्रुसूदन।अल्पावशिष्टंसैन्यंमेकृतंशक्रा
त्मजेनहि।कथंव्यायच्छमानस्यद्रोणस्ययुधिफाल्गुनः।भिंद्यात्सुदुर्भिदंव्यूहंयतमानोपिसंयुगे।प्रियोहिफाल्गुनोनित्यमाचार्यस्यमहात्मनः।
ततोस्यदत्तवान्द्वारंअयुद्धेनारिमर्दनः।अभयंसैंधवस्याजौदत्वाद्रोणःपरंतप।प्रादात्किरीटिनेद्वारंपश्यन्निर्गुणतांमम।यद्यदास्यद्नुज्ञां
वैपूर्वमेवगृहंप्रति।सिंधुराजस्यसमरेनाभविष्यज्जनक्षयः।जयद्रथोजीवितार्थीरगच्छमानोगृहान्प्रति।मयानार्येणसंरुद्धोद्रोणात्प्राप्याभयं
रणे।अद्यमेभ्रातरःक्षीणाश्चित्रसेनादयोयुधि।भीमसेनंसमासाद्यपश्यतोमेदुरात्मनः॥ ॥कर्णउवाच॥ ॥आचार्यंत्वंमागर्हस्वशक्त्यायुध्य
त्यसौद्विजः।अजय्यान्पांडवान्मन्येद्रोणेनास्त्रविदारणे।तथाह्येनमतिक्रम्यप्रविष्टःश्वेतवाहनः।दैवदृष्टोन्यथाभावोनमन्येविद्यतेक्वचित्।त

तो नो युध्यमानानां परं शक्त्या सुयोधन। सैंधवो निहतो राजन्दैवमत्र परं स्मृतं। परं यत्नं कुर्वतां च त्वया सार्द्धं रणाजिरे। हत्वास्माकं पौरुषं हि दैवं पश्चात्कृ
तो ति नः। सततं चेष्टमानानां निकृत्या विक्रमेण च। दैवोपसृष्टो नृपते यत्कर्म कुरुते क्वचित्। हतं हतं हि तत्तस्य दैवेन विनिहन्यते। तत्कर्तव्यं मनुष्ये
ण व्यवसायवता सता। तत्कार्यमविशंकेन सिद्धिर्दैवप्रतिष्ठिता। निकृत्या निकृताः पार्था विषयोगैश्च भारत। दग्धा जतुगृहे चापि द्यूतेन च
पराजिताः। राजनीतिं व्यपाश्रित्य प्रहिताश्चैव काननं। यत्नेन हि कृतं यच्च दैवेन विनिपातितं। युध्यस्व जयमास्थाय दैवं कृत्वा निवर्त्तनं। यततेस्त्वत्वे
षां च दैवं मार्गेण यास्यति। न तेषां मतिपूर्वं हि सुकृतं दृश्यते क्वचित्। दुष्कृतं तव वा वीर बुध्या हीनं कुरूद्वह। दैवं प्रमाणं सर्वत्र सुकृतस्येतरस्य वा।
अनन्यकर्म दैवं हि जागर्त्ति स्वपतामपि। बहूनि तव सैन्यानि योधाश्च बहवस्तव। न तथा पांडुपुत्राणां एवं युद्धमवर्त्तत। तैरल्पैर्बहवो यूयं क्षयं नी
ताः प्रहारिणः। शंके दैवस्य तत्कर्म पौरुषं येन नाशितं। एवं संभाषमाणानां बहुतत्र जनाधिप। पांडवानामनीकानि समदृश्यंत संयुगे। ततः प्रव
वृते युद्धं व्यतिषक्तरथद्विपं। तावकानां परैः सार्द्धं राजन्दुर्मंत्रिते तव॥ ॥इति श्रीमहाभारते द्रोणपर्वणि रात्रियुद्धे॥५९॥ संजय उवाच॥ ॥
तदुदीर्णगजाश्वाद्यं बलं तव जनाधिप। पांडुसेनामभिद्रुत्य योधयामास सर्वतः। पांचालान्कुरवश्चैव योधयंतः परस्परं। यमराष्ट्राय महते परलोकाय
दीक्षिताः। शूराः शूरैः समागम्य शरतोमरशक्तिभिः। विव्यधुः समरे तूर्णं निन्युश्चैव यमक्षयं। रथानां रथिभिः सार्द्धं रुधिरस्रावि दारुणं। प्रावर्त्तत
महद्युद्धं निघ्नतामितरेतरं। वारणाश्च महाराज समासाद्य परस्परं। विषाणैर्दारयामासुः संक्रुद्धाश्च मदोत्कटाः। हयारोहान्हयारोहाः शरश
क्तिपरश्वधैः। विव्यधुस्तुमुले युद्धे प्रार्थयंतो महद्यशः। पत्तयश्च महाबाहो शतशः शस्त्रपाणयः। अन्योन्यमजयद्राजन्नित्यं यत्ताः पराक्रमे॥
गोत्राणां नामधेयानां कुलानां चैव मारिष। श्रवणादेव जानीमः पांचालान्कुरुभिः सह। तेन्योन्यं समरे योधाः शरशक्तिपरश्वधैः। प्रेषयन्पर

लोकायविचरंतोत्वजीतवृन्।शारद्वताद्रोणोराजंस्तेषांमुख्याःसहस्रशः।नाभ्यराजंतयथानत्वंभास्करेस्तमुपासति।तथाऽयुध्यमानेषुपां
डवेयेषुनिर्भयः।दुर्योधनोमहाराजव्यवगाहततद्बलं।सैंधवस्यवधेनैवभृशंदुःखसमन्वितः।मर्तव्यमितिनिश्चित्यप्राविशत्तद्विषद्बलं।नादय
न्रथघोषेणकंपयन्निवमेदिनीं।अभ्यवर्त्ततपुत्रस्तेपांडवानामनीकिनीं।ससंन्निपातस्तुमुलस्तवतेषांचभारत।अभवत्सर्वसैन्यानामभा
वकरणोमहान्।मध्यंदिनगतंसूर्यंप्रतपंतंगभस्तिभिः।तथातवसुतंमन्येप्रतपंतंशरोर्मिभिः।नशेकुर्भारतंयुद्धेपांडवाःसमवेक्षितुं।पलायन
कृतोत्साहानिरुत्साहाद्विषज्जये।पर्यवर्त्ततपांचालावध्यमानामहात्मना।रुक्मपुंखैःप्रसन्नाग्रैस्तवपुत्रेणधन्विना।अर्द्यमानाःशरैस्तू
र्णंव्यपतत्पांडुसैनिकाः।नताहृशंरणेकर्मकृतवंतस्तुतावकाः।यादृशंकृतवान्राजंस्तवपुत्रोविशांपते।पुत्रेणतवसासेनापांडवीमथितार
णे।नलिनीद्विरदेनेवसमंतात्फुल्लपंकजा।क्षीणतोयानिलार्काभ्यांहतत्विडिवपद्मिनी।बभूवपांडवीसेनातवपुत्रस्यतेजसा।पांडुसेनांहतांदृष्ट्वा
तवपुत्रेणभारत।भीमसेनपुरोगास्तुपांचालाःसमुपाद्रवन्।सभीमसेनंदशभिर्माद्रीपुत्रौत्रिभिःशरैः।विराटद्रुपदौषड्भिःशतेनचशिखंडि
नं।धृष्टद्युम्नंचसप्तत्याधर्मपुत्रंचसप्तभिः।केकयांश्चैवचेदींश्चबहुभिर्निशितैःशरैः।सात्वतंपंचभिर्विद्ध्वाद्रौपदेयांस्त्रिभिस्त्रिभिः।घटोत्कचं
चसमरेविद्ध्वासिंहइवोन्नदत्।शतशश्चापरान्योधान्सद्विपाश्वरथान्रणे।शरैरवचकर्तोजौक्रुद्धोंतकइवप्रजाः।तस्यतान्निघ्नतःशत्रून्रुक्म
पुंखंमहास्वनं।भल्लाभ्यांपांडवोज्येष्ठस्त्रिधाचिच्छेदमारिष।विव्याधचैनंदशभिःसम्यगस्तैःशिलाशितैः।मर्माणिभित्वासमरेसम्भग्नाःक्षि
तिमाविशन्।ततःप्रमुदितायोधाःपरिवव्रुर्युधिष्ठिरं।वृत्रेहतेयथादेवाःपरिवव्रुःपुरंदरं।ततोयुधिष्ठिरोराजंस्तवपुत्रस्यमारिष।शरंपरमदुर्वा
रंप्रेषयामाससंयुगे।सतेनभृशसंविद्धोनिषसादरथोत्तमे।ततःपांचालसैन्यानांभृशमासीद्रवोमहान्।हतोराजाहिराजेंद्रमुदितानांस

मंनतः।बाणशब्दरवश्चोग्रःशुश्रुवेतत्रमारिष।अथद्रोणोद्रुतंतत्रप्रत्यदृश्यतसंयुगे।अथदुर्योधनश्चापिदृढमादायकार्मुकं।तिष्ठतिष्ठेतिरा
जानं॰ब्रुवन्पांडवमभ्ययात्।प्रत्यद्ययुस्तंत्वरिताःपांचालाराजगृद्धिनः।तान्द्रौणिःप्रतिजग्राहपरीप्सन्वैकुरूद्वहं।चंडवातोद्धतान्मेघान्नि
घ्नन्वृष्टिमुचोयथा।ततोराजन्महानासीत्संग्रामोभूरिवर्द्धनः।तावकानांपरेषांचसमेतानांयुयुत्सया॥ ॥इतिमहाभारतेद्रोणपर्वणि॥१॥
॥ ॥धृतराष्ट्र॥ ॥यत्तदाप्राविशत्पांडूनाचार्यःकुपितोबली॥उक्त्वादुर्योधनंसम्यक्‌ममशास्त्रातिगंसुतं।प्रविश्यविचरंतंचरणेशूरमव
स्थितं।कथंद्रोणंमहेष्वासंपांडवाःपर्यवारयन्।कोरक्षन्दक्षिणंचक्रमाचार्यस्यमहात्मनः।केचोत्तरमरक्षंतनिघ्नंतःशात्रवान्रणे।नृत्यन्सरथमा
र्गेषुसर्वशस्त्रभृतांवरः।धूमकेतुरिवक्रुद्धःकथंमृत्युमुपेयिवान्॥ ॥संजय॥ ॥सायाह्नेसैंधवंहत्वाराजपुत्राःसमेत्यह।सात्यकिश्चमहे
ष्वासोद्रोणमेवाभ्यधावत।तेषांयुधिष्ठिरस्तूर्णंभीमसेनश्चपांडवः।पृषत्कमुख्यैःसंसक्तौद्रोणमेवाभ्यधावतां।तथैवनकुलोधीमान्सहदेवश्च
दुर्जयः।धृष्टद्युम्नःसहानीकोविराटःसहकैकयैः।मत्स्याःशाल्वाःससेनाश्चद्रोणमेवययुर्युधि।द्रुपदश्चतथाराजापांचालैरभिरक्षितः।
धृष्टद्युम्नपिताराजन्द्रोणमेवाभ्यवर्तत।द्रौपदेयामहेष्वासाराक्षसश्चघटोत्कचः।ससेनाश्चाभ्यवर्तंतद्रोणमेवमहाद्युतिं।प्रभद्रकाश्च
पांचालाःषट्साहस्राःप्रहारिणः।द्रोणमेवाभ्यवर्तंतपुरस्कृत्यशिखंडिनं।तथेतरेनरव्याघ्राःपांडवानांमहारथाः।सहिताःसंन्यव
र्तंतपुरस्कृत्यशिखंडिनं।तेषुशूरेषुयुद्धायगतेषुपुरुषर्षभ।बभूवरजनीघोराभीरूणांभयवर्द्धिनी।योधानामशिवारौद्राराजन्नं
तकगामिनी।कुंजराणांमनुष्याणांप्राणांतकरणीतदा।तस्यांरजन्यांघोरायांनदंत्यःसर्वतःशिवाः।न्यवेदयन्भयंघोरंसज्वालकव
लैर्मुखैः।उलूकाx श्चx श्चाप्यदृश्यंतशंसंतोविपुलंभयं।विशेषतःकौरवाणांध्वजिन्यामतिदारुणं।ततःसैन्येषुराजेंद्रशब्दः

राम
१५२

समंतवन्महान्नादोभेरीशब्देनमहतामृदंगानांस्वनेनच। गजानांगर्जितैश्चापितुरगाणांचहेषितैः। खड्गशब्दनिपातैश्चतुमुलःसर्वतोऽभवत्। ततःस
मभवद्युद्धंसंध्यायामतिदारुणं। द्रोणस्यचमहाराजसृंजयानांचसर्वशः। तमसाचावृतेलोकेनप्राज्ञायतकिंचन। सैन्येनरजसाचैवसमंतादुत्थितेन
हि। नरश्चाश्वस्यनागस्यसमसज्जतशोणितं। मृदंगानांचनिर्ह्रादैःपुनर्झल्लरिनिस्वनैस्तथा। फूत्कारहेषितारावैःसर्वमेवाकुलंबभौ। नापश्या
मरजोभौमंकश्मलेनाभिसंवृताः। रात्रौवंशावनस्येवदह्यमानस्यपर्वते। कष्टश्चटचटाशब्दःशस्त्राणांपततामभूत्। नैवस्वेनपरेराजन्प्र
ज्ञायंततमोवृते। अभवत्सर्वंबभूवरजनीमुखे। भौमंरजोऽथराजेंद्रशोणितेनप्रशामितं। शातकौंभैश्चकवचैर्भूषणैश्चतमोऽभ्यगात्। ततःसा
भारतीसेनामणिविद्रुमभूषिता। द्यौरिवासीत्सनक्षत्रारजन्यांभरतर्षभ। गोमायुवृंदसंयुक्ताशक्तिध्वजसमाकुला। दारुणाभिरुताघोरा
क्ष्वेडितोत्क्रुष्टगर्जिता। ततोऽभवन्महाशब्दस्तुमुलोलोमहर्षणः। समावृण्वन्दिशःसर्वामहेंद्राशनिनिस्वनः। सानिशीथेमहाराजसेना
दृश्यतभारती। अंगदैःकुंडलैश्चैवनिष्कैःशस्त्रैश्चभासिता। तत्रनागारथाश्चैवजांबूनदविचित्रिताः। निशायांसंप्रदृश्यंतेमेघाइवसविद्यु
तः। यष्टिशक्तिगदाबाणमुशलप्रासपट्टिशाः। संपतंतोव्यदृश्यंतभ्राजमानाइवाग्नयः। दुर्योधनपुरोवातांरथनागबलाहकां। वादित्रघोषस्तनि
तांचापविद्युद्ध्वजावृतां। द्रोणपांडवपर्जन्यांखड्गशक्तिगदाशनीं। शरधारास्त्रपवनांभृशमुष्णीषसंकुलां। तांप्राविशन्नतिभयांसेनांयुद्धवि
कांक्षिणः। तस्मिन्रात्रिमुखेघोरेमहाशब्दनिनादिते। भीरूणांत्रासजननीशूराणांहर्षवर्द्धिनी। रात्रियुद्धेतदाघोरेवर्तमानेसुदारुणे। द्रोणमभ्य
द्रवन्सर्वेसहिताःपांडुसृंजयाः। येयेप्रमुखतोराजन्नन्ववर्तंतमहात्मनः। तान्सर्वान्विमुखांश्चक्रेकांश्चिन्निन्येयमक्षयं। तानिनागसहस्राणि
रथानामयुतानिच। तथापदातिसंघानांप्रयुतान्यर्बुदानिच। द्रोणेनैकेननाराचैर्भिन्नानिवनिशामुखे॥ ॥द्रोणपर्वणिरात्रियुद्धे॥ ५७ ॥

द्रो०प०
१५३

॥ ॥धृतराष्ट्र॥ ॥तस्मिन्प्रविष्टेदुर्द्धर्षेसृंजयानमितौजसि।अमृष्यमाणेसंरब्धेकावोभूद्वैमतिस्तदा।दुर्योधनंतथापुत्रमुक्त्वाशास्त्रातिगंम
म।यत्त्वाविशदमेयात्मा।किंपार्थःप्रत्यपद्यत।निहतेसैंधवेवीरेभूरिश्रवसिचाहवे।यदभ्यगान्महातेजाःपांचालानपराजितः।किममन्य
तदुर्द्धर्षःप्रविष्टेशत्रुतापने।दुर्योधनश्चकिंकृत्यंप्राप्तकालममन्यत।केचतंवरदंवीरमन्वयुर्द्विजसत्तमं।केचास्यपृष्ठतोगच्छन्वीरावीरस्य
युध्यतः।केपुरस्तादयुध्यंतनिघ्नंतःशात्रवान्रणे।मन्येहंपांडवान्सर्वान्भारद्वाजशराहतान्।शिशिरेकंपमानावैकृशागाइवगावितो।
प्रविश्यसमहेष्वासःपांचालानरिमर्दनः।कथंनुपुरुषव्याघ्रःपंचत्वमुपजग्मिवान्।सर्वेषुयोधेषुससंगतेषुरात्रौसमेतेषुमहारथेषुसं
लोड्यमानेषुपृथग्विधेषुकेवस्तदानींमतिमंतआसन्।हतांश्चैवविषक्तांश्चपराभूतांश्चसंसदि।रथिनोविरथांश्चैवकृतान्युद्धेषुमामका
न्।तेषांसंलोड्यमानानांपांडवैर्हततेजसां।अंधेतमसिकिंज्योतिरभवत्केनमस्तथा।प्रहृष्टांश्चाप्युदग्रांश्चपांडवानब्रवीषिमे।अप्रहृष्टा
न्विमनसोविद्रुतांश्चैवमामकान्।कथमेतत्ततस्सूतपार्थानामपलायिनां।प्रकाशमभवद्रात्रौकथंकुरुषुसंजय॥ ॥संजयउवाच॥ ॥
रात्रियुद्धेतदाराजन्वर्तमानेसुदारुणे।द्रोणमभ्यद्रवन्रात्रौपांडवाःसहसोमकाः।ततोद्रोणःकेकयांश्चधृष्टद्युम्नस्यचात्मजान्।अप्रेषयन्मृ
त्युलोकंसर्वान्बाणैरुधिराशनैः।तस्यप्रमुखतोराजन्योधयंतोमहाव्रतान्।तान्सर्वान्प्रेषयामासपरलोकायभारत।प्रमथंतंतदावीरंभारद्वा
जंमहारथं।अभ्यद्रवतदुर्द्धर्षःशिबीराजाविशांपते।तमापतंतंसंप्रेक्ष्यपांडवानांमहारथं।विव्याधदशभिर्बाणैःसर्वपारसवैःशितैः।तंशि
बिःप्रतिविव्याधत्रिंशतानिशितैःशरैः।सारथिंचास्यतल्लेनस्मयमानोन्यपातयत्।तस्यद्रोणोहयान्हत्वासारथिंचमहारथः।अथास्य
सशिरस्त्राणंशिरःकायादपाहरत्।कलिंगानांतुसैन्येनकलिंगस्यसुतोरणे।पूर्वंपितृवधात्क्रुद्धोभीमसेनमुपाद्रवत्।सभीमंपंच

राम
१५३

निर्विद्ध्या पुनर्विव्याध सप्तभिः। विशोकं त्रिभिराजघ्ने ध्वजमेकेन पत्रिणा। कलिंगानां तु तं शूरं क्रुद्धं क्रुद्धो वृकोदरः। रथादथ रथमभिद्रुत्य मुष्टिनाभिज
घान ह। तस्य मुष्टिहतस्यैव पांडवेन बलीयसा। सर्वाण्यस्थीनि सहसा प्रापतन्वै पृथक् पृथक्। तं कर्णो भ्रातरश्चास्य नामृष्यंत महारथाः। ते भीमसे
नं नाराचैर्जघ्नुराशीविषोपमैः। ततः शत्रुरथं त्यक्त्वा भीमः स्वरथमागमत्। पुनश्चाप्लुत्य वेगेन अनुजं तस्य पातयत्। स तथा पांडुपुत्रेण
बलिना निहतोऽपतत्। तं निहत्य महाराज भीमसेनो महाबलः। जयरातरथं प्राप्य मुहुः सिंहवन्नदत्। जयरातमथाक्षिप्य नदन्स
व्येन पाणिना। तलेनैव नाशयामास कर्णस्यैवाग्रतः स्थितं। कर्णस्तु पांडवे शक्तिं कांचनीं समवासृजत्। ततस्तामेव जग्राह प्रहसन्पांडुनं
दनः। कर्णायैव च दुर्धर्षश्चिक्षेपाजौ वृकोदरः। तामंतरिक्षे चिच्छेद शकुनिस्तैलपायिना। ततस्तव सुता राजन्भीमस्य रथमाव्रजन्। महता
रथघोषेण छादयंतो वृकोदरं। दुर्मदस्य ततो भीमः प्रहसन्निव संयुगे। सारथिं च हयांश्चैव शरैर्निन्ये यमक्षयं। दुर्मदश्च ततो यानं दु
ष्कर्णस्याथ पुप्लुवे। तावेकरथमारूढौ भ्रातरौ परतापनौ। संग्राममूर्ध्नि भीमं तावभ्यधावतां। यथांबुपतिमित्रौ हि तारकं दैत्यसत्तमं।
ततश्च दुर्मदश्चैव दुष्कर्णश्च तवात्मजौ। रथमेकं समारुह्य भीमं बाणैरविध्यतां। ततः कर्णस्य मिषतो द्रोणदुर्योधनस्य च। कृपस्य सोमद
त्तस्य बाह्लीकस्य च भीमतः। दुर्मदस्य च वीरस्य दुःकर्णस्य च तं रथं। आरुरोह महाबाहुर्मिषतां सर्वधन्विनां। पादप्रहारेण धरां प्रावेशयदरिं
दमः। ततः स तावतिबलौ वीरौ दुष्कर्णदुर्मदौ। मुष्टिना हत्य संक्रुद्धो ममर्द चरणेन ह। ततो हाहाकृतं सैन्यं दृष्ट्वा भीमपराक्रमं। रुद्रोऽयं भी
मरूपेण धार्तराष्ट्रान्प्रगृह्णाति। एवमुक्त्वा पलायंत सर्वे भारत पार्थिवाः। विसंज्ञावाहयन्वाहान्न च सख्यानमावहन्। ततो बले भृश
लुलिते निशामुखे सुपूजितौ नृपवृषभौ वृकोदरं। महाबलः कमलविबुद्धलोचनो युधिष्ठिरं नृपमभिपूजयत्स्थितौ। ततो यमौ द्रुपदविराटकैकया युधिष्ठि
रश्चापि परां मुदं ययौ। वृकोदरं भृशमभिपूजयंश्च ते यथांधके प्रतिनिहते हराहरं। ततस्तव सुता स्तववरुणात्मजोपमा रुषान्विताः सहगुरुणा महात्मना॥

वृकोदरं सरथपदातिकुंजरैर्युयुत्सवो भृशमपि तं न्यवारयन्॥ ततोऽभवत्तिमिरघनैरिवावृते महाभये भयदमतीवदारुणे॥ निशामुखे वृकवटगृ-
ध्रमोदने महात्मनां नृपवरयुद्धमद्भुतं॥ ॥इति महाभारते द्रोणपर्वणि रात्रियुद्धे॥५४॥ संजय॥ ॥प्रायोपविष्टे तु हते पुत्रे सात्यकिना
नृप। सोमदत्तो भृशं क्रुद्धः सात्यकिं वाक्यमब्रवीत्॥ क्षत्रधर्मः पुरा दृष्टो यस्तु देवैर्महात्मभिः। तं त्वं सात्वत संत्यज्य दस्युधर्मे कथं रतः। पराङ्मु-
खाय दीनाय न्यस्तशस्त्राय याचते। क्षत्रधर्मरतः प्राज्ञः कथं नु प्रहरेद्रणे। द्वावेव किल वृष्णीनां तत्र ख्यातौ महारथौ। प्रद्युम्नश्च महाबाहु-
स्त्वं चैव युधि संमतः। कथं प्रायोपविष्टाय पार्थेन छिन्नबाहवे। नृशंसं पतनीयं च तादृशं हतवानसि। शपे सात्वत पुत्राभ्यामिष्टेन सुकृते-
न च। अनतीतामिमां रात्रिं यदि त्वां वीरमानिनं। अरक्ष्यमाणं पार्थेन जिष्णुना ससुतानुजं। न हन्यां निरये घोरे पतेयं वृष्णिपांसन। एवमु-
क्त्वा भृशं क्रुद्धः सोमदत्तो महाबलः। दध्मौ शंखं स्वनवता रेण सिंहनादं ननाद च। ततः कमलपत्राक्षः सिंहदंष्ट्रो महाबलः। सात्वतो भृशसंक्रु-
द्धः सोमदत्तमथाब्रवीत्॥ हतो भूरिश्रवा वीरस्तव पुत्रो महाबलः। शलश्चैव तथा राजन्भ्रातृव्यसनकर्षितः। त्वां चाप्यद्य हनिष्यामि सपुत्रपशु-
बांधवं। तिष्ठेदानीं रणे यत्तः कौरवोसि विशेषतः। यस्मिन्दानं दमः शौचमहिंसा ह्रीर्धृतिः क्षमा। सर्वाण्यनपगानि स्म नित्यं राज्ञि युधिष्ठिरे।
मृदंगकेतोस्तस्य त्वं निहतस्तेजसा पुरा। सकर्णसौबलः संख्ये विनाशं समुपैष्यसि। शपेहं कृष्णचरणाविष्टापूर्तेन चैव हि। यदि त्वां ससु-
तं तात न हन्यां युधि रोषितः। अपयास्यसि चेत्त्यक्त्वा ततो मुक्तो भविष्यसि। एवमाभाष्य चान्योन्यं क्रोधसंरक्तलोचनौ। प्रवृत्तौ शरसंपा-
तं कर्तुं पुरुषसत्तमौ। ततो गजसहस्रेण रथानामयुतेन च। दुर्योधनः सोमदत्तं परिवार्य व्यवस्थितः। शकुनिश्च सुसंक्रुद्धः सर्वशस्त्रभृतां
वरः। पुत्रपौत्रैः परिवृतो भ्रातृभिश्चेंद्रविक्रमैः। श्यालस्तव महाबाहुर्वज्रसंहननो युवा। साग्रं शतसहस्रं तु हयानां तस्य धीमतः। सोमदत्तम-
हेष्वासं समंतात्पर्यरक्षत। रक्ष्यमाणश्च बलिभिश्छादयामास सात्यकिं। तं छाद्यमानं विशिखैर्दृष्ट्वा संनतपर्वभिः। धृष्टद्युम्नोभ्ययात्क्रुद्धः

प्रगत्य महतीं चमूं। चंडवातविसृष्टानामुदधीनामिव स्वनः॥ आसीद्राजन्बलौघानामन्योन्यमभिनिघ्नतां। विव्याध सोमदत्तस्तु सात्व
तं नवभिः शरैः। सात्यकिर्दशभिश्चैवमवधीत्कुरुपुंगवं। सोतिविद्धो बलवता समरे दृढधन्वना। रथोपस्थं समास्थाय मुमोह गतचेतनः। तं विमू
ढं समालक्ष्य सारथिस्त्वरयान्वितः। अपोवाह द्रुणं वीरः सोमदत्तं महारथं। वितं संज्ञं समालक्ष्य युयुधानशरार्दितं। द्रोणिश्चाभ्यद्रवत्क्रुद्धः
सात्यकिं रणमूर्द्धनि। तमापतंतं संप्रेक्ष्य शैनेयस्य रथं प्रति। भैमसेनिः सुसंक्रुद्धः प्रत्यमित्रमवारयत्। कार्ष्णायसमयं घोरमृक्षचर्मावृ
तं महत्। महांतं रथमास्थाय त्रिंशन्नल्वांतरांतरं। युक्तं गजनिभैर्वाहैर्न हयैर्नापि वा गजैः। निक्षिप्तयंत्रसन्नाहं महामेघौघनिस्वनं। ध्वजेनो
च्छ्रितदंडेन गृध्रराजेन राजता। लोहितार्द्रपताकं तं यंत्रमालाविभूषितं। अष्टचक्रसमायुक्तमास्थाय विपुलं रथं। शूलमुद्गरधारिण्या
शैलपादपहस्तया। राक्षसं घोररूपं तमक्षौहिण्या समावृतं। तमुद्यतमहाचापं निशाम्य व्यथितान्नृपाः। युगांतकालसमये दंडहस्त
मिवांतकं। भयार्दिता च चुक्षोभ पुत्रस्य तव वाहिनी। वायुनाक्षोभितावर्त्ता गंगेवोर्ध्वतरंगिणी। घटोत्कचप्रमुक्तेन सिंहनादेन भीषिता।
प्रसुस्रुवुर्गजा मूत्रं विव्यथुश्च नराधिपाः। ततोश्मवृष्टिरभ्यर्णमासीत्तत्र समंततः। संध्याकालेधिकबलैः प्रमुक्ता राक्षसैः क्षितौ। आयसानि
च चक्राणि भुशुंड्यः प्रासतोमराः। पतंत्यविरलाः शूलाः शतघ्नीपट्टिशान्विताः। तमुग्रमतिरौद्रं च दृष्ट्वा युद्धं नराधिपाः। तनयास्तव कर्णश्च व्य
थिताः प्राद्रवन्दिशः। तत्रैको स्त्रबलश्लाघी द्रोणिर्मानी न विव्यथे। व्यधमच्च शरैर्मायां घटोत्कचविनिर्मितां। निहतायां तु मायायाममर्षात्स घटोत्कचः।
विससर्ज शरान्घोरांस्तेश्वत्थामानमाविशन्। भुजंगा इव वेगेन वाल्मीकं क्रोधमूर्छिताः। ते शरा रुधिराभ्यक्ता भित्वा शारद्वतीसुतं। विविशु
र्धरणीं शीघ्रा रुक्मपुंखाः शिलाशिताः। अश्वत्थामा तु संक्रुद्धो लघुहस्तः प्रतापवान्। घटोत्कचमभिक्रुद्धो बिभेद दशभिः शरैः। घटोत्कचोतिवि

दृढं द्रोणपुत्रेण मर्मसु। चक्रं शतसहस्रारं अग्रह्णाद्व्यथितो भृशं। क्षुरांतं बालसूर्याभं मणिवज्रविभूषितं। अश्वत्थाम्नस्तु चिक्षेप भैमसेनि
र्जिघांसया। वेगेन महताप्यांतं विक्षिप्तं द्रौणिना शरैः। अभाग्यस्येव संकल्पस्तन्मोघमपतद्भुवि। घटोत्कचस्ततस्तूर्णं दृष्ट्वा चक्रं निपातितं।
द्रौणिं प्राच्छादयद्बाणैः स्वर्भानुरिव भास्करं। घटोत्कचसुतः श्रीमान्भिन्नांजनचयोपमः। रुरोध द्रौणिमायांतं प्रभंजनमिवाद्रिराट्। पौ
त्रेण भीमसेनस्य शरैरंजनपर्वणा। बभौ मेघेन धाराभिर्गिरिर्मेरुरिवार्दितः। अश्वत्थामा तु संभ्रांतो रुद्रोपेंद्रेंद्रविक्रमः। ध्वजमेकेन बाणेन चि
च्छेदांजनपर्वणः। द्वाभ्यां तु रगयंतारं त्रिभिस्तस्य त्रिवेणुकं। धनुरेकेन चिच्छेद चतुर्भिश्चतुरो हयान्। विरथस्योद्यतं हस्ताद्धेमबिंदुभिराचि
तं। विशिखेन सुतीक्ष्णेन खड्गमस्य द्विधाकरोत्। गदा हेमांगदा राजंस्तूर्णं हैडिंबसूनुना। उद्भ्राम्यास्ता शरैः सापि द्रौणिनाभ्याहतापतत्।
ततोंतरिक्षमुत्पत्य कालमेघ इवोन्नदन्। ववर्षांजनपर्वा स द्रुमवर्षं नभस्तलात्। ततो मायाधरं द्रौणिर्घटोत्कचसुतं दिवि। मार्गणैरभिविव्या
ध गिरिं सूर्य इवांशुभिः। सोवतीर्य पुनस्तस्थौ रथे हेमपरिष्कृते। महाबल इवात्युच्छ्रीमानंजनपर्वतः। तमयस्मयवर्माणं द्रौणिर्भीमात्मजा
त्मजं। जघानांजनपर्वाणं महेश्वर इवांधकं। अथ दृष्ट्वा हतं पुत्रमश्वत्थाम्ना महाबलं। द्रौणेः सकाशमभ्येत्य रोषात्प्रचलितांगदः। प्राह वा
क्यमसंभ्रांतो वीरः शारद्वतीसुतं। दहंतं पांडवानीकं वनमग्निमिवोद्धतं। तिष्ठ तिष्ठ न मे जीवन्द्रोणपुत्र गमिष्यसि। त्वामेवाद्य हनिष्यामि क्रौंच
मग्निसुतो यथा॥ ॥अश्वत्थामा॥ ॥गच्छ गच्छ सहान्यैस्त्वं युध्यस्वामरविक्रम। न हि पुत्रेण हैडिंबे पिता न्याय्यः प्रबाधितुं। कामं खलु न
मे रोषो हैडिंबे वर्त्तति त्वयि। किं तु रोषान्वितो जंतुर्हन्यादात्मानमप्युत॥ ॥संजय॥ ॥श्रुत्वैतत्क्रोधताम्राक्षः पुत्रशोकसमन्वितः। अश्व
त्थामानमाहार्तो भैमसेनिरभाषत। किमहं कातरो द्रौणे पृथग्जन इवाहवे। भीमात्खल्वहमुत्पन्नः कुरूणां विपुले कुले। पांडवानामहं पुत्रः

समरे ध्वनिवर्द्धिनां। रक्षसामधिराजोहं दशग्रीवसमो बले। तिष्ठतिष्ठ न मे जीवन् द्रोणपुत्र गमिष्यसि। युद्धश्रद्धामहं तेद्य विनेष्यामि रणाजिरे।
इत्युक्त्वा क्रोधताम्राक्षो राक्षसः सुमहाबलः। द्रौणिमभ्यद्रवत्क्रुद्धो गजेंद्रमिव केसरी। रथाक्षमात्रैरिषुभिरभ्यवर्षद्घटोत्कचः। रथिनामृषभं द्रौणिं धा
राभिरिव तोयदः। शरवृष्टिं शरैर्द्रौणिरप्राप्तां नाम शातयत्। ततोंतरिक्षे बाणानां संग्रामोन्य इवाभवत्। अथास्त्रसंघर्षकृतैः स्फुलिंगैरिव
बभौ। विभावरीमुखे व्योम खद्योतैरिव संवृतं। निशाम्य निहतां मायां द्रौणिना रणमूर्द्धनि। घटोत्कचस्ततो मायां ससर्जांतर्हितः पुनः। सोभवद्गिरि
रत्युच्चैः शिखरैस्तरुसंकटैः। शूलप्रासासिमुशलजलप्रस्रवणैर्महान्। तमंजनचयप्रख्यं द्रौणिर्दृष्ट्वा महीधरं। प्रपतद्भिश्च बहुभिः श
स्त्रसंघैर्न चुक्षुभे। ततस्स्मयन्निव द्रौणिर्वज्रमस्त्रमुदीरयन्। स तेनास्त्रेण शैलेंद्रः क्षिप्तः क्षिप्रमनश्यत। ततः स तोयदो भूत्वा नीलः सेंद्रायुधो
दिवि। अश्मवृष्टिभिरुग्राभिर्द्रौणिमाच्छादयद्रणे। अथ संधाय वायव्यमस्त्रमस्त्रविदां वरः। व्यधमद्द्रोणतनयो नीलमेघसमुच्छ्रितं। समार्गण
गणैर्द्रौणिर्दिशः प्रच्छाद्य सर्वशः। शतं रथसहस्राणां जघान द्विपदां वरः। स दृष्ट्वा पुनरायांतं रथेनायतकार्मुकं। घटोत्कचं सुसंभ्रांतं राक्षसैर्बहु
भिर्वृतं। सिंहशार्दूलसदृशैर्मत्तद्विरदविक्रमं। गजस्थैश्च रथस्थैश्च वाजिपृष्ठगतैरपि। विकृतास्यशिरोग्रीवैर्हैडिंबानुचरैः सह। महाबलैर्भर
मबलैः संरंभोद्वृत्तलोचनैः। उपस्थितैस्तदा युद्धे राक्षसैर्युद्धदुर्मदैः। विषण्णमभिसंप्रेक्ष्य पुत्रं ते द्रौणिरब्रवीत्। तिष्ठ दुर्योधनाद्य त्वं न कार्यः संभ्र
मस्त्वया। सहैभिर्भ्रातृभिर्वीरैः पार्थिवैश्चेंद्रविक्रमैः। निहनिष्याम्यमित्रांस्ते न तवास्ति पराजयः। सत्यं ते प्रतिजानामि पर्याश्वासय वाहिनीं॥ ॥
॥ ॥दुर्योधन उवाच॥ ॥ न त्वेतदद्भुतं मन्ये यत्ते महदिदं मनः। अस्मासु च परा भक्तिस्तव गौतमिनंदन। अश्वत्थामानमुक्त्वैवं ततः सौबलम
ब्रवीत्। वृतः शतसहस्रेण रथानां रणशोभिनां। षष्ट्या गजसहस्रैश्च प्रयाहि त्वं धनंजयं। कर्णश्च वृषसेनश्च कृपो नीलस्तथैव च। दुःशासनो निकुंभश्च कुंड
भेदी तनुक्रमः। पुरंजयो दृढरथः पताकी हेमकंपनः। शल्यारुणींद्रसेनश्च संजयो विजयो जयः। कमलाक्षः पुरक्रोधी जयवर्मा सुदर्शनः। एते त्वामनुयास्यं

तिपत्ती नामयुतानि षट्। जहि भीमं यमौ चोभौ धर्मराजं च मातुल। अस्त्राणि व देवों द्रोजयामामेत्यायिस्थिता। दारितान्द्रौणिना बाणैर्नैऋतां विसृता विशदहान्।
जहि मातुल कौंतेयान्सुरानिव पाकहिः। एवमुक्तो ययौ वाक्यं घटपुत्रेण तव सो बलः। धिप्रौ बुस्ते सुतान्राजन्न्दिधक्षन्निव पांडवान्। अथप्रववृते यु
द्धं द्रौणिराक्षसयोर्मृधे। अतिचित्रं सुतुमुलं शक्रप्रह्लादयोरिव। ततो घटोत्कचो बाणैर्दशभिर्गौतमीसुतं। जघानोरसि संक्रुद्धो विषाग्निप्रतिमैर्दृढैः।
स तैरभ्याहतो गाढं शरैर्भीमसुतेरितैः। चचाल रथमध्यस्थो वाताद्धूत इव द्रुमः। भूयश्चांजलिकेनास्य मार्गणेन महाप्रभो। द्रौणिहस्तस्थितं चापं चि
च्छेदाथ घटोत्कचः। ततोन्यत् द्रौणिरादाय धनुर्भारसहं महत्। ववर्ष विशिखांस्तीक्ष्णान्वारिधारा इवांबुदः। ततः शारद्वतीपुत्रः प्रेषयामास भार
त। सुवर्णपुंखाञ्छत्रुघ्नान्खचरान्खचरप्रभान्। तद्बाणैरर्दितं यूथं रक्षसां पीनवक्षसां। सिंहैरिव मदोन्मत्तैर्गजानामाकुलं कुलं। विधम्य
राक्षसान्बाणैः साश्वसूतरथद्विपान्। ददाह भगवान्वह्निर्भूतानीव युगक्षये। स दग्ध्वाक्षौहिणीं बाणैर्नैऋतानां महाबलः। पुरेव त्रिपुरं हत्वा
दिवि देवो महेश्वरः। युगांते सर्वभूतानि दग्ध्वेव वसुरुल्बणः। रराज जगतां श्रेष्ठो द्रोणपुत्रः प्रतापवान्। तेषु राजसहस्रेषु पांडवेयेषु
भारत। नैनं निरीक्षितुं कश्चिच्छक्तो द्रौणिमाहवे। ततो घटोत्कचो वीरो राक्षसेंद्रो महाबलः। स पुनर्भरतश्रेष्ठ क्रोधाद्रक्तांतलोचनः। तले
तलं तले न संहत्य संदश्य दशनच्छदं। स्वं च सूतमब्रवीत्क्रुद्धो द्रोणपुत्राय मां वह। स ययौ घोररूपेण सुपताकेन भास्वता। द्वैरथं द्रोणपुत्रेण पु
नरप्यरिसूदनः। स चिक्षेप ततः क्रुद्धो द्रोणपुत्राय राक्षसः। अष्टचक्रां महारौद्रामशनीं रुद्रनिर्मितां। तामवप्लुत्य जग्राह द्रौणिर्न्यस्य रथे
धनुः। चिक्षेप चैनां तस्यैव स्यंदनात्सोथ पुप्लुवे। साश्वसूतध्वजं यानं भस्म कृत्वा महाप्रभा। विवेश वसुधां भित्त्वा सा शक्तिर्भृशदारुणा।
द्रौणेस्तत्कर्म दृष्ट्वा तु सर्वभूतान्यपूजयन्। यदवप्लुत्य जग्राह घोरां शंकरनिर्मितां। धृष्टद्युम्नरथं गत्वा भीमसेनसुतो नृप। मुमोच निशि
तान्बाणान्पुनर्द्रोणेर्महात्मनः। धृष्टद्युम्नोथ संभ्रांतो मुमोचाशीविषोपमान्। सुवर्णपुंखान्प्रवरान्द्रोणपुत्रस्य वक्षसि। ततो मुमो

चनाराचान्द्रौणिस्त्वाभ्यसिहस्त्वराः । तावप्यग्निशिखाप्रख्यैर्जघ्नतुस्तत्र मार्गणैः । अतितीव्रमभूद्युद्धं तयोः पुरुषसिंहयोः । योधानां प्रीतिजननं
द्रौणेश्च भरर्षभ । ततो रथसहस्रेण द्विरदानां त्रिभिः शतैः । षड्भिर्वाजिसहस्रैश्च भीमस्तं देशमाव्रजत् । ततो भीमात्मजं वीरं धृष्टद्युम्नं ससानुगं । अ
योधयत धर्मात्मा द्रौणिरक्लिष्टकर्मकृत् । तत्राद्भुततमं द्रौणिर्दर्शयामास विक्रमं । अशक्यं कर्तुमन्येन सर्वभूतेषु भारत । निमेषांतरमात्रेण सा
श्वसूतरथद्विपां । अक्षौहिणीं राक्षसानां शितैर्बाणैरशातयत् । मिषतो भीमसेनस्य हैडंबेः पार्षतस्य च । यमयोर्धर्मपुत्रस्य विजयस्याच्युतस्य
च । प्रगाढमंजोगतिभिर्नाराचैरभिपीडिताः । निपेतुर्द्विरदा भूमौ द्विशृंगा इव पर्वताः । निकृत्तैर्हस्तिहस्तैश्च वलद्भिरितस्ततः । रराज वसुधाकी
र्णा विसर्पद्भिरिवोरगैः । क्षिप्तैः कांचनदंडैश्च नृपछत्रैः क्षितिर्बभौ । द्यौरिवोदितचंद्रार्का ग्रहाकीर्णा युगक्षये । विवृद्धध्वजमंडूकां भेरीविस्ती
र्णकच्छपां । छत्रहंसावलीयुक्तां फेनचामरमालिनीं । कंकगृध्रमहाकायां नैकायुधजलाकुलां । विकीर्णगजपाषाणां हताश्वमकरालयां । रथक्षिप्त
महावप्रां पताकारुचिरद्रुमां । शरमीनां महारौद्रां प्रासशक्त्यृष्टिदुंदुभां । मज्जामांसमहापंकां कबंधावर्जितद्रुमां । केशशैवलकल्माषीं भीरूणां क
श्मलावहां । नागेंद्रहययोधानां शरीरव्ययसंभवां । शोणितौघमहाभीमां द्रौणिः प्रावर्तयन्नदीं । योधार्तरवनिर्घोषां क्षतजोर्मिसमाकुलां । यां
तीमतिमहाघोरां यमक्षयमहोदधिं । निहत्य राक्षसान्बाणैर्द्रौणिर्हैडंबिमार्दयत् । पुनरप्यतिसंक्रुद्धः सवृकोदरपार्षतान् । सनाराचगणैः पार्थान्
द्रौणिर्विद्ध्वा महाबलः । जघान सुरथं नाम द्रुपदस्य सुतं विभुः । ततः श्रुतंजयं नाम द्रुपदस्यानुजं रणे । बलानीकं जलानीकं जलाश्वं चापि जघ्निवान् ।
श्रुताह्वयं च राजेंद्र द्रौणिर्निन्ये यमक्षयं । त्रिभिश्चान्यैः शरैस्तीक्ष्णैः सुपुंखै रुक्ममालिनं । जघान स पृषध्रं च चंद्रदेवं च मारिष । कुंतिभोजसुतां
श्चाजौ दशभिर्दश जघ्निवान् । पुनः शरेण तीक्ष्णेन द्रौणिः सिंहइवोन्नदन् । अश्वत्थामा सुसंक्रुद्धः संधायोग्रमजिह्मगं । मुमोचाकर्णपूर्णेन धनु

द्रो०प०
१५७

बाणशरमुत्तमं। यमदंडोपमं घोरमुद्दिश्याशु घटोत्कचं॥ स भित्त्वा हृदयं तस्य राक्षसस्य महाशरः। विवेश वसुधां शीघ्रं सपुंखः पृथिवीपते। तं हतं प
तितं ज्ञात्वा धृष्टद्युम्नो महारथः। द्रोणेः सकाशाद्राजेंद्र व्यपनिन्ये रथांतरं॥ तथा पराङ्मुखरथं सैन्यं यौधिष्ठिरं नृप। पराजित्य रणे वीरो द्रोण
पुत्रो ननाद ह। पूजितः सर्वभूतैश्च तव पुत्रैश्च भारत। अथ शरशतभिन्नकृत्तदेहैर्हतपतितैः शरविक्षतैः समंतात्। निधनमुपगतैर्मही बभूव भू
गिरिशिखरैरिव दुर्गमातिरौद्रैः। तं सिद्धगंधर्वपिशाचसंघा नागाः सुपर्णाः पितरो वयांसि। रक्षोगणा भूतगणाश्च द्रौणिमपूजयन्न
प्सरश्च राजन्॥ इति द्रोणपर्वणि रात्रियुद्धे अश्वत्थाम्नो विजयः॥ ५५॥ संजय॥ ॥द्रुपदस्यात्मजान्दृष्ट्वा कुंतिभोजसुतांस्तथा।
द्रोणपुत्रेण निहतान्राक्षसांश्च सहस्रशः। युधिष्ठिरो भीमसेनो धृष्टद्युम्नश्च पार्षतः। युयुधानश्च संयत्ता युद्धायैव मनो दधुः। सोम
दत्तः पुनः क्रुद्धो दृष्ट्वा सात्यकिमाहवे। महता शरवर्षेण छादयामास सर्वशः। ततः समभवद्युद्धमतीव भयवर्द्धनं। त्वदीयानां परेषां च घो
रं विजयकांक्षिणां। दशभिः सात्वतस्यार्थे भीमो विव्याध कौरवं। सोमदत्तोपि तं वीरं शतेन प्रत्यविध्यत। सात्वतस्त्वभिसंक्रुद्धः पुत्राधिभिरभि
प्लुतं। वृद्धमिद्धं गुणैः सर्वैर्ययातिमिव नाहुषं। विव्याध दशभिस्तीक्ष्णैः शरैर्वज्रनिपातनैः। शक्त्या चैनमथाहत्य पुनर्विव्याध सप्तभिः। पु
नस्तु सात्यकेरर्थे भीमसेनो नवं दृढं। मुमोच परिघं घोरं सोमदत्तस्य मूर्द्धनि। सात्वतोप्यग्निसंकाशं मुमुचे शरमुत्तमं। सोमदत्तोरसि
क्रुद्धः स्वपुंखं निशितं युधि। युगपत्पेततुर्घोरौ रथे परिघमार्गणौ। शरीरे सोमदत्तस्य स पपात रथो भुवि। व्यामोहिते तु तनये बाह्लिकः
समुपाद्रवत्। व्यसृजच्छरवर्षाणि काले वर्ष इवांबुदः। भीमोपि सात्वतस्यार्थे बाह्लीकं नवभिः शरैः। पीडयन्वै महात्मानं विव्याध रणमू
र्द्धनि। प्रातिपीयस्तु संक्रुद्धः शक्तिं भीमस्य वक्षसि। निचखान महाबाहुः पुरंदर इवाशनिं। स तया निहतो भीमश्चकंपे च मुमोह च। अथा

राम
१५७

प्यचेतश्च बलवान्गदामस्मै ससर्ज ह। सा पांडवेन प्रहिता बाह्लीकस्य शिरोहरत्। स पपात हतः पृथ्व्यां वज्राहत इवाद्रिराट्। तस्मिंश्चिनिह
ते वीरे बाह्लीके पुरुषर्षभे। पुत्रास्ते भ्यद्रवन्भीमं दश दाशरथेः समाः। नागदत्तो दृढरथो वीरबाहुरयोभुजः। दृढः सुहस्तो विरजाः परिक्रा
थी प्रगाथ्यपि। तान्दृष्ट्वा चुक्रुधे भीमो जगृहे भारसाधनं। एकमेकं समुद्दिश्य पातयामास मर्मसु। ते विद्धा व्यसवः पेतुः स्यंदनेभ्यो हतौजसः। चं
डवातप्रभग्नाश्च पर्वताग्रान्महीरुहः। नाराचैर्दशभिर्भीमस्तान्निहत्य तवात्मजान्। कर्णस्य दयितं पुत्रं वृषसेनमवाकिरत्। ततो वृषरथो नाम
भ्राता कर्णस्य विश्रुतः। जघान भीमं नाराचैस्तमप्यथवधीद्बली। ततः सप्त वरान्वीरांश्यालांस्तव भारत। निहत्य भीमो नाराचैः शतचंद्रमपो
थयत्। अमर्षयंतो निहतं शतचंद्रं महारथं। शकुनेर्भ्रातरो वीरा राराजाक्षः शतग्रो विभुः। सुभगो भानुदत्तश्च शूराः पंच महारथाः। अभिद्रुत्य
शरैस्तीक्ष्णै भीमसेनमताडयन्। स ताड्यमानो नाराचैर्वृष्टिवेगैरिवाचलः। जघान पंचभिर्बाणैः पंचैवातिबलीरथान्। तान्दृष्ट्वा निहतान्वी
रान्विचेलुर्नृपसत्तमाः। ततो युधिष्ठिरः क्रुद्धस्तवानीकमघातयत्। मिषतः कुंभयोनेस्तु पुत्राणां तव भारत। अंबष्टान्मागधान्शूरांस्त्रिगर्तोधि
पतीनपि। प्राहिणोन्मृत्युलोकाय गणान्युद्धे युधिष्ठिरः। अन्वीषाहान्शूरसेनान्बाह्लीकान्सवसातिभिः। निकृत्य पृथिवीं राजा चक्रे शोणि
तकर्दमां। यौधेयारट्टकाराजन्मद्रकांश्च गणान्युधि। प्राहिणोद्यमलोकाय शूरान्बाणैर्युधिष्ठिरः। ततो हरत गृह्णीत विध्यत व्यकृंतत। इत्या
सीत्तुमुलः शब्दो युधिष्ठिररथं प्रति। सैन्यानि द्रावयंतं तं द्रोणो दृष्ट्वा युधिष्ठिरं। नोदितस्तव पुत्रेण सायकैरभ्यवाकिरत्। द्रोणस्तु परमक्रु
द्धो वायव्यास्त्रेण पांडवं। विव्याध सोस्य तद्दिव्यमस्त्रमस्त्रेण जघ्निवान्। तस्मिंश्चिनिहते शस्त्रे भारद्वाजो युधिष्ठिरे। वारुणं याम्यमाग्नेयं त्वाष्ट्रं
सावित्रमेव च। विक्षेप समरे क्रुद्धो जिघांसुः पांडुनंदनं। क्षिप्तानि क्षिप्यमानानि तानि शस्त्राणि धर्मवित्। जघानास्त्रैर्महाबाहुः कुंभयोने

द्रो०प०
१५८

रसंभ्रमं। सत्यां चिकीर्षमाणस्तु प्रतिज्ञां कुंभसंभवः। प्रादुश्चक्रेस्त्रमैंद्रं च प्राजापत्यं च भारत। जिघांसुर्दुर्मतेर्नयं तव पुत्रहिते रतः। पतिः कुरूणां गज
सिंहगामी विशालवक्षाः पृथुलोहिताक्षः। प्रादुश्चकारास्त्रमहीनतेजा माहेंद्रमन्यत्स जघान चास्त्रं। निहन्यमानेष्वस्त्रेषु द्रोणः क्रोधसमन्वितः। युधि
ष्ठिरवधप्रेप्सुर्ब्राह्ममस्त्रमुदीरयत्। ततो न ज्ञायते किंचित् द्रोणेन च समावृते। सर्वभूतानि च परं त्रासं जग्मुर्महीपते। ब्रह्मास्त्रमुद्यतं दृष्ट्वा कुंतीपु
त्रो युधिष्ठिरः। ब्रह्मास्त्रेणैव राजेंद्र तदस्त्रं प्रत्यवारयत्। ततः सैनिकमुख्यास्ते प्रशशंसुर्नरर्षभौ। द्रोणपार्थौ महेष्वासौ सर्वयुद्धविशारदौ। ततः
प्रमुच्य कौंतेयं द्रोणो द्रुपदवाहिनीं। व्यधमद्रोषताम्राक्षो वायव्यास्त्रेण भारत। ते हन्यमाना द्रोणेन पांचालाः प्राद्रवन्भयात्। पश्यतो भीमसेन
स्य पार्थस्य च महात्मनः। किरीटी भीमसेनश्च सहसा पर्यवर्त्ततां। महता रथवंशेन परिगृह्य बलं तव। बीभत्सुर्दक्षिणं पार्श्वमुत्तरं तु वृकोदरः।
भारद्वाजं शरौघाभ्यां महद्भ्यां संन्यवर्त्ततां। तौ तदा संजयाः सर्वे पांचालाश्च महौजसः। अन्वगच्छन्महाराज मत्स्याश्च सह सात्वतैः। ततः सा
भारती सेना वध्यमाना किरीटिना। तमसा निद्रया चैव पुनरेव व्यदीर्यत। द्रोणेन वार्यमाणास्ते स्वयं तव च सूनुना। न त्वशक्यंत महाराज योधा वा
रयितुं तदा॥ ॥ इति महाभारते द्रोणपर्वणि रात्रियुद्धे॥ ५६॥ संजय॥ ॥ उदीर्यमाणं दृष्ट्वा च पांडवानां महद्बलं। अविषह्यं च मन्वानः क
र्णं दुर्योधनोऽब्रवीत्। अयं स कालः संप्राप्तो मित्राणां मित्रवत्सल। त्रायस्व समरे कर्ण सर्वान्योधान्महारथ। पांचालैर्मत्स्यकैकेयैः पांडवैश्च महा
रथैः। वृतान्समंतात्संक्रुद्धैर्निःश्वसद्भिरिवोरगैः। एते नदंति संहृष्टाः पांडवा जितकाशिनः। शक्रोपमाश्च बहवः पांचालानां रथव्रजाः॥ ॥कर्ण॥
परित्रातुमिह प्राप्तो यदि पार्थं पुरंदरः। तमप्याशु पराजित्य ततो हंतास्मि पांडवं। सत्यं ते प्रतिजानामि समाश्वसिहि भारत। हंतास्मि पांडुतनया
न्पांचालांश्च समागतान्। जयं प्रतिविधास्यामि वासवस्येव पावकिः। प्रियं तव मया कार्यमिति जीवामि पार्थिव। सर्वेषामेव पार्थानां फाल्गु

राम
१५८

नो बल्वत्तरः। तस्यामोघां विमोक्ष्यामि शक्तिं शक्रविनिर्मितां। हते तस्मिन्महेष्वासे भ्रातरस्तव मानद। तव वश्या भविष्यंति वनं यास्यंति वा पुनः।
मयि जीवति कौरव्य मा विषादं कृथाः क्वचित्। अहं जेष्यामि समरे सहितान्सर्वपांडवान्। पांचालान्केकयांश्चैव वृष्णींश्चापि समागतान्। बाणौ
घैः शकलीकृत्य तव दास्यामि मेदिनीं। एवं ब्रुवाणं कर्णं तु कृपः शारद्वतोऽब्रवीत्। स्मयन्निव महाबाहुः सूतपुत्रमिदं वचः। शोभनं शोभनं क
र्ण सनाथः कुरुपुंगवः। त्वया नाथेन राधेय वचसा यदि सिध्यति। बहुशः कत्थसे कर्ण कौरव्यस्य समीपतः। न तु ते विक्रमः कश्चिद्दृश्य
ते बलमेव वा। समागमः पांडुसुतैर्दृष्टस्ते बहुशो युधि। सर्वत्रो निर्जितश्चासि पांडवैः सूतनंदन। ह्रियमाणे तदा कर्ण गंधर्वैर्धृतराष्ट्रजे।
तदायुध्यंत सैन्यानि त्वमेकस्तु पलायिथाः। विराटनगरे तात समेताः सर्वकौरवाः। पार्थेन निर्जिता युद्धे त्वं च कर्ण महारथः। एकस्याप्यस
मर्थस्त्वं फाल्गुनस्य रणाजिरे। कथमुत्सहसे जेतुं सकृष्णान्सर्वपांडवान्। अब्रुवन्कर्ण युध्यस्व बहु कत्थसि सूतज। अनुक्त्वा विक्रमेद्य
स्तु तद्वै सत्पुरुषव्रतं। गर्जित्वा सूतपुत्र त्वं शारदाभ्रमिवाजलं। निःफलो दृश्यते कर्ण तच्च राजा न बुध्यते। तावद्गर्जसि राधेय यावत्पा
र्थं न पश्यसि। पुरा पार्थं हि तं दृष्ट्वा दुर्लभं गर्जितं भवेत्। बाहुभ्यां क्षत्रियाः शूरा वाक्शूराश्च द्विजातयः। धनुषा फाल्गुनः शूरः कर्णः
शूरो मनोरथैः। तोषितो येन रुद्रोऽपि कः पार्थं प्रतिघातयेत्। एवं परुषितस्तेन तदा शारद्वतेन सः। कर्णः प्रहरतां श्रेष्ठः कृपं वाक्यमथाब्रवीत्।
शूरा गर्जंति सततं प्रावृषीव बलाहकाः। फलं चाशु प्रयच्छंति बीजमुक्तं संक्षिता चिरा। दोषमत्र न पश्यामि शूराणां रणमूर्द्धनि। तत्तद्विकत्थ
मानानां भारं चोद्वहतां मृधे। प्रगर्जाम्यपहं बुद्ध्या तत्र न स्यति। रथोऽशूरा न गर्जंति सजला इव तोयदाः। सामर्थ्यमात्मनो ज्ञात्वा ततो गर्जंति प
ण्डिताः। सोहमद्य रणे यत्तः सहितौ कृष्णपांडवौ। उत्सहे मनसा जेतुं ततो गर्जामि गौतम। दैवमस्य ध्रुवं तत्र साहाय्यायोपपद्यते। पश्य त्वं गर्जितस्या
स्य फलं विप्रसहारुणं। व्यवसायद्वितीयोऽहं मनसा भारमुद्वहं। हत्वा पांडुसुतान्नाजौ सहकृष्णान्ससात्वतान्। दुर्योधनाय दास्यामि पृथिवीं हतकंटकां।

द्रो॰प॰
१५९

॥ ॥कृपउ॥ ॥किंनो बहुप्रलापेन फल्गुमाप्नुहि सूतज। मनोरथप्रलापो मे न यात्वत्तस्तव सूतज। यदाक्षिपसि कृष्णौ वै धर्मराजं च पांडवं। ध्रुवस्तत्र जयः कर्ण यत्र युद्धविशारदो। देवगंधर्वयक्षाणां मानुषोरगरक्षसां। दंशितानामपि रणे अजय्यो कृष्णपांडवौ। ब्राह्मण्यः सत्यवाक् दांतो गुरुदैवतपूजकः। नित्यं धर्मरतः सूत कृतास्त्रश्च विशेषतः। धृतिमान्कृतज्ञश्च धर्मपुत्रो युधिष्ठिरः। भ्रातरश्चास्य बलिनः सर्वास्त्रेषु कृतश्रमाः। गुरुवृत्तिरतास्तस्मात्सद्धर्मनित्या यशस्विनः। संबंधिनश्चेंद्रवीर्याः सानुरक्ताः प्रहारिणः। धृष्टद्युम्नः शिखंडी च दौर्मुखी जनमेजयः। चंद्रसेनो भद्रसेनः कीर्तिधर्मा ध्रुवो धरः। वसुचंद्रो दामचंद्रः सिंहचंद्रः सुवेतनः। द्रुपदस्य तथा पुत्रा द्रुपदश्च महास्त्रवित्। येषामर्थाय संयत्तो मत्स्यराजः सहानुजः। शतानीकः सूर्यदत्तो मदिराश्वः श्रुतध्वजः। बलानीको जयानीको जयाश्वो रथवाहनः। चंद्रोदयः कामरथो विराटभ्रातरः शुभाः। यमौ च द्रौपदेयाश्च राक्षसश्च घटोत्कचः। अनर्जुनान न शास्यंते महीं लोकं कथं चन। येषामर्थाय युध्यंते न ते षां विद्यते क्षयः। एते चान्ये च बहवो गणाः पांडुसुतैः सह। कामं खलु जगत्सर्वं सदेवासुरमानुषं। सयक्षराक्षसगणं सभूतभुजगद्विपं। निःशेषादस्त्रवीर्येण जीयेतां भीमफाल्गुनौ। युधिष्ठिरश्च पृथिवीं निर्दहेत्घोरचक्षुषा। अप्रमेयबलः शौरिर्येषामर्थाय दंशितः। कथं तान्समरे कर्ण जेतुमुत्सहसे परान्। महानपनयस्त्वेष तव नित्यं हि सूतज। यस्त्वमुत्सहसे योद्धुं समरे शौरिणा सह। एवमुक्तस्तु राधेयः प्रहसन्भरतर्षभ। अब्रवीच्च तदा कर्णो गुरुं शारद्वतं नृपा
स्यमुक्तं त्वया ब्रह्मन्पांडवान्प्रति यद्वचः। एते चान्ये च बहवो गुणाः पांडुसुते ध्रुवं। अजय्यश्च रणे पार्थो देवैरपि सवासवैः। सयक्षदैत्यगंधर्वपिशाचोरगराक्षसैः। तथापि पार्थं जेष्यामि शक्त्या वासवदत्तया। ममाप्यमोघा दत्तेयं शक्तिः शक्रेण वै द्विज। एतया निहनिष्यामि सव्यसाचिनमाहवे। हते तु पांडवे कृष्णो भ्रातरश्चास्य सोदराः। अनर्जुना यां च भुवि विनश्येयुर्न संशयः। तेषु नष्टेषु सर्वेषु पृथिवीयं सकानना। आयत्ता कौरवेयस्य वशे स्थास्यति गौतम। सुनीतानीह कार्याणि सिध्यंते नात्र संशयः। एतमर्थं महं ज्ञात्वा ततो गर्जामि गौतम।

राम
१५९

त्वंतुविप्रश्चवृद्धश्चश्रांतश्चापिसंयुगे।कृतस्नेहश्चपार्थेषुमोहान्मामवमन्यसे।यद्येवंवर्त्तस्यसेनयोममाप्रियमिहद्विज।ततस्तेखड्गमुद्यम्य
जिह्वांछेत्स्यामिदुर्मते।यथापिपांडवान्विप्रस्तोतुमिच्छसिदुर्मते।क्षीयन्सर्वसैन्यानिकौरवेयानिसंयुगे।अत्रापिशृणुमेवाक्यंयथाद्द्रुवतो
द्विज।दुर्योधनश्चद्रोणश्चशकुनिर्दुर्मुखोजयः।दुःशासनोवृषसेनोमद्रराजस्तथैवच।सोमदत्तश्चभूरिश्चतथाद्रौणिर्विविंशती। ज
येदेतान्रणेकोनुशक्रतुल्यसमोप्यरिः।शूराश्चापिकृतास्त्राश्चबलिनःस्वर्गलिप्सवः।धर्मज्ञायुद्धकुशलाहन्युर्युद्धेसुरानपि।एतेस्त्वास्यंति
संग्रामेपांडवानांवधैषिणः।जयमाकांक्षमाणानांश्चकौरवेयस्यदंशिताः।दैवायत्तमहंमन्येजयंहिबलिनामपि।यत्रभीष्मोमहाबाहुःशे
तेशरशतान्वितः।विकर्णश्चित्रसेनश्चबाह्लीकश्चजयद्रथः।भूरिश्रवाजयश्चैवजलसंधःसुदक्षिणः।शलश्चरथिनांश्रेष्ठोभगदत्तश्च
वीर्यवान्।एतेचान्येचबहवोदेवैरपिसुदुर्जयाः।निहताःसमरेशूराःपांडवैर्बलवत्तरैः।किमन्यद्दैवसंयोगान्मन्यसेपुरुषर्षभ।अक्षी
पस्तोषिसततंदुर्योधनरिपून्द्विज।तेषामपिहताःशूराःशतशोथसहस्रशः।क्षीयंतेसर्वसैन्यानिकुरूणांपांडवैःसह।प्रभावंनात्रपश्या
मिपांडवानांकथंचन।यस्त्वान्बलवतोनित्यंमन्यसेत्वंद्विजाधम।यतिष्येहंयथाशक्तियुद्धंकर्तुंहितैःसह।दुर्योधनहितार्थायजयो
दैवेप्रतिष्ठितः॥ ॥इतिमहाभारतेद्रोणपर्वणिरात्रियुद्धे॥५८॥ संजय॥ ॥तथापरुषितंश्रुत्वासूतपुत्रेणमातुलं।खड्गमुद्यम्यवेगेन
द्रौणिरभ्यपतद्द्रुतं॥ ॥अश्वत्थामा॥ ॥कर्णपश्यसुदुर्बुद्धेतिष्ठेदानींपुरोमम।एषतेद्यशिरःकायादुद्धरामिसुदुर्मते॥ संजय॥
तमुत्पतंतंवेगेनराजादुर्योधनःस्वयं।न्यवारयन्महाराजकृपश्चद्विपदांवरः॥ ॥कर्णउ॥ ॥शूरोयंसमरश्लाघीदुर्मतिश्चद्वि

द्रो॰प॰
१६०

जाधमः। आसादयतुमद्वीर्यमुग्रेमंकुरुसत्तम॥ ॥द्रौणिरु॥ ॥तवैतत्क्षम्यतेस्माभिः सूतात्मजसुदुर्मते। दर्पमुत्सिक्तमेतंमेफाल्गुनोनाशयि
ष्यति॥ ॥दुर्योधन॥ ॥अश्वत्थामन्प्रसीदस्वक्षंतुमर्हसिमेद्विज। कोपःखलुनकर्तव्यः सूतपुत्रेकथंचन। त्वयिकर्णेकृपेद्रोणेमद्रराजेथसौ
बले। महत्कार्यंसमायत्तंप्रसीदद्विजसत्तम। एतेत्वभिमुखाः सर्वेराधेयेनयुयुत्सवः। आयांतिपांडवाब्रह्मन्आह्वयंतः समंततः॥ संज॰
ततस्तेपांडवाराजन्पांचालाश्चसमंततः। आजग्मुः सहसाराजंस्तर्जयंतः पुनः पुनः। कर्णोपिरथिनांश्रेष्ठश्चापमुद्यम्यवीर्यवान्।
कौरवाग्र्यैः परिवृतः शक्रोदेवगणैरिव। समतिष्ठततेजस्वी स्वबाहुबलमाश्रितः। ततः प्रववृतेयुद्धंकर्णस्यसहपांडवैः। संरब्धस्य
महाराजसिंहनादविनादितं। ततस्तेपांडवाराजन्पांचालाश्चयशस्विनः। दृष्ट्वाकर्णंमहाबाहुमुच्चैःशब्दमथानदन्। अयंकर्णःकु
तःकर्णस्तिष्ठकर्णमहामृधे। युध्यस्वसहितोस्माभिर्दुरात्मन्पुरुषाधम। अन्येतुदृष्ट्वाराधेयंक्रोधरक्तेक्षणाब्रुवन्। वध्यताम
यमुत्सिक्तः सूतपुत्रोल्पचेतनः। सर्वैः पार्थिवशार्दूलैर्नानेनार्थोस्तिजीवता। अत्यंतवैरीपार्थानांसततंपापपूरुषः। एषमूलमनर्था
नांदुर्योधनमतेस्थितः। घ्नतैनमितिजल्पंतः क्षत्रियाः समुपाद्रवन्। महताशरवर्षेणछादयंतोमहारथाः। वधार्थं
सूतपुत्रस्यपार्थिवेंद्रेणनोदिताः। तांस्तुसर्वांस्तथादृष्ट्वाधावमानान्महारथान्। नविव्यथेसूतपुत्रोनचत्रासमगच्छताद्दृ
ष्ट्वासागरकल्पंतमुद्धूतंसैन्यसागरं। पितृषुस्तवपुत्राणांसंग्रामेष्वपराजितः। सायकौघेनबलवान्क्षिप्रकारीमहाबलः।
वारयामासतत्सैन्यंसमंतादूरतर्षभ। ततस्तुशरवर्षेणपार्थिवाः समवारयन्। धनूंषितंविधुन्वानाः शतशोथसहस्रशः।

राम
१६०

अयोधयंत्तराधेयं शक्रं दैत्यगणा इव। शरवर्षं ततः कर्णः पार्थिवैः समुदीरितां। नघुद्धमजवत्तेषां स्तत्प्रतिघ्नतेषिणां। यथा देवासुरे युद्धे
शक्रस्य सह दानवैः। तत्राद्भुतमपश्याम सूतपुत्रस्य लाघवं। यदेकं सर्वतो यत्ताः प्राप्नुवंति परे युधि। निवार्य च शरौघांस्तान् पार्थिवानां
महारथः। युगेषु च तनुत्रेषु हयेषु च ध्वजेषु च। आत्मनामांकितान्बाणान् राधेयः प्राहिणोच्छितान्। ततस्ते व्याकुलीभूता राजानः कर्णपी
डिताः। बभ्रमुस्तत्र तत्रैव गावः शीतार्दिता इव। हयानां वध्यमानानां नागानां रथिनां तथा। तत्र तत्र समवीक्षाम संघान्कर्णेन पीडितान्। शिरोभिः
पतितै राजन्बाहुभिश्च समंततः। आस्तीर्णा वसुधा सर्वा शूराणामनिवर्त्तिनां। हतैश्च हन्यमानैश्च निस्वनद्भिश्च सर्वशः। बभूवायोधनं रौद्रं
वैवस्वतपुरोपमं। ततो दुर्योधनो राजा दृष्ट्वा कर्णस्य विक्रमं। अश्वत्थामानमासाद्य ततो वाक्यमुवाच ह। युध्यते सौ रणे कर्णो दंशितः सर्वपार्थिवैः।
पश्यैतां द्रवतीं सेनां कर्णसायकपीडितां। कार्त्तिकेयेन विध्वस्तामासुरीं पृतनामिव। दृष्ट्वैतां पीडितां सेनां कर्णसायकनिर्जितां। अभियात्येष बी
भत्सुः सूतपुत्रं जिघांसया। तद्यथा पश्यमानानां सूतपुत्रं महारथं। न हन्यात्पांडवः संख्ये तथा नीतिर्विधीयतां। ततो द्रौणिः कृपः कर्णो हार्दि
क्यश्च महारथः। प्रत्युद्ययुस्तदा पार्थं सूतपुत्रपरीप्सया। आयांतं वीक्ष्य कौंतेयं शक्रं दैत्यचमूमिव। प्रत्युद्ययौ तदा कर्णो यथा वृत्रः पुरंदरं॥ ॥
॥ ॥धृतराष्ट्र॥ ॥संयांतं फाल्गुनं दृष्ट्वा कालांतकयमोपमं। कर्णो वैकर्त्तनः सूत प्रत्यपद्यत्किमुत्तरं। सत्वस्पर्द्धत पार्थेन नित्यमेव महारथः।
आशंसते च बीभत्सुं फ वाजेतुं सदारुणे। स तु तं सहसा प्राप्तं नित्यमत्यंतवैरिणो x त्यं x कर्णो वैकर्त्तनः सूत प्रत्यपद्यत्किमुत्तरं   संजय
आयांतं पांडवं दृष्ट्वा गजः प्रतिगजं यथा। असंभ्रांतस्ततः कर्णः प्रत्युदीयाद्धनंजयं। वारयामास तेजस्वी पांडवं शत्रुतापनः। तं कर्णः शरजालै

नच्छादयामास भारत। विव्याध चसुसंक्रुद्धः शरैस्त्रिभिरजिह्मगैः। तस्य तल्लाघवं पार्थो नामृष्यत महाबलः। तस्मै बाणान्शिलाधौतान्प्रसन्ना
ग्रानजिह्मगान्। प्राहिणोत्सूतपुत्राय त्रिंशतं शत्रुतापनः। विव्याध चैनं संरब्धो बाणेनैकेन वीर्यवान्। सव्ये भुजाग्रे बलवान्नाराचेन हसन्निवात
स्य विद्धस्य वेगेन कराच्चापं पपात ह। पुनरादाय तच्चापं निमेषार्धान्महाबलः। छादयामास बाणौघैः फाल्गुनं कृतहस्तवत्। शरवृष्टिं तु तां मुक्तां
सूतपुत्रेण भारत। व्यधमच्छरवर्षेण स्मयन्निव धनंजयः। तौ परस्परमासाद्य शरवर्षेण पार्थिव। छादयेतां महेष्वासौ कृतप्रतिकृतैषिणौ। त
दद्भुतमभूद्युद्धं कर्णपांडवयोर्मृधे। क्रुद्धयोर्वाशिताहेतोर्वन्ययोर्गजयोरिव। ततः पार्थो महेष्वासो दृष्ट्वा कर्णस्य विक्रमं। मुष्टिदेशे धनुस्तस्य
चिच्छेद त्वरयान्वितः। अश्वांश्च चतुरो भल्लैरनयद्यमसादनं। सारथेश्च शिरः कायादहरच्छत्रुतापनः। अथैनं छिन्नधन्वानं हताश्वं हतसारथिं। वि
व्याध सायकैः पार्थश्चतुर्भिः पांडुनंदनः। हताश्वात्तु रथात्तूर्णमवप्लुत्य नरर्षभः। आरुरोह रथं तूर्णं कृपस्य शरपीडितः। स नुन्नोर्जुनबाणौघैः शाचितः श
ल्यको यथा। जीवितार्थमभिप्रेप्सुः कृपस्य रथमारुहत्। राधेयं निर्जितं दृष्ट्वा तावका भरतर्षभ। धनंजयशरैर्नुन्नाः प्राद्रवंत दिशो दश। द्रवतस्तान्स
मालोक्य राजा दुर्योधनः स्वयं। निवर्त्तयामास तदा वाक्यं चेदमुवाच ह। अलं द्रुतेन वः शूरास्तिष्ठध्वं क्षत्रियर्षभाः। एष पार्थवधायाहं स्वयं गच्छा
मि संयुगे। अहं पार्थं हनिष्यामि पांचालान्सहसोमकान्। अद्य मे युध्यमानस्य सह गांडीवधन्वना। द्रक्ष्यंति विक्रमं पार्थाः कालस्येव युगक्षये।
अद्य मद्बाणवर्षाणि विमुक्तानि सहस्रशः। द्रक्ष्यंति समरे योधाः शलभानामिवायतीः। अद्य बाणमयं वर्षं सृजतो मम धन्विनः। जीमूतस्ये
व घर्मांते द्रक्ष्यंति युधि सैनिकाः। जेष्याम्यद्य रणे पार्थं सायकैर्नतपर्वभिः। तिष्ठध्वं समरे शूरा भयं त्यजत फाल्गुनात्। न हि मद्वीर्यमासाद्य फा

ल्गुनःअहनिष्यति।यथावेलांसमासाद्यसागरोमकरालयः।इत्युक्त्वाप्रययौराजासैन्येनमहतावृतः।फाल्गुनंप्रतिदुर्धर्षंक्रोधसंरक्तलोचनः।
तंप्रयांतंमहाबाहुंदृष्ट्वाशारद्वतस्ततः।अश्वत्थामानमासाद्यवाक्यमेतदुवाचह।एषराजामहाबाहुरमर्षीक्रोधमूर्छितः।पतंगवृत्तिमास्थायफा
ल्गुनंयोद्धुमिच्छति।यावन्नःपश्यमानानांप्राणान्पार्थेनसंगतः।नजह्यात्पुरुषव्याघ्रतावद्वारयकौरवं।यावत्फाल्गुनबाणानांगोचरंनाधिगच्छति।
कौरवःपार्थिवोवीरस्तावद्वारयतंद्रुतं।यावत्पार्थशरैर्घोरैर्निर्मुक्तोरगसन्निभैः।नभस्मीक्रियतेराजातावद्युद्धान्निवार्यतां।अयुक्तमिवपश्या
मितिष्ठत्स्वस्मास्वसावतः।स्वयंयुद्धाययद्राजापार्थमागान्महाजवं।दुर्लभंजीवितंमन्येकौरवस्यकिरीटिना।युध्यमानस्यपार्थेनशार्दूलेनेवहस्तिनः।
मातुलेनैवमुक्तस्तुद्रौणिःशस्त्रभृतांवरः।दुर्योधनमिदंवाक्यंत्वरितःसमभाषत।मयिजीवतिगांधारेनयुद्धंगंतुमर्हसि।मामनादृत्यकौरव्यतवनि
त्यंप्रियैषिणं।नहितेसंभ्रमःकार्यःपार्थस्यविजयंप्रति।अहमावारयिष्यामिपार्थंतिष्ठसुयोधन॥ ॥दुर्योधन॥ ॥आचार्यःपांडुपुत्रान्वैपुत्रवत्प
रिरक्षति।त्वमप्युपेक्षांकुरुषेतेषुनित्यंद्विजोत्तम।ममवामंदभाग्यत्वान्मंदस्तेविक्रमोयुधि।धिगस्तुममलुब्धस्ययत्कृतेसर्वबांधवाः।सुखा
र्हाःपरमंदुःखंप्राप्नुवंत्यपराजिताः।कोहिशस्त्रभृतांमुख्योमहेश्वरसमोयुधि।शत्रून्नक्षपयेच्छक्तोयोनस्याद्गौतमीसुतः।अश्वत्थामन्प्रसी
दस्वनाशयैतान्ममाहितान्।तवास्त्रगोचरेशक्ताःस्थातुंदेवापिनानघ।पांचालान्सोमकांश्चैवजहिद्रोणेसमागतान्।वयंशेषान्हनिष्यामस्त्वयैवपरि
रक्षिताः।एतेहिसोमकाविप्रपांचालाश्चयशस्विनः।ममसैन्येषुसंरब्धाविचरंतिमहाग्निवत्।तान्वारयमहाबाहोकैकयांश्चनरोत्तम।पुराकुर्वंतिनि
शेषंरक्ष्यमाणाःकिरीटिना।आशुवायदिवापश्चात्तवेदंकर्ममारिष।त्वमुत्पन्नोमहाबाहुःपांचालानांवधंप्रति।करिष्यसिजगत्सर्वमपांचालंकिलाच्यु
त।एवंसिद्धाब्रुवन्वाचोभविष्यतिचतत्तथा।नतेस्त्रगोचरेस्थातुंशक्तादेवाःसवासवाः।किमुपार्थाःसपांचालाःसत्यमेतद्वचोमम॥ ॥इतिमह

द्रो०प० १६२

भारतेद्रोणपर्वणिरात्रियुद्धे॥ ५८॥ संजय॥ ॥दुर्योधनेनैवमुक्तोद्रौणिराहवदुर्मदः। प्रत्युवाचमहाबाहो हेयथावदसिकौरव। प्रियाहिपांडवा
नित्यंममचापिपितुश्चमे। तथैववांप्रियास्तेषां नतुयुद्धेकुरूद्वह। शक्तितस्तातयुध्यामस्त्यक्त्वाप्राणानमीतवत। अहंशल्यश्चकर्णश्चकृपोहार्दि
क्यएवच। निमेषात्पांडवीसेनां क्षपयेमनृपोत्तम। तेचापिकौरवानित्यं निमेषात्कुरुसत्तम। क्षपयेयुर्महाबाहोस्थास्यंतियदिसंयुगे। युध्य
तःपांडवान्शक्त्यातेषांचास्मान्युयुत्सतां। तेजस्तत्तेजआसाद्यप्रशमंयातिभारत। अशक्यातरसाजेतुंपांडवानामनीकिनी। जीवत्सु
पांडुपुत्रेषुतद्धिसत्यंब्रवीमिते। आत्मार्थंयुध्यमानास्तेसमर्थाःपांडुनंदनाः। किमर्थंतवसैन्यानिनहनिष्यंतिभारत। त्वंतुलुब्धतमोराजा
निकृतिज्ञश्चकौरवः। सर्वातिशंकीमानीचततोस्मानतिशंकसे। मन्येत्वंकुत्सितोराजापापात्मापापपूरुषः। अन्यानप्यसनःक्षुद्रःशंक
सेपापभावितः। अहंतुयत्नमास्थायत्वदर्थेत्यक्तजीवितः। एषगच्छामिसंग्रामंत्वत्कृतेकुरुसत्तम। योत्स्येहंशत्रुभिःसार्द्धंजेष्यामिचवरा
न्वरान्। पांचालैःसहयोत्स्यामिसोमकैःकेकयैस्तथा। पांडवेयैश्चसंग्रामेत्वत्प्रियार्थमरिंदम। अद्यमद्बाणनिर्दग्धाःपांचालाःसोमकास्त
था। सिंहेनेवार्दितागावोविद्रविष्यंतिसर्वशः। अद्यधर्मसुतोराजादृष्ट्वाममपराक्रमं। अश्वत्थाममयंलोकं मंस्यतेसहसोमकैः। आग
मिष्यतिनिर्वेदंधर्मपुत्रोयुधिष्ठिरः। दृष्ट्वाचनिहतान्संख्येपांचालान्सोमकैःसह। येमांयुद्धेयोत्स्यंतितान्हनिष्यामिभारत। नहितेवीर
मुच्येरन्मद्बाहंतरमागताः॥ ॥संजय॥ ॥एवमुक्त्वामहाबाहुःपुत्रंदुर्योधनंतव। अभ्यवर्ततयुद्धायद्रावयन्सर्वधन्विनः। चिकीर्षुस्त
वपुत्राणांप्रियंप्राणभृतांवरः। ततोब्रवीत्सकैकेयान्पांचालान्गौतमीसुतः। प्रहरध्वमितःसर्वेममगात्रेमहारथाः। स्थिरीभूताश्चयुध्यध्वं
दर्शयंतोस्त्रलाघवं। एवमुक्तास्ततस्तेवैशरवृष्टिंन्यपातयन्। द्रौणिंप्रतिमहाराजजलंजलधराइव। तान्निहत्यशरान्द्रौणिर्दशवी

अश्वत्थामा

राम १६२

रान्पीथयत्।प्रमुखेपांडुपुत्राणांधृष्टद्युम्नस्यचाविभो।तेहन्यमानाःसमरेपांचालाःसृंजयास्तथा।परित्यज्यरणेद्रौणिंव्यद्रवंतदिशोदश।
तान्दृष्ट्वाद्रवतःशूरान्पांचालान्सहसोमकान्।धृष्टद्युम्नोमहाराजद्रौणिमभ्यद्रवद्युधि।ततःकांचनचित्राणांसजलांबुदनादिनां।वृतःशतेनशूराणां
रथानामनिवर्त्तिनां।पुत्रःपांचालराजस्यधृष्टद्युम्नोमहारथः।द्रौणिमित्यब्रवीद्वाक्यंदृष्ट्वायोधान्निपातितान्।आचार्यपुत्रदुर्बुद्धेकिमन्यैर्नि
हतैस्तव।समागच्छमयासार्द्धंयदिशूरोसिसंयुगे।अहंत्वांनिहनिष्यामितिष्ठेदानींममाग्रतः।ततस्तमाचार्यसुतंधृष्टद्युम्नःप्रतापवान्।
मर्मभिद्भिःशरैस्तीक्ष्णैर्जघानभरतर्षभ।तेतुपंक्तीकृताद्रौणिंशराविविशुराशुगाः।रुक्मपुंखाःप्रसन्नाग्राःसर्वकायावदारणाः।मध्वर्थिनइ
वोद्दामाःभ्रमराःपुष्पितंद्रुमं।सोतिविद्धोभृशंक्रुद्धःपादाक्रांतइवोरगः।मानीद्रौणिरसंभ्रांतोबाणपाणिरभाषत।धृष्टद्युम्नस्थिरोभूत्वामु
हूर्त्तंप्रतिपालय।यावत्त्वांनिशितैर्बाणैःप्रेषयामियमक्षयं।द्रौणिरेवमथाभाष्यपार्षतंपरवीरहा।छादयामासबाणौघैःसमंताल्लघुहस्त
वत्।सछाद्यमानःसमरेद्रौणिनायुद्धदुर्मदः।द्रौणिंपांचालतनयोवाक्यैरेस्तर्जयत्तदा।नजानीषेप्रतिज्ञांमेविप्रोत्पत्तिंतथैवच।द्रोणंह
त्वाकिलमयाहंतव्यस्त्वंसुदुर्मते।ततस्त्वाहंनिहत्याजौद्रोणेजीवाभिसंयुगे।इमांतुरजनींप्राप्तामप्रभातांसुदुर्मते।निहत्यपितरंतेद्यततस्त्वा
मपिसंयुगे।नेष्यामिपरलोकायएवंमेमनसिस्थितं।यत्तेपार्थेषुविद्वेषोभक्तिर्याकौरवेषुच।तांदर्शयस्थिरोभूत्वानमेजीवन्विमोक्षसे।यो
हिब्राह्मण्यमुत्सृज्यक्षत्रधर्मरतिर्द्विजः।सवध्यःसर्वलोकस्ययथात्वंपुरुषाधम।इत्युक्तःपरुषंवाक्यंपार्षतेननरोत्तम।क्रोधमाहारयत्तीव्रंतिष्ठ
तिष्ठेतिचाब्रवीत्।निर्दहन्निवचक्षुर्भ्यांपार्षतंसोभ्यवर्त्तत।छादयामाससमरेनिश्वसन्पन्नगोयथा।सछाद्यमानःसमरेद्रौणिनाराजस

द्रो०प०
१६३

त्तमा। सर्वपांचालसेनाभिः संवृतो रथसत्तमः। सायकांश्चैव विविधानस्त्राणि मुमोच ह। तौ पुनः सन्निवृत्ते तां प्राणद्यूतपरे रणे। निवारयंतौ
बाणौघैः परस्परवधैषिणौ। उत्सृजंतौ महेष्वासौ शरवृष्टिं समंततः। द्रौणिपार्षतयोर्युद्धं घोररूपं भयानकं। दृष्ट्वा संपूजयामासुः सिद्धचार
णवार्त्तिकाः। शरौघैः पूरयंतौ तौ वाकाशं च दिशस्तथा। अलक्ष्यौ संप्रयुद्धेतां महत्कृत्वा शरैस्तमः। नृत्यमाणाविव रणे मंडलीकृतकार्मुकौ।
परस्परवधे यत्तौ परस्परजयैषिणौ। अयुध्येतां महाबाहू चित्रं लघु च सुष्टु च। संपूज्यमानौ समरे योधमुख्यैः सहस्रशः। तौ प्रयुद्धौ रणे दृ
ष्ट्वा भीरूणां भयवर्द्धनौ। उभयोः सेनयोर्हर्षः तुमुलः समपद्यत। सिंहनादरवाश्चासन् दध्मुः शंखांश्च सैनिकाः। वादित्राण्यभिवाद्यंत श
तशोथ सहस्रशः। तस्मिंस्तु तुमुले युद्धे भीरूणां भयवर्द्धने। मुहूर्त्तमिव तद्युद्धं समरूपं तदाभवत्। ततो द्रौणिर्महाराज पार्षतस्य महात्मनः।
ध्वजं धनुस्तथा छत्रं तथोभौ पार्ष्णिसारथी। सूतमश्वांश्च चतुरो निहत्याभ्यद्रवद्रणे। पांचालांश्चैव तान्सर्वान्बाणैः सन्नतपर्वभिः। व्यद्रा
वयदमेयात्मा शतशोथ सहस्रशः। ततः प्रविव्यथे सेना पांडवी भरतर्षभ। दृष्ट्वा द्रोणेर्महत्कर्म वासवस्येव संयुगे। शतेन च शतं हत्वा पां
चालानां महारथाः। त्रिभिश्चान्निचितैर्बाणैर्हत्वा त्रीन्वै नरर्षभान्। द्रौणिर्द्रुपदपुत्रस्य फाल्गुनस्य च पश्यतः। नाशयामास पांचालान्
भूयिष्ठाये व्यवस्थिताः। ते वध्यमानाः समरे पांचालाः सहसृंजयैः। आगच्छन्द्रोणिमुत्सृज्य विप्रकीर्णरथध्वजाः। स जित्वा समरे शत्रू
न्द्रोणपुत्रो महारथः। ननाद सुमहानादं तपांते जलदो यथा। स निहत्य बहूञ्छूरानश्वत्थामा व्यरोचत। युगांते सर्वभूतानि भस्म
कृत्वेव पावकः। स पूज्यमानो युधि कौरवेयैर्विजित्य संख्ये रिगणान्सहस्रशः। व्यरोचत द्रोणसुतः प्रतापवान्यथा सुरेंद्रो रिगणान्

राम
१६३

निहत्य॥ ॥इति महाभारते द्रोणपर्वणि रात्रियुद्धे॥ ॥ संजय॥ ॥ततो युधिष्ठिरश्चैव भीमसेनश्च पांडवः। द्रोणपुत्रं महारा
ज समेतौ पर्यवारयन्। ततो दुर्योधनो राजा भारद्वाजेन संवृतः। अभ्ययात् पांडवान् संख्ये ततो युद्धमवर्त्तत। घोररूपं महाराज भीरू
णां भयवर्द्धनं। अंबष्ठान्मालवान्वंगान् शिबीं स्त्रैगर्त्तकानपि। प्राहिणोद्यमलोकाय गणान् क्रुद्धो युधिष्ठिरः। अभीषाहान् शूरसेनान्
क्षत्रियान्युद्धदुर्मदान्। निकृत्य पृथिवीं चक्रे भीमः शोणितकर्दमां। यौधेयारट्टराजन्यान् मद्रकान्मालवानपि। प्राहिणोन्मृत्यलोका
य किरीटी निशितैः शरैः। प्रगाढमंजोगतिभिर्नाराचैरभिपीडिताः। निपेतुर्द्विरदा भूमौ विशृंगा इव पर्वताः। निकृत्तैर्लुठमानैश्च हस्तिह
स्तैस्ततस्ततः। रराज वसुधा कीर्णा विसर्पद्भिरिवोरगैः। क्षिप्तैः कनकचित्रैश्च नृपछत्रैः क्षितिर्बभौ। द्यौरिवादित्यचंद्रार्कग्रहैः कीर्णा युग
क्षये। हतप्रहरत छिंता विध्यतव्यवकृंतत। इत्यासीत्तुमुलः शब्दः शोणाश्वस्य रथं प्रति। द्रोणश्च परमक्रुद्धो वायव्यास्त्रेण संयुगे। व्यधम
त्तान्यथा वायुर्मेघानिवडुरत्ययः। ते हन्यमाना द्रोणेन पांचालाः प्राद्रवन्भयात्। पश्यतो भीमसेनस्य पार्थस्य च महात्मनः। ततः किरीटी भी
मश्च सहसा संन्यवर्त्ततां। महता रथवंशेन परिगृह्य बलं च तौ। बीभत्सुर्दक्षिणं पार्श्वमुत्तरं तु वृकोदरः। भारद्वाजं शरौघाभ्यां महद्भ्या
मभ्यवर्षतां। तौ तथा संजयाश्चैव पांचालाश्च महौजसः। अन्वगच्छन्महाराज मत्स्याश्च सहकेकयैः। तथैव तव पुत्रस्य रथोदाराः प्रहा
रिणः। महत्या सेनया सार्द्धं जग्मुर्द्रौणिरथं प्रति। ततः सा भारती सेना वध्यमाना किरीटिना। तमसा निद्रया चैव पुनरेव व्यदीर्यत। द्रोणे
वार्यमाणास्ते स्वयं तव सुतेन च। न शक्यंते महाराज योधा वारयितुं तदा। सा पांडुपुत्रस्य सुतैर्दीर्यमाणा महाचमूः। तमसा संवृते लो

द्रो०प०
१६४

केप्यद्रवस्तत्रगतोमुखी।उत्सृज्यनरशतत्रगोवाहान्स्तत्रकेचिन्नराधिप।आद्रवंतमहाराजन्भयाविष्टाःसमंततः।। ।।द्रोणपर्वणिरात्रियुद्धे।। ।।
।। ।।संजय।। ।।सोमदत्तंतुसंप्रेक्ष्यविधुन्वानंमहद्धनुः।सात्यतांवैरिणंशत्रुंबाह्लीकंकौरवाश्रयं।उवाचसूतंसंयत्तःक्रोधसंरक्तलोच
नः।सात्यकिस्त्वरयंतारंसोमदत्तायमांवह।नत्वहत्वारणेशत्रुंबाह्लीकंकौरवाधमं।निवर्तिष्येरणेसूतसत्यमेतद्वचोमम।ततःसंप्रे
षयधंतासैंधवांस्तान्महाजवान्।तुरंगमाञ्छंखवर्णान्सर्वशस्त्रातिगान्रणे।तेवहन्युयुधानंतुमनोमारुतरंहसः।यथेंद्रंहरयो
राजन्पुरादैत्यवधोद्यतं।तमापतंतंसंप्रेक्ष्यसात्वतंरभसारणे।सोमदत्तोमहाबाहुरसंभ्रांतोन्यवर्तत।विमुंचन्शरवर्षाणिपर्ज
न्यइववृष्टिमान्।छादयामासशैनेयंजलदोभास्करंयथा।असंभ्रांतश्चसमरेसात्यकिःकुरुपुंगवं।छादयामासबाणौघैःसम
तात्भरतर्षभ।सोमदत्तस्तुतंशक्त्याविव्याधरसिमाधवं।सात्यकिश्चापितंराजन्नविध्यत्सायकैःशितैः।तावन्योन्यंशरैःकृत्तौय
राजेतांनरर्षभौ।सुपुष्पैःपुष्पसमयेपुष्पिताविवकिंशुकौ।रुधिरोक्षितसर्वांगौकुरुवृष्णियशस्करौ।परस्परमवेक्षेतांदहंताविवलो
चनैः।रथमध्यस्थितौवीरौवरंतावरिमर्दनौ।घोररूपौहितावास्तांवृष्टिमंताविवांबुदौ।शरसंछिन्नगात्रौतौसर्वतःशकलीकृतौ।
श्वाविधाविवराजेंद्रदृश्येतांशरविक्षतौ।सुवर्णपुंखैर्विशिखैराचितौतौव्यराजतां।खद्योतैरिवराजेंद्रआवृषीवनस्पती।संप्रदी
पितसर्वांगौसायकैस्तौमहारथौ।अदृश्येतांरणेक्रुद्धावुल्काभिरिवकुंजरौ।ततोयुधिमहाराजसोमदत्तोमहारथः।अर्धचंद्रेण
चिच्छेदमाधवस्यमहद्धनुः।अथैनंपंचविंशत्यासायकानांसमार्पयत्।त्वरमाणस्त्वराकालेपुनश्चदशभिःशरैः।अथान्यद्ध

राम
१६४

नुरादायसात्यसात्यकिर्वेगवत्तरं।पंचभिःसायकैस्तूर्णंसोमदत्तमविध्यत्।ततोपरेणभल्लेनध्वजंचिच्छेदकांचनं।बाह्लीकस्यरणेराजन्सात्य
किःप्रहसन्निव।सोमदत्तस्तुसंभ्रांतोदृष्ट्वाकेतुंनिपातितं।शैनेयंपंचविंशत्यासायकानांसमाचिनोत्।सात्वतोपिरणेक्रुद्धःसोमदत्तस्यध
न्विनः।धनुश्चिच्छेदसमरेक्षुरप्रेणशितेनह।अथैनंरुक्मपुंखानांशतेननतपर्वणां।आचिनोद्बहुधाराजन्भग्नदंष्ट्रमिवद्विपं।अथा
न्यद्धनुरादायसोमदत्तोमहारथः।सात्यकिंछादयामासशरवृष्ट्यामहारथं।दशभिःसात्वतस्यार्थेभीमोबाह्लीकमाचिनोत्।सोम
दत्तोथसंभ्रांतःशैनेयमवधीच्छरैः।ततस्तुसात्वतस्यार्थेभैमसेनिर्नवंदृढं।मुमोचपरिघंघोरंसोमदत्तस्यमूर्द्धनि।तमापतंतंवेगेनपरि
घंघोरदर्शनं।द्विधाचिच्छेदसमरेप्रहसन्निवकौरवः।सपपातद्विधाछिन्नआयसःपरिघोमहान्।महीधरस्येवमहच्छिरोवज्रविदारि
तं।ततस्तुसायकैराजन्सोमदत्तस्तुसंयुगे।धनुश्चिच्छेदभल्लेनहस्तावापंचपंचभिः।चतुर्भिश्चशरैस्तूर्णंचतुर्भिस्तुरगोत्तमान्।समी
पंप्रेषयामासप्रेतराजस्यभारत।सारथेश्चशिरःकायाद्भल्लेननतपर्वणा।जहाररथशार्दूलःप्रहसन्शिनिपुंगवः।ततःशरंमहाघो
रंज्वलंतमिवपावकं।मुमोचसात्वतोराजन्स्वर्णपुंखंशिलाशितं।सविमुक्तोबलवताशैनेयेनशरोत्तमः।घोरस्तस्योरसिविभोनिपप
ताशुभारत।सोतिविद्धोबलवतासात्वतेनसुरोपमः।सोमदत्तोमहाबाहुःपपातचमहारथः।तंदृष्ट्वानिहतंतत्रसोमदत्तंमहारथाः।म
हतारथवेगेनयुयुधानमुपाद्रवन्।छाद्यमानंशरैर्दृष्ट्वायुयुधानंयुधिष्ठिरः।महत्यासेनयासार्द्धंद्रोणानीकमुपाद्रवत्।ततोयुधि
ष्ठिरःक्रुद्धःतावकानांमहद्बलं।शरैर्विद्रावयामासभारद्वाजस्यपश्यतः।सैन्यानिद्रावयंतंतंद्रोणोदृष्ट्वायुधिष्ठिरं।अभिदुद्राववे

गेन क्रोधसंरक्तलोचनः। ततस्तु निशितैर्बाणैः पार्थं विव्याध सप्तभिः। युधिष्ठिरोपि संक्रुद्धः प्रतिविव्याध पंचभिः। सोतिविद्धो महाबाहुः
सृक्किणी परिसंलिहन्। युधिष्ठिरस्य चिच्छेद ध्वजं कार्मुकमेव च। सच्छिन्नधन्वा त्वरितस्त्वराकाले नृपोत्तम। अन्यदादत्त वेगेन का
र्मुकं वेगवद्दृढं। ततः शरसहस्रेण द्रोणं विव्याध मारिष। साश्वसूतध्वजरथं तदद्भुतमिवाभवत्। ततो मुहूर्तं व्यथितः शरघातप्रपीडितः।
निषसाद रथोपस्थे द्रोणो भरतसत्तम। प्रतिलभ्य ततः संज्ञां निश्वसन्नुरगो यथा। क्रोधेन महताविष्टो वायव्यास्त्रमथासृजत्। अ
संभ्रांतस्तदा पार्थो धनुराक्रम्य वीर्यवान्। तदस्त्रमस्त्रेण रणे स्तंभयामास भारत। चिच्छेद च धनुस्तस्य ब्राह्मणस्य तु पांडवः। अथान्य
द्धनुरादाय द्रोणः क्षत्रियमर्दनः। तदप्यस्य शितैर्भल्लैश्चिच्छेद कुरुपुंगवः। ततोब्रवीद्वासुदेवः कुंतीपुत्रं युधिष्ठिरं। युधिष्ठिर महाबाहो
यत्त्वां वक्ष्यामि तच्छृणु। इच्छति स्म महाबाहो ग्रहणं तव वै गुरुः। नानुरूपमहं मन्ये युद्धमद्य त्वया सह। योस्य सृष्टो विनाशाय स एनं श्वोह
निष्यति। परिवर्त्य गुरुं याहि यत्र राजा सुयोधनः। राज्ञा च राजा योद्धव्यो न राज्ञो वधमिष्यते। तत्त्वं व्रजस्व कौंतेय हस्त्यश्वरथसंयुतः।
यावन्मात्रेण च मया सहायेन धनंजयः। भीमश्च रथशार्दूलो युध्यते कौरवैः सह। वासुदेववचः श्रुत्वा धर्मराजो युधिष्ठिरः। मुहूर्तं
चिंतयित्वा तु ततो दारुणमाहवं। प्रायाद्द्रुतममित्रघ्नो यत्र भीमो व्यवस्थितः। व्यधिनिघ्नंस्तावकान्योधान्व्यादितास्य इवांतकः। रथघो
षेण महता नादयन्वसुधातलं। पर्जन्य इव घर्मांते नादयन्वै दिशो दश। भीमस्य निघ्नतः शत्रून्पार्ष्णिं जग्राह पांडवः। तमसा संवृ
ते लोके रजसा च महीपते। नापश्यंत रणे योधाः परस्परमवस्थिताः। अनुमानेन संज्ञाभिर्युद्धं तद्ववृते महत्। नरनागाश्वमथनं पर

मं लोमहर्षणं। द्रोणकर्णकृपा वीरा भीमपार्षतसात्वताः। अन्योन्यं क्षोभयामासुः सैन्यानि नृपसत्तम। वध्यमानानि सैन्यानि समंतात्तैर्महा
रथैः। तमसा रजसा चैव समंताद्विप्रदुद्रुवुः। ते सर्वतो विद्रवंतो योधा वित्रस्तचेतसः। अहन्यंत महाराज धावमानाश्च संयुगे। महारथ
सहस्राणि जघ्नुरन्योन्यमाहवे। अंधे तमसि मूढानि पुत्रस्य तव मंत्रिते। ततः सर्वाणि सैन्यानि सेनागोपाश्च भारत। व्यमुह्यं
त रणे तत्र तमसा संवृते सति॥ ॥धृतराष्ट्र॥ ॥तेषां संलोड्यमानानां पांडवैर्हततेजसां। अंधे तमसि मग्नानामासीत्को वै गति
स्तदा। कथं प्रकाशस्तेषां वा मम सैन्येषु वा पुनः। बभूव लोके तमसा तथा संजय संवृते॥ ॥संजय॥ ॥ततः सर्वाणि सैन्यानि हत
शिष्टानि यानि वै। सेनागोप्तॄन्समादिश्य पुनर्व्यूहमकल्पयत्। द्रोणः पुरस्ताज्जघने तु शल्यस्तथा द्रौणिः पार्श्वतः सौबलश्च।
स्वयं तु सर्वाणि बलानि राजन्राजाभ्ययाज्जोपयन्वै निशायां। उवाच सर्वांश्च पदातिसंघान्दुर्योधनः पार्थिव सांत्वपूर्वं। उत्सृज्य
सर्वे परमायुधानि गृह्णीत यूयं ज्वलितान्प्रदीपान्। ते नोदिताः पार्थिवसत्तमेन ततः प्रहृष्टा जगृहुः प्रदीपान्। दिदेवताश्च
समापतंत दृष्ट्वैव दीपांस्तु सुगंधतैलान्। विरोचमानो नारदपर्वताभ्यां संबोध्यमानाः कुरुपांडवार्थे। सा भूय एव ध्वजिनी विभ
क्ता व्यरोचयन्त्वैः प्रभायां निशायां। महाधनैरात्नरपैराभरणैश्च दिव्यैः शस्त्रैः प्रदीप्तैरभिसंपतद्भिः। रथे रथे पंच प्रदीपिकाश्च गजे गजे त्रि
त्रयं दीपिकानां। प्रत्येकमेकश्च महाप्रदीपः कृतस्तु तैः पांडवकौरवेयैः। क्षणेन सर्वे विहितास्ततस्ते प्रदीपा व्यादीपयंश्च ध्वजिनीं तदा तु।
सर्वाश्च सेना व्यतिसेव्यमानाः पदातिभिः पावकतैलहस्तैः। प्रकाश्यमाना ददृशुर्निशायां यथांतरिक्षे ज्वलदात्तविद्भिः। प्रकाशिता

द्रो॰प॰
१६६

यां तु तथा ध्वजिन्यां द्रोणो ग्रतुल्यः प्रतपन्समंतात्॥ रराज राजेंद्र सुवर्णवर्मा मध्यं गतः सूर्य इवांशुमाली॥ जांबूनदेष्वाभरणेषु चैव निष्केषु शुभ्रे
ष्विषु शरावरेषु॥ पीतेषु सर्वेषु च पावकस्तु स्य प्रभासयंस्तत्र ततो बभूवुः॥ गदाश्च शैक्याः परिघाश्च शुभ्रा रथेषु शक्त्यश्च विवर्तमानाः॥ प्रतिप्रभार
श्मिभिराजमीढ पुनः पुनः संजनयंति दीप्ताः॥ छत्राणि बालव्यजनानि षंगा दीप्ता महोल्काश्च तथैव राजन्॥ व्याघूर्णमानाश्च सुवर्णमाला व्य
यच्छतां तत्र तदा विरेजुः॥ शस्त्रप्रभाभिश्च विराजमानं दीपप्रभाभिश्च बलं त्वदीयं॥ प्रकाशितं चाभरणप्रभाभिर्भृशं प्रकाशो नृपते बभूव॥
पीतानि शस्त्राण्यसृगुक्षितानि वीरावधूतानि सुनिर्मलानि॥ दीप्तां प्रभां प्राजनयंत तिग्मं तत्र तपात्यये विद्युदिवांतरिक्षे॥ प्रकंपितानामभिघात
वेगैरभिघ्नतां चापततां जवेन॥ वक्त्राण्यशोभंत तदा नराणां वाय्वीरितानीव महांबुजानि॥ महावने तमसि इव प्रदीप्ते यथा प्रभा भास्करस्यापि नश्ये
त्॥ तथा तवासीद्ध्वजिनी प्रदीप्ता महाभये भारत भीमरूपे॥ तत्संप्रदीप्तं बलमस्मदीयं निशाम्य पार्थास्त्वरितास्तथैव॥ सर्वेषु सैन्येषु पदातिसंघानचो
दयंस्ते च चक्रुः प्रदीपान्॥ गजे गजे सप्त कृताः प्रदीपा रथे रथे चैव दश प्रदीपाः॥ द्वावश्वपृष्ठे परिपार्श्वतोन्ये ध्वजेषु चान्ये जघनेषु चान्ये॥ सेनासु
सर्वासु च पार्श्वतोन्ये पश्चात्पुरस्ताच्च समंततश्च॥ मध्ये तथान्ये ज्वलिताग्रहस्ता व्यदीपयन्पांडुसुतस्य सेनां॥ तेन प्रदीप्तेन तथा प्रदीप्तं बलं तदा
सीद्बलवर्द्धनेन॥ भाः कुर्वता नानुमतानलेन दिवाकरेणाग्निरिवाभितप्तः॥ सैन्यमध्ये ज्वलिताग्निहस्ताः सेनाद्वये चापि नरा विरेजुः॥ सर्वेषु सैन्येषु प
दातिसंघा व्यामिश्रिता हस्तिपदाश्च भृत्यैः॥ तयोः प्रभाः पृथिवीमंतरिक्षं सर्वा व्यतिक्रम्य दिशश्च वृद्धाः॥ तेन प्रकाशेन भृशं प्रकाशं बभूव तेषां तव चैव से
न्यं॥ तेन प्रकाशेन दिवं गतेन संतापिता देवगणाश्च राजन्॥ गंधर्वयक्षोरसिद्धसंघाः समागमन्नप्सरसश्च सर्वाः॥ तद्देवगंधर्वसमाकुलं च यक्षा
सुरेंद्राप्सरसां गणैश्च॥ हतैश्च वीरैर्दिवमारुहद्भिरायोधनं दिव्यकल्पं बभूव॥ रथाश्वनागाकुलदीपदीप्तं संरब्धयोधाहतविद्रुताश्वं॥ महद्बलं व्यू

राम
१६६

हरथाश्वनागं स्फारास्फरव्यूहसमं बभूव। नच्छक्तिसंघाकुल चंडवातं महारथाभ्रं रथवाजिघोऽषं। शस्त्रौघवर्षं रुधिरांबुधारं निशिप्रवृत्तं नरदेवयुद्धं।
तस्मिन्महाग्निप्रतिमो महात्मा संतापयन्पांडवान्विप्रमुख्यः। गभस्तिभिर्मध्यगतो यथार्को वर्षात्यये तद्ददभून्नरेंद्र॥ ॥इति महाभारते द्रोण
पर्वणि रात्रियुद्धे दीपप्रबोधने॥ ६० ॥संजय उवाच॥ ॥प्रकाशिते तथा लोके रजसा च तमोवृते। समाजग्मुरथो वीराः परस्परवधैषिणः॥ परस्प
मुदीक्षंतः परस्परकृतागसः। प्रदीपानां सहस्रैश्च दीप्यमानैः समंततः। विरराज तदा भूमिर्द्योर्ग्रहैरिव भारत। उल्काशतैः प्रज्वलितै रणभूमिर्व्य
राजत। दह्यमानेव लोकानामभावे वै वसुंधरा। दीप्यंते वै दिशः सर्वाः प्रदीपैस्तैः समंततः। वर्षाप्रदोषे खद्योतैर्वृता वृक्षा इवाबभुः। असज्जंत ततो
वीरा वीरेष्वेव पृथक्पृथक्। नागा नागैः समाजग्मुस्तुरगाः सह वाजिभिः। रथा रथवरैरेव समाजग्मुर्मुदायुताः। तस्मिन्रात्रिमुखे
घोरे पुत्रस्य तव शासनात्। चतुरंगस्य सैन्यस्य संपातः सुमहानभूत्। ततोर्जुनो महाराज कौरवाणामनीकिनीं। व्यधमत्त्वरयायु
क्तः क्षपयन्सर्वपार्थिवान्॥ ॥धृतराष्ट्र॥ ॥तस्मिन्प्रविष्टे संरब्धे मम पुत्रस्य वाहिनीं। अमृष्यमाणे दुर्द्धर्षे किंवआसीन्मनस्त
दा। किममन्यंत सैन्यानि प्रविष्टे शत्रुतापने। दुर्योधनश्च किं कृत्यं प्राप्तकालममन्यत। के चैनं समरे वीराः प्रत्ययुध्यन्नरिंद
मं। केरक्षन्दक्षिणं चक्रं के च द्रोणस्य सव्यतः। के पृष्ठतश्चाभ्यभवन् भूता वीरस्य युध्यतः। के पुरस्तादगच्छंत निघ्नंतः शात्र
वान्रणे। यत्प्राविशन्महेष्वासः पांचालानपराजितः। नृत्यन्निव नरव्याघ्रो रथमार्गेषु वीर्यवान्। ददाह च शरैर्द्रोणः पांचालानां रथव्रजं।
धूमकेतुरिव क्रुद्धः स कथं मृत्युमेयिवान्। अभ्युदीर्णान्परांश्चैव कथयस्यपराजितान्। हृष्टानुदीर्णान्संग्रामे न तु संजय मामकान्।

॥ ॥संजय॥ ॥द्रोणस्यमतमाज्ञाययोद्धुकामस्यतांनिशां।दुर्योधनोमहाराजवश्यान्भ्रातॄनभाषत।विचित्रंचित्रसेनंचसहपार्श्वेचतथैवच।
दुर्मर्षदीर्घबाहुंचयेचतस्यपदानुगाः।द्रोणंयत्ताःपराक्रांतंसर्वेरक्षंत्वनुपृष्ठतः।हार्दिक्योदक्षिणंपार्श्वंशल्यश्चैवोत्तरंतथा।त्रिगर्तानांचयेशूरा
हतशिष्टामहारथाः।गच्छध्वंब्राह्मणोयत्रतत्रतान्नित्यनोदयत्।आचार्योहिभृशंयत्तोभृशंयत्ताश्चपांडवाः।तंरक्षतसुसंयत्तानिघ्नंतःशात्रवान्रणे।
द्रोणोहिबलवान्युद्धेक्षिप्रहस्तःपराक्रमी।निर्जयेत्त्रिदशान्सर्वान्किमुपार्थान्ससोमकान्।तेयूयंसहिताःसर्वेभृशंयत्तामहारणे।द्रोणंरक्षतपांचा
ल्याद्धृष्टद्युम्नान्महारथात्।पांडवेयेषुसैन्येषुयोधंपश्याम्यहंनतं।योजयेत्तरणेद्रोणंधृष्टद्युम्नादृतेनृपाः।तस्यसर्वात्मनामन्येभारद्वाजस्यरक्ष
णं।सहगुप्तःसोमकान्हन्यात्संजयांश्चसमागतान्।संजयेष्वथसर्वेषुनिहतेषुचमूमुखे।धृष्टद्युम्नंरणेद्रौणिर्नाशयिष्यत्यसंशयं।तथार्जुनंर
णेकर्णोविजेष्यतिनसंशयः।भीमसेनमहंचापियुद्धेजेष्यामिभूमिपाः।सोयंममजयोव्यक्तंदीर्घकालंभविष्यति।तस्माद्रक्षतसंग्रामेद्रोणमेवमहा
रथाः।इत्युक्त्वाभारतश्रेष्ठःपुत्रोदुर्योधनस्तव।व्यादिदेशततःसैन्यंतस्मिंस्तमसिदारुणे।ततःप्रववृतेयुद्धंरात्रौतद्भरतर्षभ।उभयोःसेनयोर्घोरंवि
जयंप्रतिकांक्षिणोः।अर्जुनःकौरवंसैन्यमर्जुनंसर्वकौरवाः।नानाशस्त्रसमावापैरन्योन्यंपर्यपीडयत्।द्रौणिःपांचालराजानंभारद्वाजश्चसंजया
न्।छादयामासतुःसंख्येशरैःसंनतपर्वभिः।पांडुपांचालसैन्यानांकौरवाणांचमारिष।आसीन्निष्टानकोघोरोनिघ्नतामितरेतरं।नैवास्मा
भिर्नपूर्वैश्चदृष्टपूर्वंतथाविधं।युद्धंयादृशमेवासीत्तांरात्रिंसुमहाभयां॥ ॥इतिमहाभारतेद्रोणपर्वणिरात्रियुद्धे॥ ॥संजयउवाच॥ ॥
वर्तमानेतथारौद्रेरात्रियुद्धेसुदारुणे।सर्वभूतक्षयकरेधर्मपुत्रोयुधिष्ठिरः।अब्रवीत्पांडवांश्चैवपांचालांश्चससोमकान्।अभ्यद्रवतगच्छध्वं
द्रोणमेवजिघांसया।राज्ञस्तेवचनाद्राजन्पांचालाःसोमकास्तथा।द्रोणमेवाभ्यवर्तंतनदंतोभैरवान्रवान्।तान्वयंप्रतिगर्जंतःप्रत्युद्या

मत्त्वमर्षिताः। यथाशक्ति यथोत्साहं यथासत्त्वं च संयुगे। कृतवर्मा च हार्दिक्यो युधिष्ठिरमुपाद्रवत्। द्रोणं प्रति जिघांसंतं मत्तो मत्तमिव द्विपं। शै
नेयं शरवर्षाणि विकिरंतं समंततः। अभ्ययात्कौरवो राजन् भूरिः संग्राममूर्द्धनि। सहदेवं तथा यांतं रथेन रथिनां वरं। स्वयं दुर्योधनो युद्धे प्र
तीपं मत्स्यमावजत्। नकुलं च युधां श्रेष्ठं सर्वयुद्धविशारदं। द्रोनुनिः ७ सौबलो राजेन्वारयामास वैतवः। कृपः शारद्वतो राजन् वारया
मास धन्विनं। शिखंडिनमथायांतं रथेन रथिनां वरं। प्रतिविंध्यमथायांतं मयूरसदृशैर्हयैः। दुःशासनो महाराज यत्तो यत्तमवारयत्।
भैमसेनिमथायांतं मायाशतविशारदं। अश्वत्थामा पितुर्मानं कुर्वाणः प्रत्यषेधयत्। द्रुपदं वृषसेनस्तु ससामात्यं सपदानुगं। वारयामास
समरे द्रोणप्रेप्सुं महारथं। विराटं द्रुतमायांतं द्रोणस्य निधनं प्रति। मद्रराजः सुसंक्रुद्धो वारयामास भारत। शतानीकमथायांतं नाकुलिं
रभसा द्रुणे। चित्रसेनोऽस्करोधाशु शरैर्द्रोणवधैषिणं। अर्जुनं च युधां श्रेष्ठं प्रद्रवंतं महारथं। अलंबुषो महाराज राक्षसेंद्रोऽन्यवारयत्।
तथा द्रोणं महेष्वासं निघ्नंतं शात्रवान्रणे। धृष्टद्युम्नोऽथ पांचाल्यो धृष्टरूपमवारयत्। तथा तान्पांडुपुत्राणां समायातान्महारथान्। ताव
का रथिनो राजन् वारयामासुरोजसा। गजारोहा गजारोहैः सन्निपत्य महामृधे। योधयंतो व्यदृश्यंत शतशोऽथ सहस्रशः। निशीथे तु
गा राजन्नाद्रवंतः परस्परं। समदृश्यंत वेगेन पक्षवंत इवाद्रयः। सादिनः सादिभिः सार्द्धं प्रासशक्त्यृष्टिपाणयः। समागच्छन्महाराज वि
नदंतः पृथक्पृथक्। वीराश्च बहवस्तत्र समगाजघ्नुः परस्परं। गदाभिर्मुशलैश्चैव नानाशस्त्रैश्च भारत। कृतवर्मा तु हार्दिक्यो धर्मपुत्रं यु
धिष्ठिरं। वारयामास संक्रुद्धो वेलेवोद्धतमर्णवं। युधिष्ठिरस्तु हार्दिक्यं विध्वा पंचभिराशुगैः। पुनर्विव्याध विंशत्या तिष्ठ तिष्ठेति चाब्रवी
त्। कृतवर्मा तु संक्रुद्धो धर्मपुत्रस्य मारिष। धनुश्चिछेद भल्लेन तं च विव्याध सप्तभिः। अथान्यद्धनुरादाय धर्मपुत्रो युधिष्ठिरः। हार्दिक्यं

द्रो०प०
१६८

दशभिर्बाणैर्बाह्वोरुरसिचार्पयत्।माधवस्तुरणेविद्धोधर्मपुत्रेणभारत।प्राकंपतचरोषेणसप्तभिश्चार्पयच्छरैः।तस्यपार्थोधनुश्छि
त्वाहस्तावापंनिकृत्यच।प्राहिणोन्निशितान्भल्लान्पंचराजन्शिलाशितान्।तेतस्यकवचंभित्वाहेमचित्रंमहाधनं।प्राविशन्धरणीं
भित्वावल्मीकमिवपन्नगाः।अक्ष्णोर्निमिषमात्रेणसोन्यदादायकार्मुकं।विव्याधपांडवंषष्ट्यासूतंचनवभिःशरैः।तस्यशक्ति
ममेयात्मापांडवोभुजगोपमां।चिक्षेपभरतश्रेष्ठोरथेन्यस्यमहद्धनुः।साहेमचित्रामहतीपांडवेयेननोदिता।निर्भिद्यदक्षिणंबाहुंप्रा
विशद्धरणीतलं।एतस्मिन्नेवकालेतुगृह्यपार्थोमहाधनुः।हार्दिक्यंछादयामाससशरैःसन्नतपर्वभिः।ततस्तुसमरेशूरोवृष्णीनां
प्रवरोरथी।व्यश्वसूतध्वजंचक्रेनिमेषार्द्धाद्युधिष्ठिरं।ततस्तुपांडवोज्येष्ठःखड्गचर्मसमाददे।तमस्यनिशितैर्बाणैर्व्यधमन्माधवो
रणे।तोमरंतुततोगृह्यस्वर्णदंडंदुरासदं।प्रेषयत्समरेतूर्णंहार्दिक्यस्यमहात्मनः।तमापतंतंसहसाधर्मराजभुजच्युतं।द्विधाचिच्छे
दहार्दिक्यःकृतहस्तःस्मयन्निव।ततःशरशतेनाजौधर्मपुत्रमवाकिरत्।कवचंचास्यसंक्रुद्धःशरैस्तीक्ष्णैरदारयत्।हार्दिक्यशरसं
छिन्नंकवचंतन्महात्मनः।व्यशीर्यततरणेराजंस्ताराजालमिवांबरात्।सच्छिन्नधन्वाविरथःशीर्णवर्माशरार्दितः।अपायासीद्रणा
तूर्णंधर्मपुत्रोयुधिष्ठिरः।कृतवर्मातुनिर्जित्यधर्मपुत्रंयुधिष्ठिरं।पुनर्द्रोणस्यजुगुपेचक्रमेवमहाबलः॥ ॥महाभारतेद्रोणपर्वणि॥६१॥
॥ ॥संजय॥ ॥भूरिस्तुसमरेराजन्शैनेयंरथिनांवरं।आपतंतमपाषेधत्प्रपाणादिवकुंजरं।अथैनंसात्यकिःक्रुद्धःपंचभिर्निशि
तैःशरैः।विव्याधहृदयेतूर्णंप्रावर्त्ततस्यशोणितं।अथैनंकौरवोयुद्धेशैनेयंयुद्धदुर्मदं।दशभिर्विशिखैस्तीक्ष्णैरविध्यत्सभुजांतरे।ता
वन्योन्यंमहाराजततक्षातेशरैर्भृशं।क्रोधसंरक्तनयनौहर्षाद्विस्फार्यकार्मुके।ततोयोरासीन्महाराजशस्त्रवृष्टिःसुदारुणा।

राम
१६८

क्रुद्धयोः सायकमुचोर्यमांतककनिकाययोः। तावन्योन्यं महाराज प्रछाद्य समरे स्थितौ। मुहूर्त्तं चैव तद्युद्धं समरूपमिवाभवत्। ततः
क्रुद्धो महाराज द्रौणेयः प्रहसन्निव। धनुश्चिछेद समरे कौरवस्य महात्मनः। अथैनं छिन्नधन्वानं वाजिनिर्निशितैः शरैः। विव्याध हृ
दये तूर्णं तिष्ठ तिष्ठेति चाब्रवीत्। सोतिविद्धो बलवता शत्रुणा शत्रुतापनः। धनुरन्यत्समादाय सात्वतं प्रत्यविध्यत। स विध्वा
सात्वतो बाणेस्त्रिभिरेव विशांपते। धनुश्चिछेद भल्लेन सुतीक्ष्णेन हसन्निव। छिन्नधन्वा महाराज सात्यकिः क्रोधमूर्छितः। प्रजहा
र महावेगां शक्तिं तस्य महोरसि। स तु शक्ति विभिन्नांगो निपपात रथोत्तमात्। लोहितांगइवाकाशाद्दीप्तरश्मिर्यदृच्छया। तं तु दृष्ट्वा
हतं शूरमश्वत्थामा महारथः। अभ्यधावत वेगेन द्रौणेयं प्रति संयुगे। तिष्ठ तिष्ठेति चाभाष्य द्रौणेयं स नराधिप। अभ्यवर्षच्छरौघै
र्णमेरुं वृष्ट्या यथांबुदः। तमापतंतं सरथं द्रौणेयस्य रथं प्रति। घटोत्कचोब्रवीद्राजन्नादं मुक्त्वा महारथः। तिष्ठ तिष्ठ न मे जीवन्द्रोण
पुत्र गमिष्यसि। एष त्वां निहनिष्यामि महिषं स्कंदराडिव। युद्धश्रद्धामहं तेद्य विनेष्यामि रणाजिरे। इत्युक्त्वा रोषताम्राक्षो राक्षसः
परवीरहा। द्रोणिमभ्यद्रवत्क्रुद्धो गजेंद्रमिव केसरी। रथाक्षमात्रैरिषुभिरभ्यवर्षद्घटोत्कचः। रथिनामृषभं द्रौणिं धाराभिरि
व तोयदः। शरवृष्टिं तु तां प्राप्तां शरैराशीविषोपमैः। शातयामास समरे तरसा द्रौणिरुत्स्मयन्। ततः शरशतैस्तीक्ष्णैर्मर्मभेदिभिरा
शुगैः। समाचिनोद्राक्षसेंद्रं घटोत्कचमरिंदमः। स शरैराचितस्तेन राक्षसो रणमूर्द्धनि। व्यराजत महाराज श्वाविच्छल्लितो यथा। त
तः क्रोधसमाविष्टो भैमसेनिः प्रतापवान्। शरैरवचकर्त्तौजो वज्राशनिसमस्वनैः। क्षुरप्रैरर्द्धचंद्रैश्च नाराचैः साञ्जलीमुखैः। वराह

कर्णनालीकैस्तीक्ष्णैश्चापि विकर्णिभिः ।। तां शस्त्रवृष्टिमतुलां वज्राशनिसमस्वनां । पतंतीमुपरि क्रुद्धां द्रौणिरव्यथितेंद्रियः ।। सुदुःस
हां शरैस्तीक्ष्णैर्दिव्यास्त्रेणापि मंत्रितैः । व्यधमत्स महातेजा महाभ्राणीव मारुतः ।। ततोंतरिक्षे बाणानां संग्रामोन्य इवाभवत् । घोररूपो
महाराज योधानां हर्षवर्द्धनः ।। ततोस्त्रसंघर्षकृतैर्विस्फुलिंगैः समंततः । बभौ निशामुखे व्योम खद्योतैरिव संवृतं । स मार्गणगणैर्द्रौ
णिर्दिशः प्रच्छाद्य सर्वशः । प्रियार्थं तव पुत्राणां राक्षसं समवाकिरत् ।। ततः प्रववृते युद्धं द्रौणिराक्षसयोर्मृधे । विगाहे रजनीमध्ये श
क्रप्रह्लादयोरिव । ततो घटोत्कचो बाणैर्दशभिर्द्रौणिमाहवे । जघानोरसि संक्रुद्धः कालज्वलनसन्निभैः ।। स भृशं तैरभ्यायतैर्वि
द्धो राक्षसेन महाबलः । चचाल समरे द्रौणिर्वायुनाचय (?) यथा द्रुमः ।। प्रतिलभ्य ततः संज्ञामश्वत्थामा महाबलः । धनुः प्रपीड्य वा
मेन करेणामित्रकर्षणः ।। मुमोचाकर्णपूर्णेन धनुषा शरमुत्तमं । यमदंडोपमं घोरमुद्दिश्याशु घटोत्कचे । भित्त्वा सो हृदयं
तस्य राक्षसस्येसे शरोत्तमः । विवेश वसुधामुग्रः सपुंखः पृथिवीपते । सोतिविद्धो महाराज रथोपस्थ उपाविशत् । राक्षसेंद्रः
स बलवान्द्रौणिना रणमानिना । दृष्ट्वा विमूढं हैडंबिं सारथिस्तं रणाजिरात् । द्रौणेः सकाशात्संभ्रांतमपानिन्ये त्वरान्वितः ।
तथा तु समरे विद्ध्वा राक्षसेंद्रं घटोत्कचं । ननाद सुमहानादं द्रोणपुत्रो महाबलः । पूजितस्तव पुत्रैश्च सर्वयोधैश्च भारत । वपुषा
प्रतिजज्वाल मध्याह्न इव भास्करः । भीमसेनं तु युध्यंतं भारद्वाजरथं प्रति । स्वयं दुर्योधनो राजा प्रत्यविध्यच्छितैः शरैः । तं भीमसेनो
नवभिः शरैर्विव्याध मारिष । दुर्योधनोपि विंशत्या शराणां प्रत्यविध्यत । तौ सायकैरवच्छिन्नौ व्यदृश्येतां रणाजिरे । मेघजालसमा

छिन्नौ नभसीवेंदुभास्करौ। अथ दुर्योधनो राजा भीमं विव्याध पत्रिभिः। पंचभिर्भरतश्रेष्ठ तिष्ठ तिष्ठेति चाब्रवीत्। तस्य भीमो धनुश्छित्वा
ध्वजं च नवभिः शरैः। विव्याध कौरवश्रेष्ठं नवत्या नतपर्वणां। ततो दुर्योधनः क्रुद्धो धनुरन्यन्महत्तरं। गृहीत्वा कौरवश्रेष्ठो भीमसेनं सितैः शरैः।
अपीडयद्रणे राजन् पश्यतां सर्वधन्विनां। तान्निहत्य शरान् भीमो दुर्योधनधनुश्च्युतान्। कौरवं पंचविंशत्या क्षुद्रकाणां समार्पयत्। दुर्यो
धनस्तु संक्रुद्धो भीमसेनस्य भारत। क्षुरप्रेण धनुश्छित्वा दशभिः प्रत्यविध्यत। अथान्यद्धनुरासाद्य भीमसेनो महाबलः। विव्याध नृ
पतिं तूर्णं सप्तभिर्निशितैः शरैः। तदप्यस्य धनुः क्षिप्रं चिच्छेद लघुहस्तवान्। द्वितीयं च तृतीयं च चतुर्थं पंचमं तथा। आत्तमात्तं महाराज
भीमस्य धनुराच्छिनत्। तव पुत्रो महाराज जितकाशी मदोत्कटः। स तदा छिद्यमानेषु कार्मुकेषु पुनः पुनः। शक्तिं चिक्षेप समरे सर्व
पारसवीं शुभां। अप्राप्तामेव तां शक्तिं त्रिधा चिच्छेद कौरवः। पश्यतः सर्वलोकस्य भीमस्य च महात्मनः। ततो भीमो महाराज गदां गुर्वीं
महाप्रभां। चिक्षेपाविध्य वेगेन दुर्योधनरथं प्रति। ततः सा सहसा वाहान् पुत्रस्य तव संयुगे। सारथिं च गदा गुर्वी ममर्द भरतर्षभ। पुत्रस्तु
तव राजेंद्र रथं हेमपरिष्कृतं। आप्लुतः सहसा यानं नंदकस्य महात्मनः। ततो भीमो हतं मत्वा तव पुत्रं महारथं। सिंहनादं महच्चक्रे तर्जयन्निव कौ
रवान्। तावकाः सैनिकाश्चापि मेनिरे निहतं नृपं। ततो विचुक्रुशुः सर्वे नेहाहेति समंततः। तेषां तु निनदं श्रुत्वा त्रस्तानां सर्वधन्विनां। भीमसे
नस्य नादं च श्रुत्वा राजन् महात्मनः। ततो युधिष्ठिरो राजा हतं मत्वा सुयोधनं। अभ्यवर्तत वेगेन यत्र पार्थो वृकोदरः। पांचालाः केकया मत्स्याः
संजयाश्च विशांपते। सर्वोद्योगेनाभिजग्मुर्द्रोणमेव युयुत्सया। तत्रासीत्सुमहद्युद्धं द्रोणस्यापि परैः सह। घोरे तमसि मग्नानां निघ्नतामितरे
तरं॥ ॥इति महाभारते द्रोणपर्वणि रात्रियुद्धे॥ ६२॥ संजय॥ ॥सहदेवमथायांतं द्रोणमेव विशांपते। कर्णो वैकर्तनो युद्धे वारयामास सं

रत।सहदेवस्तुराधेयंविव्याधनवभिराशुगैः।पुनर्विव्याधदशभिर्निशितैर्नतपर्वभिः।सारथिंचास्यभल्लेनहृदिचैनमताडयत्।तंकर्णःप्र
तिविव्याधशतेननतपर्वणां।सज्यंचास्यधनुःक्षिप्रंचिच्छेदलघुहस्तवत्।ततोन्यद्धनुरादायमाद्रीपुत्रःप्रतापवान्।कर्णंविव्याधविंश
त्यातदद्भुतमिवाभवत्।तस्यकर्णोहयान्हत्वाशरैःसन्नतपर्वभिः।सारथिंचास्यभल्लेनशरैर्निन्येयमक्षयं।विरथःसहदेवस्तुखड्गंचर्म
समाददे।तदप्यस्यशरैःकर्णोहत्वाभूमावपातयत्।ततोगुर्वींमहाघोरांहेमचित्रांमहागदां।प्रेषयामाससमरेवैकर्तनरथंप्रति।तामा
पतंतींसहसासहदेवप्रचोदितां।व्यष्टंभयच्छरैःकर्णोभूमौचैनामपातयत्।गदांविनिहतांदृष्ट्वासहदेवस्त्वरान्वितः।शक्तिंचिक्षेपकर्णा
यतामप्यस्याच्छिनच्छरैः।ससंभ्रमस्ततस्तूर्णमवप्लुत्यरथोत्तमात्।सहदेवोमहाराजदृष्ट्वाकर्णंव्यवस्थितं।रथचक्रंततोगृह्यमुमो
चाधिरथिंप्रति।तमापतंतंसहसाकालचक्रमिवोद्यतं।शरैरनेकसाहस्रैरच्छिनत्सूतनंदनः।तस्मिंस्तुवितथेचक्रेकृतेतेनमहात्मना।
ईषादंडकयोक्त्रांश्चयुगानिविविधानिच।हस्त्यंगानितथाश्वांश्चमृदितान्पुरुषान्बहून्।चिक्षेपकर्णमुद्दिश्यकर्णस्तान्व्यधमच्छरैः।सनि
रायुधमात्मानंज्ञात्वामाद्रवतीसुतः।वार्यमाणश्चविशिखैःसहदेवोरणंजहौ।तमभिद्रुत्यराधेयोमुहूर्त्ताद्भरतर्षभ।अब्रवीत्प्रहसन्वाक्यं
सहदेवंविशांपते।मायुध्यस्वरणेवीरविशिष्टैरथिभिःसह।सदृशैर्युध्यमाद्रेयवचोमेमाविशंकिथाः।अथैनंधनुषोग्रेणतुदन्भूयोब्रवीद्व
चः।एषोर्जुनोरणेतूर्णंयुध्यतेकुरुभिःसह।तत्रगच्छस्वमाद्रेयगृहंवायदिमन्यसे।एवमुक्त्वाततःकर्णोरथेनरथिनांवरः।आयात्पांचालपां
डूनांसैन्यानिप्रदहन्निव।वधप्राप्तंतुमाद्रेयंनावधीत्समरेरिहा।कुंत्याःस्मृत्वावचोराजन्सत्यसंधोमहारथः।सहदेवस्ततोराजन्विमनाः
शरपीडितः।कर्णवाक्शरतप्तश्चजीवितान्निरविद्यत।आरुरोहरथंचापिपांचालस्यमहात्मनः।जनमेजयस्यसमरेत्वरायुक्तोम

हारथः। विराटं तु सहानीकं द्रोणार्थे द्रुतमागतं। मद्रराजः शरौघेण छादयामास धन्विनं। तयोः समभवद्युद्धं समरे दृढधन्विनोः। यादृशं
ह्यभवद्राजन् जंभवासवयोः पुरा। मद्रराजो महाराज विराटं वाहिनीपतिं। आजघ्ने त्वरितं तीक्ष्णैः शतेन नतपर्वणां। प्रतिविव्याध तं राजन्
नवभिर्निशितैः शरैः। पुनश्चैव त्रिसप्तत्या भूयश्चैनं शतेन ह। तस्य मद्राधिपो हत्वा चतुरो रथवाजिनः। सूतं ध्वजं च समरे रथोपस्थादपात
यत्। स हताश्वाद्रथात्तूर्णमवप्लुत्य महारथः। तस्थौ विस्फारयंश्चापं विमुंचंश्च शितान् शरान्। शतानीकस्ततो दृष्ट्वा भ्रातरं हतवाहनं। र
थेनाभ्यपतत्तूर्णं सर्वलोकस्य पश्यतः। शतानीकमथायांतं मद्रराजो महामृधे। विशिखैर्बहुभिर्विध्वा ततो निन्ये यमक्षयं। तस्मिंश्च नि
हते वीरे विराटो रथसत्तमः। आरुरोह रथं तूर्णं छादयामास पत्रिभिः। ततो मद्राधिपः क्रुद्धः शतेन नतपर्वणां। आजघानोरसि दृ
ढं विराटं वाहिनीपतिं। सोऽतिविद्धो महाराज रथोपस्थ उपाविशत्। कश्मलं चाविशत्तूर्णं विराटो भरतर्षभ। सारथिस्तमपोवाह
त्समरे शरविक्षतं। यज्ञसेनस्तु समरे कर्णपुत्रं महारथं। षष्ट्या शराणां विव्याध बाह्वोरुरसि चानघ। वृषसेनस्तु समरे यज्ञसेनं यतं बै
रथस्थितं बहुभिः सायकैस्तीक्ष्णै राजघान स्तनांतरे। तावुभौ शरनुन्नांगौ शरकंटकितौ रणे। व्यभ्राजेतां महाराज श्वाविधौ शल्लिलैरि
व। रुक्मपुंखैरजिह्मागैः शरैश्छिन्नतनुच्छदौ। रुधिरौघपरिक्लिन्नौ व्यभ्राजेतां महामृधे। तपनीयनिभौ चित्रौ कल्पवृक्षाविवद्रुमौ। किंशु
काविव चोत्फुल्लौ व्यकाशेतां रणाजिरे। वृषसेनस्ततो राजन्नवभिर्द्रुपदं शरैः। विद्ध्वा विव्याध सप्तत्या पुनश्चान्यैस्त्रिभिः शरैः। ततः
शरसहस्राणि विमुंचन्विबभौ तदा। कर्णपुत्रो महाराज वर्षमाण इवांबुदः। द्रुपदस्तु ततः क्रुद्धो वृषसेनस्य कार्मुकं। द्विधाचिच्छेद भ
ल्लेन पीतेन निशितेन च। एक एव ज्वलंस्तस्थौ शस्त्रेण धनुराछिनत्। सोऽन्यत्कार्मुकमादाय रुक्मबद्धं नवं दृढं। तूणादाकृष्य विमलं भल्लं पीतं

द्रो०प०
१३१

श्रितं दृढं। कार्मुके योजयित्वा तं द्रुपदं सन्निरीक्ष्य च। हृदयं तस्य भित्वा च जगाम वसुधातलं। कृतमत्रं च वीर्याढ्या वृषसेनशराहतः।
सारथिस्तमपोवाह स्मरन्सारथिचेष्टितं। तस्मिन्भग्ने राजेंद्र पांचालानां महारथे। ततस्तु द्रुपदानीकं शरैश्छिन्नतनुच्छदं। संप्राद्रवद्रणे
राजन्निशीथे भैरवे सति। प्रदीपैश्च परित्यक्तैर्ज्वलद्भिस्तैः समंततः। व्यराजत महाराज वीताभ्रा द्यौरिव ग्रहैः। तथांगदैर्निपतितैर्व्यराजत
वसुंधरा। प्रावृट्काले महाराज विद्युद्भिरिव तोयदः। ततः कर्णकृतत्रस्ताः सोमका विप्रदुद्रुवुः। यथेंद्रभयवित्रस्ता दानवास्तारकामये।
तेवध्यमानाः समरे द्रवमाणाश्च सोमकाः। व्यराजंत महाराज प्रदीपैरिव भासिताः। तांस्तु निर्जित्य समरे कर्णपुत्रो व्यरोचत। मध्यंदिन
मनुप्राप्तो घर्मांशुरिव भारत। तेषु राजसहस्रेषु तावकेषु परेषु च। एक एव ज्वलंस्तस्थौ वृषसेनः प्रतापवान्। स विजित्य रणे शूरान्सोम
कानां महारथान्। जगाम त्वरितो राजन्यत्र राजा युधिष्ठिरः। प्रतिविंध्यमभिक्रुद्धं प्रदहंतं रणे रिपून्। दुःशासनस्तव सुतः प्रत्यगच्छन्
महारथः। तयोः समागमो राजंश्चित्ररूपो बभूव ह। व्यपेतजलदे व्योम्नि बुधभार्गवयोरिव। प्रतिविंध्यं तु समरे रणकर्मसु दुर्जयं। दुःशास
नस्त्रिभिर्बाणैर्ललाटे समविध्यत। सोऽतिविद्धो बलवता पुत्रेण तव धन्विना। विरराज महाबाहुः सशृंग इव तोयदः। दुःशासनस्तु समरे
प्रतिविंध्यं महारथः। नवभिः सायकैर्विध्वा पुनर्विव्याध सप्तभिः। तत्र भारत पुत्रस्ते कृतवान्कर्म दुष्करं। प्रतिविंध्यहयानुग्रैः पातयामास
पत्रिभिः। सारथिं चास्य भल्लेन ध्वजं च समपातयत्। रथं च शतशो राजन्व्यधमत्तस्य धन्विनः। पताकांश्च रथेषांश्च वरत्रान्योक्त्राणि चावि
भो। चिच्छेद तिलशः क्रुद्धः शरैः संनतपर्वभिः। विरथः स तु धर्मात्मा धनुष्पाणिरवस्थितः। अयोधयत्तव सुतं किरन्शरगणान्बहून्। क्षु
रप्रेण धनुस्तस्य चिच्छेद कृतहस्तवत्। अथैनं दशभिर्भल्लैश्छिन्नधन्वानमर्दयत्। तं दृष्ट्वा विरथं तत्र भ्रातरः स्म महारथाः। अन्ववर्तंत वे

राम
१३१

गेन महत्यासेन्यासह। सो वल्गुत्यरथात्तत्र श्रुतसोमस्य भास्वरां धनुर्गृह्य महाराज विव्याध तनयं तव। ततस्ते तावकाः सर्वे परिवार्य स्थितं तथा।
अभ्यवर्तंत तं युद्धे महत्या सेनया वृताः। ततः सा महती सेना प्राद्रवन्निशि भारत। प्रयातो तव राजेंद्र यत्र शल्यो व्यवस्थितः। तोतु पत्यधर्योराज
न्याक्षसेंद्रोत्वलायुधः। अष्टचक्रसमायुक्तमास्थाय प्रवरं रथं। तुरंगमसुखैर्युक्तं पिशाचैर्घोरदर्शनैः। लोहिताईपताकांतं रक्तमाल्यविभू
षितं। कार्ष्णायसमयं घोरमृक्षचर्मावृतं महत्। रौद्रेण चित्रपक्षेण विवृताक्षेण दंष्ट्रिणा। ध्वजेनोच्छ्रिततुंडेन गृध्रराजेन केतुना। स बभौ
राक्षसो राजन् भिन्नांजनचयप्रभः। रुरोधार्जुनमायांतं प्रभंजनमिवाद्रिराट्। किरन्बाणगणान्राजन् शतशोर्जुनमूर्द्धनि। अतितीव्रमभूद्यु
द्धं नरराक्षसयोर्मृधे। दृष्टीनां प्रीतिजननं सर्वेषां भरतर्षभ। तमर्जुनः शतैर्नैव पत्रिणां समताडयत्। नवभिश्च शितैर्बाणैर्विव्याध भरतर्षभः।
सारथिं च त्रिभिर्बाणैश्छिन्निरेव त्रिवेणुकं। ध्वजमेकेन चिच्छेद चतुर्भिश्चतुरो हयान्। विरथस्य य धृतं खड्गं शरेरस्य द्विधाकरोत्। अथैनं
निशितैर्बाणैश्चतुर्भिर्भरतर्षभ। पार्थो विव्याध राक्षसेंद्रं स विद्धः प्राद्रवद्भयात्। तं विजित्यार्जुनस्तूर्णं द्रोणांतिकमुपाययौ। किरन्शरगणा
न्राजन्नरवारणवाजिषु। वध्यमाना महाराज पांडवेन यशस्विना। सैनिका अपतन्नुर्व्यां वातनुन्ना इव द्रुमाः। तेषु विद्राव्यमानेषु पांडवे
न महात्मना। संप्राद्रवद्बलं सर्वं पुत्राणां ते विशांपते॥ ॥इति महाभारते द्रोणपर्वणि रात्रियुद्धे॥ [illegible]॥ संजय॥उ॥ शतानीकं शरैस्तूर्णं
निर्दहंतं चमूं तव। चित्रसेनस्तव सुतो वारयामास भारत। नाकुलिश्चित्रसेनं तु नाराचेनाहनत्कृशं। स च तं प्रति विव्याध दशभिर्निशितैः श
रैः। चित्रसेनो महाराज शतानीकं पुनर्युधि। नवभिर्निशितैर्बाणैराजघान स्तनांतरे। नाकुलिस्तस्य विशिखैर्वर्म संनतपर्वभिः। गात्रात्संपा
तयामास तदद्भुतमिवाभवत्। सोपेतवर्मा पुत्रस्ते विरराज भृशं नृप। उत्सृज्य काले राजेंद्र निर्मोकमिव पन्नगः। ततोस्य निशितैर्बाणैर्ध्वजं

चिछेदनाकुलिः।धनुश्चैवमहाराजयतमानस्यसंयुगे।सछिन्नधन्वासमरेविवर्माचमहारथः।धनुरन्यन्महाराजजग्राहारिविदारणं।ततस्तूर्णंचित्रसे
नोनाकुलिंनवभिःशरैः।विव्याधसमरेक्रुद्धोभरतानांमहारथः।शतानीकोथसंरब्धश्चित्रसेनोस्यमारिष।न्यहनच्चतुरोवाहान्सारथिंचरथो
त्तमः।अवप्लुत्यरथात्तस्माच्चित्रसेनोमहारथः।नाकुलिंपंचविंशत्याशराणामर्दयद्बली।तस्यतत्कुर्वतःकर्मनकुलस्यसुतोरणे।अर्द्धचंद्रेणचिछेद
चापंरत्नविभूषितं।सछिन्नधन्वाविरथोहताश्वोहतसारथिः।आरुरोहरथंतूर्णंहार्दिक्यस्यमहारथः।द्रुपदंतुसहानीकंकर्णपुत्रोमहारथः।वृष
सेनोभ्ययात्तूर्णंकिरन्शरशतैस्तदा।ततस्तद्वर्द्धतेयुद्धंतवतेषांचभारत।निशीथेदारुणेकालेयमराष्ट्रविवर्द्धनं॥ ॥इतिद्रोणपर्वणि॥१६५॥
॥ ॥संजय॥ ॥नकुलंरभसंयुद्धेनिघ्नंतंवाहिनींतव।अभ्ययात्सौबलःक्रुद्धस्तिष्ठतिष्ठेतिचाब्रवीत्।कृतवैरौतुतौवीरावन्योन्यवधकांक्षिणौ।
शरैःपूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः।यथैवसौबलःक्षिप्रंशरवर्षाणिमुंचति।तथैवनकुलोराजन्शिक्षांसंदर्शयन्मृधे।तावुभौसमरे
शूरौशरकंटकिनौतथा।व्यराजेतांमहाराजकंटकैरिवशाल्मली।आजिह्मंप्रेक्षमाणौतुराजन्विभ्रांतलोचनौ।क्रोधसंरक्तनयनौनिर्दहंतौ
परस्परं।श्यालस्तुतवसंक्रुद्धोमाद्रीपुत्रंहसन्निव।कर्णिनैकेनविव्याधहृदयेनिशितेनह।नकुलस्तुभृशंविद्धःश्यालेनतवधन्विना।निषसा
दरथोपस्थेकश्मलंचैनमाविशत्।अत्यंतवैरिणंदृप्तंदृष्ट्वाशत्रुंतथागतं।ननादशकुनीराजंस्तपांतेजलदोयथा।प्रतिलभ्यततःसंज्ञांनकु
लःपांडुनंदनः।अभ्ययात्सौबलंभूयोव्यात्ताननइवांतकः।संक्रुद्धःशकुनिंषष्ट्याविव्याधभरतर्षभ।पुनश्चैनंशतेनैवनाराचानांस्तनांतरे।
ततोस्यसशरंचापंमुष्टिदेशेसचिछिदे।ध्वजंचत्वरितःछित्वारथाद्भूमावपातयत्।रथयष्टिंपरित्यज्यकामुकःकामिनीयथा।सोतिविद्धोम
हाराजरथोपस्थउपाविशत्।तंविसंज्ञंनिपतितंदृष्ट्वाश्यालंतवानघ।अपोवाहरथेनाशुसारथिर्ध्वजिनीमुखात्।ततःसंचुक्रुशुःपार्था

ये चैते वांपदानुगाः। निर्जित्य तु रणे शत्रुं नकुलः शत्रुतापनः। अब्रवीत्सारथिं क्रुद्धो द्रोणानीकाय मां वह। तस्य तद्वचनं श्रुत्वा माद्रीपुत्रस्य धीमतः।
प्रायात्तेन रणे राजन्यत्र द्रोणोथ युध्यते। शिखंडिनं तु समरे द्रोणप्रेप्सुं विशांपते। कृपः शारद्वतो यत्तः प्रत्युद्गच्छत्सवेगितः। गौतमं द्रुतमायांतं
द्रोणानीकमरिंदम। विव्याध नवभिर्भल्लैः शिखंडी प्रहसन्निव। तमाचार्यो महाराज विध्वा पंचभिराशुगैः। पुनर्विव्याध विंशत्या पुत्राणां प्रिय
हत्तव। महद्युद्धं तयोरासीद्घोररूपं विशांपते। यथा देवासुरे युद्धे वृत्रवासवयोरिव। शरजालावृतं व्योम चक्रतुस्तौ महारथौ। प्रकृत्या घोर
रूपं तदासीद्घोरतरं पुनः। रात्रिश्च भरतश्रेष्ठ योधानां युद्धशालिनां। कालरात्रिनिभा त्वासीद्घोररूपा भयावहा। शिखंडी तु महाराज गौतम
स्य महद्धनुः। अर्द्धचंद्रेण चिच्छेद सज्जं सविशिखोत्तमं। तस्य क्रुद्धः कृपो राजन् शक्तिं चिक्षेप दारुणां। स्वर्णदंडामकुंठाग्रां कर्मारपरिमार्जितां।
तामापतंतीं चिच्छेद शिखंडी च त्रिभिः शरैः। पपात मेदिनीं दीप्ता भासयंती महाप्रभा। तथान्यद्धनुरादाय गौतमो रथिनां वरः। प्रच्छादय
च्छितैर्बाणैर्महाराज शिखंडिनं। स च्छाद्यमानः समरे गौतमेन यशस्विना। व्यसीदत रथोपस्थे शिखंडी रथिनां वरः। सीदंतं चैनमासा
द्य कृपः शारद्वतो युधि। आजघ्ने निशितैर्बाणैर्जिघांसन्निव भारत। विमुखं तं रणे दृष्ट्वा याज्ञसेनिं महारथं। पांचाल्याः सोमकाश्चैव प
रिवव्रुः समंततः। तथैव तव पुत्राश्च परिवव्रुर्द्विजोत्तमं। महत्या सेनया सार्द्धं ततो युद्धमभूत्पुनः। पत्तीनां द्रवतां चैवमन्योन्यमभिधावतां। बभू
व तुमुलः शब्दो मेघानां नदतामिव। द्रवतां सादिनां चैव पदत्राब्देन मेदिनी। अकंपत महाराज भयत्रस्तेव चांगना। रथाश्च रथान्समासाद्य प्रद्रुता वेग
वत्तरं। न्यग्रहंश्च बहवो राजन् शलभानिव वायसाः। तथा गजाः प्रभिन्नांश्च सुप्रभिन्नान्महागजाः। तस्मिन्नेव पदे यत्ता न्यग्रह्णंत स्म भारत। सादी
सादिनमासाद्य पदातिश्च पदातिनं। समासाद्य रणेन्योन्यं संरब्धा नातिचुक्रुशुः। धावतां द्रवतां चापि पुनरावर्ततामपि। बभूव तत्र सैन्यानां शब्दः सु

तुमुलेयुधि। दीप्यमानाः प्रदीपाश्चस्म प्रभिन्नामहागजाः। अदृश्यंत महाराज सहोल्काः पर्वताइव। सा निशा भरतश्रेष्ठ प्रदीपैरवभासिता।
दिवसप्रतिमा राजन्बभूव रणमूर्द्धनि। आदित्येन यथा व्याप्तं तमो लोके प्रणश्यति। तथा नष्टं तमो घोरं दीपैर्दीप्तैरलंकृतैः। शस्त्राणां
कवचानां च शक्तीनां च महात्मनां। अंतर्दधुः प्रभाः सर्वा दीपैस्तैरवभासिताः। तस्मिन्कोलाहले युद्धे वर्त्तमाने निशामुखे। अवधीत्स
मरे पुत्रं पिता भरतसत्तम। पुत्रश्च पितरं मोहात्सखायं च तथा सखा। संबंधिनं च संबंधी स्वस्रीयं चापि मातुलः। स्वे स्वान्परे परां
श्चापि निजघ्नुरितरेतरं। निर्मर्यादमभूद्युद्धं रात्रौ घोरं भयावहं॥ ॥इति द्रोणपर्वणि रात्रियुद्धे॥ १५५॥ संजय॥ ॥तस्मिंस्तु तुमुले युद्धे
वर्त्तमाने भयावहे। धृष्टद्युम्नो महाराज द्रोणमेवाभ्यवर्त्तत। संदधानो धनुःश्रेष्ठं ज्यां विकर्षन्पुनः पुनः। अभ्यवर्त्तत द्रोणस्य रथं रुक्म
विभूषितं। धृष्टद्युम्नं ततो यांतं द्रोणस्यांतचिकीर्षया। परिवव्रुर्महाराज पांचालाः पांडवैः सह। तथा परिवृतं दृष्ट्वा द्रोणमाचार्यस
त्तमं। पुत्रास्ते सर्वतो यत्ता ररक्षुर्द्रोणमाहवे। बलार्णवौ ततस्तौ तु समेयातां निशामुखे। वातोद्धूतौ क्षुब्धसत्त्वौ भैरवौ सागराविवा त
तो द्रोणं महाराज पांचाल्यः पंचभिः शरैः। विव्याध हृदये तूर्णं सिंहनादं ननाद च। तं द्रोणः पंचविंशत्या विध्वा भरतसंयुगे। चिच्छे
दान्येन भल्लेन धनुरस्य महाप्रभं। धृष्टद्युम्नस्तु निर्विद्धो द्रोणेन भरतर्षभ। उत्ससर्ज धनुस्तूर्णं निर्दिष्टो द्रोणसायकैः। ततः क्रुद्धो महाराज
धृष्टद्युम्नः प्रतापवान्। आददे न्यद्धनुःश्रेष्ठं द्रोणस्यांतचिकीर्षया। विकृष्य च धनुश्चित्रमाकर्णं परवीरहा। द्रोणस्यांतकरं रौद्रं व्यसृजत्सा
यकं ततः। स विसृष्टो बलवता शरो घोरो महामृधे। भासयामास तत्सैन्यं दिवाकर इवोदितः। तं दृष्ट्वा तु शरं घोरं देवगंधर्वमानवाः। स्वस्त्यस्तु स
मरे राजन्द्रोणायेत्यब्रुवन्वचः। तं तु सायकमप्राप्तमाचार्यस्य रथं प्रति। कर्णो हस्तेन धाराजन्द्विधा चिच्छेद कृतहस्तवत्। स च्छिन्नो बहुधा राजन्

सूतपुत्रेण मारिष। निपपात शरस्तूर्णं निस्सृतः कर्णसायकैः। तं तु सायकमप्राप्तं शरैः सन्नतपर्वभिः। धृष्टद्युम्नं रणे कर्णो विव्याध दशभिः शरैः।
पंचभिर्द्रोणपुत्रस्तु स्वयं द्रोणस्तु सप्तभिः। शल्यश्च दशभिर्बाणैस्त्रिभिर्दुःशासनस्तथा। दुर्योधनश्च विंशत्या शकुनिश्चापि सप्तभिः। पां
चाल्यं त्वरिता विध्यन्सर्व एव महारथाः। स विद्धः सप्तभिर्वीरैर्धृष्टद्युम्नस्तथाहवे। सर्वानसंभ्रमो राजन्प्रत्यविध्यत्त्रिभिस्त्रिभिः। द्रोणं द्रौणिं
च कर्णं च विव्याध चतवात्मजान्। ते विद्धा धन्विना तेन धृष्टद्युम्नं पुनर्मृधे। विव्याधुः पंचभिस्तूर्णमेकैको रथिनां वरः। द्रुमसेनस्तु संक्रुद्धो राज
न्विव्याध पत्रिणा। त्रिभिश्चान्यैः शरैस्तूर्णं तिष्ठ तिष्ठेति चाब्रवीत्। स तु तं प्रतिविव्याध त्रिभिस्तीक्ष्णैरजिह्मगैः। स्वर्णपुंखैः शिलाधौतैः प्रा
णांतकरणैर्युधि। भल्लेनान्येन तु पुनः सुवर्णोज्वलकुंडलं। उन्ममाथ शिरः कायाद्द्रुमसेनस्य वीर्यवान्। तच्छिरो न्यपतद्भूमौ संदष्टोष्ठपुटं रणे।
महावातसमुद्धूतं पक्वं तालफलं यथा। तं स विद्ध्वा पुनर्वीरः सुनिशितैः शरैः। राधेयस्याच्छिनद्भल्लैः कार्मुकं चित्रयोधिभिः। न तु तन्ममृषे क
र्णो धनुषश्छेदनं तदा। निकृंतनमिवात्युग्रं लांगूलस्य महाहरिः। सोन्यद्धनुः समादाय क्रोधाद्रक्तेक्षणः श्वसं। अभ्यगच्छच्छरौघैस्तैर्वृष्टिं
कुर्वन्महाबलः। दृष्ट्वानुकर्णं संरब्धं ते वीराः पार्षतर्षभं। पांचाल्यपुत्रं संहृष्टाः परिवव्रुर्जिघांसया। सर्वयोधप्रवीराणां तावकानां पुरस्कृ
तं। मृत्योरास्यमनुप्राप्तं धृष्टद्युम्नं तदा मृधे। एतस्मिन्नेव काले तु दाशार्होविकिरन्शरान्। धृष्टद्युम्नं पराक्रांतं सात्यकिः प्रत्यपद्यत। तमायांतं म
हेष्वासं सात्यकिं युद्धदुर्मदं। राधेयो दशभिर्बाणैः प्रत्यविध्यदजिह्मगैः। तं सात्यकिर्महाराज विव्याध दशभिः शरैः। पश्यतां सर्ववीराणाम
गास्तिष्ठेति चाब्रवीत्। स सात्यकेस्तु बलवत्कर्णस्य च महात्मनः। आसीत्समागमो घोरो वज्रवासवयोरिव। त्रासयन्रथघोषेण क्षत्रियान्
क्षत्रियर्षभः। राजीवलोचनं कर्णं सात्यकिः प्रत्यविध्यत। तथैव युयुधानोपि धनुषा वसुधातले। सूतपुत्रं महाराज सात्यकिः प्रत्ययोधयत्। वि

विपाटकर्णिनाराचैर्वत्सदंतैःक्षुरैरपि।कर्णःशरशतैश्चापिशिनेयंप्रत्यविध्यत।तथैवयुयुधानोपिवृष्णीनांप्रवरोरथः।अभ्यवर्षच्छरैःकर्णंत
द्युद्धमभवत्समं।तावकास्तुमहाराजकर्णपुत्रश्चदंशिताः।सात्यकिंविविधुस्तूर्णंसमंतान्निशितैःशरैः।अस्त्रैरस्त्राणिसंवार्यतेषांकर्णस्य
चाभिभुः।अविध्यत्सात्यकिःक्रुद्धोवृषसेनंस्तनांतरे।तेनबाणेनिर्विद्धोवृषसेनोविशांपते।न्यपतत्समरेमूढोधनुरुत्सृज्यवीर्यवा
न्।ततःकर्णोहतंमत्वावृषसेनंमहारथं।पुत्रशोकाभिसंतप्तःसात्यकिंप्रत्यपीडयत्।पीड्यमानस्तुकर्णेनयुयुधानोमहारथः।विव्याधबहु
भिःकर्णंत्वरमाणःपुनःपुनः।सकर्णंदशभिर्विद्ध्वावृषसेनंचसप्तभिः।सहस्तावापधनुषीतयोश्चिच्छेदसात्वतः।युयुधानःसविरथौहत्वाश
त्रुभयंकरौ।विव्याधबहुभिस्तूर्णंसमंतान्निशितैःशरैः।तावन्योधनुषीसज्येकृत्वाशत्रुभयंकरौ।युयुधानमविध्येतांसमंतान्निशितैःशरैः।
वर्त्तमानेतुसंग्रामेतस्मिन्वीरवरक्षये।अतीवशुश्रुवेराजन्गांडीवस्यमहास्वनः।श्रुत्वातुरथनिर्घोषंगांडीवस्यचनिस्वनं।सूतपुत्रोब्रवीद्राजन्दुर्योध
नमिदंवचः।एषसर्वाञ्छिबीन्हत्वामुख्यान्सर्वान्नरर्षभान्।पौरवांश्चमहेष्वासान्गांडीवनिनदोमहान्।श्रूयतेरथनिर्घोषोवानरस्यचनर्दतः।
करोतिपांडवोव्यक्तंक्रुद्धरूपःस्वयंपुनः।एषाविदार्यतेराजन्बहुधाभारतीचमूः।विप्रकीर्णान्यनीकानिनचतिष्ठंतिकर्हिचित्।वातेने
वसमुद्धूतमभ्रजालंव्यदीर्यत।सव्यसाचिनमासाद्यभिन्नानौरिवसागरे।द्रवतांयोधमुख्यानांगांडीवप्रेषितैःशरैः।विद्धानांशतशोराज
न्क्रियतेनिनदोमहान्।शृणुदुंदुभिनिर्घोषमर्जुनस्यरथंप्रति।निशीथेराजशार्दूलस्तनयित्नोरिवांबरे।हाहाकाररवांश्चैवसिंहना
दांश्चपुष्कलान्।शृणुशब्दान्बहुविधानर्जुनस्यरथंप्रति।अयंमध्यस्थितोस्माकंसात्यकिःशत्रुतापनः।इहचेल्लभ्यतेलक्ष्यंलप्स्यंजेष्या
महेपरं।एषपांचालराजस्यपुत्रोद्रोणेनसंगतः।सर्वतःसंवृतोयोधैराजन्पुरुषसत्तमैः।सात्यकिंयदिहन्यामिधृष्टद्युम्नंचपार्षतं।असं

ह्ययंमहाराजकृष्णोनोविजयोऽर्जुनस्तथा।सोऽनड्वानिवमेवीराःपरिवार्यमहारथाः।प्रयत्नाभोमहाराजनिहंतुंरश्मिपार्षतौ।सव्यसाचीपुराम्येतिद्रो
णानीकायभारत।संसक्तंसात्यकिंज्ञात्वाबहुभिःकुरुपुंगवैः।तत्रगच्छंतुबहवःप्रवरारथसत्तमाः।यावत्पार्थोनिजानातिसात्यकिंबहुभिर्वृतं।ते
यतध्वंतथाशूराःशूरायामर्षणेभृशं।यथातूर्णंव्रजत्येषपरलोकायमाधवः।तथाकुरुमहाराजसुनीत्यांसंप्रयुज्यते।कर्णस्यमतमाज्ञाय
पुत्रस्तेप्राहसौबलं।यथेंद्रःसमरेराजन्आहविष्णुर्यशस्विनं।वृतःसहस्रैर्द्विरदैर्निर्गजानामनिवर्तिनां।रथैश्चदशसाहस्रैर्वृतोयाहिधनंजयं।दुःशा
सनोदुःप्रसहःसुबाहुर्दुःप्रधर्षणः।एतेत्वामनुयास्यंतिपत्तिभिर्बहुभिर्वृताः।जहिकृष्णौमहाबाहोधर्मराजंचमातुलं।नकुलंसहदेवंचभीम
सेनंचभारत।देवानामिवदेवेंद्रेजयाशामेत्वयिस्थिता।जहिमातुलकौंतेयानसुरानिवपावकिः।एवमुक्तोययौपार्थान्पुत्रेणतवसौबलः।महत्या
सेनयासार्द्धंतवपुत्रैश्चभावितः।प्रियार्थंतवपुत्राणांदिधक्षुःपांडुनंदनान्।ततःप्रववृतेयुद्धंतावकानांपरैःसह।प्रयातेसौबलेराजन्पांडवा
नामनीकिनी।बलेनमहतायुक्तःसूतपुत्रश्चसात्वतं।अभ्ययात्त्वरितोयुद्धेकिरन्शरगणान्बहून्।तथैवपांडवाःसर्वेसात्यकिंपर्यवारय
न्।भारद्वाजस्ततोगत्वाधृष्टद्युम्नरथंप्रति।महद्युद्धंतदासीत्तुद्रोणस्यनिशिभारत।धृष्टद्युम्नेनशूरेणपांचालैश्चमहात्मनः॥
॥ ॥इतिभारतेद्रोणपर्वणिरात्रियुद्धे॥६८॥संजय॥ ॥ततस्तेप्राद्रवन्सर्वेत्वरितायुद्धदुर्मदाः।आमृष्यमाणाःसंरब्धायुयुधानरथंप्र
ति।तेरथंकल्पितंराजन्महारुक्मविभूषितं।सादिभिश्चगजैश्चैनंपरिचक्रुश्चसात्वतं।अथैनंकोष्ठकीकृत्यसर्वतस्तेमहारथाः।सिंहनादांस्त
थाचक्रुस्तर्जयंतश्चसात्यकिं।तेभ्यवर्षन्शरैस्तीक्ष्णैःसात्यकिंसत्यविक्रमं।त्वरमाणामहावीर्यामाधवस्यवधैषिणः।तान्दृष्ट्वापततस्तूर्णं
शैनेयःपरवीरहा।प्रत्यगृह्णान्महाबाहुःप्रमुंचन्विशिखान्बहून्।तत्रशूरोमहेष्वासःसात्यकिःसत्यविक्रमः।निचकर्तशिरांस्युग्रैःशरैःस

न्नतपर्वभिः। हस्तिहस्तान्हयग्रीवान्बाहूनपि च सायुधान्। क्षुरप्रैः सादयामास तावकानां स माधवः। पतितैश्चामरैः श्वेतच्छत्रैश्च भारत। ब
भूव धरणी पूर्णा नक्षत्रैर्द्यौरिव प्रभो। तेषां तु युयुधानेन युध्यतां युधि भारत। बभूव तुमुलः शब्दः प्रेतानामिव क्रंदतां। तेन शब्देन महता पूरितासी
द्वसुंधरा। रात्रिः समभवच्चैव तीव्ररूपा भयावहा। दीर्यमाणं बलं दृष्ट्वा युयुधानशराहतं। श्रुत्वा च विपुलं नादं निशीथे लोमहर्षणं। सुतस्त
वाब्रवीद्राजन्सारथिं रथिनां वरः। यत्रैष शब्दस्तत्राश्वान्नोदयस्व पुनः पुनः। तेन संनोद्यमानस्तु ततस्तांस्तुरगोत्तमान्। सूतः संनोदयामास
युयुधानरथं प्रति। ततो दुर्योधनः क्रुद्धो दृढधन्वा जितक्लमः। शीघ्रहस्तश्चित्रयोधी युयुधानमुपाद्रवत्। ततः पूर्णायतोत्सृष्टैर्मांसशोणितभो
जनैः। दुर्योधनं द्वादशभिर्माधवः प्रत्यविध्यत। दुर्योधनस्तेन तथा पूर्वमेवार्दितः शरैः। शैनेयं दशभिर्बाणैः प्रत्यविध्यदमर्षितः। ततः समभव
द्युद्धं तुमुलं भरतर्षभ। पांचालानां च सर्वेषां भरतानां च दारुणं। शैनेयस्तु रणे क्रुद्धस्तव पुत्रं महाबलः। सायकानामशीत्या तु विव्याधोरसि भारत।
ततोस्य वाहान्समरे शरैर्निन्ये यमक्षयं। सारथिं च रथात्तूर्णं पातयामास पत्रिणा। हताश्वे तु रथे तिष्ठन्पुत्रस्तव विशांपते। मुमोच निशितान्बाणा
न्शैनेयस्य रथं प्रति। राजन्पंचाशतांस्तांस्तु शैनेयः कृतहस्तवत्। चिच्छेद समरे राजन्प्रेषितांस्तनयेन ते। अथापरेण भल्लेन मुष्टिदेशे
महद्धनुः। चिच्छेद रभसा युद्धे तव पुत्रस्य मारिष। विरथो विधनुष्कश्च सर्वलोकेश्वरः प्रभुः। आरुरोह रथं तूर्णं भास्वरं कृतवर्मणः। दुर्योध
ने परावृत्ते शैनेयस्तव वाहिनीं। द्रावयामास विशिखैर्निशामध्ये विशांपते। शकुनिश्चार्जुनं राजन्परिवार्य समंततः। रथैरनेकसाहस्रैर्ग
जैश्चैव सहस्रशः। तथा हयसहस्रैश्च तुमुलं सर्वतोकरोत्। ते सहस्राणि दिव्यानि विकिरंतोर्जुनं प्रति। अर्जुनं नोदयंति स्म क्षत्रियाः कालनोदिताः।
तानर्जुनः सहस्राणि रथाश्वनरदंतिनां। प्रत्यवारयदायस्तः प्रकुर्वन्विपुलं क्षयं। ततस्तु समरे शूरः सौबलः शकुनिस्तथा। विव्याध निशि

तैर्बाणैरर्जुनं प्रहसन्निव पुनश्चैव व्रातेनास्य संक्रुद्धो घमहारथं। तमर्जुनस्त्रिंशत्या विव्याध युधि भारत। अथैनं दशभिर्हेमास्त्रिभिस्त्रि
भिरविध्यत। संवार्य तानू बाणगणे युधिष्ठिराज्ञा धनंजयः। न्यहनत्तावकान्योधान्वज्रपाणिरिवासुरान्। भुजैश्छिन्नैर्महाराज शरीरैश्च सह
स्वरैः। समास्तीर्णा धरा तत्र बभौ पुष्पैरिवार्चिता। स विध्वा शकुनिं भूयः पंचभिर्नतपर्वभिः। उलूकं त्रिभिराजघ्ने त्रिभिरेव महायशाः। तमुलूकस्त्रि
भिर्विध्वा वासुदेवमताडयत्। ननाद च महानादं पूरयन्वसुधातलं। अर्जुनस्तु द्रुतं गत्वा शकुनेर्धनुराच्छिनत्। प्रेषयच्चतुरो वाहान्यमस्य सद
नं प्रति। ततो रथादवप्लुत्य सौबलो भरतर्षभ। उलूकस्य रथं तूर्णमारुरोह विशांपते। तावेकरथमारूढौ पितापुत्रौ महारथौ। अर्जुनं सिषिचुर्बा
णैर्गिरिं मेघाविवोत्थितौ। तौ तु रुध्वा महाराज पांडवो निशितैः शरैः। व्यद्रावयत्तव चमूं शतशो व्यधमच्छरैः। अनिलेन यथाभ्राणि विविधा
नि समंततः। विच्छिन्नानि तथा राजन्बलान्यासन्विशांपते। तद्बलं भरतश्रेष्ठ वध्यमानं तथा निशि। प्रदुद्राव दिशः सर्वा वीक्षमाणं भयार्दि
तं। उत्सृज्य वाहांस्त्वपरे नोदयंतस्तथापरे। संभ्रांताः पर्यवर्तंत तस्मिंस्तमसि दारुणे। विजित्य समरे योधांस्तावकान्भरतर्षभ। दध्मतुर्मुदितौ
शंखौ वासुदेवधनंजयौ। धृष्टद्युम्नो महाराज द्रोणं विध्वा त्रिभिः शरैः। चिच्छेद धनुषस्तूर्णं ज्यां शरेण शितेन ह। तन्निधाय धनुः शूरो द्रो
णः क्षत्रियमर्दनः। आददेन्यद्धनुर्भूयो वेगवत्सारवत्तरं। धृष्टद्युम्नस्ततो द्रोणं विध्वा सप्तभिराशुगैः। सारथिं पंचभिर्बाणै राजन्विव्या
ध संयुगे। न्यषेधत्कौरवीं सेनां शतशोऽथ सहस्रशः। वध्यमाने बले तस्मिंस्तव पुत्रस्य मारिष। प्रावर्तत नदी घोरा शोणितोघतरंगिणी। उभयोः
सेनयोर्मध्ये नराश्वद्विपवाहिनी। यथा वैतरिणी राजन्यमराष्ट्रपुरं प्रति। द्रावयित्वा ततः सैन्यं धृष्टद्युम्नः प्रतापवान्। अत्यराजत तेजस्वी
शक्रो देवगणेष्विव। दध्मतुस्तौ महाशंखौ धृष्टद्युम्नशिखंडिनौ। यमौ च युयुधानश्च पांडवश्च वृकोदरः। हत्वा रथसहस्राणि तावकानां महारथाः।

सिंहनादान् रवांश्चक्रुः पांडवा जितकाशिनः। पश्यतस्तव पुत्रस्य कर्णस्य चरणोत्कटाः। तथा द्रोणस्य शूरस्य द्रौणेश्चैव विशांपते॥ ॥द्रोणपर्वणि
रात्रियुद्धे॥ धृ॰ संजय॥ ॥विद्रुतं स्वबलं दृष्ट्वा वध्यमानं महात्मभिः। क्रोधेन महताविष्टः पुत्रस्तव विशांपते। अभ्येत्य सहसा कर्णं द्रोणं च ज
यतां वरं। अमर्षवशमापन्नो वाक्यज्ञो वाक्यमब्रवीत्। भवद्भ्यामिह संग्रामः क्रुद्धाभ्यां संप्रवर्त्तितः। आहवे निहतं दृष्ट्वा सैंधवं सव्यसाचि
ना। निहन्यमाना पांडूनां बलेन मम वाहिनी। ब्रूतं तं द्विजये शक्तावशक्ताविति केन वा। यद्यहं भवतोस्त्याज्यो न वाच्योस्मि तदैव हि। आ
वां पांडुसुतान् संख्ये जेष्याव इति मानदौ। तदैवाहं वचः श्रुत्वा भवतोर्मनुजर्षभौ। कृतवान् पांडवैः सार्द्धं सर्वयोधविनाशनं। यदि नाहं परित्या
ज्यो भवद्भ्यां पुरुषर्षभौ। युध्यतामनुरूपेण विक्रमेण स्वविक्रमौ। प्रसक्तं तं हि महायुद्धमाश्रित्य विपुलं बलं। भवद्भ्यां पांडवैः सार्द्धं तेन च सर्वं
निरर्थकं। वाक्प्रतोदेन तौ वीरौ प्रणुन्नौ तनयेन ते। आवर्त्तयेतां तौ युद्धे घट्टिताविव पन्नगौ। ततस्तौ रथिनां श्रेष्ठौ सर्वलोकधनुर्द्धरौ। शैनेय
प्रमुखान् पार्थानभिदुद्रुवतू रणे। तथैव सहिताः पार्थाः स्वेन वीर्येण सर्वशः। अभ्यवर्त्तंत तौ वीरौ वर्त्तमानौ मुहुर्मुहुः। अथ द्रोणो महेष्वा
सो दशभिः शिनिपुंगवं। अविध्यत्त्वरितः क्रुद्धः सर्वशस्त्रभृतां वरं। कर्णश्च दशभिर्बाणैः पुत्रश्च तव सप्तभिः। एते कौरवसंक्रुद्धाः शैनेयं पर्यवा
रयन्। दृष्ट्वा तु समरे द्रोणं निघ्नंतं पांडवीं चमूं। विविधुः सोमकास्तूर्णं समंताच्छरवृष्टिभिः। तत्र द्रोणो हरत्प्राणान् क्षत्रियाणां विशांप
ते। रश्मिभिर्भास्करो राजंस्तेजसामिव भारत। द्रोणेन वध्यमानानां पांचालानां विशांपते। शुश्रुवे तुमुलः शब्दः क्रोशतामितरेतरं। पुत्रान
न्ये पितॄनन्ये भ्रातॄनन्ये च मातुलान्। भागिनेयान् वयस्यांश्च तथा संबंधिबांधवान्। उत्सृज्योत्सृज्य गच्छंति त्वरिता जीवितेप्सवः। अप
रे मोहिता मोहात्तमेवाभिमुखा ययुः। पांडवानां रणे योधाः परलोकं गताः परे। सा तथा पांडवी सेना वध्यमाना महात्मभिः। निशि संप्र

द्रवन्राजन्नृविसृष्टेरुल्काः समंततः। पश्यतो भीमसेनस्य विजयस्याच्युतस्य च। यमयोर्धर्मराजस्य पार्षतस्य च पश्यतः। तमसा संवृते लोके न प्राज्ञा
यत किंचन। कौरवाणां प्रकाशेन दृश्यंते द्रुद्रुताः परे। द्रवमाणं तु तत्सैन्यं द्रोणकर्णौ महारथौ। जग्मतुः पृष्ठतो वापि निघ्नंतौ सायकान्बहून्। तथा
बलेषु भग्नेषु दीर्यमाणेषु सर्वशः। जनार्दनो दीनमनाः प्रत्यभाषत फाल्गुनं। द्रोणकर्णौ महेष्वासौ वेतौ सात्यकिपार्श्वतः। पांचाल्यांश्चैव सहि
तौ जघ्नतुः सायकैर्भृशं। एतयोः शरवर्षेण प्रभग्ना नो महारथाः। वार्यमाणापि कौंतेय पृतना नावतिष्ठते। तां तु विद्रवतां दृष्ट्वा ऊचतुः केशवा
र्जुनौ। मा विद्रवत वित्रस्ता भयं त्यजत पांडवाः। एतावावां सर्वसैन्यैर्व्यूह्य सम्यगुदायुधौ। द्रोणं च सूतपुत्रं च प्रयतावः प्रबाधितुं। एतौ हि बलिनौ
शूरौ जितास्त्रौ जितकाशिनौ। उपेक्षितौ बलं क्रुद्धौ नाशयेतां तमूर्मिमां। तयोः संवदतोरेवं भीमकर्मा महारथः। आयाद्वृकोदरस्तूर्णं पुनरावर्त्य वा
हिनीं। वृकोदरं तथा यांतं दृष्ट्वा तत्र जनार्दनः। पुनरेवाब्रवीद्राजन्हर्षयन्निव पांडवं॥ एष भीमो रणश्लाघी वृतः सोमकपांडवैः। अभ्यवर्तत वेगे
न द्रोणकर्णौ महारथौ। एतेन सहितो युध्य पांचाल्यैश्च महारथैः। आश्वासनार्थं सर्वेषां सैन्यानां पांडुनंदन। ततस्तौ पुरुषव्याघ्रावुभौ माधवपांडवौ।
द्रोणकर्णौ समासाद्य धिष्ठितौ रणमूर्द्धनि॥ ॥संजय॥ ॥ ततस्तत्पुनरावृत्तं युधिष्ठिरबलं महत्। ततो द्रोणश्च कर्णश्च परान्ममृदतुर्युधि। स सं
प्रहारस्तुमुलो निशि प्रत्यभवन्महान्। यथा सागरयो राजंश्चंद्रोदयविवृद्धये। ततउत्सृज्य पाणिभ्यां प्रदीपांस्तव वाहिनी। युयुधे पांडवैः सार्द्धमु
न्मत्तवत्संरता। रजसा तमसा चैव संवृते भृशदारुणे। केकयाः समरे द्रोणं प्रायुध्यंत जयैषिणः। अथात्मीयानि नामानि श्राव्यमाणानि पार्थिव।
प्रहरद्भिर्महाराज स्वयंवरइवाहवे। निःशब्दमासीत्सहसा पुनः शब्दो महानभूत्। क्रुद्धानां युध्यमानानां जयतां जीयतामिति। यत्र यत्र स्म दृश्यंते
प्रदीपाः कुरुसत्तम। तत्र तत्र स्म ते शूरा निपतंति पतंगवत्। तथा संयुध्यमानानां विगाढाभून्महानिशा। पांडवानां च राजेंद्र कौरवाणां च सर्वशः।

द्रो०प०
१७७

॥ ॥द्रोणपर्वणि रात्रियुद्धे॥१८॥संजय॥ ॥ततः कर्णो रणे दृष्ट्वा पार्षतं परवीरहा॥आजघानोरसि शरैर्दशभिर्मर्मभेदिभिः॥प्रतिविव्याध तं तूर्णं धृष्टद्युम्नोपि मारिष॥पंचभिः सायकैर्हृष्टस्तिष्ठतिष्ठेति चाब्रवीत्॥तावन्योन्यं शरैर्दृष्टौ संछाद्य सुमहारथौ॥पुनः पूर्णायतोत्सृष्टैर्विशिखैर्विव्यधाते परस्परं॥ततः पांचालमुख्यस्य धृष्टद्युम्नस्य संयुगे॥सारथिं चतुरश्चाश्वान्कर्णो विव्याध सायकैः॥कार्मुकप्रवरं चास्य प्रचिच्छेद शितैः शरैः॥सारथिं चास्य भल्लेन रथनीडादपातयत्॥धृष्टद्युम्नश्च विरथो हताश्वो हतसारथिः॥गृहीत्वा परिघं घोरं कर्णस्याश्वानपीपिषत्॥विद्धश्च बहुभिस्तेन शरैराशीविषोपमैः॥ततो युधिष्ठिरानीकं पद्भ्यामेवान्ववर्त्तत॥आरुरोह रथं चापि सहदेवस्य मारिष॥प्रयातुकामः कर्णाय वारितो धर्मसूनुना॥कर्णस्तु सुमहातेजाः सिंहनादविमिश्रितं॥धनुःशब्दं महच्चक्रे दध्मौ तारेण चांबुजं॥दृष्ट्वा विनिर्जितं युद्धे पार्षतं ते महारथाः॥अमर्षवशमापन्नाः पांचालाः सोमकैः सह॥सूतपुत्रवधार्थाय शस्त्राण्यादाय सर्वशः॥प्रययुः कर्णमुद्दिश्य मृत्युं कृत्वा निवर्त्तनं॥कर्णस्यापि रथे वाहानन्यान्सूतोभ्ययोजयत्॥शंखवर्णान्महावेगान्सैंधवान्साधुवाहिनः॥लब्धलक्ष्यस्तु राधेयः पांचालानां महारथं॥अभ्यपीडयदायत्तः शरैर्मेघ इवाचलं॥सापीड्यमाना कर्णेन पांचालानां महाचमूः॥संप्राद्रवत्सुसंत्रस्ता सिंहेनेवार्द्दिता मृगी॥पतितास्तु रथेभ्यश्च गजेभ्यश्च महीतले रथेभ्यश्च नरास्तूर्णमदृश्यंत तत्र तत्र ततः॥धावमानस्य योधस्य क्षुरप्रैः सुमहामृधे॥बाहू चिच्छेद वै कर्णः॥शिरश्चैव सकुंडलं॥ऊरू चिच्छेद चान्यस्य रथस्थस्य विशांपते॥वाजिपृष्ठगतस्यापि भूमिष्ठस्यापि मारिष॥नाज्ञासिषुर्धावमाना बहवश्च महारथाः॥संछिन्नान्यात्मगात्राणि वाहनानि च संयुगे॥ते वध्यमानाः समरे पांचालाः सृंजयैः सह॥तृणप्रस्पंदनाच्चापि सूतपुत्रं च मेनिरे॥अपि स्वं समरे योधं धावमानं विचेतसः॥कर्णमेवाभ्यमन्यंत ततो भीता द्रवंति ते॥तान्यनीकानि भग्नानि द्रवमाणानि भारत॥अभ्यद्रवद्द्रुतं कर्णः पृष्ठतो विकिरन्शरान्॥अलक्ष्यमाणास्तेन्योन्यं

राम
१७७

सुसंमूढा विचेतसः। नाशक्नुवन्त वस्थातुं पाल्यमानाः किरीटिना। कर्णेनाभ्याहता राजन्पांचालाः परमेषुभिः। द्रोणेन च दिशः सर्वा वीक्ष्यमाणाः प्र
दुद्रुवुः। ततो युधिष्ठिरो राजा स्वसैन्यं प्रेक्ष्य विद्रुतं। अपयाने मनः कृत्वा फाल्गुनं वाक्यमब्रवीत्। पश्य कर्णं महेष्वासं धनुष्पाणिमवस्थितं। नि
शीथे दारुणे काले तपंतमिव भास्करं। कर्णसायकनुन्नानां क्रोशतामिव निस्वनः। अनिशं श्रूयते पार्थ त्वद्बंधूनामनाथवत्। यथा विसृजतश्चा
स्य संदधानस्य चाशुगं। पश्यामि जयविक्रांतं क्षपयिष्यति नो ध्रुवं। यदत्रानंतरं कार्यं प्राप्तकालं प्रपश्यसि। कर्णस्य वधसंयुक्तं तत्कुरुष्व धनंजय।
एवमुक्तो महाबाहुः पार्थः कृष्णमथाब्रवीत्। भीतः कुंतीसुतो राजा राधेयस्यातिविक्रमात्। एवंगते प्राप्तकालं कर्णानीके पुनः पुनः। तं चात्र पश्य
ताक्षिप्रं द्रवते हि वरूथिनी। द्रोणसायकनुन्नानां भग्नानां मधुसूदन। कर्णेन त्रास्यमानानामवस्थानं न लभ्यते। पश्यामि च तथा कर्णं विचरंत
मभीतवत्। द्रवमाणान्रथोदारान्किरंतं विशिखैः शरैः। नैनमभ्युत्सहे सोढुं चरंतं रणमूर्द्धनि। प्रत्यक्षं वृष्णिशार्दूल पादस्पर्शमिवोरगः। स भ
वांस्तत्र यात्वाशु यत्र कर्णो महारथः। अहमेनं वधिष्यामि मभेषमधुसूदन॥ ॥कृष्ण॥ ॥पश्यामि कर्णं कौंतेय देवराजमिवाहवे। विचरंतं
नरव्याघ्रमतिमानुषविक्रमं। नैतस्यान्योस्ति समरे प्रत्युद्यातुं धनंजय। विना त्वां पुरुषव्याघ्र राक्षसाद्वा घटोत्कचात्। न तु तावदहं मन्ये प्राप्त
कालं तवानघ। समागमं महाबाहो सूतपुत्रेण संयुगे। दीप्यमाना महोल्केव तिष्ठत्यस्य हि वासवी। त्वदर्थं च महाबाहो रौद्ररूपं बिभर्ति च। घटोत्कच
स्तु राधेयं प्रत्युद्यातु महाबलः। स हि भीमेन बलवान्जातः सुरपराक्रमी। तस्मिन्नस्त्राणि दिव्यानि प्यायुतान्यायुधानि च। सततं चानुरक्तो वै हि
तैषी च घटोत्कचः। विजेष्यति रणे कर्णमिति मे नास्त्यत्र संशयः। एवमुक्त्वा महाबाहुः पार्थं पुष्करलोचनः। आजुहावाथ तद्रक्षस्तत्रासीत्प्रादुर
यतः। कवची स शरी खड्गी सधन्वा च विशांपते। अभिवाद्य ततः कृष्णं पांडवं च धनंजयं। अब्रवीत्तं तदा हृष्टो ह्ययमस्म्यनुशाधि मां। ततस्तं

द्रो०प०
१७८

४

मेघसंकाशं दीप्तास्यं दीप्तकुंडलं। अभ्यभाषत हैडंबिं दाशार्हः प्रहसन्निव॥ ॥वासुदेव॥ ॥घटोत्कच विजानीहि यत्त्वां वक्ष्यामि पुत्रक। प्राप्तो विक्रमका
लो यं तव नान्यस्य कस्यचित्। मज्जिले मज्जमानानां बंधूनां त्वं प्लवो भव। विविधानि तवास्त्राणि माया श्च तव राक्षसीः। पश्य कर्णेन हैडंब पांडवाना
मनीकिनी। काल्यमाना यथा गावो गोपालेन तथा रणे। एष कर्णो महेष्वासो मतिमान्दृढविक्रमः। पांडवानामनीकेषु दहति क्षत्रियर्षभान्। न
रा: कुर्मो व्यवस्थातुं पीड्यमानाः शरार्द्दिताः। निशीथे शरवर्षेण सूतपुत्रेण पीडिताः। एते द्रवंति पांचालाः सिंहस्येव भयान्मृगाः। एतस्यैवं प्रवृद्ध
स्य सूतपुत्रस्य संयुगे। निषेद्धा विद्यते नान्यस्त्वामृते भीमविक्रम। स त्वं कुरु महाबाहो कर्म युक्तमिहात्मनः। मातुलानां पितृणां च तेजसा
स्त्रबलस्य च। एतदर्थं हि हैडिंब पुत्रमिच्छंति मानवाः। कथं न स्तारयेद् दुःखात्स त्वं तारय बांधवान्। इच्छंति पितरः सम्यक् प्राप्तं पुत्रं घटोत्कच।
इह लोके परे लोके तारयिष्यंति ये हिताः। तव ह्यस्त्रबलं भीमं माया श्च तव दुस्तराः। संग्रामे युध्यमानस्य सततं भीमनंदन। पांडवानां प्रभग्ना
नां कर्णेन निशि सायकैः। मज्जतां धार्तराष्ट्रेषु भव पारं परंतप। रात्रौ हि राक्षसा भूयो भवंत्यमितविक्रमाः। बलवंतः सुदुर्द्धर्षाः शूरा विक्रांतचा
रिणः। जहि कर्णं महेष्वासं निशीथे माययारणे। पार्था द्रोणं वधिष्यंति धृष्टद्युम्नपुरोगमाः॥ ॥संजय॥ ॥केशवस्य वचः श्रुत्वा बीभत्सुरपि
राक्षसं। अभ्यभाषत कौरव्य घटोत्कचमरिंदमं। घटोत्कच भवांश्चैव दीर्घबाहुश्च सात्वतः। मतो मे सर्वसैन्येषु भीमसेनश्च पांडवः। स भवा
न्यातु कर्णेन द्वैरथं युध्यतां निशि। सात्यकिः पृष्ठगोपस्ते भविष्यति महारथः। जहि कर्णं रणे शूरं सात्वतेन सहायवान्। यथेंद्रस्तारकं पूर्वं स्कं
देन सह जघ्निवान्॥ ॥घटोत्कच॥ ॥अलमेवास्मि कर्णाय द्रोणायालं च सत्तम। अन्येषां क्षत्रियाणां च कृतास्त्राणां महात्मनां। अद्य दास्या
मि संग्रामं सूतपुत्राय तं निशि। यं जनाः प्रेक्षयिष्यंति यावद्भूमिर्द्धरिष्यति। न चात्र शूरान्मोक्ष्यामि न भीतान्न कृतांजलीन्। सर्वानांश्च व

राम
१७८

घिष्याम्भिराक्षसं धर्ममास्थितः॥ ॥संजय॥ ॥एवमुक्त्वा महाबाहो हैडिंबः परवीरहा। अभ्ययात्तुमुले कर्णं तव सैन्यं विभीषयन्॥ तमापतंतं संक्रु
द्धं दीप्तास्यमिव पन्नगं। अभ्यस्यन् परमेष्वासः प्रतिजग्राह सूतजः॥ तयोः समभवद्युद्धं कर्णराक्षसयोर्मृधे। गर्जतो राजशार्दूल शक्रप्रह्लादयो
रिव॥ ॥इति महाभारते द्रोणपर्वणि रात्रियुद्धे॥१६५॥ संजय॥ ॥दृष्ट्वा घटोत्कचं राजा सूतपुत्ररथं प्रति। प्रयांतं त्वरया युक्तं जिघांसुं कर्ण
माहवे। अब्रवीत्तव पुत्रस्तु दुःशासनमिदं वचः। एतद्रक्षो वरं तूर्णं दृष्ट्वा कर्णस्य विक्रमं। अभियाति द्रुतं कर्णं तद्वारय महारथ। वृतः सैन्येन मह
ता याहि यत्र महारथः। कर्णो वैकर्तनो युद्धे राक्षसेन युयुत्सति। रक्ष कर्णं रणे यत्तो वृतः सैन्येन मानद। मा कर्णं राक्षसो घोरः प्रमादान्नाशयिष्य
ति। एतस्मिन्नंतरे राजन् जटासुरसुतो बली। दुर्योधनमुपागम्य प्राह प्रहरतां वरः। दुर्योधन तवामित्रान् प्रख्यातान् युद्धदुर्मदान्। पांडवान् हंतु
मिच्छामि त्वयाज्ञप्तः सहानुगान्। जटासुरो मम पिता रक्षसामग्रणीः पुरा। प्रयुज्य कर्म रक्षोघ्नं क्षुद्रैः पार्थैर्निपातितः। तस्यापचितिमिच्छामि
शत्रुशोणितपूजया। शत्रुमांसैश्च राजेंद्र मामनुज्ञातुमर्हसि। तमब्रवीत्ततो राजा प्रीयमाणस्ततस्ततः। द्रोणकर्णादिभिः सार्द्धं पर्याप्तोहं द्विषद्व
धे। त्वं तु गच्छ यथाज्ञप्तो जहि युद्धे घटोत्कचं। राक्षसं घोरकर्माणं रक्षोमानुषसंभवं। पांडवानां हितं नित्यं हस्त्यश्वरथघातिनं। विहायसिगतं
रौद्रं प्रेषयाद्य यमक्षयं। तथेत्युक्त्वा महाकायः समाहूय घटोत्कचं। जाटासुरिर्भैमसेनिं नानाशस्त्रैः समाकिरत्। अलंबलं च कर्णं च
कुरुसैन्यं च दुस्तरं। हैडिंबः प्रममाथैको मरुद्वातोंबुदानिव। ततो मायामयं दृष्ट्वा रथं तूर्णमलंबलः। घटोत्कचं शरव्रातैर्नानालिंगैः सम
र्पयत्। विध्वा च बहुभिर्बाणैर्भैमसेनिं महाबलः। व्यद्रावयच्छरव्रातैः पांडवानामनीकिनीं। तेन विद्राव्यमाणानि पांडुसैन्यानि मारिष।
निशीथे विप्रकीर्यंत वायुनुन्ना घना इव। घटोत्कचशरैर्नुन्ना नेशे वै तव वाहिनी। निशीथे प्राद्रवद्राजन्नुल्काहस्ताः सहस्रशः। अ

द्रो०प०
१७९

लंबलस्ततः क्रुद्धो भैमसेनिं महामृधे। आजघ्ने निशितैर्बाणैस्तोत्रैरिव महाद्विपं। तिलशस्तस्य तद्यानं यंतारं सर्वायुधानि च। घटोत्कचः प्रचिच्छेद प्राणद्यु
ते निदारुणे। ततः कर्णशरव्रातैः कुरूनन्यान्सहस्रशः। अलंबलं चाप्यवर्षन्मेघो मेरुमिवाचलं। ततः संचुक्षुभे सैन्यं कुरूणां राक्षसार्दितं। उपर्यु
परि चान्योन्यं चतुरंगमभून्महत्। जाटासुरिर्महाराज विरथो हतसारथिः। घटोत्कचं रणे क्रुद्धो मुष्टिनाभ्यहनद्दृढं। मुष्टिना निहतस्तेन प्रचचाल
घटोत्कचः। क्षितिकंपे यथा शैलः सवृक्षगणगुल्मवान्। ततः सप्रतिघातेन वज्रप्रतिमबाहुना। जाटासुरिं भैमसेनिर्न्यवधीन्मुष्टिना भृशं।
तं प्रमथ्य ततस्तूर्णं क्रुद्धो हैडंबिरक्षिपत्। दोर्भ्यामिंद्रध्वजाभाभ्यां निष्पिपेषाथ भूतले। जाटासुरिर्मोक्षयित्वा आत्मनः स घटोत्कचात्। घ
टोत्कचस्ततस्तस्य बाहुमुद्यम्य दक्षिणं। आजघानोरसि तदा निष्पिपेष च भूतले। अलंबलोप्यवाक्षिप्य समुत्क्षिप्य च राक्षसः। घटोत्कचं
बलाद्दोर्भ्यां निष्पिपेष महीतले। तयोः समभवद्युद्धं गर्जतोरतिकाययोः। घटोत्कचालंबलयोस्तुमुलं लोमहर्षणं। विशेषयंतावन्योन्यं मा
याभिरभिमानिनौ। युयुधाते महावीर्याविंद्रवैरोचनाविव। पावकांबुनिभौ भूत्वा पुनर्गरुडतक्षकौ। पुनर्मेघमहावातौ पुनर्वज्रमहाचलौ।
पुनः कुंजरशार्दूलौ पुनः स्वर्भानुभास्करौ। एवं सर्वास्त्रविसृजावन्योन्यवधकांक्षिणौ। भृशं चित्रमयुध्येतामलंबलघटोत्कचौ। परिघैश्च गदा
भिश्च प्रासमुद्गरपट्टिशैः। मुसलैश्च पताकाग्रैस्तावन्योन्यं निजघ्नतुः। हयाभ्यां च गजाभ्यां च पदातिरथिभिः सह। युयुधाते महामायौ राक्षस
प्रवरौ युधि। ततो घटोत्कचो राजन्नलंबलवधेप्सया। उत्पपात भृशं क्रुद्धः श्येनवन्निपपात ह। गृहीत्वा च महाकायं राक्षसेंद्रमलंबलं। उद्य
म्याभ्यहनद्भूमौ मयं विष्णुरिवाहवे। ततो घटोत्कचः क्रुद्धरूपोद्भुतदर्शनः। शिरोऽस्य कायं निष्पिष्य घोरं विकृतदर्शनं। स्फुरतश्चापि समरे नर्दतस्त
स्य भैरवं। निचकर्त शिरो राजन् शत्रोरमितविक्रमः। पिंगाक्षं विवृतास्यं तं दंष्ट्रभयाचैव जिह्वया। शत्रोः शीर्षमथोत्पाट्य केशेषु रुधिरोक्षितं। य

राम
१७९

योघटोत्कचस्तूर्णंदुर्योधनरथंप्राद्रवत्।अन्योन्यंचमहाबाहुःस्मयमानःसराक्षसः।द्रोणकर्णकृपान्योधानतीत्यसमहाबलः।कुरुराजंस
मासाद्ययुद्दुर्योधनमरिंदमं।रथेस्यनिक्षिप्यशिरोविहृताननमूर्द्धजं।आयादक्रूरवान्नादान्प्राद्रवीवबलाहकः।अब्रवीच्चततोराजन्दुर्यो
धनमिदंवचः।एषतेनिहतोबंधुस्त्वयासंदृष्टविक्रमः।पुनर्द्रष्टासिकर्णस्यनिष्ठामेतांमहात्मनः।सुप्रीतस्त्वावतिष्ठस्वयावत्कर्णंवधाम्य
हं।एवमुक्त्वाततःप्रायात्कर्णंप्रतिजनेश्वर।किरन्शरगणास्तीक्ष्णान्शत्रुश्चरणमूर्द्धनि।ततःसमभवद्युद्धंघोररूपंभयावहं।विस्म
पनंभृशंराजन्नरराक्षसयोर्मृधे॥ ॥इतिमहाभारतेद्रोणपर्वणिजाटासुरवधः।१७०॥ ॥धृतराष्ट्र॥ ॥यत्तद्वैकर्तनःकर्णोराक्षसश्च
घटोत्कचः।निशीथेसमसज्जेतांतद्युद्धमभवत्कथं।कीदृशंचाभवद्युद्धंतस्यघोरस्यरक्षसः।रथश्चकीदृशस्तस्यहयाःसर्वायुधानिच।रू
पंचकीदृशंतस्यशराःकेतुर्द्धनुस्तथा।कीदृशंकवचंचास्यकंठत्राणंचकीदृशं।पृच्छतोमेत्वमाचक्ष्वकुशलोह्यसिसंजय॥ ॥संजय॥ ॥
तुर्ध्वरोमाहरिश्मश्रुःशंकुकर्णोमहाहनुः।लोहिताक्षोमहाबाहुस्ताम्रास्योरक्तलोचनः।आकर्णाद्दारितास्यश्चतीक्ष्णदंष्ट्रःकरालवा
नुः।आदीर्घताम्रजिह्वश्चलंबभ्रूःस्थूलनासिकः।नीलांगोलोहितग्रीवोगिरिवर्ष्माभयंकरः।महाकायोमहाबाहुर्महाशीर्षोमहाबलः।
विरूपःपरुषस्पर्शोविकटोत्कटपिंगलः।स्थूलास्थिसिंहनादश्चशिथिलोपचयान्वहनू।नानाभरणसंपन्नकेयूरांगदभूषणः।
उरसाधारयन्निष्कमग्निमालीयथानलः।तस्यहेममयंचित्रंबहुरूपंसुशोभनं।तोमरप्रतिमंशुभ्रंकिरीटंमूर्द्धिशोभितं।कुंड
लेबालसूर्याभेमालांहेममयींशुभां।धारयन्विपुलंकांस्यंकवचंचमहाप्रभे।किंकिणीशतनिर्घोषंरक्तध्वजपताकिनं।ऋक्षचर्माव न
द्धांगंनल्वमात्रंमहारथं।सर्वायुधवरोपेतमास्थितोध्वजमालिनं।अष्टचक्रसमायुक्तंमेघगंभीरनिस्वनं।तंतुमातंगसंकाशालोहिताक्षं

द्रो०प०
१८०

बिभीषणं। ऋक्षरूपमयी जैपेता बलवंतो हयोत्तमाः। वहंतो राक्षसं रौद्रं बलवंतोजितश्रमाः। विपुलाभिः सटाभिस्ते हेषमाणा मुहुर्मुहुः।
राक्षसोस्य विरूपाक्षः सूतोदीप्तास्यकुंडलः। रश्मिभिः सूर्यसंकाशैः संजग्राह हयोत्तमान्। स तेन सहितस्तस्थावरुणेन यथा रविः। सं
सक्तइव गोत्रेण यथाग्निर्महतो महान्। दिवस्पृक् सुमहाकेतुः स्यंदनेस्य समुच्छ्रितः। रक्तोत्तमांगः क्रव्यादो गृध्रः परमदारुणः। वास
वाशनिनिर्घोषदृढज्यामतिविक्षिपन्। व्यक्तं किष्कुपरीणाहं द्वादशारत्निकार्मुकं। रथाक्षमात्रैरिषुभिः सर्वाः प्रच्छादयन् दिशः। तस्यां
वीरापहारिण्यां निशायां कर्णमभ्ययात्। तस्य विक्षिपतश्चापं रथे विष्टभ्य तिष्ठतः। अश्रूयत धनुर्घोषो विस्फूर्जितमिवाशनेः। तेन वि
त्रास्यमानानि तव सैन्यानि भारत। समकंपंत सर्वाणि सिंधोरिव महोर्मयः। तमापतंतं संप्रेक्ष्य विरूपाक्षं विभीषणं। उत्स्मयन्निव राधे
यस्त्वरमाणोभ्यवारयत्। ततः कर्णोभ्ययादेनमस्यन्नस्यंतमंतिकात्। मातंगइव मातंगं यूथर्षभ इवर्षभं। स सन्निपातस्तुमुलस्तयोरा
सीद्विशांपते। कर्णराक्षसयो राजन्निंद्रशंबरयोरिव। तौ प्रगृह्य महावेगौ धनुषी भीमविक्रमौ। प्राच्छादयेतामन्योन्यं तक्षमाणौ महेषुभिः।
ततः पूर्णायतोत्सृष्टैः शरैः सन्नतपर्वभिः। विदारयेतामन्योन्यं कांस्ये निर्भिद्य वर्मणी। तौ नखैरिव शार्दूलौ दंतैरिव महाद्विपौ। रथशक्ति
भिरन्योन्यं विशिखैश्च ततक्षतुः। संछिंदंतौ हि गात्राणि संदधानौ हि सायकान्। धक्ष्यमाणौ शरव्रातैर्नोदीक्षितुमशक्नुतां। तौ तु
विक्षतसर्वांगौ रुधिरौघपरिप्लुतौ। विभ्राजेतां यथा वारिप्रस्रवंतौ गैरिकाचलौ। तौ शराग्रविभिन्नांगौ निर्भिंदंतौ परस्परं। नाकंपयेतामन्योन्यं
न्योन्यं यतमानौ महाद्युती। तत्प्रवृत्तं निशायुद्धं समं चिरमिवाभवत्। प्राणनोर्दीव्यतो राजन् कर्णराक्षसयोर्मृधे। तस्य संदधतस्तीक्ष्णा
ष्णान् शरांश्चासक्तमस्यतः। धनुर्घोषेण वित्रस्ताः स्वे परे च तदाभवन्। घटोत्कचं यदा कर्णो विशेषयति नो मृधे। ततः प्रादुष्करोद्दिव्य

राम
१८०

मस्त्रमस्त्रविदां वरः। कर्णेन विहितं दृष्ट्वा दिव्यमस्त्रं घटोत्कचः। प्रादुश्चक्रे महामायां राक्षसीं पांडुनंदनः। शूलमुद्गरधारिण्या शैलपादपह
स्तया। रक्षसां घोररूपाणां महत्या सेनया वृतः। तमुद्यतमहाचापं दृष्ट्वा ते व्यथिता नृपाः। भूतांतकमिवायांतं कालदंडोग्रधारिणं। घटोत्कचप्र
युक्तेन सिंहनादेन भीषिताः। प्रसुस्रुवुर्गजा मूत्रं विव्यथुश्च नरा भृशं। ततोऽश्मवृष्टिरत्युग्रा महत्यासीत्समंततः। अर्धरात्रेऽधिकबलैर्विमु
क्ता रक्षसां गणैः। आयसानि च चक्राणि भुशुंडीशक्तितोमराः। पतंत्यविरलाः शूलाः शतघ्न्यः पट्टिशास्तथा। तमुग्रमतिरौद्रं च दृष्ट्वा युद्धं
नराधिपाः। पुत्राश्च तव योधाश्च व्यथिता विप्रदुद्रुवुः। तत्रैकोऽस्त्रबलश्लाघी कर्णो मानी न विव्यथे। व्यधमच्च शरैर्मायां घटोत्कचविनिर्मितां।
मायायां तु प्रहीणायाममर्षाच्च घटोत्कचः। विससर्ज शरान्घोरान्सूतपुत्रं त एविशन्। ततस्ते रुधिराभ्यक्ता भित्त्वा कर्णं महाहवे। विविशुर्ध
रणीं बाणाः संक्रुद्धा इव पन्नगाः। सूतपुत्रस्तु संक्रुद्धो लघुहस्तः प्रतापवान्। घटोत्कचमभिक्रम्य बिभेद दशभिः शरैः। घटोत्कचो विनिर्भि
न्नः सूतपुत्रेण मारिष। चक्रं दिव्यं सहस्रारमगृह्णाद्व्यथितेंद्रियः। क्षुरांतं बालसूर्याभं मणिरत्नविभूषितं। चिक्षेपाधिरथेः क्रुद्धो भैमसेनि
र्जिघांसया। प्रविद्धमतिवेगेन विक्षिप्तं कर्णसायकैः। अभाग्यस्येव संकल्पस्तन्मोघमपतद्भुवि। घटोत्कचस्तु संक्रुद्धो दृष्ट्वा चक्रं निपाति
तं। कर्णं प्राच्छादयद्बाणैः स्वर्भानुरिव भास्करं। सूतपुत्रस्त्वसंभ्रांतो रुद्रोपेंद्रेंद्रविक्रमः। घटोत्कचरथं तूर्णं छादयामास पत्रिभिः। घटोत्कचे
प्रहिता नेन गदा हेमांगदा तदा। क्षिप्ता भ्राम्य शरैस्साऽपि कर्णेनाभिहताऽपतत्। ततोंऽतरिक्षमुत्पत्य कालमेघ इवोन्नदन्। प्रववर्ष महाकायो द्रुमव
र्षं नभस्तलात्। ततो मायाविनं कर्णो भीमसेनसुतं दिवि। मार्गणैरभिविव्याध घनं सूर्य इवांशुभिः। तस्य सर्वान्हयान्हत्वा संछिद्य शतधा रथं

थं। अभ्यवर्षच्छरैः कर्णः पर्जन्य इव वृष्टिमान्। न तस्यासीदभिन्नं गात्रे द्व्यंगुलमंतरं। सोदृश्यत मुहूर्तेन श्वाविच्छललितो यथा। न हयान्न रथं
तस्य न ध्वजं न घटोत्कचं। दृष्टवंतस्म समरे शरौघैरभिसंवृतं। स तु कर्णस्य तद्दिव्यमस्त्रमस्त्रेण ताडयन्। मायायुद्धेन मायावी सूतपुत्रमयो
धयत्। अवंचयत्तदा कर्णं मायया लाघवेन च। अलक्ष्यमाणोथ दिवि शरजालेन संपतन्। भैमसेनिर्महामायो मायया कुरुसत्त
म। विचचार महामायो मोहयन्निव भारत। स मं कृत्वा विरूपाणि वदनान्याशु भारत। अग्रसत्सूतपुत्रस्य दिव्यान्यस्त्राणि मायया। पुन
श्चापि महामायः संछिन्नः शतधा रणे। गतसत्वो निरुत्साहः पतितः खाद्दृश्यत। अहतं मन्यमानास्तं प्राणदन्कुरुपुंगवाः। अ
थ तन्नादयन्सर्वाः २ दिशः स प्रत्यदृश्यत। पुनश्चापि महाकायः शतशीर्षः शतोदरः। व्यदृश्यत महाबाहुर्मैनाक इव पर्वतः। अंगुष्ठमा
त्रो भूत्वा च पुनरेव स राक्षसः। सागरोर्मिरिवोद्भूतस्तिर्यगूर्ध्वमधस्तथा। वसुधां दारयित्वा च पुनरप्स्वन्यमज्जत। व्यदृश्यत तदा तत्र
पुनरुन्मज्जितोन्यतः। सोवतीर्य पुनस्तस्थौ रथे हेमपरिष्कृते। क्षितिं खं च दिशश्चैव मायया वेत्य दंशितः। गत्वा कर्णरथाभ्याशं सकुंड
लोद्योतिताननः। प्राह वाक्यमसंभ्रांतः सूतपुत्रं विशांपते। तिष्ठेदानीं क्व मे जीवन्सूतपुत्र गमिष्यसि। युद्धश्रद्धामहं तेद्य विनेष्यामि रणा
जिरे। इत्युक्त्वा रोषताम्राक्षो रक्षः क्रूरपराक्रमं। उत्पपातांतरिक्षं च जसेहोच्चयुधिष्ठिरः। कर्णमभ्याहरच्चैव गजेंद्रमिव केसरी। रथाक्ष
मात्रैरिषुभिरभ्यवर्षत् घटोत्कचः। रथिनामृषभं कर्णं धाराभिरिव तोयदः। शरवृष्टिं च तां कर्णो दूरप्राप्तामशातयत्। दृष्ट्वा च विहतां मायां
कर्णेन भरतर्षभ। घटोत्कचस्ततो मायां दुस्तरां विससर्ज ह। सोभवद्गिरिरत्युच्चैः शिखरैस्तरुसंकटैः। शूलप्रासासिमुशलजलप्रस्रवणो

महान्।तमंजनचयप्रख्यंकर्णोदृष्ट्वामहीधरं।पातयन्नायुधान्युग्रान्यघमन्नचचुक्षुभे।स्मयन्निवततःकर्णोदिव्यमस्त्रमुदीरयन्।ततःसोस्त्रे
णशैलेंद्रोविक्षिप्तःखेव्यनश्यत।ततःसतोयदोभूत्वानीलःसेंद्रायुधोदिवि।अश्मवृष्टिभिरत्युग्रःसूतपुत्रमवाकिरत्।अथसंधायवायव्यमस्त्र
मस्त्रविदांवरः।व्यधमत्कालमेघंतंकर्णोवैकर्तनोवृषः।समार्गणगणैःकर्णोदिशःप्रच्छाद्यसर्वशः।जघानास्त्रैर्महाराजघटोत्कचसमीरि
तं।ततःप्रहस्यसमरेभैमसेनिर्महाबलः।प्रादुश्चक्रेमहामायांकर्णंप्रतिमहारथं।सदृष्ट्वापुनरायांतंरथेनरथिनांवरं।घटोत्कचमसंभ्रां
तंराक्षसैर्बहुभिर्वृतं।सिंहव्याघ्रसदृक्षैर्मत्तद्विरदविक्रमैः।गजस्थैश्चरथस्थैश्चवाजिपृष्ठगतैस्तथा।नानाशस्त्रधरैर्घोरैर्नानाक
वचभूषणैः।वृतंघटोत्कचंक्रूरैर्मरुद्भिरिववासवं।दृष्ट्वाकर्णोमहेष्वासःपातयामासराक्षसान्।घटोत्कचस्ततःकर्णंविद्ध्वापंचभि
राशुगैः।ननादभैरवंनादंभीषयन्सर्वपार्थिवान्।भूयश्चांजलिकेनाथसमार्गणगणंमहत्।कर्णहस्तस्थितंचापंचिच्छेदाशुघटोत्क
चः।अथान्यद्धनुरादायदृढंभारसहंमहत्।व्यकर्षतबलात्कर्णइंद्रायुधमिवोच्छ्रितं।ततःकर्णोमहाराजप्रेषयामाससायकान्।
सुवर्णपुंखाञ्छत्रुघ्नान्खचरान्खचरंप्रति।तद्बाणैरर्दितंयूथंरक्षसांतेननाशितं।सिंहेनेवार्दितंवन्यंगजानामाकुलंकुलं।
विधम्यराक्षसान्बाणैःसाश्वसूतगजान्विभुः।ददाहभगवान्वह्निर्भूतानीवयुगक्षये।सहत्वाराक्षसींसेनांशुशुभेसूर्यनंदनः।
पुरेवत्रिपुरंहत्वादिविदेवोमहेश्वरः।तेषुराजसहस्रेषुपांडवेयेषुमारिष।नैनंनिरीक्षितुमपिकश्चिच्छक्नोतिपार्थिवः।ऋतेघटोत्क
चाद्राजन्राक्षसेंद्रान्महाबलात्।तस्यक्रुद्धस्यनेत्राभ्यांपावकःसमजायत।महोल्काभ्यांमहाराजसार्चिषःस्नेहबिंदवः।तलंतलेन

संहत्य संदधद्बाणान्छद्म। रथमास्थाय च पुनर्मायया निर्मितं महत्। युक्तं गजनिभैर्वाहैः पिशाचवदनैः खरैः। सस्तंभमब्रवीत्क्रुद्धः
सूतपुत्राय मां वह। मायया घोररूपेण रथेन रथिनां वरः। द्वैरथं सूतपुत्रेण पुनरेवाविशां पते। स चिक्षेप पुनः क्रुद्धः सूतपुत्राय राक्षसः। अष्टच
क्रां महाघोरामशनीं रुद्रनिर्मितां। तामवप्लुत्य संक्रुद्धो जग्राह सूतनंदनः। चिक्षेप चैनां तस्यैव स्यंदनात्सोथ पुप्लुवे। सा साश्वसूतध्वजं यानं भ
स्मकृत्वा महाप्रभा। विवेशाथ वसुधां भित्वा सुरास्तत्र विसिस्मियुः। कर्णं तु सर्वभूतानि पूजयामासुरंजसा। यदवप्लुत्य जग्राह देवसृष्टां महा
नीं॥ एवं कृत्वा रणे कर्ण आरुरोह रथं पुनः। ततो मुमोच नाराचान्सूतपुत्रः परंतप। अशक्यं कर्तुं मन्ये न सर्वभूतेषु मानद। यदकार्षीत्तदा
कर्णः संग्रामे भीमदर्शनं। स हन्यमानो नाराचैर्धाराभिरिव पर्वतः। गंधर्वनगराकारः पुनरंतरधीयत। एवं स वै महामायो मायया लाघवेन च।
अस्त्राणि तानि दिव्यानि जघान रिपुसूदनः। निहन्यमानेष्वस्त्रेषु मायया तेन रक्षसा। असंभ्रांतस्ततः कर्णस्तद्रक्षः पुनरासदत्। ततः क्रु
द्धो महाराज भैमसेनिर्महाबलः। चकार बहुधात्मानं भीषयन्वै नराधिपान्। ततो दिग्भ्यः समापेतुः सिंहव्याघ्रतरक्षवः। अग्निजिह्वा
श्च भुजगा विहगाश्चाप्ययोमुखाः। स कीर्यमाणो विशिखैः कर्णचापच्युतैः शरैः। नगराजसमप्रख्यस्तत्रैवांतरधीयत। राक्षसाश्च पिशा
चाश्च कृतमल्गास्याश्च सर्वशः। ते कर्णं भक्षयिष्यंतः सर्वतः समुपाद्रवन्। अथैनं वाग्भिरुग्राभिस्त्रासयांचक्रिरे तदा। उद्यतैर्बहुभिर्घो
रैरायुधैः शोणितोक्षितैः। तथानेकैरेकवर्णैः कर्णो विव्याध चाशुगैः। प्रतिहत्य तु तां मायां दिव्येनास्त्रेण राक्षसीं। आजघान हयान
स्य शरैः सन्नतपर्वभिः। ते भग्नविहृतांगाश्च छिन्नपृष्ठाश्च सायकैः। नासमेवान्यपश्यंत पश्यतस्तस्य रक्षसः। स भग्नमायो हैडिंबः

पीवैकर्त्तनंततः। एषतेविदधेमृत्युंकृत्स्नांतरधीयत॥ ॥इतिमहाभारतेद्रोणपर्वणिरात्रियुद्धे घटोत्कचवधे॥७१॥ ॥संजयउवाच॥ ॥
तस्मिंस्तथावर्त्तमानेकर्णराक्षसयोर्मृधे।अलायुधोराक्षसेंद्रोवीर्यवानभ्यवर्त्तत।महत्यासेनयायुक्तःसुयोधनमुपागमत्।राक्षसानांविरूपाणां
सहस्रैःपरिवारितः।नानारूपधरैर्वीरैःपूर्ववैरमनुस्मरन्।तस्यभ्राताहिविक्रांतोब्राह्मणाशीबकोहतः।किर्मीरश्चमहातेजाहिडिंबश्चतथा
सखा।सदीर्घकालाध्युषितःपूर्ववैरमनुस्मरन्।विज्ञातंचनिशायुद्धंजिघांसुर्भीममाहवे।समत्तइवमातंगोविचरन्खचरस्तदा।दुर्योधन
मिदंवाक्यमब्रवीद्युद्धलालसः।विदितंतेमहाराजयथाभीमेनराक्षसाः।हिडिंबबककिर्मीरानिहताममबांधवाः।परामर्शश्चकन्यायाहिडिं
बायाःकृतःपुरा।किमन्यद्राक्षसानन्यानस्मांश्चपरिभूयहि।तमहंसगणंराजन्सवाजिरथकुंजरं।हैडिंबंचसहामात्यंहंतुमभ्यागतःस्वयं।
अद्यकुंतीसुतान्सर्वान्वासुदेवपुरोगमान्।हत्वासंभक्षयिष्यामिसर्वैरनुचरैःसह।निवारयबलंसर्वंमहंयोत्स्यामिपांडवैः।युद्धश्रद्धांवि
नेष्यामिपार्थानामितिकौरव।तस्यतद्वचनंश्रुत्वाराजादुर्योधनस्तदा।प्रतिपूज्याब्रवीद्वाक्यंभ्रातृभिःपरिवारितः।त्वांपुरस्कृत्यस
गणंवयंयोत्स्यामहेपरान्।नहिवैरांतमनसःस्थास्यंतिममसैनिकाः।एवमस्त्वितिराजानमुक्त्वाराक्षसपुंगवः।अभ्ययात्त्वरयाभीमंस
हितःपुरुषाशनैः।दीप्यमानेनवपुषारथेनादित्यवर्चसा।तादृशेनैवराजेंद्रयादृशेनघटोत्कचः।तस्याप्यतुलनिर्घोषोरावणस्ययथारथोय
था।ऋक्षचर्मावनद्धांगोनल्वमात्रोमहारथः।तस्यापितुरगाःशीघ्राहस्तिकायाःखरस्वनाः।गतियुक्तामहाकायामांसशोणितभोजनाः।त
स्यापिरथनिर्घोषोमहामेघरवोपमः।तस्यापिसुमहच्चापंदृढंचबलवत्तरं।तस्याप्यक्षसमाबाणारुक्मपुंखाःशिलाशिताः।सोपिवीर्या
न्महाबाहुर्यथैवसघटोत्कचः।तस्यापिगोमायुबलाभिगुप्तोबभूवकेतुर्ज्वलनार्कतुल्यः।सचापिरूपेणघटोत्कचस्यश्रीमत्तमोव्या

कुंडलदीप्तास्यः। दीप्तांगदो गदी शक्तिकिरीटी माली बद्धस्वगुल्फी षनिबद्धखड्गः। गदी भुशुंडी मुशली हली चशरासनी वारणतुल्यवर्मा। रथेन
तेनानलवर्चसा च विद्रावयन्पांडववाहिनीनां। रराज संख्ये परिवर्तमानो विद्युन्माली मेघ इवांतरिक्षे। ते चापि सर्वे प्रवरा नरेंद्रा महाब
लावर्मिणः क्रोधमुक्ताः। हर्षान्विता युयुधुस्तत्र राजन्समंततः पांडवयोधवीराः॥ ॥इति श्रीमहाभारते द्रोणपर्वणि रात्रियुद्धे॥ ७३॥
॥ ॥संजय॥ ॥उपागतमभिप्रेक्ष्य भीमकर्माणमाहवे। हर्षमाहारयांचक्रुः कुरवः सर्व एव ते। तथैव तव पुत्रास्ते दुर्योधनपुरोगमाः।
अप्लवाः प्लवमासाद्य तर्तुकामा इवार्णवं। पुनर्जातमिवात्मानं मन्वानाः पार्थिवास्तदा। अलायुधं राक्षसेंद्रं स्वागतेनाभ्यपूजयन्। तस्मिं
स्त्वमानुषे युद्धे वर्तमाने सुदारुणे। कर्णराक्षसयोर्नक्तं दारुणे प्रतिदर्शने। उपप्रेक्षंत पांचालाः स्मयमानाः सराजकाः। तथैव तावका
राजन्घूर्णमानास्ततस्ततः। चुक्रुशुर्नेदमस्तीति द्रोणद्रौणिकृपादयः। तत्कर्म दृष्ट्वा संभ्रांता हैडिंबस्य रणाजिरे। सर्वमाविग्नमभव
द्धाहाकारमचेतनं। तव सैन्यं महाराज निराशं कर्णजीविते। तथैव तव पुत्रास्ते दुर्योधनपुरोगमाः। अलायुधं राक्षसेंद्रं समाहूयेद
मब्रुवन्। एष वैकर्तनः कर्णो हैडिंबेन समागतः। कुरुते कर्म सुमहत् यदस्योपयिकं मृधे। पश्यैतान्पार्थिवान्शूरान्निहतान्भैम
सेनिना। नानाशस्त्रैरभिहतान्पादपानिव दंतिना। तवैष भागः समरे राजमध्ये मया कृतः। ममैवानुमते वीर तं विक्रम्य निबर्हय। पुरा
वैकर्तनं कर्णमेष पापो घटोत्कचः। मायाबलमुपाश्रित्य कर्षयत्यरिकर्षणः। एवमुक्तः स राज्ञा तु राक्षसस्तीव्रविक्रमः। तथेत्युक्त्वा
महाबाहुर्घटोत्कचमुपाद्रवत्। ततः कर्णं समुत्सृज्य भैमसेनिरपि प्रभो। प्रत्यमित्रमुपायांतं मर्दयामास मार्गणैः। तयोः समभवद्यु
द्धं क्रुद्धयो राक्षसेंद्रयोः। मत्तयोर्वासिताहेतोर्द्विपयोरिव कानने। रक्षसा विप्रमुक्तस्तु कर्णो पि रथिनां वरः। अभ्यद्रवद्भीमसेनं रथे

नादित्यवर्चसा। समायांतमनादृत्य दृष्ट्वा यस्तं घटोत्कचं। अलायुधेन समरे सिंहेनेव गवां पतिं। रथेनादित्यवपुषा भीमसेनः प्रतापवान्। कि
रन्शरौघान्निशितानलायुधरथं प्रति। तमायांतमभिप्रेक्ष्य स तदालायुधः प्रभो। घटोत्कचं समुत्सृज्य भीमसेनमुपाद्रवत्। तं भीमः सहसाभ्येत्य
राक्षसांतकरः प्रभो। सगणं राक्षसेंद्रं तं शरवर्षैरवाकिरत्। तथैवालायुधो राजन्शिलाधौतैरजिह्मगैः। अभ्यवर्षत कौंतेयं पुनः पुनररिंदमः। तथा
ते राक्षसाः सर्वे भीमसेनमुपाद्रवन्। नानाप्रहरणा भीमास्त्वत्सुतानां जयैषिणः। स ताड्यमानो बहुभिर्भीमसेनो महाबलः। पंचभिः पंचभिः सर्वा
तानविध्यच्छितैः शरैः। ते वध्यमाना भीमेन राक्षसाः क्रूरयोनयः। विनेदुस्तुमुलान्नादान्दुद्रुवुश्च दिशो दश। तांस्त्रास्यमानान्भीमेन दृष्ट्वा र
क्षो महाबलं। अभिदुद्राव वेगेन शरैश्चैनमवारयत्। तं भीमसेनः समरे तीक्ष्णाग्रैरक्षिपच्छरैः। अलायुधस्तु तानस्तान्भीमेन विशिखान्रणे।
चिच्छेद कांश्चित्समरे त्वरया कांश्चिदग्रहीत्। स तं दृष्ट्वा राक्षसेंद्रं भीमो भीमपराक्रमः। गदां चिक्षेप वेगेन वज्रपातोपमां तदा। तामापतंतीं वेगेन
गदां ज्वालाकुलां ततः। गदया ताडयामास सा गदा भीममाद्रवत्। स राक्षसेंद्रं कौंतेयः शरवर्षैरवाकिरत्। तां गदामकरोन्मोघां राक्षसो[illegible]से। विविधैः
शरैः। ते चापि राक्षसाः सर्वे सैनिका भीमरूपिणः। शासनाद्राक्षसेंद्रस्य निजघ्नू रथकुंजरान्। पांचालाः संजयाश्चैव वाजिनः परमद्वि
पाः। न शांतिं लेभिरे तत्र क्षेरोसेर्भृशपीडिताः। तं तु दृष्ट्वा महाघोरं वर्तमानं महाहवं। अब्रवीत्पुरुषश्रेष्ठो धनंजयमिदं वचः। पश्य भीमं महाबा
हुं राक्षसेंद्रवशानुगं। पदवीमस्य गच्छ त्वं मा विचारय पांडव। धृष्टद्युम्नः शिखंडी च युधामन्यूत्तमौजसौ। सहिता द्रौपदेयाश्च कर्णं यांतु
महारथाः। नकुलः सहदेवश्च युयुधानश्च वीर्यवान्। इतरान्राक्षसान्घ्नंतु शासनात्तव पांडव। त्वमपि च महाबाहो चमूं द्रोणपुरस्कृतां।
वारयस्व नरव्याघ्र महद्धि भयमुपागतं। एवमुक्ते तु कृष्णेन यथादिष्टा रथोत्तमाः। जग्मुर्वैकर्तनं कर्णं राक्षसांश्चेतरान्रणे। अथ पूर्णायतो

स्तस्ते: शरैरग्नी विषोपमैः। धनुश्चिच्छेद भीमस्य राक्षसेंद्रः प्रतापवान्। हयांश्चास्य त्रिभिर्बाणैः सारथिं च महाबलः। जघान मिषतः संख्ये भीम
सेनस्य भारत। सोवतीर्य रथोपस्थाद्धताश्वो हतसारथिः। तस्मै गुर्वीं गदां घोरां स विनद्योत्ससर्ज ह। ततस्तां भीमनिर्घोषामापतंतीं महागदां।
गदया राक्षसो घोरो निजघान नराधिप। तद्दृष्ट्वा राक्षसेंद्रस्य घोरं कर्म भयावहं। भीमसेनो प्रहृष्टात्मा गदामाशु परामृशत्। तयोः सम
भवद्युद्धं तुमुलं नररक्षसोः। गदानिपातसंह्रादैर्भुवं कंपयतोर्भृशं। गदाविमुक्तौ तौ भूयः समासाद्येतरेतरं। मुष्टिभिर्वज्रसंह्रादैरन्योन्यमभि
जघ्नतुः। रथचक्रैर्युगैरक्षैरधिष्ठानैरुपस्करैः। यथासन्नमुपादाय निजघ्नतुरमर्षणौ। तौ विक्षरंतौ रुधिरं समासाद्येतरेतरं। मत्ताविव म
हानागौ व्यकर्षेतां पुनः पुनः॥ ॥इति द्रोणपर्वणि रात्रियुद्धे घटोत्कचवधे॥ श्री संजय॥ ॥संप्रेक्ष्य भीमं समरे रक्षसा ग्रस्तमंतिकात्।
वासुदेवोब्रवीद्राजन् घटोत्कचमिदं वचः। पश्य भीमं महाबाहो रक्षसा ग्रस्तमंतिकात्। पश्यतां सर्वसैन्यानां तव चैव महाद्युते। स कर्णं त्वं
समुत्सृज्य राक्षसेंद्रमलायुधं। जहि क्षिप्रं महाबाहो पश्चात्कर्णं वधिष्यसि। स वार्ष्णेयवचः श्रुत्वा कर्णमुत्सृज्य वीर्यवान्। युयुधे राक्षसेंद्रे
ण बकभ्राता घटोत्कचः। तयोः सुतुमुलं युद्धं बभूव निशि रक्षसोः। अलायुधस्य चैवोग्रं हैडंबस्य च भारत। वेगेनापततः शूरानुग्रगृही
तशरासनान्। आत्तायुधस्तु संक्रुद्धो युयुधानो महारथः। नकुलः सहदेवश्च विद्धिदुर्निशितैः शरैः। सर्वांश्च समरे राजन् किरीटी
क्षत्रियर्षभान्। परिचिक्षेप बीभत्सुः सर्वतः प्रक्षिपन् शरान्। कर्णश्च समरे राजन् प्राद्रावयत पार्थिवान्। धृष्टद्युम्नशिखंड्यादीन्
पांचालानां महारथान्। तान् वध्यमानान् दृष्ट्वा तु भीमो भीमपराक्रमः। अभ्ययात्त्वरितः कर्णं विकिरन् विशिखान् रणे। ततस्तेप्याययुर्हत्वा
राक्षसान्यत्र सूतजः। नकुलः सहदेवश्च सात्यकिश्च महारथः। ते कर्णं योधयामासुः पांचालाद्रोणमेव च। अलायुधस्तु संक्रुद्धो घटोत्क

राम
१ ८४

चमरिंदमापरिघेणातिकायेनताडयामाससमूर्द्धनि।सतुतेनप्रहारेणभैमसेनिर्महाबलः।ईषन्मूर्छान्वितात्मानंसंस्तंभयनवीर्य
वान्।ततोदीप्ताग्निसदृशांशतघंटामलंकृतां।चिक्षेपतस्मैसमरेगदांकांचनभूषणां।साहयान्सारथिंचैवरथंचास्यमहाधनं।चू
र्णयामासवेगेनविसृष्टाभीमकर्मणा।सभग्नहयचक्राक्षोविशीर्णध्वजकूबरः।उत्पपातरथात्तूर्णंमायामास्थायराक्षसीं।ससमा
स्थायमायांतुववर्षरुधिरंबहु।विद्युद्विभ्राजितंचासीत्तुमुलाभ्राकुलंनभः।ततोवज्रनिपातैश्चसाशनिस्तनयित्नुमान्।महांश्चट
चटाशब्दस्तथासीत्तस्मिन्महाहवे।तांप्रेक्ष्यविहितांमायांसराक्षसोराक्षसेनतु।ऊर्ध्वमुत्पत्यहैडंबस्तांमायांमाययाववधीत्।सोभिवी
क्ष्यहतांमायांमायावीमाययैवहि।अश्मवर्षंतुतुमुलंविससर्जघटोत्कचे।घटोत्कचस्ततांवृष्टिंशरवर्षेणवीर्यवान्।दिशोविध्वंसया
मासतदद्भुतमिवाभवत्।ततोनानाप्रहरणैरन्योन्यमभिवर्षतां।आयुधैःपरिघैःशूलैर्गदामुशलमुद्गरैः।पिनाकैःकरवालैश्चतोमर
प्रासकंपनैः।नाराचैर्विविधैर्भल्लैःशरैश्चक्रैःपरस्परं।अयोगुडैर्भिंडिमालैर्गोशीर्षैर्लूखलैरपि।अर्द्धचंद्रैर्वत्सदंतैर्दंडैश्शतयष्टि
मुद्गरैः।उत्पाट्यचमहाशाखैर्विविधैर्जगतीरुहैः।शमीपीलुकरीरैश्चकंपनैरर्जुनैरपि।इंगुदीबदरीभिश्चकोविदारैश्चपुष्पितैः।पलाशैरि
मेदैश्चप्लक्षन्यग्रोधपिप्पलैः।महद्भिःसमरेतस्मिन्नन्योन्यमभिजघ्नतुः।विविधैःपर्वताग्रैश्चनानाधातुभिराचितैः।तेषांशब्दोमहानासीत्
वज्राणांभिद्यतामिव।युद्धंतदभवद्घोरंभैम्यलायुधयोर्नृप।हरींद्रयोर्यथाराजन्वालिसुग्रीवयोःपुरा।तौयुद्धपरिघैर्घोरैरायुधैर्विशिखैस्त
था।निशितैर्निशितौखड्गावन्योन्यमभिजघ्नतुः।तावन्योन्यमभिद्रुत्यकेशेषुचमहाबलौ।भुजाभ्यांपर्यगृह्णीतांमहामायौभयंकरौ।।
तौभिन्नगात्रौप्रस्वेदंसुस्रुवातेजनाधिप।रुधिरंचमहाकायावभिवृष्टाविवांबुदौ।अथाभिपत्यवेगेनसमुद्भ्राम्यचराक्षसं।बलेनाक्षिप्य

अब्रवीच्च ततो राजन्दुर्योधनमिदं वचः। पश्यतेन निहतो बंधुस्त्वयासं दृष्टविक्रमः। पुनर्द्रष्टासि कर्णस्य निष्ठामेतां महात्मनः। मुहूर्त्तं तावत्तिष्ठ स्वया वत्कर्णं वधाम्यहं ४

हैडिंबश्चकर्त्तास्य शिरो महत्। सोपाहृत्य शिरस्तस्य कुंडलाभ्यां विभूषितं। तदा स तुमुलं नादं ननाद स महाबलः। हतं दृष्ट्वा महाकायं बककज्ञातिमरिंदमं। पांचालाः पांडवाश्चैव सिंहनादान्ननर्द्दिरे। ततो भेरीसहस्राणि शंखानामयुतानि च। अवादयन्पांडवेयास्तस्मिन्रक्षसि पातिते। अतीव सा निशा तेषां बभूव विजयावहा। विद्योतमाना विबभौ समंताद्दीपमालिनी। अलंबुषस्य च शिरो भीमसेनेन निर्महाबलः। दुर्योधनस्य प्रमुखे चिक्षेप गतचेतनं। अथ दुर्योधनो राजा दृष्ट्वा हतमलायुधं। बभूव परमोद्विग्नः सहसैन्येन भारत। तेन ह्यस्य प्रतिज्ञातं भीमसेनमहं युधि। हंतेति स्वयमागम्य स्मरता वैरमुत्तमं। ध्रुवं स तेन हंतव्य इत्यमन्यत पार्थिवः। जीवितं चिरकालाय भ्रातॄणामभ्यमन्यत। स तं दृष्ट्वा विनिहतं भीमसेनात्मजेन वै। प्रतिज्ञां भीमसेनस्य पूर्णामेवाभ्यमन्यत॥ ॥ इति द्रोणपर्वणि रात्रियुद्धे अलायुधवधः॥ ॥ संजय उ॥ ॥

निहत्यालायुधं रक्षः प्रहृष्टात्मा घटोत्कचः। ननाद विविधान्नादान्वाहिन्याः प्रमुखे स्थितः। तस्य तं तुमुलं शब्दं श्रुत्वा कुंजरकंपनं। तावकानां महाराज भयमासीत्सुदारुणं। अलायुधं विशस्तं तु भीमसेनसुतेन ह। दृष्ट्वा कर्णो महाबाहुः पांचालान्समुपाद्रवत्। दशभिर्दशभिर्बाणैर्धृष्टद्युम्नशिखंडिनौ। दृढैः पूर्णायतोत्सृष्टैर्बिभेद नतपर्वभिः। ततः परमनाराचैर्युधामन्यूत्तमौजसौ। सात्यकिं च रथोदारं कंपयामास मार्गणैः। तेषामप्यस्यतां संख्ये सर्वेषां सव्यदक्षिणं। मंडलान्येव चापानि व्यदृश्यंत जनाधिप। तेषां ज्यातलनिर्घोषो रथनेमिस्वनश्च ह। मेघानामिव घर्मांते बभूव तुमुलो निशि। ज्यानेमिघोषस्तनयित्नुमान्वै धनुस्तडिन्मंडलकेतुशृंगः। शरौघवर्षाकुलवृष्टिमांश्च संग्राममेघः स बभूव राजन्। तदुद्गतं शैलइवाप्रकंप्यो वर्षं महच्छैलसमानसारः। विध्वंसयामास रणे नरेंद्र वैकर्त्तनः शत्रुगणावमर्द्दी। ततस्तलैर्वज्रनिपातकल्पैः शितैः शरैः कांचनचित्रपुंखैः। महाजवैः शत्रुविमोहनैश्च वैकर्त्तनः शत्रुगणावमर्द्दी। ततस्तलैर्वज्रनिपातकल्पैः। शितैः शरैः कांचनचित्रपुंखैः। महाजवैः शत्रुविमो

हतैश्च वैकर्त्तनः शत्रुगणानुददाह। शत्रून्व्यपोहन्समरे महात्मा वैकर्त्तनः पुत्रहितेरतस्ते। संछिंन भिन्न ध्वजिनस्तु केचित्केचिच्छरैस्त्वर्पित भिन्न
देहाः। केचिद्विसूता विहयाश्च केचिद्वैकर्त्तनेनाशु हता बभूवुः। अविंदमानास्त्वथ शर्म संख्ये योधिष्ठिरं तेबलमन्वपद्यत। तान्वीक्ष्य भग्नां
न्विमुखीकृतांश्च घटोत्कचो रोषमतीव चक्रे। आस्थाय तं कांचनचित्रं रत्नैरथं समितिं हर्षनवन्ननाद। वैकर्त्तनं कर्णमुपेत्य चापि विव्या
ध वज्रप्रतिमैः पृषत्कैः। तौ कर्णिनाराचशिलीमुखैश्च नालीकवंडाननवत्सदंतैः। वराहकर्णैः सविपाटशृंगैः क्षुरप्रवर्षैश्च विनेदतुः खं।
तद्बाणमालावृतमंतरिक्षं तिर्यग्गताभिः समरे रराज। सुवर्णपुंखज्वलनप्रभाभिर्विचित्रपुष्पाभिरिवस्रजाभिः। समाहितावप्रतिम
प्रभावावन्योन्यमाजघ्नतुरुत्तमास्त्रैः। तयोर्हि वीरोत्तमयोर्न कश्चिद्ददर्श तस्मिन्समरे विशेषं। अतीवतच्चित्रमतीवरूपं बभूव युद्धं र
विभीमसून्वोः। समाकुलं शास्त्रनिपातघोरं दिवीव राह्वंशुमतोः प्रदीप्तं। घटोत्कचो यदा कर्णं न विशेषयते नृप। ततः प्रादुश्चकारो
ग्रमस्त्रमस्त्रविदांवरः। तेनास्त्रेण हयान्घोरान्हत्वा कर्णस्य राक्षसः। सारथिं चास्य हैडंबः क्षिप्रमंतरधीयत॥ ॥धृतराष्ट्र॥ ॥
तथात्वंतर्हिते तस्मिन्कूटयोधिनि शोहवे। मामकैः प्रतिपन्नं यत्तन्ममाचक्ष्व संजय॥ ॥संजय॥ ॥अंतर्हितं राक्षसं तं विदित्वा संप्राक्रो
शन्कुरवः सर्वएव। कथं नायं राक्षसः कूटयोधी हन्यात्कर्णं समरे दृश्यमानः। ततः कर्णो लघुचित्रास्त्रयोधी सर्वादिशो व्याव
णोद्बाणजालैः। नवै किंचिदपश्यत रूपमेकं भूतेसायकैरंतरिक्षे। नचाददानो न च संदधा×ना×नो नचेषुधी स्पृशमानः करा
ग्रैः। अदृश्यन्त्वैलाघवात्सूतपुत्रः सर्वं बाणैश्छादयानोतंरिक्षं। ततः क्षणाद्दृष्टतामंतरिक्षे भीमां घोरां दारुणां राक्षसीं च। प्रपश्या
मो लोहिताभ्रप्रकाशां देदीप्यंतीमग्निशिखामिवोल्कां। ततस्तस्याविधुतः प्रादुरासन्नुग्राश्चोल्काज्वलिताः कौरवेंद्र।

दी०प०
१८६

घोषस्तासां प्रादुरासीत्सुघोरः सहस्रशः प्रणदद्दुंदुभीनां। ततः शराश्चापतन्नुग्ररूपाः शतघ्न्यः प्रासा मुद्गरा अन्यायुधानि। परस्वधास्तोलधौताश्च
खड्गाः प्रदीप्ताग्राः पट्टिशास्तोमराश्च। मायाविनः परिघा लोहनद्धा गदाश्चित्राः शतधाराश्च शूलाः। मुष्ट्यो गदा हेमपट्टावनद्धाः शतघ्न्य
श्च प्रादुरासन्समंतात्। महाशिलाश्चापतंत्यश्च तत्र सहस्रशश्चाशनयः सवज्राः। चक्राणि चानेकशितक्षुराणि प्रादुर्बभूवुर्ज्वलनप्र
भाशिणि। तां शक्तिपाशासिपरस्वधानां प्रासर्ष्टिवज्राशनिमुद्गराणां। वृष्टिं विशालां ज्वलितां पतंतीं कर्णः शरौघैर्न शशाक हंतुं। शस्र
हतानां पततां हयानां वज्राहतानां च महागजानां। शिलाहतानां च महारथानां महान्निनादः पततां बभूव। स भीमनानाविधश
स्त्रपातैर्घटोत्कचेनाभिहितः समंतात्। दौर्योधनं तद्बलमार्तरूपमावर्तमानं ददृशे समंतात्। हाहाकृतं संपरिवर्तमानं संलीयमानं
चाविषण्णरूपं। न त्वार्यभावाः पुरुषप्रवीराः पराङ्मुखा न बभूवुस्तदानीं॥ तां राक्षसीं घोरतमां च भीमां वृष्टिं महाशस्त्रमयीं पतंतीं।
दृष्ट्वा बलौघं प्रनिपात्यमानं महद्भयं तव पुत्रान्विवेश। शिवाश्च वैश्वानरदीप्तजिह्वाः सुभीमनादाः शतशो नदंत्यः। रक्षोगणं नर्दमा
नं च वीक्ष्य नरेंद्र योधा व्यथिता बभूवुः। ते दीप्तजिह्वानना तीक्ष्णदंष्ट्रा विभीषणाः शैलनिकाशवर्णाः। नभोगताः शक्तिविषक्तहस्ता मे
घा विमुंचन्निव वृष्टिमुग्राम्। ते राक्षसास्तैः शरशक्तिशूलगदाभिरुग्रैः परिघैः सुदीप्तैः। वज्रैः पिनाकैः रशनिप्रहारैश्चक्रैः शतघ्न्याभि
नाश्च पेतुः क्रुद्धा भृशं ज्यश्च गुडाः शतघ्न्यः शूलाश्च कार्ष्णायसपट्टनद्धाः। एवाकिरंस्तव पुत्रस्य सैन्यं तथा घोरं कश्मलं प्रादुरासीत्। वि
शीर्णशस्त्रा विहतैरुत्तमांगैः संभग्नांगाः शेरते तत्र शूराः। छिन्ना हयाः कुंजराश्चैव भग्नाः संचूर्णिताश्चैव रथाः शिलाभिः। एवं महच्छस्त्रवर्षं
सृजं तस्ते यातुधाना भुवि घोररूपाः। मायासृष्टास्तत्र घटोत्कचेन नामुंचन्ये याचमानेन भीतान्। तस्मिन्क्रूरे कुरुवीरावमर्दे काले

राम
१८६

त्सृष्टे क्षत्रियाणामभावो वा तैवैनग्नाः सहसाप्यद्रवंत प्रक्रोशंतः कौरवाः सर्व एव पलायध्वं कुरवो नैतदस्ति सेंद्रा देवा घ्नंति नः पांडवार्थे त
स्मिन्घोरे परकायावमर्दे काले सृष्टे क्षत्रियाणामभावो तथा तेषां मज्जतां भारतानां न स्म द्वीपस्तत्र कश्चिद्बभूव। तस्मिन्संक्रंदे तुमुले व
र्तमाने सैन्ये भग्ने लीयमाने कुरूणां। अनीकानां प्रविभागैः प्रकाशो नाज्ञायंत कुरवो नेतरे वा। निर्मर्यादे विप्लवे घोररूपे सर्वा दिशः
प्रेक्षमाणाः स्म शून्याः। तां शस्त्रवृष्टिं तरसा गाहमानं कर्णं चैकं तत्र राजन्नपश्यन्। ततो बाणैरावृणोदंतरिक्षं दिव्यां मायां रोधयन्राक्षसस्य।
ह्रीमान्कुर्वन्दुष्करं चार्यकर्म नैवामुह्यत्संयुगे सूतपुत्रः। ततो भीताः समुदैक्षंत कर्णं राजन्सर्वे सैंधवा बाह्लिकाश्च। असंमोहं पूजयंत
स्म संख्ये संपश्यंतो विजयं राक्षसस्य। तेनोत्सृष्टा चक्ररूपा शतघ्नी समं सर्वांश्चतुरोश्वाञ्जघान ते जानुभिर्जगतीमन्वपद्यंत नास्तने
निर्दिष्टानाक्षिजिह्वाः। ततो हताश्वादवरुह्य वाहादंतर्मनाः कुरवः प्राद्रवंते स्ते। दिव्ये चास्त्रे मायया वध्यमाने। नैवामुह्यच्चिंतयन्प्राप्त
कालं। ततोब्रुवन्कुरवः सर्व एव कर्णं दृष्ट्वा घोररूपां च मायां। शक्त्या रक्षो जहि कर्णाद्य तूर्णं नश्यंत्येते कुरवो धार्तराष्ट्राः। करि
ष्यतः किं च नो भीमपार्थौ तपंतमेनं जहि रक्षो निशीथे। यो नः संग्रामान्मुच्यते घोररूपाद्धि मुच्येत स नः पार्थान्संमतो योधयेत। तस्मादेनं रा
क्षसं घोररूपं जहि शक्त्या दत्तया वासवेन। मा कौरवाः सर्व एवेंद्रकल्पा रात्रीमुखे कर्ण नेशुः सयोधाः। अवध्यमानः स वै राक्षसेन घोर
रूपे दृष्ट्वा राजन्नश्यमानं बलं च। महच्च दृष्ट्वा निधनं कौरवाणां मतिं दध्रे शक्तिमोक्षाय कर्णः। स वै क्रुद्धः सिंहवदावमर्षी नामर्षयत्प्र
तिघातं रणे तां। शक्तिं श्रेष्ठां वैजयंतीमसह्यां समाददे तस्य वधं चिकीर्षन्। या सा राजन्विहिता वर्षपूगान्वधायाजौ सात्कृता फाल्गुनस्य।
यां च प्रादात्सूतपुत्राय शक्रः शक्तिं श्रेष्ठां कुंडलाभ्यां निनाय। तां वै शक्तिं लेलिहानां प्रदीप्तां पाशैर्युक्तामंतकस्येव रात्रिं। मृत्योः स्वसा

द्रो॰प॰
१८७

रंज्वलितामभितोल्कां वै कर्तनः प्राहिणोद्रासौ क्षेप। तामुत्तमांपरकायापहंत्रीं दृष्ट्वा शक्तिं बाहुरूपां ज्वलंतीं। भीमं रक्षो दुद्रुवे चापि राजन्कृ
त्वात्मानं विंध्यपादप्रमाणं। दृष्ट्वा शक्तिं कर्णबाह्वंतरस्थां नेदुर्भूतान्यंतरिक्षे नरेंद्र। ववुर्वाताः सुमुलाश्चापि राजन्सनिर्घाता भूतले संपतं
ति। सा तां मायां भस्म कृत्वा ज्वलंती भित्वा गाढं हृदयं राक्षसस्य। ऊर्ध्वं ययौ दीप्यमाना निशायां नक्षत्राणामंतराण्याविशंती। स निर्भिन्नो
विविधैः शस्त्रपूगैर्दिव्यैर्वीरैः सौरराक्षसैर्मानुषैश्च। नदन्नादान्विविधान्भैरवांश्च प्राणानिष्टांस्त्याजितः शक्रशक्त्या। इदं चान्यच्चि
त्रमाश्चर्यरूपं चकारासौ कर्म शत्रुक्षयाय। तस्मिन्काले शक्तिनिर्भिन्नवर्मा हतो राजन्मेघशैलप्रकाशः। ततोंतरिक्षादपतद्गतासुः
स राक्षसेंद्रो भुवि भिन्नदेहः। अवाक्शिरास्तब्धगात्रो विजिह्वो घटोत्कचो महदाश्चर्यरूपः। स तद्रूपं भैरवं भीमकर्मा भीमं कृ
त्वा भैमसेनिः पपात। हाहा हतोप्येव तव सैन्यैकदेशमपोथयत्कौरवान्भीषयानः। ततो मिश्राः प्राणदन्सिंहनादाः भेर्यः शं
खा मुरजाश्चानकाश्च। दग्धां मायां निहतं राक्षसं च दृष्ट्वा हृष्टाः प्राणदन्कौरवेयाः। ततः कर्णः कुरुभिः पूज्यमानो यथा शक्रो वृत्रव
धे मरुद्भिः। अन्वारूढस्तव पुत्रं रथस्थं हृष्टश्चापि प्राविशत्स्वसैन्यं॥ ॥इति द्रोणपर्वणि रात्रियुद्धे घटोत्कचवधः॥७५॥
हैडिंबं निहतं दृष्ट्वा विकीर्णमिव पर्वतं। पांडवा दीनमनसः सर्वे बाष्पाकुलेक्षणाः। वासुदेवस्तु हर्षेण महताभिपरिप्लुतः। ननां
द सिंहवन्नादं व्यथयन्निव भारत। विनद्य सुमहानादं पर्यष्वजत फाल्गुनं। स विनद्य महानादं अभीषूणि नियम्य वा। ननर्त
हर्षसंवीतो वातोद्धूत इव द्रुमः। ततो विनद्य च पुनः पार्थमास्फोट्य सासकृत्। रथोपस्थे गतं भीमं प्राणदत्पुनरच्युतः। प्रहृ
ष्टमनसं ज्ञात्वा वासुदेवं महाबलं। अब्रवीदर्जुनो राजन्नातिहृष्टमनाइव। अशोकस्थाने परं प्राप्ते हैडिंबस्य वधेन

राम
१८७

तु। विमुखानि च सैन्यानि हतं दृष्ट्वा घटोत्कचं। वयं च भृशमुद्विग्ना हैडंबस्य निपातने। नैतत्कारणमल्पं हि भविष्यति जनार्दन। तत्
दद्य शंस मे सर्वं सत्यं सत्यपराक्रम। यद्येतन्न रहस्यं ते वक्तुमर्हस्यरिंदम। धैर्यस्य वैकृतं ब्रूहि त्वमद्य मधुसूदन। अतिहर्षोयमस्था
ने तवाद्य मधुसूदन। समुद्रस्येव संक्षोभो मेरोरिव विसर्पणं। तथैतदद्य मन्येहं तव कर्म जनार्दन॥ ॥वासुदेव॥ ॥अतिहर्षमिमं
प्राप्तं शृणु मे त्वं धनंजय। अतीव मनसः सद्यः प्रसादकरमुत्तमं। शक्तिं घटोत्कचेनेमां व्यंसयित्वा महाद्युते। कर्णं विहतमेवाजौ विद्धि सद्यो ध
नंजय। शक्तिहस्तं पुनः कर्णं को लोकेस्ति पुमानिह। य एनमभितस्तिष्ठेत्कार्त्तिकेयमिवाहवे। दिष्ट्यापनीतकवचो दिष्ट्यापहृतकुंडलः। दि
ष्ट्या सा व्यंसिता शक्तिरमोघा घटोत्कचे। यदि हि स्यात्सकवचस्तथैव च सकुंडलः। सामरानपि लोकांस्त्रीनेकः कर्णो जयेद्ध्रुवं। वासवो
वा कुबेरो वा वरुणो वा जलेश्वरः। यमो वा नोत्सहेत् कर्णं रणे प्रतिसमासितुं। गांडीवमायम्य भवांश्चक्रं चाहं सुदर्शनं। न शक्तौ स्म रणे जेतुं
तथायुक्तं नरर्षभं। त्वद्धितार्थं हि शक्रेण मायया हृतकुंडलः। विहीनकवचश्चायं कृतः परपुरंजय। उत्कृत्य कवचं यस्मात्कुंडले विमले च तो
प्रादाच्छक्राय कर्णो वै तेन वैकर्तनः स्मृतः। आशीविष इव क्रुद्धो स्तंभितो मंत्रतेजसा। तथाद्य भाति कर्णो मे सन्नज्वाल इवानलः। यदा प्र
भृति कर्णाय शक्तिं दत्ता महात्मना। वासवेन महाबाहो प्राप्ता या सो घटोत्कचे। कुंडलाभ्यां च सा लब्धा दिव्येन कवचेन तु। प्राप्याहं वांह
तं मेन्येत सततं च महारणे। एवं गतेपि शक्योयं हंतुं नान्येन केनचित्। ऋते त्वां पुरुषव्याघ्र शपे सत्येन चानघ। ब्रह्मण्यः सत्यवादी
च तपस्वी नियतव्रतः। रिपुष्वपि दयावांश्च तस्मात्कर्णो वृषः स्मृतः। युद्धशौंडो महाबाहुः शस्त्राद्यो सो घटोत्कचं। केसरीव वने मत्तो मा
तमातंगयूथपान्। विमदान् र्षभशार्दूलान्कुरुते रणमूर्द्धनि। मध्यंगत इवादित्यो यो न शक्यो निरीक्षितुं। त्वदीयैः पुरुषव्याघ्र योधमुख्यैर्म

द्रो० प०
१८८

हात्मभिः। शरजालसहस्रांशुः शरदीव दिवाकरः। तपांते जलदो यद्वद्रक्षरं धारागणान्बहून्। दिव्यास्त्रजलदः कर्णः पर्जन्य इव वृष्टिमान्।
सोऽधमानुषतां प्राप्तो विमुक्तः शक्रदत्तया। एकस्कयोग्योस्य न वेद्धा याप छिद्रेषेनं त्वप्रमतः प्रमत्तो ॥ज॥ त्वच्छुश्रा ततरभूयच्चक्रे निमग्ने ह
न्यादेनं मम संज्ञां विचार्य। जरासंधश्चेदिराजो महात्मा महाबाहुश्चैकलव्यो निषादः। एकैकशो निहताः सर्व एव योगैस्तैस्तैस्त्वद्धितार्थं
मयैव। अथापरे निहता राक्षसेंद्रा हिडिंबकिर्मीरबकप्रधानाः। अलायुधः परसैन्यावमर्दी घटोत्कचश्चोग्रकर्मा तरस्वी॥ ॥
॥ ॥इति महाभारते द्रोणपर्वणि कर्णप्रशंसा॥ १८१॥ अर्जुन॥ ॥कथमस्मद्धितार्थं ते कैश्च योगैर्जनार्दन। जरासंधप्रभृतयः पातिताः
पृथिवीश्वराः॥ ॥कृष्ण॥ ॥जरासंधश्चेदिराजो नैषादिश्च महाबलः। यदि स्युर्न हताः पूर्वमिदानीं स्युर्भयंकराः। सुयोधनस्तानवश्यं
वृणुयाद्रथसत्तमान्। तेस्माभिर्नित्यसंदुष्टाः संश्रयेयुश्च कौरवान्। ते हि वीरा महात्मानः कृतास्त्रा दृढयोधिनः। धार्तराष्ट्रीं चमूं सर्वां रक्षे
युस्ते मरा इव। सूतपुत्रो जरासंधश्चेदिराजो निषादजः। सुयोधनं समाश्रित्य जयेरन्पृथिवीमिमां। योगैरभिहता यैस्ते तन्मे शृणु
धनंजय। अजय्या हि विना योगैर्मृधे ते दैवतैरपि। एकैको हि पृथक्तेषां समस्तां सुरवाहिनीं। योधयेत्समरे पार्थ लोकपालाभिरक्षि
तां। जरासंधो हि रुषितो रौक्मिणेयप्रधर्षितः। अस्मद्वधार्थं चिक्षेप गदां वै शतघातिनीं। सीमंतमिव कुर्वाणां नभसः पावकप्रभां। व्य
दृश्यतापतंती सा शक्रमुक्तेव चाशनिः। तामापतंतीं दृष्ट्वैव गदां रौक्मिणिनंदनः। प्रतिघातार्थमस्त्रं वै स्थूणाकर्णमवासृजत्। अस्त्र
वेगप्रतिहता सा गदा प्रापतद्भुवि। धारयंती धरां देवीं कंपयंती च पर्वतान्। तत्र स्म राक्षसी घोरा जरा नाम सुविक्रमा। संधयामास
तं जातं जरासंधमरिंदमं। द्वाभ्यां हि जातो मातृभ्यामर्धदेहः पृथक्पृथक्। तया स संधितो यस्मात् जरासंधस्ततोऽभवत्। सा तु भूमिं ग

राम
१८८

तापार्थहतास्सुतबांधवा। गदयातेन चास्त्रेण स्थूणाकर्णेन राक्षसी॥ विनाभूतः सगदया जरासंधो महामृधे। निहतो भीमसेनेन पश्यतस्ते ऽधनंज
य। यदि हि स्याद्गदापाणिर्जरासंधः प्रतापवान्। सेंद्रान्देवान्रणे हंतुं शक्तः पुरुषसत्तमः। त्वद्धितार्थं च नैषादिरंगुष्ठेन वियोजितः। द्रोणेनाचार्य
कं हत्वा छद्मना सत्यविक्रमः। स तु बद्धांगुलित्राणो नैषादिर्दृढविक्रमः। अस्यन्नेको वनचरो बभौ राम इवापरः। एकलव्यं हि सांगुष्ठ
मशक्ता देवदानवाः। सराक्षसोरगाः पार्थ विजेतुं युधि कर्हिचित्। किमु मानुषमात्रेण शक्यः स्यात्प्रतिवीक्षितुं। दृढमुष्टिः कृती नित्य
मस्यमानो दिवानिशं। त्वद्धितार्थं तु स मया हतः संग्राममूर्द्धनि। चेदिराजश्च विक्रांतः प्रत्यक्षं निहतस्तव। स चाप्यशक्यः संग्रामे जेतुं सर्वैः
सुरासुरैः। वधार्थं तस्य जातोहमन्येषां च सुरद्विषां। त्वत्सहायेन रव्याघ्र लोकानां हितकाम्यया। हिडंब बक किर्मीरा भीमसेनेन घातिताः
रावणेन समप्राणा ब्रह्मयज्ञविनाशनाः। हतस्तथैव मायावी हैडंबेनाप्यलायुधः। हैडिंबश्चाप्युपायेन शक्त्या कर्णेन घातितः। यदि ह्येनं
नाहनिष्यत्कर्णः शक्त्या महामृधे। मया वध्यो भविष्यत्स भैमसेनिर्घटोत्कचः। मया न निहतः पूर्वमेष युष्मत्प्रियेच्छया। एष हि ब्राह्मण
द्वेषी यज्ञद्वेषी च राक्षसः। धर्मस्य लोप्ता पापात्मा तस्मादेष निपातितः। व्यंसिता चाप्युपायेन शक्रदत्ता मयानघ। ये हि धर्मस्य लोप्तारो व
ध्यास्ते मम पांडव। धर्मसंस्थापनार्थं हि प्रतिज्ञैषा ममाव्यया। ब्रह्म सत्यं दमः शौचं धर्मो ह्रीः श्रीर्धृतिः क्षमा। यत्र तत्र रमे नित्यमहं सत्येन ते शपे।
न विषादस्त्वया कार्यः कर्णं वैकर्तनं प्रति। उपदेक्ष्याम्युपायं ते येन तं प्रसहिष्यसि। सुयोधनं चापि रणे हनिष्यति वृकोदरः। तस्य चा
पि वधोपायं वक्ष्यामि तव पांडव। वर्द्धते तुमुलस्त्वेष शब्दः परचमूं प्रति। विद्रवंति च सैन्यानि त्वदीयानि दिशो दश। लब्धलक्ष्या हि कौर
व्या विधमंति चमूं तव। दहत्येष हि वः संख्ये द्रोणः प्रहरतां वरः॥ ॥ द्रोणपर्वणि रात्रियुद्धे ह्लघम वाक्यं ७ ॥संजय॥ धृतराष्ट्र उवाच॥ ॥

एकवीरवधेमोघांशक्तिंसूतात्मजोयदा।कस्मात्समुत्सृज्यसतांशक्तिंपार्थेनमुक्तवान्।तस्मिन्हतेहताहिस्युःसर्वेपांडवसंजयाः।एकवी
रवधेकस्मान्नयुद्धेजयमासदत्।आहूतोहेननिवर्त्तेयामितितस्यमहाव्रतं।स्वयमाह्वयितव्यःस्मसूतपुत्रेणफाल्गुनः।ततोद्वैरथमानी
यफाल्गुनंशक्रदत्तया।जघाननवृषःकस्मात्तन्ममाचक्ष्वसंजय।ननुबुद्धिविहीनश्चअसहायश्चमेसुतः।शत्रुभिर्व्यंसितःपापःस
कथंनुजयेदरीन्।यात्वस्यपरमाशक्तिर्जयस्यचपरायणं।साशक्तिर्वासुदेवेनव्यंसिताघटोत्कचे।कुणेयथाहस्तगतंह्रियेद्बिल्वंब
लीयसा।तथाशक्तिरमोघासामोघीभूताघटोत्कचे।यथावराहस्यशुनश्चयुध्यतोस्तयोरभावेश्वपचस्यलाभः।मन्येत्वहंवासुदेवस्यतद्व
द्वल्लाभःकर्णहैडंबयोर्वै।घटोत्कचोयदिहन्याद्धिकर्णंपरोलाभःसभवेत्पांडवानां।वैकर्त्तनोवायदितंवैनिहन्याद्यथाहरेतंशत्रुभिस्त
त्कृतंस्यात्।इतिप्राज्ञःप्रज्ञयातद्विचिंत्यघटोत्कचंसूतपुत्रेणयुद्धे।अयोधयद्वासुदेवोनृसिंहःप्रियंकुर्वन्पांडवानांहितंच॥ संज॥
एतद्विकीर्षितंज्ञात्वाकर्णेमधुनिहान्नृप।नियोजयामासतदाद्वैरथेराक्षसेश्वरं।घटोत्कचंमहावीर्यंमहाबुद्धिर्जनार्दनः।अमोघाया
विघातार्थंराजन्दुर्मंत्रितेतव।तदैवकृतकार्याहिवयंस्यामःकुरूद्वह।नरक्षेद्यदिकृष्णस्तंपार्थंकर्णान्महाभयात्।साश्वध्वजरथः
संख्येधृतराष्ट्रपतेद्भुवि।विनाजनार्दनंपार्थोयोगानामीश्वरंप्रभुं।तैस्तैरुपायैर्बहुभिरक्ष्यमाणःसपार्थिव।जयत्यभिमुखःशत्रू
न्पार्थःकृष्णेनपालितः।सविशेषंत्वमोघायाःकृष्णोरक्षतिपांडवं।हन्यात्क्षिप्ताहिकौंतेयंशक्तिर्वृक्षमिवाशनिः॥ धृतरा॥
विरोधीचकुमंत्रीचप्राज्ञमानीममात्मजः।यस्यैषसमतिक्रांतोवधोपायोजयंप्रति।नचापिसमतिक्रांतमेतन्नावल्गणेकथं।एतम

र्थं महाबुद्धे त्वयायन्नावबोधितं॥ ॥संजय॥ ॥दुर्योधनस्य शकुनेर्मम दुःशासनस्य च। शत्रौ शत्रौ भवत्येषा नित्यमेव समर्थना। श्वः
सर्वसैन्यान्यपास्य ज्यजहि कर्णधनंजयं। प्रेष्यवत्पांडुपांचालानुपभोक्ष्यामहे ततः। अथवा निहते पार्थे पांडवान्यतमं पुनः। स्थापयेद्वृष्णिवार्ष्णे-
य तस्मात्कृष्णो निपात्यतां। कृष्णो हि मूलं पांडूनां पार्थः स्कंद इवोद्गतः। शाखा इवेतरे पार्थाः पांचालाः पत्रसंज्ञकाः। कृष्णाश्रयाः कृष्णबलाः कृ-
ष्णनाथाश्च पांडवाः। कृष्णः परायणं चैषां ज्योतिषामिव चंद्रमाः। तस्मात्पर्णानि शाखाश्च स्कंधानुत्सृज्य सूतज। कृष्णं निकृंत पांडूनां
मूलं सर्वत्र सर्वदा। हन्याद्यदि हि दाशार्हं कर्णो यादवनंदनं। कृत्स्ना वसुमती राजन् वशे तव न संशयः। यदि हि स निहतः शयीत भूमौ
यदुकुलपांडवनंदनो महात्मा। ननु तव वसुधा नरेंद्र सर्वा सगिरिसमुद्रवना वशं व्रजेत। सा तु बुद्धिः कृताप्येवं जाग्रति त्रिदिवेश्वरे। अ-
प्रमेये हृषीकेशे युद्धकाले व्यमुह्यत। अर्जुनं चापि कौंतेयं सदा रक्षति केशवः। न ह्येनमैच्छत्प्रमुखे सौतेः स्थापयितुं रणे। अन्यांश्चास्मै
रथोदारानुपस्थापयदच्युतः। अमोघां तामहं कथं शक्तिं मोघां कुर्यादिति प्रभो॥ ॥संजय उ॥ ॥ततः कृष्णं महाबाहुः सात्यकिर्देवकीसु-
तं। पप्रच्छ रथशार्दूलः कर्णं प्रति महारथं। अयं च प्रत्ययः कर्णे शक्त्या यामितविक्रम। किमर्थं सूतपुत्रेण न मुक्ता फाल्गुनस्य सा॥ ॥
॥ ॥वासुदेव॥ ॥दुःशासनश्च कर्णश्च शकुनिश्च ससैंधवः। सततं मंत्रयंति स्म दुर्योधनपुरोगमाः। कर्ण कर्ण महेष्वास रणे चामितवि-
क्रम। नान्यस्य शक्तिरेषा ते मोक्तव्या जयतां वर। ऋते महारथात्पार्थात्कुंतीपुत्राद्धनंजयात्। स हि तेषामतियशा देवानामिव वासवः।
तस्मिन्विनिहते सर्वे पांडवाः संजयैः सह। भविष्यंति गतात्मानः सुरा इवानिरग्नयः। ऋते महात्मनः पार्थात्कर्णेन निहता ध्रुवं। तथे-
ति तत्प्रतिज्ञातं कर्णेन शिनिपुंगव। हृदि नित्यं तु कर्णस्य वधो गांडीवधन्वनः। अहमेव तु राधेयं मोहयामि युधां वर। ततो नावसृज

शक्तिं पांडवे श्वेतवाहने। फाल्गुनस्य च तं मृत्युमनिवार्यं युयुत्सतः। न निद्रा न च मे हर्षो मनसोस्ति युधां वर। घटोत्कचे व्यंसितां तां दृष्ट्वा तां त्रि
निपुंगव। मृत्योरास्यांतरान्मुक्तं पश्याम्यद्य धनंजयं। न पिता न च मे माता न यूयं भ्रातरस्तथा। न च प्राणास्तथा रक्ष्या यथा बीभत्सुराहवे।
त्रैलोक्यराज्याद्यत्किंचिद्भवेदन्यत्सुदुर्लभं। इच्छेयं सात्वताहं न विना पार्थं धनंजयं। अतः प्रहर्षः सुमहान्युयुधानाद्य मेऽभवत्। मृतं प्रत्या
गतमिव दृष्ट्वा पार्थं धनंजयं। अतश्च प्रहितो युद्धे मया यो कर्णाय राक्षसः। न ह्यन्यः समरे रात्रौ शक्तः कर्णं प्रबाधितुं। सात्यके
रिति सं प्राह तदा देवकीनंदनः। धनंजयहिते युक्तस्तत्प्रियेसततं रतः॥ ॥द्रोणपर्वणि रात्रियुद्धे ७०॥ धृतराष्ट्र॥ ॥कर्णदुर्योधना
नादीनां शकुनेः सौबलस्य च। अपनीतं महत्तात तव चैव विशेषतः। यदाजानासि तां शक्तिं एकघ्नीं सततं रणे। अनिवार्यामसह्यां च
सुरैरपि सवासवैः। सा किमर्थं न कर्णेन प्रवृत्ते समरे पुरा। न देवकीसुते मुक्ता फाल्गुने वापि संजय॥ ॥संजय॥ ॥संग्रामाद्विनि
वृत्तानां सर्वेषां नो विशांपते। रात्रौ कुरुकुलश्रेष्ठ मंत्रो नः समजायत। ततः प्रभातसमये शक्तिं कर्णस्य दैवतैः। अन्येषां चैव योधा
नां सा बुद्धिर्नश्यते पुनः। दैवमेव परं मन्ये यत्कर्णो हस्तसंस्थया। न जघान रणे पार्थं कृष्णं वा देवकीसुतं। स तस्य हस्तस्थिता शक्तिः
कालरात्रिरिवोद्यता। दैवोपहतबुद्धित्वान्न तां कर्णो विमुक्तवान्। कृष्णे वा देवकीपुत्रे मोहितो देवमायया। पार्थे वा शक्रकल्पे च वधार्थं
वासवीं प्रभो॥ ॥धृतराष्ट्र॥ ॥दैवेनेव हता यूयं स्वबुध्या केशवस्य वा। दैवोपहतबुद्धित्वात्तृणभूतं घटोत्कचं। कर्णश्च मम पुत्राश्च सर्वे चा
न्ये च पार्थिवाः। अनेन दुःप्रणीतेन गता वैवस्वतक्षयं। भूय एव तु मे शंस यथा युद्धमवर्तत। कुरूणां पांडवानां च हैडंबे निहते तदा।
ये च तेभ्यद्रवन् द्रोणं व्यूढानीकाः प्रहारिणः। संजयाः सह पांचालैस्तेप्यकुर्वन्कथं रणे। सौमदत्तेर्वधात् द्रोणमायांतं सैंधवस्य च।

अमर्षाज्जृंभितं त्यक्त्वा गाहमानं वरूथिनीं। जृंभमाणमिव व्याघ्रं व्यात्ताननमिवांतकं। कथं प्रत्युद्ययुर्द्रोणमस्यंतं पांडुसृंजयाः।
आचार्यं ये च तेरक्षन्दुर्योधनपुरोगमाः। द्रौणिकर्णकृपास्तात ते च कुर्वन्किमाहवे। भारद्वाजं जिघांसंतौ सव्यसाचिवृकोदरौ। समर्थाः सो
मका युद्धे कथं संजय शंस मे। सिंधुराजवधेनैते घटोत्कचवधेन ते। अमर्षिताः सुसंक्रुद्धा रणं चक्रुः कथं निशि॥ ॥संजय उ०॥ ॥
हते घटोत्कचे राजन् कर्णेन निशि राक्षसे। प्रणदत्सु च हृष्टेषु तावकेषु युयुत्सुषु। आपतत्सु च योधेषु वध्यमाने बलेपि च। विगाढा
यां रजन्यां च राजा दैन्यं परं गतः। अब्रवीच्च महाबाहुं भीमसेनं परंतप। वारयैतां महाबाहो धार्त्तराष्ट्रस्य वाहिनीं। हैडंबस्य निघातेन
मोह आविशतीव मां। एवं भीमं समादिश्य स्वरथे समुपाविशत्। अश्रुपूर्णमुखो राजन् निश्वसंश्च पुनः पुनः। कश्मलं प्राविशद्घोरं दृ
ष्ट्वा कर्णस्य विक्रमं। तं तथा व्यथितं दृष्ट्वा कृष्णो वचनमब्रवीत्। माव्यथां कुरु कौंतेय नैतत्त्वय्युपपद्यते। वैक्लव्यं भरतश्रेष्ठ यथा प्राकृतपू
रुषे। उत्तिष्ठ राजन्युध्यस्व वह गुर्वीं धुरं विभो। त्वयि वैक्लव्यमापन्ने संशयो विजये महान्। श्रुत्वा कृष्णस्य वचनं धर्मराजो युधिष्ठिरः।
विमृज्य नेत्रे पाणिभ्यां कृष्णं वचनमब्रवीत्। विदिता मे महाबाहो धर्माणां परमा गतिः। ब्रह्मवध्याफलं तस्य यः कृतं नावबुध्यते। अस्मा
कं तु वनस्थानां हैडंबेन महात्मना। बालेनापि सता तेन कृतं साह्यं महात्मना। अस्त्रहेतोर्गतं ज्ञात्वा पांडवं श्वेतवाहनं। असौ कृष्ण महेष्वा
सः काम्यके मामुपस्थितः। उषितश्च सहास्माभिर्यावन्नासीद्धनंजयः। गंधमादनयात्रायां दुर्गेभ्योत्यव तारिता। पांचाली च परिश्रांता पृ
ष्ठेनोढा महात्मना। दिशां हि विजये कृष्ण सहदेवस्य चाज्ञया। लंकां तु गत्वा पौलस्त्यः करं वै दापितो बलात्। आरंभांश्चैव युद्धानां सहदे
व कृतवान्प्रभो। मदर्थं दुष्करं कर्म कृतं तेन महात्मना। स्वभावाद्या च मे प्रीतिः सहदेवे जनार्दन। सैव मे द्विगुणा प्रीती राक्षसेंद्रे घटोत्कचे।

द्रो०प०
१९९

न त्वर्क्ष्यमे महाबाहो प्रियश्चासि प्रियश्च मे। तेन विंदामि वार्ष्णेय कृष्णमलं शोककर्षितः। पश्य सैन्यानि वार्ष्णेय द्राव्यमाणानि कौरवैः। द्रोणकर्णौ च संयत्तौ पश्य युद्धे महारथौ। निशीथे पांडवं सैन्यं पश्यांपश्य प्रमर्दितं। गजाभ्यामिव मत्ताभ्यां यथा नलवनं महत्। अनादृत्य बलं बाह्वोर्भीमसेनस्य माधव। चित्रास्त्रतां च पार्थस्य विक्रमं तस्य कौरवाः। एष द्रोणश्च कर्णश्च राजा चैव सुयोधनः। निहत्य राक्षसं युद्धे हृष्टा नर्दंति संयुगे। कथमस्मासु जीवत्सु त्वयि चैव जनार्दन। हैडिंबः प्राप्तवान्मृत्युं सूतपुत्रेण संयुगे। कदर्थीकृत्य नः सर्वान्पश्यतः सव्यसाचिनः। निहतो राक्षसः कृष्ण भैमसेनिर्महाबलः। यदाभिमन्युर्निहतो धार्तराष्ट्रैर्दुरात्मभिः। नासीत्तत्र रणे कृष्ण सव्यसाची महारथः। निरुद्धाश्च वयं सर्वे सैंधवेन दुरात्मना। निमित्तमभवद्द्रोणः सपुत्रस्तत्र कर्मणि। उपदिष्टो वधोपायः कर्णस्य गुरुणा स्वयं। व्यायच्छतश्च खड्गेन द्विधा ज्यां निचकर्त्त च। व्यसनेमज्यमानस्य कृतवर्मा नृशंसवत्। अश्वान्जघान सहसा तथोभौ पार्ष्णिसारथी। अथेतरे महेष्वासाः सौभद्रं समपातयन्। अल्पे च कारणे कृष्ण हतो गांडीवधन्वना। सैंधवो यादवश्रेष्ठ तच्च नातिप्रियं मम। यदि शत्रुवधो न्याय्यो भवेत्कर्तुं च पांडवैः। द्रोणकर्णौ रणे पूर्वं हंतव्याविति मे मतिः। एतौ मूलं हि दुःखानां अस्माकं पुरुषर्षभ। एतौ रणे समासाद्य पराश्वस्तः सुयोधनः। तत्र वध्यो भवेद्द्रोणः सूतपुत्रश्च सानुगः। तत्रावधीन्महाबाहुः सैंधवं दूरवासिनं। अवश्यं तु मया कार्यः सूतपुत्रस्य निग्रहः। ततो यास्याम्यहं वीर स्वयं कर्णजिघांसया। भीमसेनो महाबाहुर्द्रोणानीकेन संवृतः। एवमुक्त्वा ययौ तूर्णं त्वरमाणो युधिष्ठिरः। स विस्फार्य महच्चापं शंखं दध्मौ च भैरवं। ततो रथसहस्रेण गजानां च शतैस्त्रिभिः। वाजिभिः पंचसाहस्रैस्त्रिसाहस्रैः प्रभद्रकैः। वृतः शिखंडी त्वरितो राजानं पृष्ठतोन्वयात्। ततो भेरीः समाजघ्नुः शंखानुच्चैश्च दध्मिताः। पांचालाः पांडवाश्चैव

राम
१९९

स

युधिष्ठिरपुरोगमाः॥ ततोऽब्रवीन्महाबाहुर्वासुदेवो धनंजयं। एष प्रयाति त्वरितः क्रोधाविष्टो युधिष्ठिरः। जिघांसुः सूतपुत्रस्य तवोपेक्षा न
विद्यते। एवमुक्त्वा हृषीकेशः शीघ्रमश्वानचोदयत्। दूरं च यांतं राजानं अन्वगच्छज्जनार्दनः। तं दृष्ट्वा सहसा यांतं सूतपुत्रं जिघां
सया। शोकोपहतसंकल्पं दह्यमानमिवाग्निना। अभिगम्याब्रवीद्व्यासो धर्मपुत्रं युधिष्ठिरं। कर्णमासाद्य संग्रामे दिष्ट्या जीवति
फाल्गुनः। सव्यसाचिवधाकांक्षी शक्तिं रक्षितवानपि। न चागाद्द्वैरथं जिष्णुर्दिष्ट्या तेन नरर्षभ। सृजंतौ स्पर्धिनावेतौ दिव्या
न्यस्त्राणि सर्वशः। वध्यमानेषु चास्त्रेषु पीडितः सूतनंदनः। वासवीं समरे शक्तिं ध्रुवं मुंचेद्युधिष्ठिर। ततो भवेत्ते व्यसनं घोरं भरतस
त्तम। दिष्ट्या रक्षो हतं युद्धे सूतपुत्रेण मानद। वासवीं कारणं कृत्वा कालेनोपहतो यथा। तवैव कारणाद्रक्षो निहतं तात संयुगे। मा क्रुधो
भरतश्रेष्ठ मा च शोके मनः कृथाः। प्राणिनामिव सर्वेषामेषा निष्ठा युधिष्ठिर। भ्रातृभिः सहितः सर्वैः पार्थिवैश्च महात्मभिः। कौरवान्स
मरे राजन्नभियुध्यस्व भारत। पंचमे दिवसे चैव पृथिवी ते भविष्यति। नित्यं च पुरुषव्याघ्र धर्ममेवाविचिंतय। आनृशंस्यं ततो दान
क्षमा नित्यं च पांडव। सर्वेषां परमा प्रीतिर्यतो धर्मस्ततो जयः॥ ॥संजय॥ ॥इत्युक्त्वा पांडवं व्यासस्तत्रैवांतरधीयत। युधिष्ठिरोऽपि ध
र्मात्मा परां मुदमुपावहत्॥ ॥इति द्रोणपर्वणि रात्रियुद्धे व्यासवाक्यं॥ ७९॥ संजय॥ ॥घटोत्कचे तु निहते सूतपुत्रेण तां निशां। दुःखा
मर्षवशं प्राप्तो धर्मराजो युधिष्ठिरः। दृष्ट्वा भीमेन महतीं वार्यमाणां महाचमूं। धृष्टद्युम्नमुवाचेदं कुंभयोनिं निवारय। त्वं हि द्रोणवि
नाशाय समुत्पन्नोऽग्निशासनात्। शरी कवची खड्गी धन्वी च परतापनः। अभिद्रव रणे हृष्टो न च ते भीः कथंचन। जनमेजयः शिखंडी च दौ
र्मुखी च यशोधरः। अभिद्रवंतु संक्रुद्धाः कुंभयोनिं समंततः। नकुलः सहदेवश्च द्रौपदेयाः प्रभद्रकाः। द्रुपदश्च विराटश्च पुत्रभ्रातृसमन्वि

द्रो०प०
१९२

तौ। सात्यकिः केकयाश्चैव पांडवश्च धनंजयः। अभिद्रवंतु वेगेन नारद्वाजवधेप्सया। तथैव रथिनः सर्वे हस्त्यश्वं यच्च किंचन। पदाताश्च रणे द्रो
णं प्रापयंतु महारथं। तथाज्ञप्तास्ततस्ते सर्वे पांडवेन महात्मना। अभ्यद्रवंत वेगेन कुंभयोनिं वधेप्सया। आगच्छतस्तान्सहसा सर्वोद्योगेन पां
डवान्। प्रतिजग्राह समरे द्रोणः शस्त्रभृतां वरः। ततो दुर्योधनो राजा सर्वोद्योगेन पांडवान्। अभ्यद्रवत्सुसंक्रुद्ध इच्छन्द्रोणस्य जीवितं। त
तः प्रववृते युद्धं श्रांतवाहनसैनिकं। पांडवानां निरुत्साहाः क्षत्रिया दीनचेतसः। तव चैव परेषां च गतास्त्रा विगतेषवः। ते तदा पारयंत
श्च रात्रीं तच्च मनस्विनः। स्वधर्ममनुपश्यंतो न जहुः स्वामनीकिनीं॥ शस्त्राण्यन्ये समुत्सृज्य निद्रांधाः शूरतेजनाः। गजैरन्ये रथैरन्ये
शास्त्रैरन्ये च भारत। निद्रांधा न बुबुधिरे कांश्चिच्चेष्टां नराधिपाः। तेन्योन्यं समरे योधाः प्रेषयंतः परस्परं। स्वपमानास्तु समरे परान्
गीचिचेतसः। आत्मानं समरे जघ्नुः स्वानेव च परानपि। नाना वाचो विमुंचतो निद्रांधास्ते महारणे॥ योद्धव्यमिति तिष्ठंतो निद्रा
संसक्तलोचनाः। संसुप्तान्ये रणे केचिन्निद्रांधाश्च परस्परं। जघ्नुः शूरा रणे राजंस्तस्मिंस्तमसि दारुणे। हन्यमानानमिचात्मानं
परेभ्यो बहवो जनाः। नाभ्यजानंत समरे निद्रयापीडिता भृशं। तेषामेतादृशीं चेष्टां विज्ञाय पुरुषर्षभः। उवाच वाक्यं बीभत्सुरुच्चैः
संनादयन्दिशः। श्रांतो भवंतो निद्रांधाः सर्व एव सवाहनाः। तमसा संवृते सैन्ये रजसा बहुलेन च। ते यूयं यदि मन्यध्वं उपारमत सै
निकाः। निमीलयत चात्रैव रणभूमौ मुहूर्तकं। ततो विनिद्रा विश्रांताश्चंद्रमस्युदिते पुनः। संसाधयन्यथायोगं स्वर्गाय कुरुपुंगवाः। तद्वचः
सर्वधर्मज्ञा धार्मिकस्य विशांपते। अरोचयंत सैन्यानि तथा पक्षस्य द्वादशी। तस्मिन्मार्गशिरे मासे तदा चान्योन्यमब्रुवन्। चुक्रुशुः कर्णक
र्णतिराजन्दुर्योधनेति च। उपारमत पांडूनां विरता हि वरूथिनी। एवं विक्रोशमानस्य फाल्गुनस्य ततस्ततः। उपारमत पांडूनां सेना

राम
१९२

नवयत्भारत।मुहूर्त्तमाश्वसद्राजन्वाहिनी भरतर्षभ। तत्र संप्राप्य विश्रामं ध्वजिनी तव भारत। सुखमाप्तवती वीरमर्जुनं प्रत्यपूजयत्।
त्वयि वेदास्तथास्त्राणि त्वयि बुद्धिपराक्रमौ। धर्मस्त्वयि महाबाहो दया भूतेषु चानघ। यथा यथा ते वेछा च सर्वे पार्थ तदस्तु ते। मनसश्च
प्रिया नर्थान्वीर क्षिप्रमवाप्नुहि। इति ते तं नरव्याघ्रं प्रशंसंतश्च कौरवाः। निद्रया समविक्षिप्तास्तूष्णीमासन्विशांपते। अश्वपृ
ष्ठेषु चाप्यन्ये रथनीडेषु चापरे। गजस्कंधगताश्चान्ये शेरते चापरे क्षितौ। सायुधाः सगदाश्चैव सखड्गाः सपरश्वधाः। स प्रास क
वचाश्चान्ये नराः सुप्ताः पृथक्पृथक्। गजाः पन्नगभोगाभैर्भुजैरिषु विभूषितैः। निद्रांधा वसुधां चक्रुर्घ्राणनिश्वासशीत
लां। गजाः शुशुभिरे तत्र निश्वसंतो महीतले। विकीर्णा गिरयो यद्वन्निश्वसद्भिर्महोरगैः। समां च विषमां चक्रुः खुराग्रैर्वि
षमां महीं। हयाः कांचनयोक्त्राश्च केसरालंबिभिर्युगैः। सुषुपुस्तत्र राजेंद्र युक्ता वाहेषु सर्वशः। निद्रया त तथा भग्नमासद्बाप बलं मह
त्। कुशलैरिव सन्यस्तं पटे चित्रमिवाद्भुतं। ते क्षत्रियाः कुंडलिनो युवानः परस्परं सायकविक्षतांगाः। कुंभेषु लीनाः सुषुपुर्गजानां कु
चेषु लीना इव कामिनीनां। ततः कुमुदनाथेन कामिनीगंडपांडुना। नेत्रानंदेन चंद्रेण माहेंद्री दिगलंकृता। ततो मुहूर्त्ताद्भगवान्पुरस्ताच्छ
शलक्षणः। अरुणं दर्शयामास ग्रसञ्ज्योतिः प्रभां पुनः। अरुणस्य तु तस्यानु जातरूपसमप्रभं। रश्मिजालं महच्चंद्रो मंदं मंदमवा
सृजत्। उत्सारयंतः प्रभया तिमिरं ते गभस्तयः। शनैः शनैः ... तेवासमंतात्कृष्णवर्णास्ततस्तदा। ततो दशाशाता ... कुरुं ... निसृतैः। दशशाता ... कुरुं ... रितिः स्फुतः किरणकेस
रभासुरपिंजरः। तिमिरवारणयूथविदारणः समुदयादुदयाचलकेसरी। हरवृषोदरगात्रसमद्युतिः स्मरशरासनपूर्णसमप्रभः। नववधू
स्मितचारुमनोहरः प्रविसृतः कुमुदाकरबांधवः। प्रतिप्रकाशिते लोके आविर्भूते निशाकरे। विचेरुर्न विचेरुश्च राजन्नक्तंचरास्तदा।

बोध्यमानं तु तत्सैन्यं राजंश्चंद्रस्य रश्मिभिः। बुबुधे शतपत्राणां वनं महदिवांभसि। यथा चंद्रोदयोद्धूतः सक्षुब्धः सागरो भवेत्। तथा चंद्रोदयोद्धूतः स बभूव बलार्णवः। ततः प्रववृते युद्धं
पुनरेव विशांपते। तेषां लोके विनाशाय लोकं परमभीप्सतां॥ ॥इति द्रोणपर्वणि रात्रियुद्धे मुहूर्तनिमीलने॥ ७॥ संजय॥ ॥ततो दुर्योधनो द्रो
णमभिगम्येदमब्रवीत्। अमर्षवशमापन्नो जनयन् हर्षतेजसी॥ ॥दुर्योधन॥ ॥न मर्षणीयाः संग्रामे विश्रमंतः श्रमान्विताः। सपत्ना ग्ला
नमनसो लब्धलक्ष्या विशेषतः। तत्तु मर्षितमस्माभिर्भवतः प्रियकाम्यया। तत एते सुविश्रांताः पांडवा बलवत्तराः। सर्वथा परि
हीनाः स्म तेजसा च बलेन च। भवता पाल्यमानास्ते विवर्द्धंते पुनः पुनः। दिव्यान्यस्त्राणि सर्वाणि ब्रह्मास्त्रादीनि यानि च। तानि सर्वाणि तिष्ठं
ति भवत्येव विशेषतः। न पांडवेया न वयं नान्ये लोके धनुर्द्धराः। युध्यमानस्य ते तुल्याः सत्यमेतद्ब्रवीमि ते। ससुरासुरगंधर्वानिमां
ल्लोकान्द्विजोत्तम। सर्वास्त्रवित् भवान्हन्याद्दिव्यैरस्त्रैर्न संशयः। स भवान्मर्षयत्येतांस्त्वत्तो भीतान्विशेषतः। शिष्यत्वं वा पुरस्कृत्य मम वा मंद
भाग्यतां॥ ॥संजय॥ ॥एवमुद्धर्षितो द्रोणः कोपितश्चात्मजेन ते। समन्युरब्रवीद्राजन्दुर्योधनमिदं वचः। स्थविरः सन्परं शक्त्या घटामि तु
र्योधनाहवे। अतः परं मया कार्यं क्षुद्रं विजयगृद्धिना। अनस्त्रविदयं सर्वो हंतव्योऽस्त्रविदा जनः। यद्भवान्मन्यते चापि शुभं वा यदि वाशु
भं। तद्वै कर्त्तास्मि कौरव्य वचनात्तव नान्यथा। निहत्य सर्वपांचालान्युद्धे कृत्वा पराक्रमं। विमोक्ष्ये कवचं राजन्सत्येनायुधमालभे। मन्य
से यच्च कौंतेयमर्जुनं श्रांतवाहनं। तस्य वीर्यं महाबाहोः शृणु सत्येन कौरव। तं न देवा न गंधर्वा न यक्षोरगराक्षसाः। उत्सहंते रणे सोढुं कु
पितं सव्यसाचिनं। खांडवे येन भगवान्प्रत्युद्यातः सुरेश्वरः। सायकैर्वारितश्चापि वर्षमाणो महात्मना। यक्षा नागास्तथा दैत्या ये चान्ये
बलगर्विताः। निहताः पुरुषेंद्रेण तच्चापि विदितं तव। गंधर्वा घोषयात्रायां चित्रसेनादयो जिताः। यूयं तैर्ह्रियमाणाश्च मोक्षिता दृढध

र्जुना।। निवातकवचाश्चापिदेवानांशत्रवस्तथा। सुरैरवध्याःसंग्रामेतेनवीरेणनिर्जिताः। दानवानांसहस्राणिहिरण्यपुरवासिनां। विजि
ग्येपुरुषव्याघ्रःसशक्योमानुषैःकथं। प्रत्यक्षंवैतेसर्वंयथाबलमिदंतव। क्षपितंपांडुपुत्रेणचेष्टितंनोविशांपते। दयोमस्मास्कुरुतेतेनजी
वामिकौरवापरित्यक्तागौरवेणनवयंनिधनंगताः। तंतथाभिप्रशंसंतंअर्जुनंकुपितस्तदा। द्रोणंनवसुनोराजन्पुनरेवेदमब्रवीत्। अहं
दुःशासनःकर्णःशकुनिर्मातुलश्चमे। हनिष्यामोर्जुनंसंख्येद्वैधीकृत्याद्यभारतीं। तस्यतद्वचनंश्रुत्वाभारद्वाजोहसन्निव। अन्ववर्तततरा
जानंस्वस्तितेस्त्वितिचाब्रवीत्। कोहिगांडीवधन्वानंज्वलंतमिवतेजसा। अक्षयंक्षपयेत्कश्चित्क्षत्रियःक्षत्रियर्षभ। नतंदुःशासनस्त्रा
णंनकर्णोनापिसौबलः। नचभोजशायापित्वंकलयातस्यदुर्मते। तंनवित्तपतिर्नेंद्रोनयमोनजलेश्वरः। नासुरोरगरक्षांसिक्षपयेयुःसहायुधं।
मृधस्त्वेवंप्रभाषंतोयानीमान्याच्छभारत। युद्धेत्वर्जुनमासाद्यस्वस्तिमान्कोव्रजेद्गृहं। त्वंतुसर्वाभिशंकित्वान्निष्ठुरःपापनिश्चयः। श्रेयोहि
पार्थिवान्सर्वान्घातयित्वानलज्जसे। श्रेयांसस्त्व। द्भूतेयुक्तःस्त्वंनुवक्तुमिहेच्छसि। गच्छत्वमपिकौंतेयमात्मार्थेश्रेयआचरन्। त्वमप्यात्रांस
सेयोद्धुंकुलजःक्षत्रियोह्यसि। इमान्किंपार्थिवान्सर्वान्घातयिष्यस्यनागसः। नरकंयास्यसेघोरं। धिक्त्वांकुरुकुलाधमं। त्वमस्यमूलंवैरस्य
तस्माद्दासाद्ययार्जुनं। एषतेमातुलःप्राज्ञःक्षत्रधर्ममनुव्रतः। दुर्द्यूतदेवीगांधारिःप्रयात्वर्जुनमाहवे। एषोक्षकुशलोजिह्मोद्यूतकृत्कितवःश
ठः। देविताक्षनिकृतिप्राज्ञोयुधिजेष्यतिपांडवान्। त्वयाकथितमत्यर्थंकर्णेनसहहृष्टवत्। असकृत्सत्यकृन्मोहात्हतराष्ट्रस्यपत्र्यनः। प्र
हंचतातकर्णश्चभ्रातादुःशासनश्चमे। पांडुपुत्रान्हनिष्यामःसहिताःसमरेष्वयः। इतितेकथ्यमानस्यश्रुतंसंसदिसंसदि। अनुतिष्ठप्रति
ज्ञातंसत्यवान्भवतैःसह। एषतेवपांडवःशत्रुरव्यग्रस्त्वोग्रतःस्थितः। क्षत्रधर्ममवेक्षस्वश्लाघ्यस्तववधोजयात्। दत्तंभुक्तमधीतंचप्राप्त

द्रो॰प॰
१९४

मैश्वर्यमीप्सितं। हतस्त्वं नृपैश्चापि माभैर्युध्यस्व पांडवैः। इत्युक्त्वा समरे द्रोणो प्यावर्त्तत नृपतः परे। द्वैधीकृत्य ततः सेनां युद्धं समभवत्तदा।
॥ ॥द्रोणपर्वणि रात्रियुद्धे॥ ॥संजय॥ ॥त्रिभागमात्रशेषायां रात्र्यां युद्धमवर्त्तत। कुरूणां पांडवानां च संहृष्टानां विशांपते।
अथ चंद्रप्रभां मुष्णन्नादित्यस्य पुरःसरः। अरुणोभ्युदयं चक्रे ताम्रीकुर्वन्निवांबरं। प्राच्यां दिशि सहस्रांशोररुणेनारुणीकृतं।
तापनीयं यथा चक्रं भ्राजते रविमंडलं। देवब्रह्मर्षिगंधर्वैर्जपे च प्रस्तुतो रविः। नुदति स्म जगत्सर्वं भासयन्स्वांशुभिः शुभैः। ततो रथाश्चैव
सवाजियानानुत्सृज्य योधाः कुरुपांडुसैन्याः। दिवाकरस्याभिमुखा जपंतः संध्यागताः प्रांजलयो बभूवुः। ततो द्वैधीकृते सैन्ये द्रोणः सो
मकपांडवान्। अभ्यद्रवत्सपंचालान्दुर्योधनपुरोगमः। द्वैधीकृतं तु तद्दृष्ट्वा माधवोर्जुनमब्रवीत्। सपत्नान्सव्यतः कुर्वन्नपसव्यमिमं कुरु।
समाधवमनुज्ञाय कुरुष्वेति धनंजयः। द्रोणकर्णौ महेष्वासौ सर्वतः पर्यवर्त्तत। अभिप्रायं तु कृष्णस्य ज्ञात्वा परपुरंजयः। अर्जुनं पुरतो दृ
ष्ट्वा भीमसेनः समासदत्॥ ॥भीमसेन॥ ॥अर्जुनार्जुन बीभत्सो शृणु मे तत्त्वतो वचः। यदर्थं क्षत्रिया सूते तस्य कालोयमागतः। अस्मिंश्चे
दागते काले श्रेयो न प्रतिपत्स्यसे। असंभावितरूपः सन्नानृशंस्यं करिष्यसि। सत्यश्रीधर्मयशसां वीर्येणानृण्यमाप्नुहि। भिंध्यनीकं युधां श्रे
ष्ठ सव्यमाजिमिमं कुरु॥ ॥संजय॥ ॥स सव्यसाची भीमेन नोदितः केशवेन च। कर्णद्रोणावतिक्रम्य समंतात्पर्यवारयत्। तमाजिशीर्षम
यांतं दहंतं क्षत्रियर्षभान्। पराक्रांतं पराक्रम्य यततः क्षत्रियर्षभाः। न शेकुर्वारयितुं दहमानमिवानलं। अथ दुर्योधनः कर्णः शकुनिश्चा
पि सौबलः। अभ्यवर्षञ्छरव्रातैः कुंतीपुत्रं धनंजयं। तेषामस्त्राणि सर्वेषामुत्तमास्त्रविदां वरः। कदर्थीकृत्य राजेंद्र शरवर्षैरवाकिरत्। अस्त्रैरस्त्रा
णि संवार्य लघुहस्तो धनंजयः। सर्वानविध्यन्निशितैर्दशभिर्दशभिः शरैः। उद्धूता रजसो वृष्टिः शरवृष्टिस्तथैव च। तमश्च घोरं शब्दश्च तदा

राम
१९४

संभवन्महान्। नद्यौर्न भूमिर्न दिशो न प्राज्ञायंत तथैव तदा। सैन्येन रजसा मूढं सर्वमंधमिवाभवत्। नैव ते न वयं राजन् प्राज्ञासिष्म परस्परं। उ
द्देशेनैव निघ्नंतः समयुध्यंत पार्थिवाः। विरथा रथिनो राजन् समासाद्य परस्परं। केशेषु समसज्जंत कवचेषु भुजेषु च। हताश्वा हतसूताश्च
निश्चेष्टा रथिनस्तदा। जीवंत इव तत्र स्म व्यदृश्यंत भयार्दिताः। हतान्गजान्समाश्लिष्य पर्वतानिव वाजिनः। गतसत्वा व्यदृश्यंत तथैव सहसा
दिभिः। ततस्त्वभ्यवसृत्यैवं संग्रामादुत्तरां दिशं। अतिष्ठदाहवे द्रोणो विधूम इव पावकः। तमाजिशीर्षादेकांतमपक्रांतं निशाम्य तु। सम
कंपंत सैन्यानि पांडवानां विशांपते। भ्राजमानं श्रिया युक्तं ज्वलंतमिव तेजसा। द्रोणं दृष्ट्वा रणे तत्र चेरुस्ते सर्वतो दिशं। आक्रम्यं ते
परानीकं प्रभिन्नमिव वारणं। नैनमाशंसिरे जेतुं दानवा वासवं यथा। केचिदासन्निरुत्साहाः केचित्क्रुद्धा मनस्विनः। विस्मिताश्चा
भवन् केचित्केचिदासन्नमर्षिताः। हस्तैर्हस्ताग्रमपरे प्रत्यपेषन्नराधिपाः। अपरे दशनैरोष्ठानदशन् क्रोधमूर्छिताः। व्याक्षि
पन्नायुधान्यन्ये ममृदुश्चापरे भुजान्। अन्ये चाभ्यपतन्द्रोणं त्यक्तात्मानो महौजसः। पांचालास्तु विशेषेण द्रोणसायकपीडिताः।
समसज्जंत राजेंद्र सर्वतो भृशविक्षताः। ततो विराटद्रुपदौ द्रोणं प्रत्यक्रतं रणे। तथा चरंतं संग्रामे भृशं वीरं समरदुर्जयं। द्रुपदस्य त्रयः पुत्रास्त
त एव विशांपते। चेदयश्च महेष्वासा द्रोणमेवाभ्ययुर्युधि। तेषां द्रुपदपुत्राणां त्रयाणां निशितैः शरैः। त्रिभिर्द्रोणो हरत्प्राणांस्ते हता
न्यपतन्भुवि। ततः क्रुद्धो द्रुपदः क्रुद्धः शरवर्षमवासृजत्। द्रोणं प्रति महाराज विराटश्चैव संयुगे। ततो द्रोणः सुपीताभ्यां भल्लाभ्यामरिमर्दनः।
द्रुपदं च विराटं च प्रैषीद्वैवस्वतक्षयं। हते विराटे द्रुपदे केकयेषु तथैव च। तथैव चेदिमत्स्येषु पांचालेषु तथैव च। हतेषु त्रिषु वीरेषु द्रुपदे
स्य च नप्तृषु। द्रोणस्य कर्म तद्दृष्ट्वा कोपदुःखसमन्वितः। शशाप रथिनां श्रेष्ठो धृष्टद्युम्नो महाबलः। इष्टापूर्तात्तथा क्षात्राद्ब्राह्मण्याच्च स नश्यतु।

द्रोणं यद्यद्य मुच्येत यस्याद्द्रोणापराङ्मुखः। इति ते षां प्रतिश्रुत्य मध्ये सर्वधनुष्मतां। आयाद्द्रोणं सहानीकं धृष्टद्युम्नः प्रतापवान्॥ पांचालास्त्वेततो द्रोणम
भ्यघ्नन्पांडवास्तथा। दुर्योधनश्च कर्णश्च शकुनिश्चापि सौबलः। सोदर्याश्च यथामुख्यास्तेऽरक्षन्द्रोणमाहवे। रक्ष्यमाणं तथा द्रोणं समरे तैर्महात्मभिः।
यतमानाश्च पांचाला न शेकुः प्रतिवीक्षितुं। तत्राक्रुध्यद्भीमसेनो धृष्टद्युम्नस्य भारत। स एनं वाग्भिरुग्राभिस्तक्षत्पुरुषर्षभं॥ ॥भीमसेन॥
द्रुपदस्य कुले जातः सर्वास्त्रकुशली रणे। कः क्षत्रियंमन्यमानः प्रेक्षेतारिमुपस्थितं। पितृपुत्रवधं प्राप्य कः शत्रो हि प्रतीक्षते। विशेषतः सम
र्थश्च शपित्वा राजसंसदि। एष वैश्वानरसमः समिद्धः स्वेन तेजसा। शरचापेंधनो द्रोणः क्षत्रं दहति तेजसा। पुरा करोति निःशेषां पांडवानां
मनीकिनीं। स्थिताः पश्यंतु मे कर्म द्रोणमेकं प्रयास्यतः। इत्युक्त्वा प्राविशत्क्रुद्धो द्रोणानीकं वृकोदरः। दृढैः पूर्णायतोत्सृष्टैः द्रावयंस्तव वा
हिनीं। धृष्टद्युम्नोपि पांचाल्यः प्रविश्य महतीं चमूं। आससाद रणे द्रोणं तदासीत्तुमुलं महत्। नैव नस्तादृशं युद्धं दृष्टपूर्वं कदाचन। यथास्
र्योदये राजन् समीकं॰ तदभून्महत्। संसक्तान्येव दृश्यंते रथवृंदानि चाभिभो। हतानि च विकीर्णानि शरीराणि शिरांसि च। केचिदन्यत्र ग
छंतः पथि चान्यैरभिद्रुताः। विमुखाः पृष्ठतश्चान्ये गच्छंत्येके महाहवे। तथा संसक्तं युद्धं तदभवत्क्रूरदारुणं। अथ संध्यागतः सूर्यः क्षणे
नसमपद्यत। गते चतुरहे रात्रौ दिनो जायत पंचमः॥ ॥इति श्रीमहाभारते द्रो ४ क ४ णपर्वणि रात्रियुद्धं समाप्तं चतुर्थो युद्धदिवसः॥ ८२ ॥
॥ ॥संजय॥ ॥ते तथैव महाराज दंशिता रणमूर्द्धनि। संध्यागतं सहस्रांशुमादित्यमुपतस्थिरे। उदिते तु सहस्रांशौ तप्तकांचनसप्रभे।
प्रकाशितेषु लोकेषु पुनर्युद्धमवर्त्तत। रथैर्हया हयैर्नागाः पदाताश्चापि कुंजरैः। हया हयैः समाजघ्नुः पादाताश्च पदातिभिः। नरा रथैर्नै
र्नागास्तथैव भरतर्षभ। संसक्ताश्च वियुक्ताश्च योधाः संन्यपतन्रणे। ते रात्रौ कृतकर्माणः श्रांताः सूर्यस्य तेजसा। क्षुत्पिपासापरीतांगा निःसं

संजय उवाच॥ तत्येव महाराज दंशितारणमूर्द्धनि। संध्यागतं सहस्रांशुमादित्यमुपतस्थिरे। उदिते तु निशानाथे तप्तकांचनसप्रभे।
प्रकाशितेषु लोकेषु पुनर्युद्धमवर्त्तत॥ रथैर्हयाहयैर्नागाः पदाताश्चापि कुंजरैः॥ हयाहयैः समाजघ्नुः पदाताश्च पदातिभिः॥
नरा रथैर्नरैर्नागास्तथैव भरतर्षभ॥ संसक्ताश्च विमुक्ताश्च योधाः संन्यपतन्रणे। ते रात्रौ भ्रूतकमणिः श्रांताः सूर्यस्य तेज
सा। क्षुत्पिपासापरीतांगा निःसंज्ञा बहवो भवन्॥ शंखभेरीमृदंगानां कुंजराणां च गर्जतां॥ विस्फारितविकृष्टानां धनुषां
चैव कूजतां। शब्दः समभवद्राजन्दिविस्पृग्भरतर्षभ। द्रवतां च पदातीनां शस्त्राणां विनिपातितनां॥ हयानां हेषतां चैव
रथानामभिवर्त्तिनां॥ क्रोशतां गर्जतां चैव तदासीत्तुमुलं महत्। विवृद्धस्तुमुलः शब्दो द्यामगच्छन्महास्वनः॥ क्रमाव
श्रयुत महांस्तदासीत्तुमुलं महत्। पततां पात्यमानानां पत्यश्वरथहस्तिनां। ते भुसृषे घनीकेषु व्यतिषक्ते घनेकरा
॥ स्वे स्वान्जघ्नुः परस्तांश्च स्वान्परे च परांस्तथा। वीरबाहुविसृष्टाश्च वीरेषु बहुलेषु च। असयः प्रत्यदृश्यं
त विद्युतः प्रावृषीव हि। उद्यतप्रतिपिष्टानां खड्गानां वीरबाहुभिः। बभूव तुमुलः शब्दो वंशानां दह्यतामिव। असि
भिश्च तथा प्रासैस्तोमरैश्च परस्वधैः। निकृष्टयुद्धं संसक्तं महदासीत्सुदारुणं। गजाश्वकायप्रभवां नरदेहप्रहारि
णीं। शस्त्रमत्स्यसुसंपूर्णां मांसशोणितकर्दमां। आर्त्तनादस्वनवतीं पताकावस्त्रफेनिलां। नदीं प्रावर्त्तयन्वीराः प

द्रो॰प॰
१२६

रलोकप्रवाहिनीं। शरशक्त्यर्दिताः कुंताराष्ट्रिमढाल्पचेतसः। विष्टभ्य सर्वगात्राणि व्यतिष्ठन्राजवाजिनः। संशुष्कवदनादीना
ः शिरोभिश्चारुकुंडलैः। युद्धोपकरणैश्चान्यैस्तत्रतत्र चकाशिरे। रथसंघैरवाकीर्णैर्मनुजैरश्वैस्तैरपि। नासीद्रथवरस्तत्र सर्वमा
योधनंप्रति। मृत्तुरस्कचक्रे रुरथैः सत्र मास्थायवाजिनः। कथंचिदवहंस्तत्रश्रान्ताविषमानाः शरार्दिताः। कुलसत्वबलोपे
तावाजिनोवारणोत्तमाः। विह्वला बलमुत्सृज्यनाः सैन्येतुरजसावृते। बलमोसीत्तथा सर्वमृते द्रोणार्जुनावुभौ। तावेवास्तां
निलयनं तावार्तायनमेवच। तावेवान्येसमासाद्य जग्मुर्वैवस्वतक्षयं। आविग्नमभवत्सर्वं कौरवाणां महद्बलं। वा
पांचालानां चसंसक्तं नप्रज्ञायत किंचन। अंतकाक्रीडसदृशं भीरूणां भयवर्द्धनं। पृथिव्यां राजवंशानामुत्थिते महति
क्षये। नतत्रद्रोणं नकर्णं नार्जुनं नयुधिष्ठिरं। नभीमसेनं नयमौ नपांचाल्यं नसात्यकिं। नचदुःशासनं द्रौणिं नदुर्योधनसौब
लौ। नकृपं मद्रराजं वा कृतवर्माणमेवच। नचान्यांनैवचात्मानं नक्षितिं नदिशस्तथा। पश्यामराजन्संसक्तान्सैन्येतुर
जसावृते। संभ्रांते तुमुले घोरे महामोहे समुत्थिते। द्वितीयामिवसंप्राप्तां तामन्यंत निशां तदा। नज्ञायते नकौरव्यान
पांचालान्नपांडवाः। नदिशो नवियन्नोर्वी नसमं विषमं तथा। हस्तसंस्पर्शमापन्नाः संबुध्येयुः परांस्वकान्। न्यपा
तयंस्तु [illegible] युद्धेनराः सर्वे विजयैषिणः। उद्धूतत्वात्तु रजसः प्रसेकाच्छोणितस्य तु। प्रशशामरजो भीमं शीघ्रत्वादनि
लस्य च। तत्रनागा हयायोधा रथिनो थपदातयः। पारिजातवनानीव व्यरोचन्रुधिरोक्षिताः। ततो दुर्योधनः कर्णो द्रोणो

राम
१२६

दुःशासनस्तथा। पांडवैः समसज्जंत चतुर्भिस्त्रिभिरेव रथाः। दुर्योधनः सह भ्रात्रा भायमाभ्यां समसज्जत। वृकोदरेण राधेयो भा
रद्वाजेनैव चार्जुनः। रथमार्गैर्विचित्रैश्च विचित्ररथसंकुलं। अपश्यन् रथिनो युद्धे विचित्रांश्चित्रयोधिनः। यतमानाः परा
क्रांताः परस्परजिगीषवः। जीमूता इव घर्मान्ते शरवर्षैरवाकिरन्। ते रथाः सूर्यसंकाशा नाश्चिता पुरुषर्षभाः। अशोभंत
यथा मेघाः शारदाः समुपस्थिताः। स्पर्द्धिनस्ते महेष्वासाः कृतयत्ना धनुर्धराः। अभ्यगच्छंस्तदान्योन्यं मत्तागजवृषा इवा। न
नूनं देहभेदोस्ति काले राजन्ननागते। यत्र सर्वे न युगपद्व्यशीर्यंत महारथाः। बाहुभिश्चरणैश्छिन्नैः शिरोभिश्च
स कुंडलैः। कार्मुकैर्विशिखैः प्रासैः खड्गैः परशुपट्टिशैः। नालीकक्षुरनाराचैर्नखरैः शक्तितोमरैः। अन्यैश्च विवि
धाकारै राजन्प्रहरणोत्तमैः। चित्रैश्च विविधाकारैः शरीरावरणैरपि। विचित्रैश्च रथैः संभग्नैर्हतैश्च गजवाजिभिः।
अन्यैश्च नगराकारैर्हतयोधध्वजै रथैः। अमनुष्यैर्हयैस्त्रस्तैः कृष्यमाणैस्ततस्ततः। वातायमानैरसकृद्धतवीरै
रलंकृतैः। व्यजनैः शाकटैश्चैव ध्वजैश्च विनिपातितैः। छत्रैराभरणैर्वस्त्रैर्माल्यैश्चैव सुगंधिभिः। हारैः किरीटैर्मु
ष्णीषैः किंकिणीनां गणैरपि। उरस्थैर्मणिभिर्निष्कैश्चूडामणिभिरेव च। आसीदायोधनं तत्र नभस्तारागणैरिव।
ततो दुर्योधनस्यासीन्नकुलेन समागमः। अमर्षितेन क्रुद्धस्य क्रुद्धेनामर्षितस्य च। अपसव्यं चकाराथ माद्रीपु
त्रस्तवात्मजं। किरन् शरशतैर्हृष्टस्तत्र नादो महानभूत्। अपसव्यं कृतः संख्ये भ्रातृव्येनाप्यमर्षिता। समर्षित

द्रो॰प॰
१२७

स्तमेवाजौ प्रतिच्छेकूपसव्यतः। ततः प्रतिचिकीर्षंतमपसव्यं तु तेसूतं। न्यवारयत तेजस्वी नकुलश्चित्रमार्गवित्। सर्वतो विनिवा
र्यैनं शरजालेन पीडयन्। विमुखं नकुलः संख्ये तत्सैन्यान्यभ्यपूजयन्। तिष्ठतिष्ठेति नकुलो बभाषे तनयं तव। संस्मृत्य सर्वदुःखानि त
वदुर्मंत्रितजानि च॥ ॥ महाभारते द्रोणपर्वणि॥ १॥ ततो दुःशासनः क्रुद्धः सहदेवमुपाद्रवत्। रथवेगेन तीव्रेण कंपयन्निव मेदिनीं। त
स्यापततएवाशु रथेनामित्रकर्षणः। माद्रीपुत्रः शिरो यंतुः सशिरस्त्राणमाछिनत्। नैव दुःशासनः सूतं बुबुधेनापि तच्चेतसं। सहसा
संनिगृह्याजौ स्वयं रणविशारदः। युयुधे चारथिनां श्रेष्ठो लघु चित्रं च सुष्ठु च। तदस्यापूजयन्कर्म स्वे परे चैव संयुगे। हतसूतर
थेनाजौ विचरंतमभीतवत्। सहदेवस्ततो नश्वांस्तीक्ष्णैर्बाणैरवाकिरत्। पीड्यमानाः शरैस्ते तु प्राद्रवंत ततस्ततः। स रश्मिषु
विषक्तत्वादुत्ससर्ज शरासनं। धनुषा कर्म कुर्वंश्च पुनरश्वान्समुत्सृजन्। छिद्रेषु तेषु तं बाणैर्माद्रीपुत्रोन्यवारयत्। परी
प्संस्त्वत्सुतं कर्णस्तदंतरमापतत्। वृकोदरस्ततः कर्णं त्रिभिः क्षुद्रैः स्तनांतरे। बाह्वोरुरसि चापी
डयत्। सन्यवर्तत ततः पार्थः पादस्पृष्ट इवोरगः। तदभूत्तुमुलं युद्धं भीमराधेययोस्तदा। तौ वृषाविव संरब्धौ विवर्तमानौ यतावुभौ
। वेगेन महतान्योन्यं संरब्धावभिपेततुः। अभिसंश्लिष्टयोस्तत्र तयोराहवशूरयोः। संभिन्न शरपातत्वाद् गदायुद्धमवर्तत। गदया
भीमसेनस्तु कर्णस्य रथकूबरं। बिभेदाशु तदा राजंस्तदद्भुतमिवाभवत्। ततो भीमस्य राधेयो गदामादाय वीर्यवान्। अवासृजद्
भी॰२

राम
१२७

पेतां तु विमेदाद यागतां। तां शरैर्दशभिः कर्णः क्षुरपुंखैः सुसमाधिना। अत्यविध्य सुरस्ताच्च सा भीमं
पुनराप्रजघ्न। तस्याः प्रतिनिपातेन भीमस्याथ विपुलो ध्वजः। पपात सोऽथ ध्वजस्य सम्मोहं गदयाहतः। स कर्णे सायकान
षष्टिं व्यसृजत् क्रोधमूर्छितः। तैस्तस्य निशितैः पीतैः भीमसेनो महाबलः। चिच्छेद परवीरघ्नः प्रहसन्निव भारत। ध्वजं शरा
सनं चैव हस्तावापं च भारत। कर्णोऽप्यन्यद्धनुर्गृह्य हेमपृष्ठं दुरासदं। ततः पुनस्तु राधेयो हयानस्य रथेषुभिः। ऋक्षव
र्णान् जघानाशु नयोर्भौ पार्ष्णिसारथी। सविपन्ने रथे भीमो नकुलस्याप्लुतो रथं। हरिर्यथा गिरेः शृंगं समा
क्राम दरिंदम। तथा द्रोणार्जुनौ चित्रमयुध्येतां महारथौ। आचार्यशिष्यौ राजेन्द्र कृतप्रहरणौ युधि। रथसंधानयोगाभ्यां
रथयोश्च रणेन च। मोहयंतौ मनुष्याणां चक्षूंषि च मनांसि च। उपारमंत ते सर्वे योधास्माकं परे तथा। अदृष्टपूर्वं पश्यंत
स्तद्युद्धं गुरुशिष्ययोः। विचित्रपुत नामध्येरथमार्गानुदीर्यं च। अन्योन्यमपसव्यं च कर्तुं वीरौ विचेरतुः। पराक्रमं तयो
र्योधा ददृशुस्तेऽथ विस्मिताः। तयोः समभवद्युद्धं द्रोणपांडवयोर्महत्। आमिषार्थं महाराज गगने श्येनयोरिव।
यद्यच्च कार्य द्रोणस्तु कुंतीपुत्रजिगीषया। तत्तत्प्रतिजघानाशु प्रहसंस्तस्य पांडवः। यदा द्रोणो न शक्नोति पांडवस्य विशेषणे।

द्रो०प०
१९८

न४

ततः प्रादुश्चकाराशु मस्त्रमार्गविधानवित्। ऐंद्रं पाशुपतं त्वाष्ट्रं वायव्यमथ वारुणी। मुक्तं मुक्तं द्रोणचापात्तज्जघान धनंजयः
। अस्त्राण्यस्त्रैर्यदा तस्य विनिहंति धनंजयः। ततस्त्रैः परमैर्दिव्यैः द्रोणः पार्थमवाकिरत्। यद्यदस्त्रं स पार्थाय प्रयुंक्ते स्म वि
जिगीषया। पार्थोपि तस्य तैर्दिव्यैरस्त्रैरस्त्राणि चाग्रसत्। स वध्यमानेष्वस्त्रेषु दिव्येष्वपि यथाविधि। अर्जुनेनार्जु
नं द्रोणो मनसैवाभ्यपूजयत्। आत्मनोभ्यधिकं मेने पृथिव्यामपि भारत। तेनेन शास्त्रेण सर्वशास्त्रभृतांवरः। वार्य
माणश्च पार्थेन तथा मध्ये महात्मनो। यतमानोधिकं प्रीत्या प्रत्यवारयदर्जुनं। ततोंतरिक्षे देवाश्च गंधर्वाश्च सहस्रश
:। ऋषयः सिद्धसंघाश्च व्यतिष्ठंत समंततः। तदप्सरोभिराकीर्णं यक्षराक्षससंकुलं। श्रीमदाकाशमभवद्भूयो मेघाकुलं यथा
। तत्र स्मांतर्हिता वाचो व्यचरंत पुनः पुनः। द्रोणसंस्तवसंयुक्ताः पार्थस्य च महात्मनः। विसृज्यमानेष्वस्त्रेषु ज्वलयत्सु त
तस्ततः। न चेदं मानुषं युद्धं नासुरं न च राक्षसं। न दैवं न च गांधर्वं ब्राह्म्यं ध्रुवमिदं परं। विचित्रमिदमाश्चर्यं न च दृष्टं
न च श्रुतं। अति पांडवमाचार्यो द्रोणं चाप्यति पांडवः। नानयोरंतरं द्रष्टुं शक्यमस्त्रेषु केनचित्। यदि रुद्रो द्विधात्मानं यु
ध्येदात्मानमात्मना। तत्र शक्योपमा कर्तुमन्यस्यापि नात्र विद्यते। ज्ञानमेकस्थमाचार्ये ज्ञानं योगश्च पांडवे। नौ तौ
शक्यौ महेष्वासौ रणे क्षपयितुं परैः। इच्छमानौ महाराज हन्येतां सचराचरं। इत्यब्रुवन्महाराज दृष्ट्वा तौ पुरुषर्षभौ।
अंतर्हितानि भूतानि प्रकाशानि च सर्वशः। ततो द्रोणो ब्राह्ममस्त्रं प्रादुश्चक्रे महामतिः। संतापयन्रणे पार्थं भूतान्यंत

राम
१९८

र्हितानि च । ततश्चचाल पृथिवी सपर्वतवनद्रुमा । ववौ च विषमो वायुः सागराश्चापि चुक्षुभुः । ततस्त्वासीन्महानासीत्कुरुपांडवसे
नयोः । रश्मिषी चैव भूतानां मुह्यते स्वे महात्मना ॥ ततः पार्थोपि संप्राप्तं तस्त्वदस्त्वं प्रति जग्मिवान् । ब्रह्मास्त्रेणैव राजेंद्र तदस्त्रं शस्त्रवारय
त् । ततः संकुलयुद्धेन न धुंधुं याकुलीकृतं । नाज्ञायत ततः किंचित्पुनरेव विशांपते । प्रवृत्ते तु मुखे पूर्वे द्रोणपांडवयोर्मृधे । शरजा
लैः समाकीर्णमेघजालैरिवांबरं । नाज्ञासीच्च ततः किंचिदंतरिक्षे मुकुस्तदा ॥ ॥ महाभारते द्रोणपर्वणि ॥ [illegible] ॥ संजय०
दुःशासनो महाराज नराश्वप्रवरक्षये । स तु रुक्मरथः प्राज्ञो धृष्टद्युम्नमयोधयत् ॥ स च रुक्मरथासक्तो दुःशासनशरार्दितः । अम
र्षितो वपुत्रस्य शरैर्वाहानवाकिरत् । क्षणेन स रथस्तस्य सध्वजश्च ससारथिः । नादृश्यत महाराज पार्षतस्य शरैश्चितः ।
दुःशासनस्तु राजेंद्र पांचाल्यस्य महात्मनः । नाशकत्प्रमुखे स्थातुं शरजालप्रपीडितः । स तु दुःशासनं बाणैः प्रमुखे विमुखीकृत्य पा
र्षतः । किरन्शरसहस्राणि द्रोणमेवाभ्ययाद्रणे । प्रत्यपद्यत हार्दिक्यः कृतवर्मा तदंतरं । सोदर्याणां त्रयश्चैव तत एनं पर्यवारयन् । तं
तं यमौ पृष्ठतोन्वितौ रक्षंतौ पुरुषर्षभौ । द्रोणायाभिमुखं यांतं दीप्यमानमिवानलं । संप्रहारमकुर्वंस्ते सर्वे सप्त महारथाः । अम
र्षिताः सत्ववंतः प्रेक्षंतो गतिमुत्तमां । शुद्धात्मानः शुद्धवृत्ता राजन्स्वर्गपुरस्कृताः । आर्यं युद्धमकुर्वंत परस्परजिगीषवः । धर्मयु
द्धमयुध्यंत त्यक्त्वा मरणमग्रतः । न तत्रासीदधर्मिष्ठमशस्त्रं युद्धमेव च । नात्र कर्णी न नालीको नालिप्तो न च वस्तकाः । न सूचिः कपि
शो वासीत्पलायनपरायणाः । इषुरासीन्न संश्लिष्टो न चैवाभूदजिह्मगाः । ऋजून्येव विशुद्धानि सर्वशस्त्राण्यपातयन् । सुयुद्धे
न परान्लोकानीप्संत कीर्तिमेव च । तदासीत्तुमुलं युद्धं सर्वदोषविवर्जितं । चतुर्णां तव योधानां तैस्त्रिभिः पांडवैः सह । धृष्टद्युम्न

द्रो॰प॰

१२१

स्कृतान्दृष्ट्वा राजन्क्षत्रियपुंगवान्। यमाभ्यां वारितान्दृष्ट्वा शीघ्रास्त्रो द्रोणमभ्ययात्। निवारितास्कृते वीरास्तयोः पुरुषसिंहयोः। सम
सज्जंत चतुरोगाताः पर्वतस्येरिव। द्वाभ्यां द्वाभ्यां यमौ सार्द्धं रथाभ्यां रथपुंगवौ। समासक्तौ ततो द्रोणं धृष्टद्युम्नोभ्यवर्त्तत। दृष्ट्वा द्रोण
यपांचाल्यं प्रभंजं तं युद्धदुर्मदं। यमाभ्यां तांश्च संसक्तांस्तदंतरमुपाद्रवत्। दुर्योधनो महाराज किरं शोणितभोजनान्। संसात्यकिः
शीघ्रतरं पुनरेवाभ्यवर्त्तत। तौ परस्परमासाद्य समीपे कुरुमाधवौ। हसमानौ नरशार्दूलौ सहितौ समगच्छतां। बाल्ये वृत्तानि सर्वा
णि प्रीयमाणौ विचिंत्य तौ। अन्योन्यं प्रेक्षमाणौ च स्मरमानौ पुनः पुनः। अथ दुर्योधनो राजा सात्यकिं प्रत्यभाषत। प्रियं सखायं स
ततं गर्हयन्वृत्तमात्मनः। धिक्क्रोधं धिक्क्षमत्वे लोभं धिक्मोहं धिगमर्षितं। धिगस्त्वक्षात्रमाचारं धिगस्तु बलमौरसं। यत्त्वमाम
भिसंधत्से त्वां चाहं शिनिपुंगव। त्वं हि प्राणप्रियतरो ममाहं च सदा तव। स्मरामि तानि सर्वाणि बाल्ये वृत्तानि यानि नौ। तानि सर्वाणि
जीर्णानि सांप्रतं नौ रणाजिरे। ततथा वादिनं राजन्सात्वतः प्रत्यभाषत। प्रवर्षन्विशिखांस्तीक्ष्णानुद्यम्य परमास्त्रवित्। नेयं सभा
राजपुत्र त्वाचार्यस्य निवेशनं। यत्र क्रीडितमस्माभिस्तदा राजन्समागमे॥ दुर्योधन उ॥ क्व चा क्रीडा गता स्माभिर्वा लेये वै शि
निपुंगव। क्व च युद्धमिदं भूयः कालो हि दुरतिक्रमः। किं नु वै नियते भृत्यं बलेन बलिलिप्सुना। यत्र वध्यामहे सर्वे धनलोभात्स
मागतान्॥ संजय उ॥ तं तथा वादिनं तत्र राजानं माधवोब्रवीत्। एवं वृत्तं च नः क्षात्रं यत्र घ्नंति गुरूनपि। यदि तेहं प्रियो राजन्।
जहि मां [illegible]न्यथा क्षुधाः। त्वत्कृते सुकृतांल्लोकान्गच्छेयं पुरुषर्षभ। या ते शक्तिर्बलं चैव तत्क्षिप्रं मयि दर्शय। नेछामि त्वामहं द्रष्टुं
मित्राणां व्यसनं महत्। इत्येवं व्यक्तमाभाष्य प्रतिभाष्य च सात्यकिः। अभ्ययात्तूर्णमव्यग्रो निरपेक्षो विशांपते। तमायांतमभि
प्रेक्ष्य प्रत्यगृह्णात्तवात्मजः। शरैश्चावाकिरं राजा शैनेयं तनयस्तव। ततः प्रववृते युद्धं कुरुमाधवसिंहयोः। अन्योन्यं क्रुद्ध

राम

१२१

योधेरियथाद्रिरदसिंहस्य योः। ततः पूर्णायतोत्सृष्टैः सात्वतं युद्धदुर्मदं। दुर्योधनः प्रत्यविध्यद्दशभिर्निशितैः शरैः। तं सात्यकिः प्रत्यविध्यद्दशभिर्नि
शितैः शरैः। तं सात्यकिः प्रत्यविध्यद्दशभिर्निशितैः शरैः। सात्यकिं तु रणे राजन्प्रहसंस्तनयं तव। आपूर्णकर्णनिर्मुक्तैर्विव्याध त्रिंशता शरैः। ततो
स्य सशरं चापं क्षुरप्रेण द्विधाकरोत्। सोन्यत्कार्मुकमादाय शीघ्रहस्तस्तथा न्तरं। सात्यकिर्व्यसृजच्चापि शरश्रेणीं सुतस्य ते। तामापतंतीं स
हसा शरश्रेणीं जिघांसया। चिच्छेद बहुधा राजंस्तत उच्चुक्रुशुर्जनाः। स सात्यकिं त्रिसप्तत्या पीडयामास वेगितः। स्वर्णपुंखैः शिलाधौतैरा
कर्णपूर्णनिसृतैः। तस्य संदधतश्चेषुं संहतेषु च कार्मुकं। आच्छिनत्सात्यकिस्तूर्णं शरैश्चैवाभ्यपीडयत्। स गाढविद्धो व्यथितः प्रतिप्रायाद
थांतरं। दुर्योधनो महाराज दाशार्हशरपीडितः। समाश्वस्य तु विश्रम्य सात्यकिं पुनराव्रजत्। विसृजन्निषुजालानि युयुधानरथं प्रति। तथै
व सात्यकिर्बाणैर्दुर्योधनरथं प्रति। प्रततान्यसृजद्राजंस्तत्संकुलमवर्तत। ततस्त्विषुभिः क्षिप्यमाणैः पतद्भिश्च समंततः। अग्नेरिव महाकक्षे
शब्दः समभवन्महान्। तयोः शरसहस्रैश्च संछन्नं वसुधातलं। आगम्यरूपं च शरैराकाशं समपद्यत। तत्राभ्यधिकमालक्ष्य माधवं रथ
सत्तमं। क्षिप्रमभ्यगमत्कर्णः परीप्संस्तनयं तव। न तु तं मर्षयामास भीमसेनो महाबलः। अभ्ययात्त्वरितः कर्णं विसृजन्सायकान्बहून्। त
स्य कर्णः शितान्बाणान्प्रतिसंधाय सन्निव। धनुः शरांश्च चिच्छेद सूतं चाभ्यहनच्छरैः। भीमसेनस्तु संक्रुद्धो गदामादाय पांडवः। ध्वजं धनुश्च
सूतं च सम्मम्लत्वाहवे रिपोः। रथचक्रं च कर्णस्य बभंज सुमहाबलः। भग्नचक्रे रथे तिष्ठन्नकंप्यः शैलराडिव। एकचक्रं रथं तस्य तमूहुः स्म
चिरं हयाः। एकचक्रमिवार्कस्य रथं सप्त हयामलाः। संकुले वर्तमाने तु राजन्धर्मसुतोब्रवीत्। पांचालानां नरव्याघ्रान्मत्स्यांश्चैव नरर्षभा
न्। येन प्राणा यक्षितारो ये नो योधा महारथाः। एते ते धार्तराष्ट्रेषु विषक्ताः पुरुषर्षभाः। किं तिष्ठत यथा मूढाः सर्वे विगतचेतसः।

तत्रगच्छतयत्रैतेयुध्यंतेमामकारथाः। क्षत्रधर्मंपुरस्कृत्यसर्वएवगताजुर्नं। यज्जंतोवध्यमानावागतिमिष्टांगमिष्यथ। जित्वावावबहुभि
र्यज्ञैर्यजध्वंभूरिदक्षिणैः। हत्वावादेवताजुष्टाल्लोकान्प्राप्स्यथपुष्कलान्। तेराजानोदितावीरायोत्स्यमानामहारथाः। चतुर्द्धावाहि
नींकृत्वात्वरिताद्रोणमभ्ययुः। पांचालाश्चैकतोद्रोणमभ्यघ्नन्निशितैःशरैः। भीमसेनपुरोगाश्चत्वेकतःसमवाकिरन्। आसं
स्कःपांडुपुत्राणांत्रयोयुद्धेमहारथाः। पांचाल्योभीमसेनश्चप्राक्रोशंतधनंजयं। अभिद्रवार्जुनक्षिप्रंकुरून्द्रोणंचपांडव। ततएनंह
निष्यंतिपांचालाःसर्वतोभृशं। कौरवेयांस्ततःपार्थःसहसासमुपाद्रवत्। पांचालाश्चैवतुद्रोणंधृष्टद्युम्नपुरोगमाः॥ ॥संजय॥ ॥
पांचालानांततोद्रोणोप्यकरोत्कदनंमहत्। यथाक्रुद्धोरणेशक्रोदानवानांक्षयंपुरा। द्रोणेनतेमहाराजवध्यमानाःपरेयुधि। नात्रसंत
रणेद्रोणात्सत्ववंतोमहारथाः। तेषामुत्साद्यमानानांपांचालानांसमंततः। अभवद्भैरवोनादोवध्यतांत्वारशक्तिभिः। वध्यमानेषुसंग्रा
मेपांचालेषुमहात्मना। उदीर्यमाणेद्रोणास्त्रेपांडवान्भयमाविशत्। दृष्ट्वाचरैनेसिंहानांविपुलंचक्षयंमृधे। पांडवेयामहाराजनाशं
संविजयंमहत्। कच्चिद्द्रोणोनतःसर्वान्क्षपयन्परमास्त्रवित्। समिद्धःशिशिरापायेदहन्कक्षमिवानलः। नचैनंसंयुगेकश्चित्सम
र्थःप्रतिवीक्षितुं। नचैनमर्जुनोजातुप्रतियुध्येतधर्मवित्। त्रस्तान्कुंतीसुतान्दृष्ट्वाद्रोणसायकपीडितान्। मतिमान्श्रेयसेयुक्तःके
शवोर्जुनमब्रवीत्। नैषयुद्धेनसंग्रामेजेतुंशक्यःकथंचन। अपिवृत्रहणायुद्धेरथयूथपयूथपः। आस्थीयतांजयेयोगोधर्ममुत्सृज्य
पांडव। यथावःसंयुगेसर्वान्नहन्याद्रुक्मवाहनः। अश्वत्थाम्निहतेनैषजह्यात्प्राणान्मतिर्मम। तंहतंसंयुगेकश्चिदस्मैशंसतुमारिषा। ए
तन्नारोचयद्राजन्कुंतीपुत्रोधनंजयः। अन्येत्वरोचयन्सर्वेकृच्छ्रेणतुयुधिष्ठिरः। ततोभीमोमहाबाहुरनीकस्वंमहागजं। जघानगदयारो

जघ्ने अश्वत्थामानमित्युत। भीमसेनस्तु सव्रीडमुपेत्य द्रोणमाहवे। अश्वत्थामा हत इति शब्दमुच्चैश्चकार ह। अश्वत्थामेति हि गजः ख्यातो
नाम्ना हतोऽभवत्। कृत्वा मनसि तं भीमो मिथ्या व्याहृतवांस्तदा। भीमसेनवचः श्रुत्वा द्रोणस्तत्परमप्रियं। मनसा सन्नगात्रोऽभूद्यथा सै
कतमंभसि। शंकमानः स तं मिथ्या वीर्यज्ञः स्वसुतस्य च। हतः स इति च श्रुत्वा नैव धैर्यादकंपत। स लब्ध्वा चेतनां द्रोणः क्षणेनैव समाश्वसत्।
अनुचिंत्यात्मनः पुत्रमविषह्यमरातिभिः। स पार्षतमभिद्रुत्य जिघांसुर्मृत्युमात्मनः। अवाकिरत्सहस्रेण तीक्ष्णानां कंकपत्रिणां। तं वै विंश
तिसाहस्राः पांचालानां रथर्षभाः। तथा चरंतं संग्रामे सर्वतो व्यकिरञ्छरान्। तैः शरैरावृतं द्रोणं नापश्याम महारथं। भास्करं जलदैश्छ
न्नं वर्षास्विव विशांपते। विधम्य तान्बाणगणान्पांचालानां महात्मनां। ततः स क्रुद्धो द्रोणो आत्मनः ..स्त्रं परंतपः। वधाय तेषां शूराणां पां
चालानाममर्षितः। ततो व्यरोचत द्रोणो विनिघ्नन्सर्वसोमकान्। शिरांस्यपातयच्चापि पांचालानां महामृधे। तथैव परिघाकारान्बाहून्कनकभूष
णान्। ते वध्यमानाः समरे भारद्वाजेन पार्थिवाः। मेदिन्यामन्वकीर्यंत वातनुन्ना इव द्रुमाः। कुंजराणां च पततां हयौघानां च भारत। अगम्य
रूपा पृथिवी मांसशोणितकर्दमा। हत्वा विंशतिसाहस्रान्पांचालानां रथव्रजान्। अतिष्ठदाहवे द्रोणो विधूमोऽग्निरिव ज्वलन्। तथैव
च पुनः क्रुद्धो भारद्वाजः प्रतापवान्। वसुदानस्य भल्लेन शिरः कायादपाहरत्। पुनः पंचशतान्मत्स्यान्षट्सहस्रांश्च संजयान्। अश्वा
नामयुतं हत्वा हस्तिनामयुतं पुनः। क्षत्रियाणामभावाय दृष्ट्वा द्रोणमवस्थितं। ऋषयोऽभ्यागमंस्तूर्णं हव्यवाहपुरोगमाः। विश्वामित्रो ज
मदग्निर्भरद्वाजोऽथ गौतमः। वसिष्ठः कश्यपोऽत्रिश्च ब्रह्मलोकं निनीषवः। देवतास्त्वृषयो गर्गा वालखिल्याः सरीसृपाः। भृगवोंऽगिरसश्चै
व सूक्ष्माश्चान्ये महर्षयः। त एनं समुपागम्य सर्वे द्रोणमाहवशोभिनं। अधर्मतस्त्वया ह्येते युद्धे समयो निधनस्य ते। न्यस्यायुधं रणे द्रोण समेत्यास्मा

निहस्थितान्नू। नातः क्रूरतरं कर्म पुनः कर्तुं त्वमर्हसि। वेदवेदांगवपुषः सत्यधर्मपरस्य ते। ब्राह्मणस्य विशेषेण तवैतान्यो न विद्यते। न्यस्यायुध
ममोघेषो तिष्ठ वर्त्मनि शाश्वते। परिपूर्णश्च कालस्ते वस्तुं लोकेद्य मानुषे। इति तेषां वचः श्रुत्वा भीमसेनवचश्च हि। धृष्टद्युम्नं च संप्रेक्ष्य रणे
च विमनाभवत्। सद्दसमानो व्यथितः कुंतीपुत्रं युधिष्ठिरं। अहतं वाहतं वेति पप्रच्छ स तमात्मनः। स्थिरा बुद्धिर्हि द्रोणस्य न पार्थो वक्ष्यतेऽनृ
तं। त्रयाणामपि लोकानामैश्वर्यार्थे कथंचन। तस्मात्तं परिपप्रच्छ नान्यं कं चिद्विशेषतः। तस्मिंस्तस्य हि सत्याशा बाल्यात्प्रभृति पांडवे। तत
तो निष्पांडवामुर्वीं करिष्यंतं युधांपतिं। द्रोणं ज्ञात्वा धर्मराजं गोविंदो व्यथितोऽब्रवीत्। यद्येवं दिवसं युद्धं द्रोणः पार्थ करिष्यति। सत्यं ब्रवीमि
से नाते विनाशं समुपैष्यति। स भवांस्त्रातु नो द्रोणात्सत्याज्ज्यायोऽनृतं वचः। अनृतं जीवितस्यार्थे वकथ्यं नानृतं भवेद्र। कामिनीषु विवाहे
षु गवां भक्ते तथैव च। ब्राह्मणाभ्युपपत्तौ च अनृते नास्ति पातकं। तयोः संवदतोरेवं भीमसेनोऽब्रवीदिदं। श्रुत्वैव तं महाराज वधोपायं महा
त्मनः। गाहमानस्य ते सेनां मालवस्येंद्रवर्मणः। अश्वत्थामेति विख्यातो गजः शक्रगजोपमः। निहतो युधि विक्रम्य ततो हं द्रोणमब्रुवं। अ
श्वत्थामा हतो ब्रह्मन्निवर्तस्वाहवादिति। नूनं न श्रद्दधे वाक्यमेवं मे पुरुषर्षभ। स त्वं गोविंदवाक्यानि मानयस्व जयैषिणः। द्रोणाय निह
तं शंस राजन् शारद्वतीसुतं। त्वयोक्तो नैष युध्येत जातु राजन् द्विजर्षभः। सत्यवान्हि त्रिलोकेस्मिंस्त्वं वाख्यातो जनाधिप। तस्य तद्वचनं
श्रुत्वा शोकग्लानो द्विजोत्तमः। न पृच्छाम्येनमहं तावन्नानृतं मयि यावदेन्न। ब्रूहि राजेन्द्र यथा सत्यं वृकोदरमुखोद्गतो। सत्यवाक् त्वं महारा
ज त्वयि मे प्रत्ययो महान्। अथ धर्मसुतो राजा श्रुत्वा द्रोणभाषितं। श्रुत्वा कदैतस्य तद्वाक्यमनतस्य भयात्तसः। कंपमानस्तदा चैव ब्री
तोद्विग्नमनाः नाभवत्। अव्यक्तमब्रवीद्राजन्हतः कुंजर इत्युत। तस्य पूर्वं रथः पृथ्व्यां चतुरंगुलमुत्ततः। बभूवैवं तु तेनोक्ते तस्य वाहास्पृशन्महीं॥

युधिष्ठिरात्तु तद्वाक्यं श्रुत्वा द्रोणो महारथः। पुत्रस्य व्यसनेत प्तो निराशो जीविते भवत्। आगस्कृतमिवात्मानं पांडवानां महात्मनां। ऋषिवा
क्यं च मन्वानः श्रुत्वा च निहतं सुतं। विचेताः परमोद्विग्नो धृष्टद्युम्नमवेक्ष्य च। योद्धुं नाशक्नुवद्राजन्यथापूर्वमरिंदम॥ ॥द्रोणपर्वणि॥ ॥

॥ ॥संजय॥ ॥तं दृष्ट्वा परमोद्विग्नं शोकोपहतचेतसं। पांचालराजस्य सुतो धृष्टद्युम्नोऽभ्यपाद्रवत्। य इष्ट्वा मनुजेंद्रेण द्रुपदेन महा
मखे। लब्धो द्रोणविनाशाय समिद्धाद्धव्यवाहनात्। स धनुर्जैत्रमादाय घोरं जलदनिस्वनं। दृढज्यमजरं दिव्यं शरांश्चाशीविषोपमा
न्। संदधे कार्मुके तस्मिंश्शरमाशीविषोपमं। द्रोणं जिघांसुः पांचाल्यो महाज्वालमिवानलं। तस्य रूपं शरस्यासीद्धनुर्ज्यामंडलां
तरे। द्योततो भास्करस्येव घनांते परिवेष्यतः। पार्षतेन परामृष्टं ज्वलंतमिव तद्धनुः। अंतकालमिव प्राप्तं मेनिरे वीक्ष्य सैनिकाः। तमि
षुं संधितं तेन भारद्वाजः प्रतापवान्। दृष्ट्वामन्यत देहस्य कालपर्यायमात्मनः। तस्य त्वहानि चत्वारि क्षपा चैकास्य तो गता। तस्य चा
स्त्रस्य क्षयं जग्मुः पत्त्रिणः। स शरक्षयमासाद्य पुत्रशोकेन चार्दितः। विविधानां च दिव्यानामस्त्राणामप्रसन्नतां। उत्स्रष्टुका
मः शस्त्राणि विप्रवाक्याभिनोदितः। तेजसा प्रेर्यमाणश्च युयुधे सोऽतिमानुषं। अथान्यत्स समादाय दिव्यमांगिरसं धनुः। शरांश्च
ब्रह्मदंडाभान् धृष्टद्युम्नमयोधयत्। ततस्तं शरवर्षेण महता समवाकिरत्। व्यसनेयच्च संक्रुद्धो धृष्टद्युम्नममर्षणः। तं शरं शतधा
चास्य द्रोणश्चिच्छेद सायकैः। ध्वजं धनुश्च निशितैः सारथिं चाप्यपातयत्। धृष्टद्युम्नः प्रहस्यान्यत्पुनरादाय कार्मुकं। शितेन चैनं बाणेन
प्रत्यविध्यत्स्तनांतरे। सोऽतिविद्धो महेष्वासः संभ्रांतस्तेन संयुगे। भल्लेन शितधारेण चिच्छेदास्य महद्धनुः। यच्चास्य बाणं विकृतं धनूंषि च
महामतेः। सर्वं संछिद्य दुर्धर्षो गदां खड्गमथापि च। धृष्टद्युम्नं ततोविध्यन्नवभिर्निशितैः शरैः। जीवितांतकरैः क्रुद्धः क्रुद्धरूपं परंतपः। धृष्ट

द्रो०प०
२०२

द्युम्नरथस्याश्वान्संस्थोस्तैर्महारथः। व्यामिश्रयन्महाराजद्रोणोब्रह्मविदुत्तमः। तेमिश्रावहुशोभेतेजवनावातरंहसः। पारावतसवर्णा
श्वाः शोणाश्वाभरतर्षभ। यथासविद्युतोमेघानदंतोजलदागमे। तस्यरेणुर्महाराजमिश्रितारणमूर्द्धनि। ईषाबंधंचक्रबंधंरथबंधंतथै
वच। प्रणाशयद्रमेयात्मा धृष्टद्युम्नस्यसद्विजः। सच्छिन्नधन्वाविरथोहताश्वोहतसारथिः। उत्तमामापदंप्राप्यगदांवीरःपरामृशत्।
तामस्यविशिखैस्तीक्ष्णैः क्षिप्यमाणांमहारथो। विजघानशरैर्द्रोणः क्रुद्धःसत्यपराक्रमः। तांदृष्ट्वातुनरव्याघ्रोद्रोणेननिहतांशरैः।
विमलंखड्गमादत्तशतचंद्रंचचर्मच। असंशयंतथाभूतोमृत्युंपांचाल्यःसत्वमन्यत। वधमाचार्यमुख्यस्यप्राप्तकालंमहात्मनः। ततस्त्वरथनी
डस्थोरथादस्यरथंययौ। अगच्छदसिमुद्यम्यशतचंद्रंचभानुमत्। चिकीर्षुर्दुष्करंकर्मधृष्टद्युम्नोमहारथः। असिहस्तोनदद्भूयोभार
द्वाजस्यपश्यतः। सोतिष्ठद्युगमध्येवैयुगसंनहनेषुच। तिष्ठतोयुगपालीषुतदध्रेषुचतिष्ठतः। शोणानांजघनाग्रेषुतत्सैन्यान्य
भ्यपूजयन्। नापश्यदंतरंद्रोणस्तदद्भुतमिवाभवत्। गृध्रस्येवानुचरतोयथैवामिषगृद्धिनः। तद्वदासीत्संप्रहारोद्रोणपार्षतयो
रणे। तस्याश्वान्रथशक्त्यासौजघानपरवीरहा। स्वबाणैरेवद्रोणोपिजघानाश्वान्महाहवे। शोणाश्चपर्यमुच्यंतरथबंधान्महामते। तेह
तान्यपतन्भूमौधृष्टद्युम्नस्यवाजिनः। तान्हतांश्चहयान्दृष्ट्वाद्विजाग्र्येणसपार्षतः। नामृष्यतयुधांश्रेष्ठोयाज्ञसेनिर्महारथः। विरथःस
गृहीत्वातुखड्गंखड्गभृतांवरः। द्रोणमभ्यपतद्राजन्वैनतेयइवोरगं। तस्यरूपंबभौराजन्भारद्वाजंजिघांसतः। यथारूपंपरं
विष्णोर्हिरण्यकशिपोर्वधे। सोचरद्विविधान्मार्गान्प्रकारानेकविंशति। दर्शयामाससकौरव्यपार्षतोविचरन्रणे। भ्रांतमुद्भ्रांतमावि

राम
२०२

द्रुमाद्रुतं प्रसृतं सृतं। परिवृत्तं निरस्त्रं च खड्गं चर्म च धारयन्। संपातं समुदीर्णं च दर्शयामास पार्षतः। भारतं कौशिकं चैव सात्वतं चैव
शिक्षया। दर्शयन्व्यचरद्युद्धे द्रोणस्यांतचिकीर्षया। चरतस्तस्य तान्मार्गान्विचित्रान्खड्गचर्मणोः। व्यस्मयंत रणे योधा देवताश्च समाग
ताः। ततः शरसहस्रेण शतचंद्रमपातयत्। खड्गं चर्म च संबाधे धृष्टद्युम्नस्य स त्वरः। ते तु वैतस्तिका नाम शरा ह्यासन्नघातिनः। निकृष्टयु
द्धे द्रोणस्य नान्येषां संति ते शराः। भारद्वाजस्य पार्थस्य द्रौणेर्वैकर्तनस्य च। प्रद्युम्नयुयुधानाभ्यामभिमन्योश्च ते शराः। अथेषुं स
समादत्त दृढं परमसंशितं। अंतेवासिनमाचार्यो जिघांसुः पुत्रसंमितं। अनंतरं शितैर्बाणैः प्रविश्य शिनिपुंगवः। पश्यतस्त
व पुत्रस्य कर्णस्य च महात्मनः। ग्रस्तमाचार्यमुख्येन धृष्टद्युम्नं मुमोच ह। चरंतं रथमार्गेषु सात्यकिं सत्यविक्रमं। द्रोणकर्णांतर
गतं कृपस्यापि च भारत। अपश्येतां महात्मानौ विष्वक्सेनधनंजयौ। अपूजयेतां वार्ष्णेयं ब्रुवाणौ साधु साध्विति। दिव्या
न्यस्त्राणि सर्वेषां क्रुधि निघ्नंतमच्युतं। अभिपत्य ततः सेनां विष्वक्सेनधनंजयौ। धनंजयस्ततः कृष्णमब्रवीत्पश्य केशव।
आचार्यवरमुख्यानां मध्ये क्रीडन्मधूद्वह। आनंदयति मां भूयः सात्यकिः परवीरहा। माद्रीपुत्रं च भीमं च राजानं च युधिष्ठि
रं। संशिक्षया सात्वतस्य रणे तान्हर्षमागतान्। महारथमुपक्रीडन्वृष्णीनां कीर्तिवर्द्धनः। तमेते प्रतिनंदंति सिद्धाः सैन्या
श्च विस्मिताः। अजय्यं समरे दृष्ट्वा साधु साध्विति सात्वतं। योधाश्चोभयतः सर्वे कर्म तत्समपूजयन्॥ ॥द्रोणपर्वणि॥ ॥
॥ ॥संजय॥ ॥सात्वतस्य तु तत्कर्म दृष्ट्वा दुर्योधनादयः। शैनेयं सर्वतः क्रुद्धाः सहसा समवारयन्। कर्णश्च सर्वतः क्रुद्धो गौतम

श्चैव ते सुतः। शैनेयं त्वरयाभ्येत्य विनिघ्नन्निशितैः शरैः। युधिष्ठिरस्ततो राजा माद्रीपुत्रौ च भ्रातरौ। भीमसेनश्च कौंतेयः सात्वतं पर्यवारयन्।
तां वृष्टिं सहसा राजन्नुच्छितां घोररूपिणीं। वारयामास शैनेयो योधयंस्तान्महारथान्। तेषामस्त्राणि दिव्यानि संहतानि महात्मनां। वार
यामास विधिवद्दिव्यैरस्त्रैर्महामृधे। केशमायोधनं जज्ञे तस्मिन्वीरसमागमे। रुद्रस्याक्रीडसदृशं निघ्नतस्तु पशून्यथा। हस्तानामुत्त
मांगानां कार्मुकाणां च भारत। छत्राणां चापविद्धानां चामराणां च संयुगे। राशयः समदृश्यंत तत्र तत्र रणाजिरे। भग्नचक्रै रथैश्चापि प
तितैश्च महाभुजैः। सादिभिश्च हतैः शूरैः संकीर्णा वसुधाभवत्। बाणपातनिकृत्ताश्च योधास्ते कुरुसत्तम। चेष्टंतो विविधाश्चेष्टा व्यदृ
श्यंत महाहवे। वर्त्तमाने तथा रौद्रे घोरे देवासुरोपमे। अब्रवीत्क्षत्रियान्सर्वान्धर्मपुत्रो युधिष्ठिरः। अभिद्रवत संयत्ताः कुंभयोनिं महार
थाः। एषो हि पार्षतो वीरो भारद्वाजेन संगतः। घटते च यथाशक्ति भारद्वाजस्य शासने। यादृशानीह रूपाणि दृश्यंते नो महारणे।
अथ द्रोणं रणे क्रुद्धः पातयिष्यति पार्षतः। ते यूयं सहिता भूत्वा कुंभयोनिं परीप्सत। युधिष्ठिरसमाज्ञप्ताः सृंजयानां महारथाः। अ
भ्यद्रवंत संयत्ता भारद्वाजं जिघांसवः। तान्समापततः सर्वान्भारद्वाजो महामनाः। अभ्यवर्त्तत वेगेन मर्त्तव्यमिति निश्चितः। प्रया
ते सत्यसंधे तु समकंपत मेदिनी। ववुर्वाताः सनिर्घातास्त्रासमाना वरूथिनी। पपात महती चोल्का आदित्यान्निःसरन्निव। दी
पयंती वपातेन शंसती च महद्भयं। जज्वलुश्चैव शस्त्राणि भारद्वाजस्य मारिष। रथाः स्वनंति चात्यर्थं हयाश्चाश्रूण्यपातयन्। ह
तौजा इव सोप्यासीद्भारद्वाजो महारथः। प्रास्फुरन्नयनं चास्य सव्यो बाहुरकंपत। विमनाश्चाभवद्युद्धे दृष्ट्वा पार्षतमग्रतः।।

ऋषीणांब्रह्मवादीनांस्वर्गस्यगमनंप्रति।सुयुद्धेनततःप्राणानुत्स्रष्टुमुपचक्रमे।ततश्चतुर्विधंसैन्यंद्रौपदेयाभिसंवृतं।निर्दहन्क्षत्रि
यश्चातान्द्रोणःपर्यचरद्रणे।हत्वाविंशतिसाहस्रान्क्षत्रियाणामरिंदमः।दशायुतानितीक्ष्णाग्रैरवधीद्विशिखैःशितैः।सोतिष्ठदाहवेयत्तोवि
धूमइवपावकः।क्षत्रियाणामभावायब्रह्मास्त्रंसमास्थितः।पांचाल्यंविरथंभीमोहतसर्वायुधंवशी।अविषण्णंमहात्मानंत्वरमाणःसमभ्यया
त्।ततःस्वरथमारोप्यपांचाल्यमरिमर्दनः।अब्रवीदभिसंप्रेक्ष्यद्रोणमस्यंतमंतिके।नत्वदन्यइहाचार्ययुद्धमुत्सहतेपुमान्।त्वरस्वत्वंव
धार्थायत्वयिभारःसमाहितः।सतथोक्तोमहाबाहुःसर्वभारसहंनवं।प्रतिपद्याददेक्षिप्रमायुधप्रवरंदृढं।संरब्धश्चशरानस्यन्द्रोणं
दुर्वारणंरणे।निवारयिषुराचार्यंशरवर्षैरवाकिरत्।तौनिवारयतांश्रेष्ठौसंरब्धौरणशोभिनौ।उदीरयेतांब्राह्म्याणिदिव्यान्यस्त्रा
ण्यनेकशः।समहास्त्रैर्महाराजद्रोणमाच्छादयद्रणे।।निहत्यसर्वाण्यस्त्राणिभारद्वाजस्यपार्षतः।सर्वान्सपार्थिवांश्चैवबाह्लिकान्कौ
रवानपि।रक्ष्यमाणोस्त्रसंयोगैर्बाणैर्व्यधमदद्भुतः।धृष्टद्युम्नस्ततोराजन्गभस्तिभिरिवांशुमान्।बभौप्रच्छादयन्नश्वान्शरजालैः
समंततः।तस्यद्रोणोधनुश्छित्त्वापीड्यैनंशिलीमुखैः।मर्माण्यभ्यहनद्भूयोविचरन्परमास्त्रवित्।ततोभीमोदृढक्रोधोद्रोणस्या
श्लिष्यतेरथं।शनकैरिवराजेंद्रद्रोणंवचनमब्रवीत्।यदिनामन्युध्येरन्शिक्षिताब्रह्मबंधवः।स्वकर्मभिरसंतुष्टानास्मक्षत्रंक्षयंब्रजे
त्।अहिंसासर्वभूतेषुधर्मज्ञाःसततंविदुः।तस्यचब्राह्मणोमूलंभवान्हिब्रह्मवित्तमः।श्वपाकवान्म्लेच्छगणान्हत्वाचान्यान्पृथ
ग्विधान्।अज्ञानान्मूढवद्ब्रह्मन्पुत्रदारधनेप्सया।एकस्यार्थेबहून्हत्वापुत्रस्याधर्मविद्यथा।स्वकर्मस्थान्विकर्मस्थोनव्यपत्रपसेकथं।
यस्यास्त्रेवाशस्त्रमादायसंयोत्स्यसिसजीवति।सचाद्यपतितःशेतेपृष्ठेनावेदितस्तव।धर्मराजस्यतद्वाक्यंनाभिशंकितुमर्हसि।एवमुक्तस्त

द्रो०प०
२०४

ततोद्रोणो भीमेनोक्तस्त्यक्तद्धनुः। सर्वाण्यस्त्राणि धर्मात्मा त्यक्तुकामोभ्यभाषत। कर्ण कर्ण महेष्वास कृप दुर्योधनेति च। संग्रामे क्रियतां यत्नो ब्र
वीम्येतं पुनः पुनः। पांडवेभ्यः शिवं वोस्तु शस्त्रमभ्युत्सृजाम्यहं। इति तत्र महाराज चुक्रोश द्रोण एव च। सन्त्यज्य रणे शस्त्रं स्वं रथोप
स्थे निवेश्य च। अभयं सर्वभूतानां प्रददौ योगयुक्तवान्। तस्य तच्छिद्रमाज्ञाय धृष्टद्युम्नः समुत्थितः। खड्गी रथादवप्लुत्य सहसा द्रोण
मभ्ययात्। हाहाकृतानि भूतानि मानुषाणीतराणि च। द्रोणं तथागतं दृष्ट्वा धृष्टद्युम्नवशं गतं। हाहाकारं भृशं चक्रुरहो धि
गिति चाब्रुवन्। द्रोणोपि शस्त्राण्युत्सृज्य परमं मार्गमास्थितः। तथोक्त्वा योगमास्थाय ज्योतिर्भूतो महातपाः। पुराणं पुरुषं विष्णुं जगा
म मनसा हरिं। कायं किंचित्समुन्नाम्य विष्टभ्य चतुरोग्रतः। निमीलिताक्षः संतस्थे विनिक्षिप्याङ्कि धारणां। ओमित्येकाक्षरं ब्रह्म
ज्योतिर्भूतो महातपाः॥ स्मृत्वा तु देवं देवेशमनंतं तं तपसः परं। निरावरणमाचार्यं पश्यामस्तदनंतरं। दिवमाक्रमदाचार्यः सद्भिः सह मह
रथः। द्वौ सूर्याविति नो बुद्धिस्तस्मिन्नासीत्तथागते। एकस्थमिव तत्रासीज्ज्योतिर्भिः पूरितं नभः। समपद्यत्तथार्कत्तु भारद्वाजो निशाकरः।
निमेषमात्रेण ततो ज्योतिरंतरधीयत। आसीत्किलकिलाशब्दः प्रहृष्टानां दिवौकसां। ब्रह्मलोकं गते द्रोणे धृष्टद्युम्ने च मोहिते। वयमेव
तथाद्राक्ष्म पंच मानुषयोनयः। योगयुक्तं महात्मानं गच्छंतं परमां गतिं। अहं धनंजयः पार्थः कृपः शारद्वतस्तथा। वासुदेवश्च वार्ष्णेयो योध
र्मराजश्च पांडवः। अन्ये च सर्वे नापश्यन् भारद्वाजस्य धीमतः। महिमानं महाराज योगयुक्तस्य गच्छतः। ब्रह्मलोकं हितं दिव्यं देवगुह्यं
हि तत्परं। गतिं परमिकां प्राप्तमजानंतो न्ययोनयः। नापश्यन् गच्छमानं हि तं सार्द्धमृषिपुंगवैः। आचार्यं योगमास्थाय ब्रह्मलोकमरिंद
मं। विभिन्नांगं शरशतैर्न्यस्तायुधमसृक्क्षरन्। धिक्कृतः पार्षतस्तत्र सर्वलोकैः परामृशत्। तस्य मूर्द्धानमादाय गतसत्वस्य देहिनः।

राम
२०४

किंचिदब्रुवतः कायाद्धिस्थिकेनासिना शिरः। हर्षेण महतायुक्तो भारद्वाजो निपातितो। सिंहनादरवं चक्रे ल्लोलयन्खे महाहवे। आपन्नप
लितः श्यामो वयसाशीतिपंचकः। त्वत्कृते व्यचरत्संख्ये स तु षोडशवर्षवत्। उक्तवांश्च महाबाहुः कुंतीपुत्रो धनंजयः। जीवंतमानय
चार्यं मा वधीर्द्रुपदात्मज। न हंतव्यो न हंतव्य इति ते सैनिका ब्रुवन्। उत्क्रोशन्नर्जुनश्चैव सानुक्रोशस्त्वमाब्रजन्। क्रोशमाने र्जुने चैव
पार्थिवेषु च सर्वशः। धृष्टद्युम्नो व्यधीत् द्रोणं शरतल्पे नरर्षभं। शोणितेन परिक्लिन्नो रथाद्भूमिमरिंदमः। लोहितांगइवादित्यो दुर्दर्शः
समपद्यत। एवं तं निहतं संख्ये ददृशुः सर्वसैनिकाः। धृष्टद्युम्नस्ततो राजन् भारद्वाजशिरो महत्। तावकानां महेष्वासः प्रमुखे तत्समा
क्षिपत्। ते तु दृष्ट्वा शिरो राजन् भारद्वाजस्य तावकाः। पलायनकृतोत्साहा दुद्रुवुः सर्वतो दिशं। द्रोणस्तु दिवमास्थाय नक्षत्रपथमा
विशत्। अहं च तत्र शाद्राक्षं द्रोणस्य निधनं नृप। तस्य प्रसादात्कृष्णस्य सत्यवत्याः सुतस्य च। विधूमामिव संयांतीमुल्कां प्रज्वलि
तामिव। प्रपश्यामि दिवं दिव्यं गच्छंतं स्वर्गमुत्तमं। हते द्रोणे निरुत्साहाः कुरुपांडवसृंजयाः। अभ्यद्रवन्महावेगास्ततः सैन्यं व्य
दीर्यत। निहता हतभूयिष्ठाः संग्रामे निशितैः शरैः। तावका निहते द्रोणे गतासव इवाभवन्। पराजयमथावाप्य परत्र च महाभ
यं। उभये नैव ते प्रीता नाविंदंतो गतिमात्मनः। वधं समीक्ष्य ते सर्वे भारद्वाजस्य पार्थिवाः। नान्वगच्छन्महाराज तुरंगाक्षतसंवृते।
पांडवास्तु जयं लब्ध्वा परत्र च महद्यशः। बाणशब्दरवांश्चक्रुः सिंहनादांश्च पुष्कलान्। भीमसेनस्ततो राजन् धृष्टद्युम्नश्च पार्षतः।
वरूथिन्यां समागम्य परिष्वज्य परस्परं। अब्रवीच्च तदा भीमः पार्षतं शत्रुतापनं। भूयोहं त्वां विजयिनं परिष्वज्यामि पार्षत। सूतपुत्रेह

तेपापेधार्त्तराष्ट्रेचसंयुगे।एतावदुक्त्वाभीमस्तुहर्षेणमहतायुतः।बाहुशब्देनमहताकंपयामासमेदिनीं।तस्यशब्देनमहताप्राद्रवंस्ता
वकायुधि।त्तत्रधर्मसमुत्सृज्यपलायनपरायणाः।पांडवास्तुजयंलब्ध्वाहृष्टाआसन्विशांपते।अरिक्षयंचसंग्रामेतेनतेसु
खमाप्नुवन्॥ ॥इतिमहाभारतेद्रोणपर्वणिभारद्वाजवधःसमाप्तः॥८७॥संजय॥ ॥ततोद्रोणेहतेराजन्कुरवःश
स्त्रपीडिताः।हतप्रवीराविध्वस्ताभृशंशोकपरायणाः।उदीर्णांश्चपरान्दृष्ट्वाप्रहृष्टाःपुनःपुनः।अश्रुपूर्णेक्षणा
स्त्रस्तादीनाआसन्विशांपते।विचेतसोहतोत्साहाःकश्मलाभिहतोजसः।आर्त्तस्वरेणमहतापुत्रंतेपर्यवारयन्।रजःस्व
लावेपमानावीक्षमाणादिशोदश।अश्रुपूर्णायथादैत्याहिरण्याक्षेनिपातिते।सतैःपरिवृतोराजंस्त्रस्तैःक्षुद्रमृगैरि
व।अशक्नुवन्नवस्थातुंसभयात्तनयस्तव।क्षुत्पिपासापरिम्लानास्तेयोधास्तवभारत।आदित्येनसुसंतप्तादीनावि
मसोभवन्।भास्करस्येवपतनंसमुद्रस्येवशोषणं।विपर्यासंयथामेरोर्वासवस्येवनिर्जयं।अमर्षयंतस्तदृष्ट्वाभारद्वाज
स्यपातनं।त्रस्तारूपतराराजन्कौरवाद्रुद्रुवुर्भयात्।गांधारराजःशकुनिस्त्रस्तस्त्रस्ततरैःसह।हतंरुक्मरथंदृष्ट्वाप्राद्रवत्स
हितोरथैः।वरूथिनींवेगवतींविद्रुतांसपताकिनीं।परिगृह्यमहासेनांसूतपुत्रोपयाद्भयात्।रथनागाश्वकलितांपुरस्कृ
त्यतुवाहिनीं।मद्राणामीश्वरःशल्योवीक्षमाणोपयाद्भयात्।हतप्रवीरैर्भूयिष्ठंद्विपैर्बहुपदातिभिः।वृतःशारद्वतोराजन्कष्टंक
ष्टमितिब्रुवन्।भोजानीकेनशिष्टेनकलिंगैरथबाह्लिकैः।कृतवर्माततोराजन्प्रायात्सुजमहारथः।संसप्तकबलंगत्वात्रिसा

हस्त्यश्वं दंतिनः। वृषसेनो पयात्तूर्णं दृष्ट्वा द्रोणं निपातितं। गजाश्वरथसंयुक्तो वृतश्चैव पदातिभिः। दुःशासनोभ्रशोद्विग्नः प्राद्रवत्कुंज
रसंवृतः। रथानामयुतं गत्वा हते भीष्मे किरीटिना। सुशर्मा प्राद्रवद्राजन्दृष्ट्वा द्रोणं निपातितं। गजाश्वरथान्समारुह्य वृतः सैन्येन भारि
ष। दुर्योधनो महाराज प्रायात्तत्र महारथः। प्राद्रवन्सर्वतः संख्ये दृष्ट्वा रुक्मरथं हतं। वारयंतः पितॄनन्ये भ्रातॄनन्ये च मातुलान्।
पुत्रानन्ये वयस्यांश्च प्राद्रवन्कुरवस्तदा। नोदयंतश्च सैन्यानि स्वस्त्रीयांश्च तथापरे। संबंधिनस्तथा चान्ये प्राद्रवंत दिशो दश।
प्रकीर्णकेशा विध्वस्ता नद्वितावियेतसः। नेदमस्तीति पुरुषा हतोत्साहा हतौजसः। उत्सृज्य कवचानन्ये प्राद्रवंस्तावका विभो। अन्योन्यं ते
समाक्रोशन्त सैनिका भरतर्षभ। तिष्ठ तिष्ठेति न च ते स्वयं तत्रावतस्थिरे। धुर्यान्मुक्त्वा च विरथा हतसूताः स्वलंकृताः। अधिरुह्य हयानन्ये धाष्टि
प्रंच प्रत्यनोदयन्। द्रवमाणे तथा सैन्ये त्रस्तरूपे हतौजसि। अतिश्रांत इव ग्राहो द्रोणपुत्रः परानियात्। तस्यासीत्कमहद्युद्धं शिखंडिप्रमुखैर्गणैः।
प्रभद्रकैश्च पांचालैः। क्षिप्रं द्विरनोदयन्। हे त्वा बहुविधां सेनां पांडवीं युद्धदुर्मदः। कथंचित्संकटान्मुक्तो मत्तद्विरदविक्रमः। द्रवमाणं बल
दृष्ट्वा पलायनकृतं रणे। दुर्योधनं समासाद्य द्रोणपुत्रोऽब्रवीदिदं। किमियं द्रवते सेना त्रस्तरूपेव भारत। द्रवमाणां च राजेंद्र नावस्थापयसे र
णे। त्वं चापि न यथा पूर्वं प्रकृतिस्थो जनाधिप। कर्णप्रभृतयश्चेमे नावतिष्ठंति पार्थिवाः। अन्येष्वपि च युद्धेषु नैवं सेनाद्रवत्तव। कच्चित्क्षेमं म
हाबाहो तव सैन्यस्य भारत। कस्मिंश्चिन्निहते राजन् रथसिंहे बलं तव। एतार्थि मवस्थां संप्राप्तं तन्ममाचक्ष्व कौरव। तत्तु दुर्योधनः श्रु
त्वा द्रोणपुत्रस्य भाषितं। घोरमप्रियमाख्यातुं नाशकत्पार्थिवर्षभः। भिन्ना नौरिव ते पुत्रो निमग्नः शोकसागरे। बाष्पेण पिहितो दृष्ट्वा द्रोणपु
त्रं रथस्थितं। ततः शारद्वतो राजन्सव्रीडमिदमब्रवीत्। शंस हं सर्वं भवतो यथा सैन्यमिदं द्रुतं। अथ शारद्वतो राजन्नार्तिं गच्छन्पुनः पुनः। शशंस द्रो
णपुत्राय यथा द्रोणो निपातितः॥ ॥१९३॥ ॥ वयं द्रोणं पुरस्कृत्य पृथिव्यां प्रवरं रथं। प्रावर्त्याम संग्रामं पांचालैरेव केवलैः। ततः प्रवृत्ते सं

यामेविमिश्राः कुरुसोमकाः। अन्योन्यमभिगर्जंतः शस्त्रैर्देहान्नपायेतेन्। वर्त्तमानेतदायुद्धे क्षीयमाणेषुसर्वतः। धार्त्तराष्ट्रेषुसंक्रुद्धः पितातेस्त्र
मुदीरयन्। ततोद्रोणोआत्मनमस्त्रंविकुर्वाणोनरर्षभ। व्यहनच्छारवान्भल्लैः शतशोथसहस्रशः। पांडवान्केकयान्मत्स्यान्पांचालांश्चविशां
पते। संख्येद्रोणरथंप्राप्यव्यनशन्नात्कोलनोदिताः। सहस्रंरथसिंहानांद्विसहस्रंचदंतिनां। द्रोणोब्रह्मास्त्रनिर्दग्धान्प्रेषयासमृत्यवे। आ
पन्नपलितःश्यामो वयसाशीतिपंचकः। रणेपर्यचरद्द्रोणोवृद्धः षोडशवर्षवत्। क्लिश्यमानेषुसैन्येषु वध्यमानेषुराजसु। अमर्षवशा
मापन्नः पांचालाविमुखोभवन्। तेषुकिंचित्प्रभग्नेषुविमुखेषुसपत्नजित्। दिव्यमस्त्रंविकुर्वाणोबभूवार्कइवोदितः। समध्यंप्राप्य
पांडूनांशरजालाक्षिप्रतापवान्। मध्यंगतइवादित्योदुष्प्रेक्ष्यस्तेपिताभवत्। तेदह्यमानाद्रोणेनसूर्येणेवविराजता। दग्धवीर्यानिरुत्साहाब
भूवुर्गतचेतसः। तान्दृष्ट्वापीडितान्बाणैर्द्रोणेनमधुसूदनः। जयैषीपांडुपुत्राणामिदंवचनमब्रवीत्। नैषजातुपरैःशक्योजेतुंशस्त्र
भृतांवरः। अपिवृत्रहणासंख्येरथयूथपयूथपः। तेयूयंधर्ममुत्सृज्यजयंरक्षतपांडवाः। यथावःसंयुगेसर्वान्नहन्याद्रुक्मवाहनः। अश्वत्था
म्निहतेनैषयुध्येदितिमतिर्मम। हतंतंसंयुगेकश्चिदाख्यात्वस्यमृषानरः। एतन्नारोचयद्राजन्कुंतीपुत्रोधनंजयः। अरोचयंतसर्वेन्ये
कष्टेनतुयुधिष्ठिरः। भीमसेनस्तुसव्रीडमब्रवीत्पितरंतव। अश्वत्थामाहतइतिनत्वबुध्यततेपिता। सशंकमानस्तन्मिथ्याधर्मराजमपृच्छत।
अहतंवाहतंवाजौपितापुत्रमभीप्सितं। सतुमिथ्याभयोद्विग्नोजयासक्तोयुधिष्ठिरः। अश्वत्थामानमाहेदंहतःकुंजरइत्युत। भीमस्तुगि
रिवर्माणंमालवस्येंद्रवर्मणः। अभिहत्यतदाद्रोणमुपेत्यरिदमभाषत। यस्यार्थेशस्त्रमादत्सेयमवेक्ष्यचजीवसि। पुत्रस्तेदयितोनित्यंसोश्व
त्थामानिपातितः। शेतेविनिहतोभूमौवनेसिंहशिशुर्यथा। जानन्नप्यनृतस्याथदोषान्सद्विजसत्तम। अव्यक्तमब्रवीद्राजाहतःकुंजरइ
त्युत। सत्वांनिहतमाक्रंदन्नस्त्रंत्वासंपातपीडितः। नियम्यदिव्यान्यस्त्राणिनायुध्यतयथापुरा। तंदृष्ट्वापरमोद्विग्नंशोकोपहतचेतसं।

पांचालराजस्यसुतैःक्रूरकर्मासमासदत्।तंदृष्ट्वाविहितंमृत्युंलोकेतत्त्वविचक्षणः।दिव्यान्यथोत्सृज्यरणेततःप्रायमुपाविशत्।ततोऽस्य
केशान्सव्येनगृहीत्वापाणिनातदा।पार्षतःक्रोशमानानांवीराणामाच्छिनच्छिरः।नहंतव्योनहंतव्यइतितेसर्वतोब्रुवन्।तथैवार्जुनोवाहा
दवलुत्यैनमाव्रजत्।उद्यम्यबाहूंत्वरितोब्रुवाणश्चपुनःपुनः।जीवंतमानयोचार्यंमावधीरितिधर्मवित्।तथापिवार्यमाणेनकौरवैरर्जुने
नच।हतएवनृशंसेनपितातवनरर्षभ।सैनिकास्ततःसर्वेप्राद्रवंतभयार्दिताः।वयंचापिनिरुत्साहाहतेपितरितेनघ॥ ॥संजय॥ ॥
तच्छ्रुत्वाद्रोणपुत्रस्तुनिधनंपितुराहवे।क्रोधमाहारयत्तीव्रंपादाहतइवोरगः।ततःक्रुद्धोभृशंद्रोणीरणेजज्वालमन्युना।यथेंधनमनु
प्राप्यज्वलतेहव्यवाहनः।तलंतलेननिष्पिष्यदंतैर्दंतानुपस्पृशन्।निश्वसन्नुरगोयद्वदश्वत्थामाब्रवीदिदं॥ ॥द्रोणपर्वणि॥ ॥
॥ ॥धृतराष्ट्र॥ ॥मानुषंवारुणाग्नेयंब्राह्ममस्त्रंचवेदवत्।ऐंद्रंनारायणंचैवयस्मिन्नित्यंप्रतिष्ठितं।तमधर्मेणधर्मिष्ठंधृष्टद्युम्नेनसंयु
गे।श्रुत्वानिहतमाचार्यंसोऽश्वत्थामाकिमब्रवीत्।येनरामादवाप्येवंधनुर्वेदंमहात्मना।प्रोक्तान्यस्त्राणिसर्वाणिपुत्रायजयकांक्षिणा।
एवमेवहिलोकेस्मिन्नात्मनोगुणवत्तरं।इच्छंतिपुरुषाःपुत्रंलोकेनान्यंकथंचन।आचार्याणांभवंत्येवरहस्यानिमहात्मनां।तानिपुत्रायवा
दद्युःशिष्यायानुयोमतायवा।सशिक्षि[illegible]त्स्नंप्राप्यतत्सर्वंसविशेषंचसंजय।शूरःशारद्वतीपुत्रःसंख्येद्रोणादनंतरः।रामस्यानुमतःसंख्ये
शस्त्रेपुरंदरसमंयुधि।कार्त्तवीर्यसमायुद्धेबृहस्पतिसमोमतौ।महीधरसमोधृत्यांतेजसाग्निसमोयुवा।समुद्रइवगांभीर्येक्रोधेसर्वविषो
पमः।सरथप्रथमोलोकेविजितात्माजितक्लमः।शीघ्रोवायुरिवाकंप्यःश्चरन्क्रुद्धइवांतकः।अस्यतायेनसंग्रामेधरण्यामभिपीडिताः।

यो नाप्यथत्स संग्रामे वीरः सत्यपराक्रमः। वेदस्नातो बले शक्रो धनुर्वेदस्य पारगः। महोदधिरिवाक्षोभ्यो रामो दाशरथिर्यथा। तम धर्मेण ध
र्मिष्ठं धृष्टद्युम्नेन संयुगे। श्रुत्वा निहतमाचार्यमश्वत्थामा किमब्रवीत्। धृष्टद्युम्नस्य यो मृत्युः सृष्टस्तेन महात्मना। यथा द्रोणस्य पांचा
ल्यो यज्ञसेनसुतोऽभवत्। तं नृशंसेन पापेन क्रूरेणात्यल्पचेतसा। श्रुत्वा निहतमाचार्यमश्वत्थामा किमब्रवीत्॥ ॥इति द्रोणपर्वणि॥ ॥ ८८
॥ ॥संजय॥ ॥ छद्मना निहतं श्रुत्वा पितरं पापकर्मणा। बाष्पेणापूर्यत द्रौणी रोषेण च नरर्षभ। तस्य क्रुद्धस्य राजेंद्र वपुर्दिव्यमदृश्य
त। अंतकस्येव भूतानि जिहीर्षोः कालपर्यये। तोयपूर्णे ततो नेत्रे प्रमृज्य च पुनः पुनः। उवाच कोपान्निःश्वस्य दुर्योधनमिदं वचः। पि
ता मम यथा क्षुद्रैर्न्यस्तशस्त्रो निपातितः। अनार्येण नृशंसस्य धर्मपुत्रस्य मे श्रुतं। युद्धेष्वपि प्रवृत्तानां ध्रुवौ जयपराजयौ। द्वयमेत
द्भवेद्राजन्वधस्तत्र प्रशस्यते। न्यायवृत्तो वधो यस्तु संग्रामे युध्यतो भवेत्। न स दुःखाय भवति तथा दृष्टो हि स द्विजैः। गतः स वीरलोकं
य पिता मम न संशयः। न शोच्यः पुरुषव्याघ्रस्तथा स निधनं गतः। यत्तु धर्मप्रवृत्तः स केशग्रहणमाप्तवान्। पश्यतां सर्वसैन्यानां तन्मे
मर्माणि कृंतति। कामात्क्रोधादवज्ञानाद्दर्पाद्बाल्येन वा पुनः। विधर्मिकाणि कुर्वंति तथा परिभवंति च। तदिदं पार्षतेनेह महदाधर्मिकं कृ
तं। अवज्ञाय च मां नूनं नृशंसेन दुरात्मना। तस्यानुबंधं संद्रष्टा धृष्टद्युम्नः स दारुणं। अनार्यं परमं कृत्वा मिथ्यावादी च पांडवः। यो ह्यसौ
छद्मनाचार्यं शस्त्रमत्याजयत्तदा। तस्याद्य धर्मराजस्य भूमिः पास्यति शोणितं। शपे सत्येन कौरव्य इष्टापूर्तेन चैव हि। अहत्वा सर्वपांचा
लान्जीवेयं न कथंचन। सर्वोपायैर्यतिष्यामि पांचालानामहं मृधे। धृष्टद्युम्नं च समरे हंताहं पापकारिणं। कर्मणा येन तेनेह मृदुना दा

रुणेन वा पांचालानां वधं कृत्वा शांतिं लब्धास्मि कौरव। यदर्थं पुरुषव्याघ्र पुत्रानिच्छंति मानवाः। प्रेत्य चेह च संप्राप्तं त्राणाय महतो
भयात्। पित्रा तु मम सावस्था प्राप्ता निर्बंधुना यथा। मयि शैलप्रतीकाशे पुत्रे शिष्ये च जीवति। धिङ्ममास्त्राणि दिव्यानि धिक् बाहू धिङ्मप
राक्रमः। यन्मां द्रोणः सुतं प्राप्य केशग्रहणमाप्तवान्। स तथाहं करिष्यामि यथा भरतसत्तम। परलोकं गतस्यापि न विष्याम्यनृणः पि
तुः। आर्येण तु न वक्तव्या कदाचित्स्तुतिरात्मनः। पितुर्वधममृष्यं स्तु व स्याम्यद्येह पौरुषं। मयि जीवति यत्तातः केशाकर्षणमाप्तवान्।
कथमन्ये करिष्यंति पुत्रेभ्यः पुत्रिणः स्पृहां। अद्य पश्यंतु मे वीर्यं पांचालाः पांडवास्तथा। मृद्नंतः सर्वसैन्यानि युगांतमिव कुर्वतः। नहि
देवा न गंधर्वा नासुरा न च राक्षसाः। अद्य शक्ता रणे जेतुं रथस्थं मां नरर्षभ। मदन्यो नास्ति लोकेस्मिन्नर्जुनाद्वास्त्रवित्तमो वित्। अ
हं हि ज्वलतां मध्ये मयूखानामिवांशुमान्। प्रयोक्ता देवसृष्टानां सर्वास्त्राणामहं युधि। अद्य सर्वा दिशो राजन् धाराभिरभिसंकु
लाः। आवृताः पत्रिभिस्तीक्ष्णैर्द्रष्टारो मायया मम। किरन्नहि शरजालानि सर्वतो भैरवस्वरान्। शत्रून्निपातयिष्यामि महावात इव द्रुमान्। न
हि जानाति बीभत्सुस्तदस्त्रं न जनार्दनः। न भीमसेनो न यमौ न च राजा युधिष्ठिरः। न पार्षतो दुरात्मासौ न शिखंडी न सात्यकिः। यदिदं मयि
कौरव्य सरहस्यनिवर्तनं। नारायणात्समे पित्रा प्रणम्य विधिपूर्वकं। उपहारः पुरा दत्तो ब्रह्मरूप उपस्थिते। ततस्स्वयं प्रतिगृह्य त्वास्त्रं भग
वान्स वरं ददौ। वव्रे पिता मे प्रवरमस्त्रं नारायणं ततः। अथैनमब्रवीद्राजन् भगवान्देवसत्तमः। भविता त्वत्समो नान्यः कश्चिद्युधि नरः
क्वचित्। न त्विदं सहसा ब्रह्मन्प्रयोक्तव्यं कथंचन। न ह्येतदस्त्रमन्यत्र वधाच्छत्रोर्निवर्तते। न चैतच्छक्यते ज्ञातुं केन चित्स हि तु प्रभो। अव
ध्यमपि हन्याद्धि तस्मान्नैतत्प्रयोजयेत्। विक्रमेतिष्ठतश्चैव शस्त्राणां च विसर्जनं। प्रयाचनं च शत्रूणां गमनं शरणस्य च। एते प्रशमने

योगा महास्त्रस्य परंतप। सर्वथा पीडितो हि स्यादवध्यान्हि जयेद्रणे। तच्च याह पितामह त्वमब्रवीच्चैव स प्रभुः। त्वं वर्षिष्यसि दिव्यानि शस्त्रवर्षा-
ण्यनेकशः। अनेनास्त्रेण संग्रामे तेजसा च ज्वलिष्यसि। एवमुक्त्वा स भगवान्दिवमाचक्रमे पुनः। एतन्नारायणादस्त्रं संप्राप्तं मम बंधुना।
तेनाहं पांडवांश्चैव पांचालान्मत्स्यकैकयान्। विद्रावयिष्यामि रणे शचीपतिरिवासुरान्। यथा यथाहमिच्छेयं तथा भूत्वा शरा मम। निपते-
युः सपत्नेषु विक्रमत्स्वपि भारत। यथेष्टं शरवर्षेण प्रवर्षिष्ये रणे स्थितः। अस्त्रयोगैश्च विविधैर्द्रावयिष्ये महारथान्। परस्वधांश्च वि-
विधान्प्रस्रक्ष्येहमसंशयं। सोहं नारायणास्त्रेण महता शत्रुतापनः। शत्रून्विध्वंसयिष्यामि कदर्थीकृत्य पांडवान्। मित्रद्रोह गुरुद्रो-
ही पापकर्मा विगर्हितः। पांचालापसदश्चाद्य न मे जीवन्विमोक्ष्यते। तच्छ्रुत्वा द्रोणपुत्रस्य पर्यवर्तत वाहिनी॥ ततः सर्वे महाशंखान्दध्मुः
पुरुषसत्तमाः। भेरीश्चाप्यहन्हृष्टा डिंडिमांश्च सहस्रशः। तथा ननाद वसुधा खुरनेमिप्रपीडिता। स शब्दस्तुमुलः खं च पृथिवीं च व्यना-
दयत्। तं शब्दं पांडवाः श्रुत्वा पर्जन्यनिनदोपमं। समेत्य रथिनां श्रेष्ठाः सहिताश्चाप्यमंत्रयन्। तथोक्त्वा द्रोणपुत्रस्तु वार्युपस्पृश्य भार-
त। प्रादुश्चकार तद्दिव्यमस्त्रं नारायणं तदा॥ ॥इति द्रोणपर्वणि नारायणास्त्रप्रेरणं॥ ॥ संजय॥ ॥प्रादुर्भूते ततस्तस्मिन्नस्त्रे ना-
रायणे विभो। प्रावासीत्पृषतो वायुः कर्करास्तनयित्नुमान्। चचाल पृथिवी चापि चुक्षुभे च महोदधिः। प्रतिस्रोतः प्रवृत्ताश्च तत्र तत्र स-
मुद्रगाः। शिखराणि व्यशीर्यंत गिरीणां तत्र भारत। अपसव्यं मृगाश्चैव पांडुपुत्रान्प्रचक्रिरे। तमसा चावकीर्यंत सूर्यश्च कलुषोऽभवत्। संपतं-
ति च भूतानि क्रव्यादानि प्रहृष्टवत्। देवदानवगंधर्वास्त्रस्ता आसन्विशांपते। कटंकटाभवत्तीव्रा दृष्ट्वा तद्व्याकुलं नभः। व्यथिताः सर्वराजानस्तदा-
त्यासन्विशांपते। निवर्तितेषु सैन्येषु द्रोणपुत्रेण संयुगे। भृशं शोकान्वितस्तेन पितुर्वधममृष्यता॥ ॥धृतराष्ट्र॥ ॥कुरूनापततो दृष्ट्वा धृष्टद्युम्न-

स्यरक्षणे।कोमंत्रः पुनरेवासीत्तन्ममाचक्ष्वसंजय॥ ॥संजय॥ ॥प्रागेवविद्रुतान्दृष्ट्वाधार्त्तराष्ट्रान्युधिष्ठिरः।पुनश्चचक्रेतुलंयुद्धंकृत्वार्जुनम
थाब्रवीत्।आचार्येनिहतेद्रोणेधृष्टद्युम्नेनसंयुगे।निहतेवज्रहस्तेनयथावृत्रेमहासुरे।नाशंसंतजयंयुद्धेदीनात्मानोधनंजय।आत्मत्रा
णेमतिंकृत्वाप्राद्रवन्कुरवोयथा।द्रा।केचिद्भ्रांतैरथैस्तूर्णंनिहतैःपार्ष्णियंतृभिः।विपताकध्वजैःछत्रैःपार्थिवाःशीर्णकूबरैः।भग्ननीडैश्च्यां
कुलैश्चैवस्वयमानाविचेतसः।भीताःपार्श्वैर्हयान्केचित्त्वरयंतःस्वयंरणे।युगचक्राक्षभग्नैश्चद्रुताःकेचिद्भयार्दिताः।हयपृष्ठगताश्चान्येम
र्दिताश्चहयद्विपैः।गजस्कंधेचसंछिन्नानाराचैश्चलितासनाः।शरार्तैर्विद्रुतैर्नागैःभूराःकेचिद्धतारणे।विशस्त्रकवचाश्चान्येवाहनेभ्यः
क्षितिंगताः।संछिन्नान्येप्रपेतुश्चययोधाविनिहतौजसः।कोत्रांतस्तातपुत्रेतिपालयंतःपरेहयान्।नाभ्यजानंततेन्योन्यंकश्मलाभिहतौजसः।
पुत्रान्पितृन्सखीन्भ्रातृन्समारोप्यनरर्षभाः।जलेनक्लेदयंत्यन्येविमुच्यकवचान्यपि।अवस्थांतादृशींप्राप्यहतेद्रोणेद्रुतंबलं।पुनरावर्त्ति
तंकेनयदिजानासिशंसमे।हयानांहेषतांशब्दःकुंजराणांबृंहतां।रथनेमिस्वनश्चात्रविमिश्रःश्रूयतेमहान्।एतेशब्दाभृशंतीव्राःप्रवृत्ताःकु
रुसागरे।मुहुर्मुहुरुदीर्यंतकंपयंतीहिमानवान्।यएषतुमुलःशब्दःश्रूयतेरोमहर्षणः।सेंद्रानप्येषलोकास्त्रीन्भंज्यादितिमहाबलः।मन्ये
वज्रधरस्यैषनिनदोभैरवस्वनः।द्रोणेहतेकौरवार्थंव्यक्तमभ्येतिवासवः।प्रहृष्टरोमकूपाश्चसंविग्नरथकुंजराः।ततोधनंजयश्रुत्वा
त्रस्तोनादंसुभीषणं॥ ॥अर्जुन॥ ॥यएषकौरवान्दीर्णानवस्थाप्यमहाबलः।निवर्त्तयतियुद्धार्थंमखेदेवेश्वरोयथा।उद्याम्यात्मानमुत्थाय
कर्मणेधैर्यमास्थितः।उदंतःकौरवाःसंख्येयस्यवीर्यमुपाश्रयन्।नैवात्रसंशयोराजन्न्यस्तशस्त्रेगुरौहते।धार्त्तराष्ट्रानवस्थाप्यएकएषचनर्द्दति।
श्रीमंतंहिमहाबाहुंमत्तद्विरदगामिनं।आख्यास्याम्युग्रकर्माणंकुरूणामभयंकरं।यस्मिन्जातेददौद्रोणोगवांदशशतंधनं।आत्मणेभ्योमहा

न

हेष्यः सोश्वच्छामेषगर्जति। जातमात्रेणवीरेणयेनोच्चैःश्रवसा इव। हेषतां कंपिताभूमिर्लोकाश्चसकलास्त्रयः। तच्छ्रुत्वांतर्हितंभूतंनामचास्याक
रोत्प्रभो। अश्वच्छामेतिसोद्यैवशूरोनदतिपांडव। योद्यनाथइवाक्रम्यपार्षतेनहतस्तदा। कर्मणासनृशंसेनतस्यनाथोयुवस्थितः। गुरुंमेयच्चपांचा
ल्यः केशपक्षेपरामृशत्। तन्नजातुक्षमेद्द्रौणिर्जानन्पौरुषमात्मनः। उपचीर्णोगुरुर्मिथ्याभवताराज्यकारणात्। धर्मज्ञेनसतानामसोधर्मः सु
महान्कृतः। सर्वधर्मोपपन्नोयंममशिष्यश्चपांडवः। नायंवक्ष्यतिमिथ्येतिप्रत्ययंकृतवांस्त्वयि। ससत्यकंचुकंनामप्रविष्टेनत्वयानृतं। आचा
र्यउक्तोभवताहतःकुंजरइत्युत। ततःशस्त्रंसमुत्सृज्यनिर्ममोगतचेतनः। आसीत्सविह्वलोराजन्यथादृष्टस्त्वयाविभुः। सतुशोकेनचाविष्टो
विमुखःपुत्रवत्सलः। शाश्वतंधर्ममुत्सृज्यगुरुःशिष्येणघातितः। न्यस्तशस्त्रमधर्मेणघातयित्वागुरुंभवान्। रक्षत्विदानींसामात्योयदिश
क्तोसिपार्षतं। संहारंसर्वयुद्धेषुयःकरोत्यतिमानुषं। सोद्यकेशग्रहंश्रुत्वापितुर्वक्ष्यतिनोरणे। विक्रोशमानेहिमयिभृशमाचार्यगृद्धिनि। अपा
कीर्यस्वधर्मंहिशिष्येणनिहतोगुरुः। यदागतंवयोभूयःशिष्टमल्पतरंतव। तस्येदानींविकारोयमधर्मोयंकृतोमहान्। पितेवनित्यंसौहार्दात्
पितेवहिसधर्मतः। अल्पकालस्यराज्यस्यकारणेघातितोगुरुः। धृतराष्ट्रेणभीष्मायद्रोणायचविशांपते। विसृष्टापृथिवीसर्वासहपुत्रैश्चतत्प
रैः। सप्राप्यतादृशींवृत्तिंसत्कृतःसततंपरैः। अवृणीतसदापुत्रान्मामेवाभ्यधिकंगुरुः। अक्षीयमाणोन्यस्तास्त्रस्त्वद्वाक्येनाहवेहतः। नत्वेनंयु
ध्यमानंहिहन्यादपिशतक्रतुः। तस्याचार्यस्यवृद्धस्यद्रोहेनित्योपकारिणः। कृतोह्यनार्यैरस्माभीराज्यार्थेलघुबुद्धिभिः। पुत्रान्भ्रातॄन्पितॄ
न्दारान्जीवितंचतथेप्सितं। त्यजेत्सर्वंममप्रेम्णाजानात्येतदहंगुरुः। समयाराज्यकामेनहन्यमानउपेक्षितः। तस्मादवाक्शिराराजन्
प्राप्तोस्मिनरकंविभो। आत्मनंचदृष्ट्वाचार्यंन्यस्तशस्त्रंतथागुरुं। घातयित्वाद्यराज्यार्थेमृतंश्रेयोनजीवितं॥ ॥द्रोणपर्वण्यर्जुनवाक्यं॥ १० ॥

॥ ॥संजय॥ ॥अर्जुनस्य वचः श्रुत्वा नोचुस्तत्र महारथाः। अप्रियं वा प्रियं वापि महाराज धनंजयं। ततः क्रुद्धो महाबाहुर्भीमसेनोभ्यभाषत।
उत्स्मयन्निव कौंतेयमर्जुनं भरतर्षभ। मुनिर्यथारण्यगतो भाषते धर्मसंहितं। न्यस्तशस्त्रो यथा पार्थ ब्राह्मणः शंसितव्रतः। क्षतात्त्रायेत् क्षतात् जीवन्
क्षांतस्त्रिष्वपि साधुषु। क्षत्रियः क्षितिमाप्नोति क्षिप्रं धर्मं यशः श्रियं। स भवान्क्षत्रियगुणैर्युक्तः सर्वैः कुरूद्वह। अविपश्चिद्यथा वाक्यं व्याह
रन्नाद्य शोभसे। पराक्रमस्ते कौंतेय शक्रस्येव विशांपते। न चातिवर्तसे धर्मं वेलामिव महोदधिः। संपूजयेत्त्वां को न्वद्य यस्त्वयोदश वार्षिकं।
अमर्षं पृष्ठतः कृत्वा धर्ममेवाभिकांक्षसे। यत्तु धर्मप्रवृत्तस्य हृतं राज्यमधर्मतः। द्रौपदी च परामृष्टा सभा मानीय शत्रुभिः। वनं प्रव्राजिता
श्चास्म वल्कलाजिनवाससः। अनर्हमाणास्तं भावं त्रयोदश समाः परैः। एतान्यमर्षस्थानानि मर्षितानि त्वयानघ। क्षत्रधर्मप्रसक्तेन सर्व
मेतदनुष्ठितं। स्वधर्ममनुपाल्यैव स्मारस्त्वं सहितस्त्वया। सानुबंधान्हनिष्यामि क्षुद्रान्यैन्राज्यहरानहं। त्वया तु कथितं पूर्वं युद्धायाभ्याग
तावयं। घटामोस्मो यथाशक्ति त्वं तु नो ह्यजुगुप्ससे। स्वधर्मं नेच्छसि ज्ञातुं मिथ्यावचनमेव ते। भयार्दितानामस्माकं वाचो मर्माणि कृंत
सि। वपन्व्रणे क्षारमिव क्षतानां शत्रुकर्षण। विशीर्यते मे हृदयं त्वया वाक्छल्यपीडितं। अधर्म्यमेतद्विपुलं धार्मिकः सन्न बुध्यसे। यस्त्वम
त्मानमस्मांश्च शंसेस्यान्न प्रशंससे। वासुदेवे स्थिते चापि द्रोणपुत्रं प्रशंससि। यः कलां षोडशीं चापि धनंजय न मेर्हति। स्वयमेवात्मनो
वक्तुं न युक्तो गुणसंस्तवः। दारयेयं महीं क्रोधाद्विकिरेयं च पर्वतान्। आविध्य च गदां गुर्वीं भीमां कांचनमालिनीं। गिरिप्रकाशान्क्षिति
जान्भंजेयमनिलो यथा। स त्वमेवंविधं जानन्भ्रातरं मां नरर्षभ। द्रोणपुत्राद्भयं कर्तुं नार्हस्यमितविक्रम। अथवा तिष्ठ बीभत्सो सह सर्वै

द्रो० प०
२१०

नरर्षभैः।अहमेनंगदापाणिर्जेष्याम्येकोमहाहवे।ततःपांचालराजस्यपुत्रःपार्थमथाब्रवीत्।संक्रुद्धमिवनर्दंतंहिरण्यकशिपुंहरिं॥
॥ ॥धृतराष्टु॥ ॥बीभत्सोविप्रतीर्णानिविधायंतेमनस्विनां।याजनाध्ययनंदानंतथायःप्रतिग्रहः।षष्ठमध्यापनंनामतेषांकर्मप्रतिष्ठितं।
हतेद्रोणेमथामयायत्तत्किंमांपार्थविगर्हसे।अपक्रांतःस्वधर्माच्चक्षत्रधर्ममुपाश्रितः।अमानुषेणहंत्यन्यानस्त्रेणक्षुद्रकर्मकृत्।तथामा
यांप्रयुंजानमसह्यांब्राह्मणंध्रुवं।माययैवनिहत्याजौयुक्तंपार्थतथाकिं।तस्मिंस्तथामयाशास्तेयदिद्रोणायनिस्तथा।कुरुतेभैरवा
न्नादांस्तत्रकिंनामपौरुषं।नचाद्भुतमहंमन्येयद्द्रोणिःप्रतिगर्जति।घातयिष्यामिकौरव्यपरित्रातुममार्जुनः।यच्चमांधार्मिकोभू
त्वाब्रवीषिगुरुघातिनं।तदर्थमहमुत्पन्नःपांचालस्यसुतोनलात्॥२॥यस्यकार्यमकार्यंवायुध्यतोस्मान्समंरणे।तंकथंब्राह्मणंब्रू
यांक्षत्रियंवाधनंजय।योह्यनस्त्रविदोहन्याद्ब्रह्मास्त्रैःक्रोधमूर्छितः।सर्वोपायैर्नसकथंवध्यःपुरुषसत्तम।विधर्मिणोधर्मविद्भिःप्रोक्तो
स्तेनविषोपमाः।जानन्धर्मार्थतत्वज्ञःकिमर्जुनविगर्हसि।नृशंसःसमयाक्रम्यरथादवनिपातितः।तस्मान्तानिंद्यंबीभत्सोकिमर्थंनाभिनं
दसे।अस्मिंश्चरणेकथंपार्थज्वलनार्कविषोपमे।भीमद्रोणाच्छिरःछेदेप्रशस्यंतेप्रशंससि।योसौममैवनान्यस्यबांधवानभिजघ्निवान्।छित्वा
पितस्यमूर्द्धानंनैवास्मिविगज्वरः।तच्चमेकृंततेमर्मयन्नतस्यशिरोमया।निषादविषये।क्षिप्तंजयद्रथशिरोयथा।मयाशत्रोहतेकस्मान्म
मधर्मेनमन्यसे।नान्ततःपांडवोज्येष्ठोनचैवाहमधार्मिकः।अवध्यश्चहिशत्रूणामधर्मःशिष्यतेर्जुन।क्षत्रियस्यवयोधर्मोहन्याद्धन्येतवा
पुनः।सशत्रुर्निहतःसंख्येयथाधर्मेणपांडव।यथात्वयाहतःशूरोभगदत्तोमहामृधे।शिष्यद्रुड्ढतःसंख्येयुध्यस्वविजयस्तव।पिता

राम
२१०

पितामहं रणे हत्वा मन्यसे धर्ममात्मनः। मया शत्रौ हते कस्मात्पार्थ धर्मं न मन्यसे। संबंधावनतं पार्थ न मां त्वं बहु मन्यसे। स्वगात्रस्तसोपानं भिषंत
मिव कुंजरं। क्षमामि ते सर्वमेव व्यतिक्रममिमं ध्रुवं। द्रौपद्या द्रौपदेयानां हते नान्येन हेतुना। कुलक्रमागतं वैरं मम चार्येण विश्रुतं। तथा जाना
त्ययं लोको न यूयं पांडुनंदनाः॥ ॥ द्रोणपर्वणि धृष्टद्युम्नवाक्यं॥ ९९ ॥ धृतराष्ट्र॥ ॥ सांगो वेदो यथान्यायं येनाधीतो महात्मना। यस्मिन्सा
क्षाद्धनुर्वेदो ह्रीनिषेधे प्रतिष्ठितः। तस्मिन्नाक्रोशिते द्रोणे महर्षितनये तथा। नीचात्मना नृशंसेन क्षुद्रेण गुरुघातिना। यस्य प्रसादात्कर्माणि
कुर्वंति पुरुषर्षभाः। अमानुषाणि संग्रामे देवैरसुकराणि च। तस्मिन्नाक्रोशिते द्रोणे समक्षं पापकर्मणः। नामर्षं तत्र कुर्वंति धिग्क्षत्रं धिगमर्षि
तं। पार्थाः सर्वे च राजानः पृथिव्यां ये धनुर्द्धराः। श्रुत्वा किमाहुः पांचाल्यं तन्ममाचक्ष्व संजय॥ ॥ संजय॥ ॥ श्रुत्वा द्रुपदपुत्रस्य ता वाचः पु
क्रूरकर्मणः। तूष्णीं बभूवू राजानः सर्व एव विशांपते। अर्जुनस्तु कटाक्षेण जिह्मं प्रेक्ष्य च पार्षतं। सबाष्पमभिनिश्वस्य धिक् धिगित्येव चाब्रवीत्।
युधिष्ठिरश्च भीमश्च यमौ कृष्णस्तथापरे। आसन्व्रीडिताः सर्वे सात्यकिस्त्विदमब्रवीत्। नेहास्ति पुरुषः कश्चिद्यो य एनं पापपूरुषं। भाषमाणं
गुरोर्निंदां शीघ्रं हन्यान्नराधमं। एते त्वां पांडवाः सर्वे कुत्सयंति विचित्सया। कर्मणानेन पापेन श्वपाकमिव ब्राह्मणाः। एतत् श्रुत्वा महापापं निंदंते
सर्वसाधवः। कथं च रात न धा जिह्वा न ते मूर्द्धा विशीर्यते। गुरुमाक्रोशतः प्रेक्ष्य न च धर्मेण घातितः। त्याज्यस्त्वमसि पार्थैश्च सर्वैश्चांधकवृष्णिभिः।
यत्कर्म कलुषं कृत्वा श्लाघसे राजसंसदि। अकार्यं तादृशं कृत्वा पुनरेव गुरुं क्षिपन्। वध्यस्त्वं न त्वयार्थोस्ति मुहूर्त्तमपि जीवता। कस्त्वदध्यव
से दार्यस्त्वदन्यः पुरुषाधमः। निगृह्य केशेषु वधं गुरोर्द्धर्मात्मनः। सतः। सप्तापरे तथा पूर्वे बांधवास्ते निपातिताः। यत्रासाच परित्यक्ता।

द्रो०प०
२११

त्त्वां प्राप्य कुलपांसनं। उक्तवांश्चापि यत्पार्थं भीष्मं प्रति नरर्षभं। तथा तु निहतस्तेन स्वयमेव महात्मना। तस्यापि तव सोदर्यो निहंता पापदुत्तमः।
नान्यः पांचालपुत्रेभ्यो विद्यते भुवि पापकृत्तरः। स चापि सृष्टः पित्रा ते भीष्मस्यांतकरः किल। शिखंडी रक्षितो नेन स च मृत्युर्महात्मनः। पांचालाश्चलिता
धर्मात्क्षुद्राः पितृगुरुद्रुहः। त्वां प्राप्य सहसोदर्यं धिक्कृतं सर्वसाधुभिः। पुनश्चेतादृशं वाचं मत्समीपे वदिष्यसि। शिरस्ते पातयिष्यामि गदया
वज्रकल्पया। त्वां च ब्रह्महणं दृष्ट्वा जनः सूर्यमुदीक्षते। ब्राह्मणं व्याहरत्क्रूर प्रायश्चित्तार्थमात्मनः। पांचालापसदासाधो मम मे
च गुरुमग्रतः। गुरोर्गुरोश्चैव भर्त्रां क्षिपन्नेवं न लज्जसे। तिष्ठ तिष्ठ सहस्वैकं गदापातमिमं मम। न चापि प्रसहिष्ये हं गदापातानने कशः।
सात्वतेन च विक्षिप्तः पार्षतः परुषाक्षरं। संरब्धं सात्यकिं प्राह संरब्धः प्रहसन्निव॥ ॥धृष्टद्युम्न उवाच॥ ॥श्रूयते श्रूयते चेति
क्षम्यते चेति माधव। क्षमा प्रशस्यते लोके न तु पापे हिता क्षमा। क्षमावंतं हि पापात्मा जितोयमिति मन्यते॥ स त्वं क्षुद्रसमाचारो नी
चात्मा पापनिश्चयः॥ आकेशाग्रांतनखाग्रांतं वक्तव्यो वक्तुमिच्छसि॥ यस्मात्तु भूरिश्रवाः छिन्ने भुजे प्रायगतस्त्वया॥
वार्यमाणेन निहतस्ततः पापतरं नु किं॥ व्यूहमानो मया द्रोणो दिव्येनास्त्रेण संयुगे॥ विसृज्य शस्त्राणि हतः किं तत्र
क्रूरदुष्कृतं। अयुध्यमानं यस्त्वा जौ यथा प्रायगतं मुनिं॥ छिन्नबाहुं मृधे हन्यात्सात्यके स कथं भवेत्। निहत्य त्वां यदा भू
मौ स विक्रामति वीर्यवान्॥ किं तदानीं न हंस्येनं भूत्वा पुरुषसत्तमः। त्वया पुनरनार्येण पूर्वं पार्थेन निर्जितः। यदा तदा हतः शूरः सौ
मदत्तिः प्रतापवान्। यत्र यत्र तु पांडूनां द्रोणो विद्रवते चमूं। किरन्नस्त्रसहस्राणि तत्र तत्र प्रयाम्यहं। स त्वमेवंविधं कृत्वा कर्म चंडालवत्स्वयं।

द्रोण
२११

वक्तुमर्हसिकिंवाक्यंपरुषंवसुदुर्मुखः। कर्तासित्वंकर्मणोयस्यनाहंद्रष्टासिकुलाधम। पापानांचत्वमाधारःकर्मणांमापुनर्वदीः। जोषमास्स्वनमांभूयोव
क्तुमर्हस्यतःपरं। अधरोत्तरमेतद्धियन्मांवक्तुमिहेच्छसि। अथवक्ष्यसिमांमोहाद्वाक्यंभूयःपरुषमीदृशं। गमयिष्यामिबाणेस्त्वांयुधिवैवस्वतक्षयं।
नचैवंदुर्वचोमूर्खकेवलंनैवशक्यते। एषामपिस्वधर्मेणस्थितंशृणुयादृशं। वंचितःपांडवःपूर्वमधर्मेणयुधिष्ठिरः। द्रौपदीचपरिक्लिष्टातथा
धर्मेणसात्यके। सर्वेस्त्वमपकृष्टश्चतथाधर्मेणबालिश। अधर्मेणापकृष्टश्चमद्रराजःपरैरिति। अधर्मेणतथाबालःसौभद्रोविनिपातितः।
इतोप्यधर्मेणहतोभीष्मःकुरुपितामहः। भूरिश्रवाप्यधर्मेणत्वयाधर्मविदाहतः। एवंपरैराचरितंपांडवेयैश्चसंयुगे। रक्षमाणैर्जयंवीरैर्ध
र्मज्ञैरपिसात्वत। दुर्ज्ञेयःपरमोधर्मस्तथाधर्मश्चदुर्विदः। युध्यस्वपितृभिःसार्धंमागाःपितृनिवेशनं॥ ॥संजयउ०॥ ॥एवमादीनिवाक्यानि
निक्रूराणिपरुषाणिच। श्रावितःसात्यकिःश्रीमानाकंपितइवाभवत्। तच्छ्रुत्वाक्रोधताम्राक्षःसात्यकिस्त्वाददेगदां। विनिःश्वस्यमहाबा
हुःप्रणिधायरथेधनुः। ततोभिपत्यपांचाल्यंसंरंभेणेदमब्रवीत्। नत्वांवक्ष्यामिपरुषंहनिष्येत्वांवधक्षमम्। तमापतंतंसहसामहाबलप
राक्रमं। पांचाल्यायाभिसंक्रुद्धमंतकायांतकोपमं। चोदितोवासुदेवेनभीमसेनोमहाबलः। अवप्लुत्यरथात्तूर्णंबाहुभ्यांसमधारयत्। द्रवमा
णंतथाक्रुद्धंसात्यकिंपांडवोबली। प्रस्पंदमानमादायजगामबलिनांवरः। स्थित्वाविष्टभ्यचरणेभीमेनशिनिपुंगवः। निगृहीतःपदेषष्ठेबले
नबलिनांवरः। अवरुह्यरथात्तंतुध्रियमाणंबलीयसा। उवाचश्लक्ष्णयावाचासहदेवोविशांपते। अस्माकंपुरुषव्याघ्रमित्रमन्यन्नविद्यते। व
रमंधकवृष्णिभ्यांपांचालेभ्यश्चमारिष। तथैवांधकवृष्णीनांतवचैवविशेषतः। कृष्णस्यचतथासत्यंमित्रमन्यन्नविद्यते। पांचालानांचवार्ष्णे
यसमुद्रांतांविचिन्वतां। नान्यदस्तिपरंमित्रंयथापांडववृष्णयः। सभवानीदृशंमित्रंमन्यतेचयथातव। भवंतश्चयथास्माकंभवतांचयथावयं।

द्रो॰प॰
२१२

स एवं सर्वधर्मज्ञ मित्रधर्ममनुस्मरन्। नियच्छ मन्युं पांचाल्ये प्रशाम्य शिनिपुंगव। पार्षतस्य क्षमत्वं वै क्षम्यतां चैव पार्षत। वयं क्षमयिता
रश्च किमन्यत्र शमाद्भवेत्। प्रशाम्यमाने शैनेये सहदेवेन मारिष। पांचालराजस्य सुतः प्रहसन्निदमब्रवीत्। मुंच मुंच शिनेः पौत्रं भीमसे
न मदान्वितं। आसादयतु मामेष धाराधर इवाचलं। यावदस्य शितैर्बाणैः संरंभं नाशयाम्यहं। युद्धश्रद्धां च कौंतेय जीवितं चास्य संयुगे। किं
तु शक्यं मया कर्तुं कार्यं यदिदमुद्यतं। सुमहत्पांडुपुत्राणामायांत्येते महारथाः। अथवा फाल्गुनः सर्वान्वारयिष्यति संयुगे। अहमप्यस्य मू
र्धानं पातयिष्यामि सायकैः। मन्यते छिन्नबाहुं मां भूरिश्रवसमाहवे। उत्सृजैनं महाबाहो मे प्यमो विहनिष्यति। शृण्वन्पांचाल्यवाक्यानि सात्य
किर्बलवच्छ्वसन्। भीमबाहुं तरसा क्रोधाद्विस्फुरंस्त्यनिशं बली। ततो हृषीकेषाविवनुंदंतौ बलिनौ बाहुशालिनौ। त्वरया वासुदेवश्च धर्मराजश्च मारिष।
यत्नेन महता वीरौ वारयामासतुस्ततः। निवार्य परमेष्वासौ क्रोधसंरक्तलोचनौ। युयुत्सवः परान्संख्ये प्रतीयुः क्षत्रियर्षभाः॥ ॥इति द्रोण
पर्वणि॥१९२॥ संजय उ॥ ॥ततः स कदनं चक्रे रिपूणां द्रोणनंदनः। युगांते सर्वभूतानां कालसृष्ट इवांतकः। ध्वजद्रुमं शस्त्रशृंगं हतनागमहा
नगं। अश्वकिंपुरुषाकीर्णं शरासनलतावृतं। शवक्रव्यादसंघुष्टं भूतयक्षगणाकुलं। निहत्य शात्रवान्भल्लैः सोऽचिनोद्देहपर्वतं। ततो वेगे
न महता विनद्य स महाबलः। प्रतिज्ञां श्रावयामास पुनरेव तवात्मजं। यस्माद्युध्यंतमाचार्यं धर्मकंचुकमास्थितः। मुंच शस्त्रमि
ति प्राह कुंतीपुत्रो युधिष्ठिरः। विद्राव्य सत्यं हंतास्मि पापं पांचाल्यमेव च। सर्वानेतान्हनिष्यामि यदि योत्स्यंति मां रणे। सत्यं ते प्रतिजानामि
परावर्तय वाहिनीं। तच्छ्रुत्वा तव पुत्रस्तु वाहिनीं पर्यवर्तयत्। सिंहनादेन महता व्यपोह्य सुमहद्भयं। ततः समागमो राजन्कुरुपांडवसेनयोः।
पुनरेवाभवत्तीव्रः पूर्णसागरयोरिव। संरब्धा हि स्थिरीभूत्वा द्रोणपुत्रेण कौरवाः। उदग्राः पांडुपांचाला द्रोणस्य निधनेन च। तेषां परमहृष्टा

राम
२१२

नांजयमात्मनि पश्यतां। संरब्धानां महावेगः पुनरासीद्रणाजिरे। यथा विलोड्यते शैलैः सागरः सागरे यथा। प्रतिहन्येत राजेंद्र तथा हि कु
रुपांडवाः। ततः शंखसहस्राणि भेरीणामयुतानि च। अवादयंत संहृष्टाः कुरुपांडवसैनिकाः। ततो निर्मथ्यमानस्य सागरस्येव निस्वनः।
अभवत्तव सैन्यस्य सुमहानद्भुतस्वनः। प्रादुश्चक्रे ततो द्रौणिरस्त्रं नारायणं तदा। अभिसंधाय पांडूनां पांचालानां च वाहिनीं। प्रादुरासंस्ततो
दीप्ता बाणाः खे सहस्रशः। पांडवान्भक्षयिष्यंतो दीप्तास्या इव पन्नगाः। ते दिशः खं च सैन्यं च समावृण्वन्महाहवे। मुहूर्ताद्भास्करस्येव राजन्लो
के गभस्तयः। तथापरे द्योतमाना ज्योतींषीवामलेंबरे। प्रादुरासन्महीपाल कार्ष्णायसमयाः गुडाः। चतुर्दिशं दिवं चक्राश्च शतघ्नीबहुला गदाः।
चक्राणि च क्षुरांतानि मंडलानीव भास्वतः। शस्त्राकृतिभिराकीर्णा महीव भरतर्षभ। दृष्ट्वांतरिक्षमाविग्नाः पांडुपांचालसृंजयाः। यथा यथा ह्यु
ध्यंत पांडवानां महारथाः। तथा तथा तदस्त्रं वै व्यवर्द्धत जनाधिप। वध्यमानास्तथास्त्रेण तेन नारायणेन च। दह्यमाना नलेनेव सर्वतोभ्यर्दिता रणे।
यथा हि शिशिरापाये दहेत्कक्षं हुताशनः। तथा तदस्त्रं पांडूनां ददाह ध्वजिनीं तदा। आपूर्यमाणे चास्त्रेण सैन्ये क्षीयति वा विभो। जगाम परमं
त्रासं धर्मराजो युधिष्ठिरः। द्रवमाणं तु तत्सैन्यं दृष्ट्वा विगतचेतनं। मध्यस्थतां च पार्थस्य धर्मपुत्रो ब्रवीदिदं। धृष्टद्युम्न पलायस्व सह पांचालसे
नया। सात्यके त्वं च गच्छस्व वृष्ण्यंधकवृतः स्वयं। वासुदेवोपि धर्मात्मा करिष्यत्यात्मनः क्षमं। उपदेष्टुं समर्थोयं लोकस्य किमुतात्मनः। संग्रा
मस्तु न कर्तव्यः सह सैन्या ब्रवीमि वः। अहं हि सह सोदर्यैः प्रवेक्ष्ये हव्यवाहनं। भीष्मद्रोणार्णवं तीर्त्वा संग्रामे भीरुदुस्तरं। अवसीदामि सलिले
सगणो द्रौणिगोष्पदे। कामः संपद्यतामस्य बीभत्सोराशु मां प्रति। कल्याणवृत्तो ह्याचार्यो मया युधि निपातितः। येन बालः स सौभद्रो युद्धाना
मविशारदः। समर्थैर्बहुभिर्घोरैर्घातितो नाभिपालितः। येन विब्रुवती प्रश्नं तथा कृष्णा सभां गता। उपेक्षिता सपुत्रेण दासभावं नियच्छता।

जिघांसुर्धर्मराजस्य स्मातेषस्थेषु फाल्गुनं। कवचेन यथा पुत्रो रक्षार्थं सैंधवस्य च। येन शस्त्रास्त्रविदुषां पांचालाः सत्यजित्मुखाः। कुर्वाणाम
ज्यये यत्नं समूलाविनिपातिताः। येन प्रभ्राज्यमानाश्च राज्याद्यम धर्मतः। निवार्यमाणेनैवयं नानुयातस्तदेविणा। सोसावत्संतमस्मा
सु कुर्वाणः सोहं दंपरं। हतस्तदर्थे मरणं गमिष्यामि सबांधवः। न भीमो नार्जुनश्चापि न चाहं न च माधवः। न यमो सात्यकिश्चैव यातिजीवन्
कश्चन। एवं ब्रुवति कौंतेये दाशार्हस्त्वरितस्ततः। निवार्य सैन्यं बाहुभ्यामिदं वचनमब्रवीत्। शीघ्रं न्यस्यत शस्त्राणि वाहेभ्यश्चाधिरोह
त। एष योगोत्र विहितः प्रतिघाते महात्मनः। द्विपाश्वस्यंदनेभ्यश्च क्षितिं समधिरोहत। एवमेतन्न वो हन्यादस्त्रं भूमौ निरायुधान्। यथा य
था हि युध्यंति योधाः शस्त्रमिदं शाति। तथा तथा भवंत्येते कौरवा बलवत्तराः। रामेण पृथिवी सर्वा निःक्षत्रियगणा कृता। च्युनेनास्त्रेण भी
मेनस्वेन मुत्सादित पुरा। यत्र नारायणो तेजः सर्वतेजः प्रमर्दनं। नरस्त्वं निर्मितं पूर्वं विष्णुना प्रभविष्णुना। यदा निपातितो भीमो हिरण्या
क्षो महाबलः। तदा नारायणास्त्रं हि सृष्टं पूर्वं हि विष्णुना।। तं निपात्य महादैत्यं द्वापरांते नृपोत्तम। रामेण तपसाश्चायलब्धं पूर्वं महात्मनो। दे
वदेवं समाराध्य विष्णुं त्रिभुवनेश्वरं। तस्माद्द्रोणमनुप्राप्तं सर्वास्त्रप्रतिवारणं। तथेतद्धि महाशास्त्रं केनाचिन्न निवार्यते। नारायणास्त्रस्य
नृपा एषयोगो निवारणे। निःक्षिप्यंति च शास्त्राणि वाहनेभ्यो वरुह्यये। तान्नैतदस्त्रं संयत्तान् निहनिष्यति मानवान्। ये त्वेतत्प्रतियोत्स्यंति
मनसापीह केचन। निहनिष्यति तान् सर्वान् रसातलगतानपि। ते वचस्तस्य तच्छ्रुत्वा वासुदेवस्य भारत। इष्टः सर्वे समुत्स्रष्टुं मनोभिः करणे
न च। ततउत्स्रष्टुमानां स्त्राण्यालक्ष्य पांडवः। भीमसेनोऽब्रवीद्वाक्यमिदं संहर्षयंस्तदा। न कथंचन शस्त्राणि त्यक्तव्यानीह केनचित्।
अहं आवारयिष्यामि द्रोणपुत्रास्त्रमाशुगैः। अथवा गदया शीघ्रं हेमविग्रहया रणे। कालवद्विचरिष्यामि द्रोणेरस्त्रं विशातयन्। न हि

मे विक्रमे तुल्यः कश्चिदस्ति पुमानिह। यथैव सवितुस्तुल्यं ज्योतिरन्यन्न विद्यते। पश्यध्वं मे दृढौ बाहू नागराजकरोपमौ। समर्थौ पर्वतस्यापि शि-
रस्य विशातने। नागायुतसमप्राणो ह्यहमेको नरोधिह। शक्रो यथा प्रतिद्वन्द्वो दिवि देवेषु विश्रुतः। अद्य पश्यत मे वीर्यं बाह्वोः पीनांसयोर्युधि।
ज्वलमानस्य दीप्तस्य द्रौणेरस्त्रनिवारणे। यदि नारायणास्त्रस्य कश्चिद्योद्धा न विद्यते। अद्यैनं प्रतियोत्स्यामि पश्यत्सु कुरुपाण्डवाः। अर्जुनस्तु
नबीभत्सो न्यस्यतो गाण्डिवं तव। शशांकस्येव ते पंको निर्मलस्य भविष्यति॥ ॥अर्जुन उ॥ ॥भीम नारायणास्त्रे मे ब्राह्मणेषु च गोषु च। गां-
डीवं न्यस्यतः पंकः शशांकस्येव सोऽस्तु नः। एवमुक्तस्ततो भीमो द्रोणपुत्रमरिंदमः। अभ्ययान्मेघघोषेण रथेनादित्यवर्चसा। स एनमिषुजा-
लेन लघुनाशीघ्रविक्रमः। निःशेषमाश्रयासाद्य कुंतीपुत्रोऽभ्यवारयत्। ततो द्रौणिः प्रहस्येदं मुदा समभिभाष्य च। अवाकिरलदमाद्येः
शरैस्तेनाभिमंत्रितैः। पन्नगैरिव दीप्तास्यैः सृजद्भिरनलं रणे। अवकीर्णोऽभवत्पार्थः स्फुलिंगैरिव कांचनैः। तस्य रूपमभूद्राजन्भीमसे-
नस्य संयुगे। खद्योतैरावृतस्येव पर्वतस्य दिनक्षये। ततोऽस्त्रं द्रोणपुत्रस्य तस्मिन्प्रतिशाम्यति। अवर्धत महाराज यथाग्निरनिलोद्धतः।
प्रवर्धमानमालोक्य तदस्त्रं भीमविक्रमं। पांडुसैन्यमृते भीमं सुमहद्भयमाविशत्। ततः शस्त्राणि ते सर्वे समुत्सृज्य महीतले। अवारोहन्र-
थेभ्यश्च हस्त्यश्वेभ्यश्च सर्वशः। तेषु निक्षिप्तशस्त्रेषु वाहनेभ्यश्च सर्वशः। तदस्त्रवीर्यं विपुलं भीममूर्धन्यथापतत्। हाहाकृतानि भूतानि पांड-
वाश्च विशेषतः। भीमसेनमपश्यन्त तेजसा संवृतं तदा॥ ॥इति द्रोणपर्वणि नारायणास्त्रीये ॥२॥ संजय उ॥ ॥भीमसेनं समाकीर्णं दृष्ट्वा-
स्त्रेण धनंजयः। तेजसः प्रतिघातार्थं वारुणेन समावृणोत्। नालक्षयत तं कश्चिद्वारुणास्त्रेण संवृतं। अर्जुनस्य लघुत्वाच्च संवृतत्वाच्च तेज-
सः। साश्वसूतरथो भीमो द्रोणपुत्रास्त्रसंवृतः। अग्नावग्निरिव न्यस्तो ज्वालामाली सुदुःसहः। यथा रात्रिक्षये राजञ्ज्योतींष्यस्तगिरिं प्रति। समा-

द्रो०प०
२१४

पेतुस्तथा बाणा भीमसेनरथं प्रति। तदस्त्रं दारुणं मुक्तं नारायणसमुद्भवं। प्रजज्वाल पुनर्भृशं संवृतस्तु रणाजिरे। सहि भीमो रथस्यास्य ह
याः सूतश्च मारिष। संवृतो द्रोणपुत्रेण पावकांतर्गतोभवत्। यथा दग्ध्वा जगत्सर्वं समये सचराचरं। गच्छेदग्निर्विभोरास्यं तथास्त्रं भी
ममावृणोत्। सूर्यमग्निः प्रविष्टः स्याद्यथा वाग्निं दिवाकरः। तथा प्रविष्टस्तत्तेजो न प्राज्ञायत पांडवः। विकीर्णमस्त्रं तद्दृष्ट्वा तथा भीमरथं प्रति।
उदीर्यमाणं द्रोणिं च निःप्रतिद्वंद्वमाहवे। सर्वसैन्यानि पांडूनां न्यस्तशस्त्राण्यचेतसः। युधिष्ठिरपुरोगाश्च विमुखास्ते महारथाः। अर्जुनो वा
सुदेवश्च त्वरमाणौ महाद्युती। अवप्लुत्य रथाद्वीरौ भीममभ्यद्रवतां तदा। ततस्तद्द्रोणपुत्रस्य तेजोस्त्रबलसंभवं। विगाह्य तौ सुबलिनौ माय
याविशतां ततः। न्यस्तास्त्रौ तु तदस्त्रं च प्रशशाम नरर्षभ। वारुणास्त्रप्रयोगाच्च वीर्यवत्त्वाच्च कृष्णयोः। ततश्चकृषतुर्भीमं तस्य सर्वायुधानि च।
नारायणास्त्रशांत्यर्थं नरनारायणौ बलात्। आकृष्यमाणः कौंतेयो नावर्तत महाबलः। युयुधे चैव तद्घोरं द्रोणेरस्त्रं सुदुर्जयं। ततोब्रवीद्वा
सुदेवः किमिदं पांडुनंदन। वार्यमाणोपि कौंतेय कस्मात्त्वं न निवर्तसे। यदि युद्धेन जेयाः स्युरिमे कौरवनंदन। वयमप्यत्र युध्यामस्तथा सर्वे
नरर्षभाः। रथेभ्यस्त्ववतीर्णाः स्म सर्व एव महारथाः। तस्मात्त्वमपि कौंतेय रथात्तूर्णमपाक्रम। एवमुक्त्वा ततः कृष्णो रथाद्भूमिमपातयत्। निःश्वस
तं यथा नागं क्रोधसंरक्तलोचनं। यदापकृष्टः स रथात्स्थापितश्च रणे भुवि। ततो नारायणास्त्रं तत्प्रशशांतं शत्रुतापनं॥ ॥संजय उ०॥ ॥तस्मिन्प्र
शांते विधिना तदा तेजसि दुःसहे। बभूवुर्विमलाः सर्वा दिशः प्रदिशस्तथा। प्रववुश्च शिवा वाताः प्रशांता मृगपक्षिणः। वाहनानि प्रहृष्टानि
योधाश्च मनुजेश्वर। व्यपोढे तु ततो घोरे तस्मिंस्तेजसि भारत। बभौ भीमो महाबाहुर्यथा सूर्य इवोदितः। हतशेषं बलं तत्र पांडवानामतिष्ठत। अ
स्त्रोपरमहृष्टं तत्तव पुत्रजिघांसया। व्यवस्थिते बले तस्मिन्नस्त्रे प्रतिहते तथा। दुर्योधनो महाराज द्रोणपुत्रमथाब्रवीत्। अश्वत्थामन्पुनः

राम
२१४

शीघ्रमस्त्रमेतत्प्रयुंजय। व्यवस्थिता हि पांचालाः पुनरेव जयैषिणः। कृष्णश्च मातथा कस्मात्कृतं पुत्रेण मारिष। सदीनमभिनिःश्वस्य राजानमि
दमब्रवीत्। नैतदावर्त्तते राजन्नस्त्रं द्विर्नोपपद्यते। आवर्त्तनाद्धि हन्त्येतत्प्रयोक्तारं न संशयः। एष चास्त्रप्रतीघातं वासुदेवः प्रयुक्तवान्। अन्य
था तु हितः संख्ये वधः शत्रोर्जनाधिप। पराजयो वा मृत्युर्वा श्रेयो मृत्युर्न निर्जयः। निर्जिताश्च ये ह्येते शस्त्रोत्सर्गान्मृतोपमाः॥ ॥दुर्योधन॥ ॥
आचार्यपुत्र यद्येतद्द्विरस्त्रं न प्रयुज्यते। अन्यैर्गुरुघ्ना वध्यंतामस्त्रैरस्त्रविदांवर। त्वयि ह्यस्त्राणि दिव्यानि यथा स्युस्त्र्यंबके तथा। इच्छतो न हि
ते मुच्येत क्रुद्धस्यापि पुरंदरः॥ ॥धृतराष्ट्र उ॥ ॥तस्मिन्नस्त्रे प्रतिहते द्रोणे चापि तथा हते। तथा दुर्योधनेनोक्तो द्रौणिः किमकरोत्पुनः। दृष्ट्वा पार्थां
श्च संग्रामे युद्धाय समवस्थितान्। नारायणास्त्रनिर्मुक्तांश्चरतः प्रतनामुखे॥ ॥संजय उ॥ ॥जानन्पितुः स निधनं सिंहलांगूलकेतनः। स
क्रोधं भयमुत्सृज्य सोभिदुद्राव पार्षतं। अभिद्रुत्य च विव्याध स्वर्णपुंखैः शिलाशितैः। पंचभिश्चातिवेगेन विव्याध पुरुषर्षभ। धृष्टद्युम्नस्ततो
राजन्ज्वलंतमिव पावकं। द्रोणपुत्रं ततः शायराजन्विव्याध पत्रिणा। सारथिं चास्य विंशत्या स्वर्णपुंखैः शिलाशितैः। हयांश्च चतुरो विव्याध चतुर्भि
र्निशितैः शरैः। विद्ध्वा विद्ध्वानदद्द्रौणिः कंपयन्निव मेदिनीं। आददत्सर्वलोकस्य प्राणानिव रणाजिरे। पार्षतस्तु बली राजन्कृतास्त्रः कृतनिश्च
यः। द्रौणिमेवाभिदुद्राव कृत्वा मृत्युं निवर्त्तनं। ततो बाणमयं वर्षं द्रोणपुत्रस्य मूर्धनि। अवासृजदमेयात्मा पांचाल्यो रथिनां वरः। तं द्रौणिः सम
रे क्रुद्धः छादयामास पत्रिभिः। विव्याध चैनं दशभिः पितुर्वधमनुस्मरन्। द्वाभ्यां च सुविकृष्टाभ्यां शराभ्यां ध्वजकार्मुके। छित्वा पांचालराजस्य
द्रौणिरन्यैः समार्पयत्। व्यश्वसूतरथं चक्रे द्रोणपुत्रो महाहवे। तस्य चानुचरान्सर्वान्क्रुद्धः प्राद्रावयच्छरैः। प्रदुद्राव ततः सैन्यं पांचालानां वि
शांपते। दृष्ट्वा च विविधान्योधान्धृष्टद्युम्नं च पीडितं। द्रौणेयो नोदयत्तूर्णं रथं द्रौणिरथं प्रति। सप्ताभिर्निशितैश्चैव समभ्यहरमानमार्पयत्॥

विंशत्या पुनराहत्य नानारूपैरमर्षणः। विव्याध च तथा सूतं चतुर्भिश्चतुरो हयान्। सोऽतिविद्धो महेष्वासो नानालिंगैरमर्षणः। युयुधा
नेन तं द्रौणिः प्रहसन्वाक्यमब्रवीत्। शैनेयाभ्युपपत्तिं ते जानाम्याचार्यघातिनः। न त्वेनं त्रास्यसि मया यस्तु मां मानमेव च। शपेत्मनाहं शै
नेय सत्येन तपसा तथा। अहत्वा सर्वपाञ्चालान्यथा शान्तिमवाप्नुयां। यद्बलं पाण्डवेयानां वृष्णीनामपि यद्बलं। क्रियतां सर्वमेवेह निहनिष्यामि
सोमकान्। एवमुक्त्वा शरैस्तीक्ष्णैः सात्यकिं तूर्णमावृणोत्। संरब्धः क्रोधताम्राक्षो द्रोणपुत्रः प्रतापवान्। सात्यकिस्तु ततः क्रुद्धः शतेन नरतप
र्वणां। द्रोणपुत्रं समाजघ्ने सर्वसैन्यस्य पश्यतः। ततो द्रौणिर्महातेजा वायोः संबाध सात्यकिं। धनुः क्रोधपरीतात्मा चिच्छेदाथ महास्त्रवित्।
ततः शक्तिं महाघोरां हेमदण्डां भयस्मयां। चिक्षेप सात्यकिस्तूर्णं द्रोणपुत्रजिघांसया। तामापतन्तीं सहसा शक्रमुक्तामिवाशनिं। अप्राप्तामेव चि
च्छेद द्रौणिः सप्तभिराशुगैः। तां निकृत्तां शरैर्दृष्ट्वा द्रौणिना सात्यकिर्भृशं। सोऽन्यदादाय वेगेन कार्मुकं वेगवत्तरं। तद्विकृष्य महच्चापं सात्यकिः
सात्वतां वरः। सायकैर्बहुभिस्तूर्णमभ्यद्यमानमार्दयत्। ततो द्रौणिस्तु संरब्धः शरजालैरनेकशः। शरजालेन समरे सात्यकिं क्रोधमूर्छितः।
तान्यस्य शरजालानि विजरिक्तो विशांपते। अप्राप्तान्येव चिच्छेद युयुधानो महारथः। ततः पूर्णायतोत्सृष्टैर्हेमपुंखैः शिलाशितैः। बाणैर्विव्या
ध सुभृशं द्रोणपुत्रममर्षणः। तथा स विद्धः सुभृशं द्रोणपुत्रोऽप्यमर्षणः। शैनेयं समरे क्रुद्धः प्रदहन्निव भारत। अवाकिरदमेयात्मा बाणव
र्षैः समंततः। पर्वतं वारिधाराभिस्तपान्ते जलदो यथा। ततोऽर्करश्मिप्रतिमं सुपर्वाणं शरोत्तमं। व्यसृजत्सात्वते द्रौणिर्वज्रं वृत्रे यथा हरिः।
स तु तेनाभिघातेनार्तः सायकः सत्रारावरं। विवेश वसुधां भित्त्वा श्वसन्निव महोरगः। स भिन्नकवचः शूरस्तोत्त्रार्दित इव द्विपः। विसृज्य सशरं
चापंभूष्टिदेशो महद्धनुः। द्रुतं रुधिरसिक्तांगो रथोपस्थ उपाविशत्। सूतेनापहृतस्तूर्णं द्रोणपुत्राद्रथान्तरं। तस्मिन्नपहृते द्रौणिः शरेण

न नप दर्पणा। व्याजघानाशु वीर्मध्ये धृष्टद्युम्नं परंतपं। स दृष्ट्वमतिविद्धश्च भृशं पश्चा त्समर्पितः। ससीद न्नथ पांचाल्यो युध्याम्बयत तं ध्वजं। तं
नागमिव सिंहेन गजं कुंजरमर्दिना। जवेनाभ्यपतन्क्रुद्धः पांडवानां महारथः। भीमसेनो महाबाहुर्वृद्धक्षत्रश्च पौरवः। युवराजश्च वेदानां
मालवश्च सुदर्शनः। एते हाहाकृताः सर्वे प्रगृहीतशरासनाः। वीराः द्रोणायनिं भूरं सर्वतः पर्यवारयन्। ते विंशति शरैर्युक्ता द्रोणपुत्रं स
मर्पपरा पंचभिः पुंवाभिर्भल्लै रभ्यघ्नन्सर्वतो दिशं। आशीविषाभैस्तरितैस्तांश्चापि विशिखैः शितैः। चिक्षेप पुंखपक्षाणान्यं चाविंशति माशु
गान्। तनत्ल पंचभिर्बाणैः पौरवो द्रोणिमर्दयत्। मालवास्त्रिभिरेवेन शरैः षड्भिर्वृकोदरः। एवं ते विविधुः सर्वे द्रोणिं राजन्महारथाः। युग
पच्चाट्पथक्केनं स्वर्णपुंखैः शिलाशितैः। युवराजस्तु विंशत्या द्रोणिं विव्याध पंचभिः। भीमश्च पुनरष्टाभिस्तथा सर्वे त्रिभिस्त्रिभिः। ततो भी
षं बर्द्धरभ्याजघान द्रोणिर्बली विशिखैर्वेदु रुक्मपुंखैः। दशार्हसंख्येषु वराजं च संख्येहाभ्यां द्वाभ्यां मालवपौरवौ च। स तं विद्धाभीम
सेनस्य षड्भिर्वाभ्यां विधा कार्मुकं च ध्वजं च। पुनर्भीमं शरवर्षेणाभित्वा द्रोणिर्घोरं सिंहनादं ननाद। तस्यास्यतः क्षिताः पीतधारा द्रो
णेः शराः दृष्टन्न्वायतश्च। धाराभिः संख्ये प्रदिशो दिशश्च छन्नं बाणेरभवद्घोररूपैः। तद्वास्य तत्तद्रथमुग्रवेगैः स्तैर्भल्लिवस्येंद्रकेतु
प्रकाशं। भुजौ शिरश्चेंदुसमानक्तं वक्त्रं त्रिभिः शरैर्युगपत्स चकर्त। ततः क्रूरं पौरवस्याधिराजन् छित्वा रथं तिलशो थास्य बाणैः।
चिछेद बाहुवरं चंदनाक्तं भल्लेन कायाच्छिरश्च कर्त। ततो युवानं वरहेमवर्णं चेदिप्रियं युवराजं प्रसह्य। बाणैस्त्वरावान्ज्वलनार्कवर्णैः
घित्वा प्राप न्मृत्यवे साश्वकेतुं। मालवं पौरवं चैव युवराजं च चेदिपं। दृष्ट्वा समेतान्निहतान्द्रोणपुत्रेण पांडवः। भीमसेनो महाबाहुः क्रो
धमाहारयत्परं। ततः शरशतैस्तीक्ष्णैर्भुजगैरिव सोमपैः। छादयामास समरे द्रोणपुत्रं महारथं। ततो द्रोणिर्महाराज शरवर्षं वितत्य च।

द्रो॰ प॰
२९६

ततोभीमोमहाबाहुर्द्रौणेर्युधिचित्तस्यचमहाबलः। शरवृष्टिंतुतांघोरामापतंतींमचिंतयन्। द्रोणपुत्रवधप्रेप्सुर्भीमोभीमपराक्रमः। मुमोच
शरवर्षाणिप्रावृषीवबलाहकः। तद्रुक्मपृष्ठंभीमस्यधनुर्घोरंमहद्रणे। विकृष्यमाणंविबभौशक्रचापमिवागतं। तस्माच्छराःप्रादुरासन्श
तशोथसहस्रशः। संछादयंतःसमरेद्रौणिमाहवशोभिनं। तयोर्विसृजतोरेवंशरवर्षाणिमारिष। वायुरप्यंतरातस्मिन्नशक्नोतिविसर्पितुं।
ततोद्रौणिर्महाराजशरान्हेमविभूषितान्। कर्मारिमार्जितान्क्रुद्धःप्राहिणोद्वधकांक्षया। तानंतरिक्षेविशिखैस्तथैकैकमशातयत्। विशेषयु
द्रोणपुत्रंतिष्ठतिष्ठेतिचाब्रवीत्। पुनश्चशरवर्षाणिघोराण्युग्राणिपांडवः। अवसृजद्बलवान्क्रुद्धोद्रोणपुत्रवधेप्सया। ततोस्त्रमाययातूर्णं
शरवृष्टिंविधम्यह। धनुश्चिच्छेदभीमस्यद्रोणपुत्रोमहास्त्रवित्। शरैश्चैनंसुबहुभिःक्रुद्धःसंख्येसमार्दिनोत्। सछिन्नधन्वाबलवान्
गदांगृह्यवृकोदरः। वेगेनाविध्यचिक्षेपद्रोणपुत्रंप्रतिप्रभो। तामापतंतींसहसामहोल्कांनिशितैःशरैः। चिच्छेददशभिर्द्रौणिर्दर्शयन्
पाणिलाघवं। एतस्मिन्नंतरेभीमोदृढमायम्यकार्मुकं। द्रोणिंविव्याधदशभिर्विशिखैरुत्स्मयन्निव। ततोद्रौणिर्महाराजभीमसेनस्यसा
रथिं। ललाटेभ्यहनत्तूर्णंशरेणनतपर्वणा। सोतिविद्धोबलवताद्रोणपुत्रेणसारथिः। विमोहमगमद्राजन्रश्मीनुत्सृज्यवाजिनां। ततोश्वाः
प्राद्रवन्तूर्णंमोहितेरथसारथौ। भीमसेनस्यराजेंद्रपश्यतांसर्वधन्विनां। तंदृष्ट्वाप्रद्रुतैरश्वैरपकृष्टं[illegible]हारथं। दध्मौप्रमुदितःशंखंबृ
हंतंद्रौणिराहवे। पांचालास्तुततःसर्वेद्रोणपुत्रशरार्दिताः। धृष्टद्युम्नेनसहिताद्रुतंसंप्राद्रवन्दिशः। द्रोणपुत्रभयाद्राजन्नादिक्षुसर्वा
स्वजग्मिरे॥ ॥इतिद्रोणपर्वणि॥२७॥ संजयउ॥ ॥तत्तुभग्नंबलंदृष्ट्वाकुंतीपुत्रोधनंजयः। न्यवारयदमेयात्माद्रोणपुत्रजयेप्सया।
ततस्तेसैनिकाराजन्नैवतत्रावतस्थिरे। संस्थाप्यमानायत्नेनगोविंदेनार्जुनेनच। एकएवतुबीभत्सुःसमस्त्रैर्यवनैःसह। मत्स्यैरन्यैश्च

राम
२९६

संधाय कौरवैः सन्न्यवर्तत। ततो ऽद्भुतमभिक्रम्य सिंहलांगूलकेतनं। सव्यसाची महेष्वासमभ्यपश्यमानमब्रवीत्। या शक्तिर्यश ते वीर्यं यत्र
ज्ञानं यच्च पौरुषं। धार्त्तराष्ट्रेषु या प्रीतिः सद्वेषो ऽस्मास्मु यश्च ते। यच्च भूयो ऽस्ति ते तेजस्तत्परं मम दर्शय। स एव द्रोणहंता ते दर्पं छेत्स्यति पार्षतः।
कालानलयमप्रख्यो द्विषतामंतको युधि। समासादय पांचाल्यं मां चापि सहकेशवं॥ ॥धृतराष्ट्र उ०॥ ॥आचार्यपुत्रो मानार्हो बल-
वांश्चापि संजय। प्रीतिर्धनंजये चापि प्रियश्चास्य महात्मनः। न भूतपूर्वं बीभत्सोर्वाक्यं परुषमीदृशं। अथ कस्मात्तदा सूत सखायं रूक्ष-
मब्रवीत्॥ ॥संजय उ०॥ ॥युवराजे हते चैव वृद्धक्षत्रे च पौरवे। इष्वस्त्रविधिसंपन्ने मालवे च सुदर्शने। धृष्टद्युम्ने सात्वते च भीमे चा-
पि पराजिते। युधिष्ठिरस्य तैर्वाक्यैः सोदर्ये चापि घट्टिते। अंतर्भेदे च संजाते दुःखं संस्मृत्य च प्रभो। अभूतपूर्वो बीभत्सोर्दुःखान्मन्युरजा-
यत। तदा नर्हमश्लीकमप्रियं द्रोणिमुक्तवान्। मान्यमाचार्यतनयं रूक्षं कापुरुषं यथा। एवमुक्तः सक्रोधान्महेष्वासतमो नृणां। पार्थिवा-
नां च समरे पश्यतामितरेतरं। द्रोणिश्चुकोप पार्थाय रुष्टाय च विशेषतः। स तु यत्तो रणे स्थित्वा वार्युपस्पृश्य वीर्यवान्। देवैरपि सुदुर्धषम-
स्त्रमाग्नेयमाददे। दृश्यादृश्यानरिगणानुद्दिश्याचार्यनंदनः। सोऽभिमंत्र्य शरं दीप्तं विधूंतामिव पावकं। सर्वतः क्रोधमाविश्य चिक्षेप परवी-
रहा। ततस्तुमुलमाकाशे शरवर्षमजायत। पावकार्चिःपरीतं च पार्थमेवाभिदुद्रुवे। उल्काश्च गगनात्पेतुर्दिशश्च न चकाशिरे। तमश्च सहसा
रौद्रं चमूमवततार तां। रक्षांसि च पिशाचाश्च विनेदुरभिसंगताः। ववुश्चैवाशिवा वाताः सूर्यो नैव ततापच। चुक्रुशुर्दानवाश्चापि दिक्षु सु-
र्वस्विनेरवाः। रुधिरं चाभिवर्षंतो विनेदुस्तोयदा दिवि। पक्षिणः पशवो गावो मुनयश्चापि सुव्रताः। परमं प्रयतात्मानो न शांतिमुपले-
भिरे। भ्रांत सर्वमहाभूतमावर्जितदिवाकरं। त्रैलोक्यमभिसंतप्तं ज्वराविष्टमिवातुरं। शरतेजोऽभिसंतप्ता नागा भूम्याश्रयास्तथा। निश्व-

संतः सस्रुस्तेजोघोरं मुमुक्षवः। जलजा निवसत्वा निदह्यमानानि भारत। न शांतिमुपजग्मुर्हि तप्यमाने जलाशये। दिशः खं च दिशश्चैव
भुवं च शरवृष्टयः। उच्चावचा निपेतुश्च गरुडानिलरंहसः। तैः शरैर्द्रोणपुत्रस्य वज्रवेगैः समाहितैः। प्रदग्धाः शत्रवः पेतुरग्निदग्धा इव द्रु
माः। दह्यमाना महानागाः पेतुर्भुवि समंततः। नदंतो भैरवान्नादाञ्जलदोपमनिस्वनान्। अपरे प्रद्रुताश्चैव दह्यमाना महागजाः। त्रस्तास्त
त्रावने घोरे यथा दावाग्निसंवृताः। गिरीणां शिखराणीव दावदग्धानि मारिष। अश्ववृंदान्यदृश्यंत रथवृंदानि चाभिभो। आपतंतो रथौघाः
स्तत्र तत्र सहस्रशः। तत्सैन्यं भगवानग्निर्ददाह युधि भारत। युगांते सर्वभूतानि संवर्तक इवानलः। दृष्ट्वा तु पांडवीं सेनां दह्यमानां महाहवे। प्र
हृष्टास्तावका राजन्सिंहनादान्विनेदिरे। ततस्तूर्यसहस्राणि नानालिंगानि भारत। तूर्णमावादयामासुस्तावका युधिकाशिनः। कृत्स्ना ह्यक्षौ
हिणी राजन्सव्यसाची च पांडवः। तमसा संवृते लोके नादृश्यत महाहवे। निधनं तादृशं राजन्दृष्टपूर्वं न च श्रुतं। यादृशं द्रोणपुत्रेण कृतं हि क
दनं महत्। अर्जुनस्तु महाराज ब्राह्ममस्त्रमुदैरयत्। सर्वास्त्रप्रतिघातार्थं विहितं वेधसा पुरा। ततो मुहूर्तादिव तत्तमो व्युपशाम्यत। त
त्राद्भुतमपश्याम कृत्स्नामक्षौहिणीं हतां। अनभिज्ञेयरूपां च प्रदग्धामस्त्रमायया। स हि वीरो रथगतः समसादत पार्थिव। सपताकध्वजह
यः सानुकर्षवरायुधः। प्रबभौ सरथो मुक्तस्तावकानां विशांपते। ततः किलिकिलाशब्दः शंखभेरीविमिश्रितः। पांडवानां प्रहृष्टानां क्षणेन सम
जायत। हताविति तयोरासीत्सेनयोरुभयोर्मतिः। तरसाभ्यागतौ दृष्ट्वा विमुक्तौ केशवार्जुनौ। ततो मुक्तौ प्रमुदितौ दध्मतुर्वारिजावथ। दृष्ट्वा प्र
मुदितान्पार्थांस्त्वदीया व्यथिताभवन्। विमुक्तौ च महात्मानौ दृष्ट्वा द्रौणिः सुदुःखितः। मुहूर्तं चिंतयामास किमेतदिति भारत। चिंतयित्वा च राजें
द्र ध्यानशोकपरायणः। निश्वसन्दीर्घमुष्णं च विमनाश्चाभवत्ततः। ततो द्रौणिर्धनुर्न्यस्य रथात्प्रस्कंद्य वेगतः। धिग्धिक्सर्वमिदं मिथ्येत्युक्त्वा

सप्राद्रवद्रणात्॥ ततः स्निग्धाम्बुदाभासं वेदाभासं द्विजर्षभं । वेदव्यासं सरस्वत्या वासं व्यासं ददर्श ह । तं द्रोणिरग्रतो दृष्ट्वा स्थितं कुरुकुलोद्वह । स
नकं बोब्रवीद्वाक्यमभिवाद्य कृतांजलिः । भो भो माया यदृच्छं वा दैवं वा किमिदं मुने । इच्छामि त्वामहं तात संदेहं त्वं वदस्व मे । अस्त्रं त्विदं कथं मि
थ्याभवत्कश्च व्यतिक्रमः । अधरोत्तरमेतद्वा लोकानां च पराभवः । यद्भी मो जीवितश्चाणो विमुक्तो योयमस्त्रकृतो । किं करोमि कथं धामिकालो
हि दुरतिक्रमः । नासुरान्न च गंधर्वाः पिशाचोरगराक्षसाः । न सर्पा न यक्षा नागाश्च न मनुष्याः कथंचन । उत्सहंते तद्यथा कर्तुमेतदस्त्रं मयेरितं । तदि
दं केवलं हत्वा युक्तामक्षौहिणीं ज्वलत् । सर्वघातिमया युक्तं महत्परमदारुणं । केन तौ मर्त्यधर्माणौ नावधीत्केशवार्जुनौ । एतन्मे ब्रूहि भगवन्
मयापृष्टो यथातथं । श्रोतुमिच्छामि तत्त्वेन सर्वमेतन्महामुने ॥ ॥व्यास उवाच॥ ॥महांतमेतमर्थं हि यं त्वं पृच्छसि विस्मयं । तं च वक्ष्यामि ते सर्वं स
माधाय मनः शृणु । यो सौ नारायणो नाम पूर्वेषामपि पूर्वजः । अजायत च कार्यार्थं पुत्रो धर्मस्य विश्वकृत् । तपः सतीव्रमातिष्ठन्मैनाकं गिरि
मास्थितः । ऊर्ध्वबाहुर्महातेजा ज्वलनादित्यसन्निभः । षष्टिं वर्षसहस्राणि तावंत्येव शतानि च । अशोषयत्तदात्मानं वायुभक्षोंबुजेक्षणः । अथा
परं तपस्तप्त्वा द्विस्तावत्सु पुनर्नरः । द्यावापृथिव्योर्विवरं तेजसा समपूरयत् । स तेन तपसा युक्तो ब्रह्मभूतो यदाभवत् । ततो विश्वेश्वरं स्थाणुं वि
श्वस्य जगतः पतिं । ददर्श भृशदुर्दर्षं सर्वदेवैः स्वरेश्वरं । अणीयसामणीयांसं बृहद्भ्यश्च महत्तरं । रुद्रमीशानमृषभं चेकितानं परांगतिं । त
तिष्ठंतं योगतश्चापि राजन् दुर्वारणं दुर्दर्शं तिग्ममन्युं । महात्मानं सर्वहरं प्रचेतसं दिव्यं चापमिषुधी आददानं । हिरण्यवर्माणमनंतवीर्यं पिना
किनं वज्रिणं दीप्तशूलं । परश्वधं गदिनं चायतासिं सुभ्रूं जटिं मुशलं चंद्रमौलिं । व्याघ्राजिनं परिघं दंडपाणिं शुभांगदं नागयज्ञोपवीतं । वि
श्वैर्गणैः शोभितं भूतसंघैरेकीभूतं तमसः सन्निधाने । मनो गुणैः संस्कृतमिष्टवाग्भिः जलं दिवं खं क्षितिं चंद्रसूर्यौ । तथा वायुग्नी प्रतिमा

भं

नंजयश्चैकालंहृतंतमजंभिन्नदृष्टिं।ब्रह्माणंविष्णुमभृतस्ययोनियंपश्यंतिब्राह्मणाःसाधुवृत्ताः।क्षीणेपापेमनसायेविशोकायत्नादि
दंतपसाधर्ममाज्यं।तद्भक्त्यावैविश्वरूपंददर्श।सदृष्ट्वाचैनमात्मनेवाबुद्धिभेदेः।सहृष्टात्मामुमुदेदेवदेवं।अक्षमालापरिक्षिप्तंज्योतिषां
परमानिधिं।ततोनारायणोदृष्ट्वाववंदेविश्वसंभवं।वरदंविष्टिचारिण्यापार्वत्यासहितंप्रभुं।अभिवाद्याप्यरुद्रायसद्योधकनिपा
तिने।पद्माक्षस्तंविरूपाक्षंपरितुष्टावभक्तिमान्॥ ॥नारायणउ॥ ॥त्वत्संभूताविश्वकृतोवरेण्यगोप्तारोस्यभुवनस्यादेवाः।आवि
श्येमांधरणींयेभ्यरक्षन्पुरादेवाविश्वसृग्विश्वयोनिः।सुरासुराभूतपक्षाः।पैशाचानागाःसुपर्णाःपितरोथयक्षाः।पृथग्विधाभू
तसंघांश्चविश्वंत्वत्संभूतंसर्वमेतत्प्रभुस्त्वं।ऐंद्रंयाम्यंवारुणंवायुमेवंमैत्रंसोम्यंपाशुपतंतथास्त्रं।एवंविदन्सभवंचाप्ययंचरूपंज्यो
तिःशब्दमाकाशवायू।कालोब्रह्माब्रह्मवब्राह्मणाश्चत्वत्संभूतंस्थाणुवरिष्ठुचैव।अध्यस्तोकायांतियथाहृथश्चतानभिश्चैक्यंसंक्षये
यांतिभूयः।दिव्यामृतोमानसौद्वौसुपर्णौचात्मानंदपिप्पलोसमशाखौ।देवाश्चान्येयुगपद्धारयंतितथास्त्वष्टास्तेहितेभ्यःपरस्त्वं।
भूतंभव्यंभविष्यत्ताताथदृष्टंत्वत्संभूतंभुवनानीहविश्वं।भक्तंचमांभजमानंभजस्वचात्मानंत्वामात्मनोमन्यभावं।विद्वन्वेदंगच्छ
तिब्रह्मश्रुत्वोमस्तोमंत्वांतवसमानमिच्छन्।विश्वासंवेमन्यमानस्त्वरीयंसुदुर्लभान्देहिवरान्ममेष्टान्।अभिष्टुतःप्रविकर्षस्समायां।
। ॥व्यासउ॥ ॥तस्मैवरानमेयात्मानीलकंठःपिनाकधृक्।अर्हतेदेवमुख्यायप्रायच्छदृषिसंस्तुतः॥ ॥श्रीभगवानु॥ ॥मत्प्रसा
दान्मनुष्येषुदेवगंधर्वयोनिषु।अप्रमेयबलात्मात्वंनारायणभविष्यसि।नचत्वांप्रसहिष्यंतिदेवासुरमहोरगाः।नपिशाचानगंधर्वा
ननागानचराक्षसाः।नसुपर्णास्तथानागानयक्षाविश्वयोनिजाः।नकश्चित्त्वांसमोवापिसमरेषुवजेष्यति।नवास्त्रेणनवज्रेण

न शास्त्रेण न शास्त्रतः। न चार्द्रेण न शुष्केण न रसेन स्थावरेण च। कश्चित्त्वरुजं कर्तुं मत्प्रसादात्कथंचन। एवमेता वराल्लब्ध्वा पुरस्ता
द्वि— लक्षितान्। स एव देवश्चरति मायया मोहयञ्जगत्। तस्यैव तपसो जातं नरं नाम महामुनिं। तुल्यमेतेन देवेन त्वं जानीहि द्युतिं रणे।
तावेतौ पूर्वदेवानां परमोपचिताहवौ। लोककार्यार्थविधानार्थं संजायेते युगे युगे। तथैव कर्मणः कृत्स्नं महतस्तपसो पि च। तेजः सन्युश्च वि
द्वांस्त्वं जातो रुद्र महामते। स भवान्देववत्प्राज्ञो ज्ञात्वा भवमयं जगत्। अवकर्षस्त्वमात्मानं नियमैस्तत्प्रियेप्सया। शुभ्रमंत्रभवं कृत्वा
महापुरुषविग्रहं। ईजिवांस्त्वं महादेवस्तु पहारैश्च मानद। स तथा पूज्यमानस्ते सर्वदेहेश्वरः प्रभुः। पुष्कलांश्च वरान्प्रादात्त्वं विद्व
न्हृदि स्थितान्। ताभ्यां लिंगे र्चिते वै वत्स पाञ्चा पद्युगे युगे। चतुर्दश्यष्टमी तिथ्योर्नक्तं लिंगेन योर्चयेत्। यो वै भूतधरो भूत्वा स महेश्वरव
द्भवेत्। स एष रुद्र भक्तश्च केशवो रुद्रसंभवः। शरीरमेकमेताभ्यां योगाद्द्वैधीकृतं। सर्वे विष्णुमया देवाः सर्वे विष्णुमया गणाः। सर्वं
वै विष्णुना व्याप्तं त्रैलोक्यं सचराचरं। शिवाय विष्णुरूपाय शिवरूपाय विष्णवे। यथांतरं न पश्यामि तथा मे स्वस्ति रायुषः। भूतपतेस्त्व
देवस्य ब्रह्मा विष्णु महेश्वराः। अनंतस्य महाबाहो यच्चान्यद् पि किंचन। सर्वभूतभवं ज्ञात्वा लिंगे योर्चयति प्रभुं। आत्मयोगश्च यस्मिन्वे
शास्त्रयोगश्च शाश्वतः। एतमेवार्च्य देवाः सिद्धाश्च परमर्षयः। प्रार्थयंतः परांल्लोकान्दिवो ब्रह्मर्षयो मराः। अर्चयंति महाविष्णुस्त्वा
णुं ब्रह्माणमेव च। मोक्षं तेनैव द्वारेण प्राप्नुवंति च मानवाः। स तं ब्रह्मा रजो विष्णुस्तमो देवो महेश्वरः। भूतग्राम सृजे ब्रह्मा सर्वं पालय
ते च्युतः। संहरत्येष भूतानि रुद्रो रौद्रेण कर्मणा। कृष्ण एव हि यष्टव्यो यष्टव्येषु सनातनः। इज्यते योगिभिर्नित्यं तद्विष्णोः परमं पदं।
यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजत्यसौ। मत्स्यः कूर्मो वराहश्च भुजगो वामनो हरिः। साध्यो

नारायणो विष्णुः कश्यपस्यात्मसंभवः। रामो रामश्च रामश्च वासुदेवश्च यादवः। कल्की भविष्यते विप्रयुगे क्षीणेषु नरहरिः। स साध्यो नारायणो
लोके स्थावरं जंगमं च यत्। तत्सर्वं विष्णुना सृष्टमनंतेन महात्मना। तप एवं प्रकुर्वन्हि लोकानां हितकाम्यया। तपो विधानेन कृतो लोकश्चापि
प्रवर्तते। तन्निमित्तं हरिरयं तपश्चरति नित्यशः। वरान्प्रार्थयते यस्मात्प्रधा देवसत्तमात्। पदवीं समुपागम्य विष्णुना जिष्णुना सह। तपश्चर्यां
विशालायामेतन्नेकथितं पुरा मया। तस्मिन्नभ्यधिकां शांतिं करोति रिषभध्वजेः॥ ॥संजय उ०॥ ॥ तस्य तद्वचनं श्रुत्वा द्रोणपुत्रो महारथः।
नमश्चकार रुद्राय बहु मेने च केशवं। हृष्टरामोत्त्ववश्यात्मा नमस्कृत्य महारथः। वरूथिन्यां पार्थिवेभ्यो ह्यवहारमकारयत्। ततः प्रत्यवहा
रं कुपांडवानां विशांपते। कौरवाणां च दीनानां द्रोणे नमुधि पातिते। युद्धं कृत्वा दिनान्पंच द्रोणो हत्वा वरूथिनीं। ब्रह्मलोकं गतो राजन्ब्राह्म
णो वेदपारगः॥ ॥इति द्रोणपर्वणि शततरुद्रीये ॥१९५॥ धृतराष्ट्र उ०॥ ॥ तस्मिन्नतिरथे द्रोणे निहते तत्र संजय। मामकाः पांडवाश्चैव किम
कुर्वत्ततः परं॥ ॥संजय उ०॥ ॥ तस्मिन्नतिरथे द्रोणे निहते पार्षतेन वै। कौरवेषु च भग्नेषु कुंतीपुत्रो धनंजयः। दृष्ट्वा सुमहदाश्चर्यमात्म
नो विजयावहं। यदृच्छयागतं व्यासं पप्रच्छ भरतर्षभ॥ ॥अर्जुन उ०॥ ॥ संग्रामे निघ्नतः शत्रून्शरौघैर्विमलैरिह। अग्रयतो लक्षये यांतं पु
रुषं पावकप्रभं। ज्वलंतं शूलमुद्यम्य यां दिशं प्रतिपद्यते। तस्यां दिशि विशीर्यंते शत्रवो मे यतः स्थिताः। पद्भ्यां स स्पृश्यते भूमिं न च शू
लं विमुंचति। शूलाच्छूलसहस्राणि निपेतुस्तस्य तेजसः। तेन भग्नान्नरा सर्वान्भग्नान्मन्यते जनः। तेन दग्धानि सैन्यानि पृष्ठतोनुव्रजा
म्यहं। भगवंस्तन्मे भावेक्ष्य को वै मम पुरोभवत्॥ ॥व्यास उ०॥ ॥ प्रजापतीनां प्रथमं तेजसं पुरुषं प्रभुं। भवनं भूर्भुवं दिव्यं सर्वलोकेश्व
रेश्वरं। ईशानं वरदं पार्थ दृष्टवानसि शंकरं। तं गच्छ शरणं देवं देवादिं भुवनेश्वरं। महादेवं महात्मानमीशानं जटिलं शिवं। त्र्यक्षामय

जुषं तद इंगिरिशं चीरवाससं। देवदेवं हरं स्थाणुं वरदं भुवनेश्वरं। जगद्योनिं जगद्बीजं जयंतं जगतो गतिं। विश्वात्मानं विश्वसृजं विश्वमूर्तिं यश
स्विनं। विश्वेश्वरं विश्वयोनिं विश्वकर्माणमीश्वरं। शंभुं स्वयंभुं भूतेशं भूतभव्यभवोद्भवं। योगं योगेश्वरं शर्वं सर्वलोकेश्वरेश्वरं। सर्वश्रेष्ठं जगच्छ्रे
ष्ठं वरिष्ठं परमेष्ठिनं। लोकस्रष्टिविधातारमेकं लोकत्रयाश्रयं। शुद्धात्मानं भवं भीमं शशांकं विश्वरेतसं। शाश्वतं भूधरं देवं सर्ववागीश्वरेश्वरं।
सुदुर्जयं जगन्नाथं जन्ममृत्युजरातिगं। ज्ञानात्मानं ज्ञानगम्यं ज्ञानज्ञेयं सुदुर्विदं। दातारं चैव भोक्तारं प्रसादकरकं नृणां। तस्य ते पार्षता दि
व्या मूर्तिर्नानाविधा विभो। वामना जटिला मुंडा ह्रस्वग्रीवा महोदरा। महाकाया महोत्साहा महाकर्णास्तथापरे। सद्विवृत्ताननतेजस्त्वा प्रसादाद्य
न्नितेयतः। तस्मिन्घोरे महापार्थसंग्रामे लोमहर्षणे। द्रोणकर्णकृपैर्गुप्तां महेष्वासैः प्रहारिभिः। कस्तां सेनां तदा पार्थ मनसापि प्रधर्षयेत्। ऋ
ते देवान्महेष्वासाद्बहुरूपान्महेश्वरात्। स्थातुमुत्सहते कश्चिन्न तस्मिन्नग्रतः स्थिते। न हि भूतं समं तेन त्रिषु लोकेषु विद्यते। गंधेनापि हि संग्रामे
यस्य क्रुद्धस्य शत्रवः। विसंज्ञा हतभूयिष्ठा रथस्याग्रे पतंति ते। तस्मै नमस्तु कुर्वंतो देवादी यांति वै दिवि। ये चान्ये मानवा लोके ये च स्वर्गजितो नराः।
ये भक्ता वरदं देवं शिवं रुद्रमुमापतिं। इह लोके परिज्ञातुः स याति परमां गतिं। नमः कुरुष्व कौंतेय तस्मै शांतात्मने सदा। रुद्राय शितिकंठाय कद्रु
द्राय सुवर्चसे। कपर्दिने करालाय हर्यक्षाय महात्मने। याम्यायाव्यक्तकेशाय सद्वृत्ते शंकराय च। हरिकेशाय मुंडाय कृशायोत्तरणाय च।
इह लोके सुखं प्राप्य ते यांति परमां गतिं। नमः कुरुष्व कौंतेय तस्मै शांतात्मने सदा। भास्कराय सुतीर्थाय देवदेवाय रंहसे। बहुरूपाय शर्वाय प्रि
याय प्रियवाससे। उष्णीषिणे सुवक्त्राय सहस्राक्षाय मीढुषे। गिरिशाय प्रशांताय पतये चीरवाससे। हिरण्यबाहवे राजन्नुग्राणां पतये
नमः। पर्जन्यपतये चैव भूतानां पतये नमः। वृक्षाणां पतये नित्यं गवां च पतये नमः। वृक्षैरावृतकायाय सेनान्ये मध्यमाय च। स्रुवहस्ताय देव

द्रो०प०
२२०

पधन्विने भार्गवाय च। बहुरूपाय विश्वस्य पतये चीरवाससे। सहस्रशिरसे चैव सहस्रचरणाय च। शरणं शायकौंतेय वरदं भुवनेश्वरं। उमापतिं
विरूपाक्षं दक्षयज्ञविनाशनं। प्रजानां पतिमव्यग्रं भूतानां पतिमव्ययं। कपर्दिनं वृषावर्त्तं वृषनाभं वृषध्वजं। वृषदर्पं वृषपतिं वृषशृंगं वृषर्षभं। वृषां
कं वृषभोदारं वृषभं वृषभेक्षणं। वृषायुधं वृषगतिं वृषभूतं महेश्वरं। महोदरं महाकायं द्वीपिचर्मनिवासिनं। लोकेशं वरदं मुंडं ब्रह्मण्यं ब्राह्मणः
प्रियं। त्रिशूलपाणिं वरदं खड्गचर्मधरं प्रभुं। पिनाकिनं खंडपरशुं लोकानां पतिमीश्वरं। प्रपद्ये शरण्यं देवं शरण्यं चीरवाससं। नमस्तुभ्यं सुरेशाय य
स्य वैश्रवणः सखा। उग्रायुधाय देवाय नमः सुरवराय च। नमोस्तु बहुरूपाय नमश्च बहुधन्विने। नमोस्तु त्रिपुरघ्नाय भगघ्नाय च वै नमः। वनस्पती
नां पतये नराणां पतये नमः। अपां चैव प्रभो नित्यं यज्ञानां पतये नमः। पूष्णोदंतविनाशाय त्र्यक्षाय वरदाय च। नीलकंठाय पिंगाय स्वर्णकेशाय
वे नमः। कर्माणि चैव दिव्यानि महादेवस्य धीमतः। तानि ते कीर्त्तयिष्यामि यथाप्रज्ञं यथाश्रुतं। न सुरा नासुरा लोके न गंधर्वा न राक्षसाः। सु
खमेधांति कुपिते तस्मिन्नपि महात्मनि। दक्षस्य यजमानस्य विधिवत्संभृतं पुरा। विव्याध कुपितो यज्ञं निर्भयस्तु भवस्तदा। धनुषा बाणमुत्सृज्य
सघोषं विननाद च। विंदुते सहसा यज्ञे कुपिते च महेश्वरे। तेन चैवातिकोपेन स यज्ञो ध्वंसितः पुरा। तेन ज्यातलघोषेण सर्वे लोकाः समाकु
लाः। बभूवुर्वशगाः पार्थ निपेतुश्च सुरासुराः। आपश्चुक्षुभिरे सर्वाश्चकंपे च वसुंधरा। पर्वताश्च व्यशीर्यंत दिशो नागाश्च मोहिताः। अंधाश्च
तमसा लोका न प्राकाशंत संवृताः। गमिताः सहसूर्येण सर्वेषां ज्योतिषां प्रभाः। चुक्रुशुः सहिता देवाः शांतिं चक्रुस्तथैव च। ऋषयः सर्वभूतानामा
त्मनश्च सुखैषिणः। पूषाणमभ्यद्रवत शंकरः प्रहसन्निव। पुरोडाशं भक्षयतो दशनान्वै व्यपातयत्। मन्त्राश्चापि सुराश्चासन्संयतोद्यापितंग
जि। ततो विश्वपुर्देवानर्दयामास तेजसा। पुनः स संदधे दीप्तं देवानां निशितं शरं। सधूमं विस्फुलिंगाभं विद्युत्तोयदसन्निभं। दृष्ट्वा तं तु सुराः

राम
२२०

सर्वेष्वाधिपत्यमहेश्वरं। रुद्रस्य यज्ञभागं तु विशिष्टं ते न्वकल्पयन्। न येन त्रिदशा राजन् शरणं वै प्रपेदिरे। ते नैव शान्तिको येन स यज्ञः संधितस्तु
दा। असुराणां पुराण्यासंस्त्रीणि वीर्यवतां दिवि। आयसं राजतं चैव सौवर्णमपरं तथा। आयसे तारकाक्षस्य कमलाक्षस्य राजते। सौवर्णं तारण
स्यासीद्विद्युन्माली प्रतापवान्। न शक्तस्तानि मघवा भेत्तुं सर्वायुधैरपि। अथ सर्वे सुरा रुद्रं जग्मुः शरणमुद्यताः। ते तमूचुर्महात्मानं सर्वे देवाः सवा
सवाः। ब्रह्मदत्तवरा एते घोरास्त्रिपुरवासिनः। पीडयन्त्यधिकं लोकं तस्मादेतान्निषूदय। इह शान्ते वदे वेश नान्यः शक्तः कथंचन। हंतुं शक्तो महादेव
त्वं हंता चासुरद्रुहां। ततो रौद्रा भविष्यंति पशवः सर्वकर्मसु। स तथोक्तस्तथेत्युक्त्वा देवानां हितकाम्यया। गंधमादनविंध्यौ च कृत्वा वंशध्वजौ हरः। पृ
थ्वीं ससागरवनां रथं कृत्वा तु शंकरः। अक्षं कृत्वा तु नागेंद्रं शेषं नागं त्रिलोचनः। चक्रे कृत्वा च चंद्रार्कौ देवदेवः पिनाकधृक्। अणी कृत्वेलपत्रं च पुष्प
दंतं च त्र्यंबकः। यूपं कृत्वाथ मलयं विनाहं वाति तक्षकं। योक्त्राण्यंगानि चक्रे तारिष्ठतारावः प्रतापवान्। वेदान्कृत्वाथ चतुरश्चतुरोश्वान्महेश्वरः। उप
वेदान्खलीनांश्च कृत्वा लोकत्रयेश्वरः। गायत्रीं प्रग्रहं कृत्वा सावित्रीं च महेश्वरः। कृत्वोंकारं प्रतोदं च ब्रह्माणं चैव सारथिं। गांडीवं मंदरं कृत्वा गुणं कृ
त्वा तु वासुकिं। विष्णुं शरोत्तमं कृत्वा शल्यमग्निं तथैश्वरः। वायुं कृत्वाथ वाजाभ्यां पुंखे वैवस्वतं यमं। विद्युं कृत्वाथ निस्त्रायां मेरुं कृत्वाथ वै ध्वजं। आरुह्य
स रथं दिव्यं सर्वदेवमयं शिवः। त्रिपुरस्य वधार्थाय स्थाणुः प्रहरतां वरः। असुराणामंतकरः श्रीमानतुलविक्रमः। स्तूयमानः सुरैः पार्थ ऋषि
भिश्च तपोधनैः। स्थानं माहेश्वरं कृत्वा दिव्यमौतिमप्रभं। अतिष्ठत्स्थाणुभूतश्च सहस्रं परिवत्सरान्। यदा त्रीणि समेतानि अंतरिक्षे पुराणि वै। त्रि
पर्वणा त्रिशल्येन तेन तानि बिभेद सः। पुराणि च न तं शेकुर्दानवाः प्रतिवीक्षितुं। शरं कालाग्निसंयुक्तं विष्णुसोमसमायुतं। बालमंकगतं कृत्वा स्व
यं पंचशिखं पुनः। उमा जिज्ञासमाना वै कोयमित्यब्रवीत्स्फुरान्। असूयतश्च शक्रस्य वज्रेण प्रहरिष्यतः। बाहुं सवज्रं शक्रस्य क्रुद्धः स्तंभय

प्र

प्रभुः। प्रहस्य भगवांस्तूर्यं सर्वलोकेश्वरः शिवः। ततः संस्तंभितभुजः शक्रो देवगणैर्वृतः। जगाम शरणं भूयः परमात्मानमव्ययं। ते तं प्रणम्य शि
रसा प्रोचुः प्रांजलयः स्थिताः। किमयं भूतकागतं उत्संगपार्वत्या भूतमद्भुतं। बालरूपधरं दृष्ट्वा नास्माभिरभिवादितः। तस्मात्त्वां द्रष्टुमिच्छामो निं। दि
तायेनैव वयं। अयुध्यता हि बालेन लीलया सपुरंदराः। तेषां तद्वचनं श्रुत्वा ब्रह्मा ब्रह्मविदां वरः। ध्यात्वा स शंभुं भगवान्बालं चामिततेजसं। उ
वाच भगवान्ब्रह्मा शक्रादीन्स्तान्कुरोत्तमान्। चराचरस्य जगतः प्रातः स भगवान्हरः। तस्मात्परतरं नान्यत्किंचिदस्ति महेश्वरात्। यो दृष्ट ह्युमया सा
र्द्धं युष्माभिरमितद्युतिः। स पार्वत्याः कृते देवः कृतवान्बालरूपतां। ते मया सहिता यूयं प्रपद्यध्वं तमेव हि। एवमुक्ता गता देवा देवानां भुवनेश्व
रः। अथान्येन स्वरूपेण ब्रह्मा दृष्ट्वा तमव्ययं। न तं बुबुधिरे देवो देवानां भुवनेश्वरं। श्रेयः श्रेष्ठ इति ज्ञात्वा ववंदे स पितामहः॥ ॥ब्रह्मोवाच॥ ॥त्वं
यज्ञो भुवनस्यास्य त्वं गतिस्त्वं परायणं। त्वं देवस्त्वं महादेव त्वं धाम त्वं परायणं। त्वया सर्वमिदं व्याप्तं जगत्स्थावरजंगमं। भगवन्भूतभव्येश लोक
नाथ जगत्पते। प्रसादं कुरु शक्रस्य त्वया क्रोधार्दितस्य वै। पद्मयोनिवचः श्रुत्वा ततः प्रीतो महेश्वरः। ततः प्रसादयामास कृत्वा द्दासं ततेसुराः। स
द्यः स्तु पुनर्बाहुं यथाप्रकृति वज्रिणः। तेषां प्रसन्नो भगवान्सपत्नीको वृषभध्वजः। देवानां त्रिदशश्रेष्ठो दक्षयज्ञविनाशनः। स वै रुद्रः स च शिवः सो
ग्निः सर्वः स सर्ववित्। स चेंद्रः स च वायुश्च सोऽश्विनौ स च विद्युतः। स भवः स च पर्जन्यो महादेवश्च सोऽनघ। स चंद्रः स महेशानः स सूर्यो वरुणश्च
सः। स कालः सोंतको मृत्युः स यमो रात्र्यहानि तु। मासार्द्धमासा ऋतवः संध्ये संवत्सरश्च सः। धाता च स विधाता च विश्वात्मा विश्वदशकृ
त्। सर्वासां देवतानां च धारयत्यवपुर्वपुः। सर्वदेवैः स्तुतो देवः सर्वथा बहुधा च सः। शतधा सहस्रधा चैव तथा शतसहस्रधा। द्वे तनू तस्य दे
वस्य वेदज्ञा ब्राह्मणा विदुः। घोरा चान्या शिवा चान्या ते तनू बहुधा पुनः। घोरा तु या तनुस्तस्य सोऽग्निर्विद्युत्स भास्करः। स ईशानः स्मृतो रु

इज्यापोज्योतींषि चंद्रमाः। वेदांगास्सोपनिषदः पुराणाध्यात्मनिश्चयः। यत्तच्च परमं गुह्यं स वै देवो महेश्वरः। ईदृग्वाच्यं महादेवो भूयश्च भगवा
न्नजः। न हि सर्वे मया शक्या वक्तुं भगवतो गुणाः। अपि वर्षसहस्रेण सततं पांडुनंदन। सर्वैर्ग्रहैर्गृहीतस्तु सर्वपापसमन्वितः। शममायाति स
प्रीतः शरण्यः शरणार्थिनां। आयुरारोग्यमैश्वर्यं वित्तं कामांश्च पुष्कलान्। स ददाति मनुष्येभ्यः स चैवाक्षिपते पुनः। सेंद्रादिषु देवेषु तस्य चै
श्वर्यमुच्यते। ऐश्वर्ये चैव कामानां ईश्वरः स निगद्यते। महेश्वरश्च भूतानां महतामीश्वरश्च सः। बहुभिर्बहुधा रूपैर्विश्वं व्याप्नोति वै जगत्।
अस्य देवस्य यद्वक्त्रं समुद्रे तत्स्य तिष्ठति। वडवामुखे निवसति पिबंस्तोयमयं हविः। एष चैव विमनायेद देवो वसति नित्यशः। यजंते तं
जनास्तत्र वीरं स्थाणुमिति स्थिरं। अस्य दीप्तानि रूपाणि घोराणि च बहूनि च। लोके यान्यस्य कुर्वंति मनुष्याः प्रवदंति च। नामधेयानि लो
केस्मिन् बहून्यस्य यथार्थवत्। निरुक्तं नेमहत्त्वाच्च विभुत्वात्कर्मणस्तथा। देवेनास्य समाख्यातं शतरुद्रियमुत्तमं। नाम्नां चानंतरं रुद्रमु
पस्थारं महात्मनः। सकामानां प्रभुर्देवो ये दिव्या ये च मानुषाः। सर्वथा यः पशून्पाति तैश्च यद्रमते पुनः। तेषामधिपतिर्यश्च तस्मा
त्पशुपतिः स्मृतः। महयंति च लोकांस्तं महेश्वर इति स्मृतः। ऋषयश्च हि देवाश्च गंधर्वाश्चरसस्तथा। लिंगमभ्यर्चयंति स्म तच्चाप्यूर्ध्वं सम
स्थितं। पूज्यमाने ततस्तस्मिन्मोदते स महेश्वरः। सुखी प्रीतश्च भवति प्रहृष्टश्चापि शंकरः। यदस्य बहुधा रूपं तद्धते नैव शूलिनं। स्था
वरं जंगमं चैव बहुरूपं ततः स्मृतं। एकाक्षो योज्वलन्नास्ते सर्वतोक्षिमयोपि वा। क्रोधाद्यश्चाविशल्लोकांस्तस्मात्सर्व इति स्मृतः।
सहस्राक्षोयुताक्षश्च सर्वतोक्षिमयस्तथा। यच्च विश्वं महत्पाति महादेवस्ततः स्मृतः। धुर्विश्वे य इति प्रोक्तो धर्मश्च वृष उच्यते। स दे

यदेवोभगवान्कीर्त्यते वेदेषाकपिः। अन्नाणामिदंवरः गंयमंधनदमेवच। निगृह्यहरतेयस्मात्तस्माद्धरइति स्मृतः। निमीलिताभ्यांनेत्रा
भ्यामन्यद्देवोमहेश्वरः। ललाटेनेत्रमसृजत्तेनत्र्यक्षः सउच्यते। भूतंभव्यंभविष्यच्चसर्वंशर्वोमिहेश्वरः। भवएवततोयस्माद्भूतभव्यभ
वोद्भवः। विषमस्थः शरीरेषुप्राणापानशरीरिषु। पूजयेद्विग्रहंयस्तु लिंगंचापिसमर्चयेत्। लिंगंप्रपूजयेन्नित्यं महतींश्रियमश्नु
ते। ऊरुभ्यामर्द्धमाग्नेयंसोमार्द्धंशाशिनस्तनुः। आत्मनोर्द्धंचतस्याग्निः सोमार्द्धंपुनरुच्यते। तैजसीमहतीदीप्तादेवेभ्यः स्वाशिवातनुः
नदस्तूर्द्धं स्थितोयश्च प्राणोत्पत्तिस्थितोपियः। स्थितंलिंगंस्ययन्नित्यं तस्मात्स्थाणुरितिस्मृतः। सूर्याचंद्रमसोर्लोके प्रकाशयतियो
निशां। ताः कथाः संस्थितास्त्वस्य व्याधिकेशाइतिस्मृतः। ब्रह्मचर्यंचरत्येव शिवावाप्यस्यतनुः स्मृता। याऽस्यघोरतरामूर्त्तिः सर्वानात्ति स
रेश्वरा। एषदेवोमहादेवोयोसौपार्थतवाग्रतः। संग्रामेशात्रवान्निघ्नंस्त्वयादृष्टः पिनाकधृक्। सिंधुराजवधार्थायप्रतिज्ञातेयंतवान
घ। एषवैभगवान्देवः संग्रामेयातितेग्रतः। येनदत्तानितेस्त्राणि पैस्त्वयादानवाहताः। धन्यंयशस्यमायुष्यंपुण्यंवेदस्यसंमितं।
देवदेवस्यतेपार्थव्याख्यातंशतरुद्रियं। सर्वार्थसाधकंपुण्यंसर्वकिल्बिषनाशनं। सर्वपापप्रशमनंसर्वदुःखभयापहं। चतुर्विध
मिदंस्तोत्रंयः शृणोतिनरः सदा। विजित्यसर्वान्शत्रून्सरुद्रलोकेमहीयते। एतद्देशात्तरुद्रीयंश्रृण्वंश्चसततोत्थितः। भक्तोविश्वेश्वरं
देवंमानुषेषुचयः सदा। वरान्सकामान्लभते प्रसन्नेत्र्यंबकेनरः। गच्छयुध्यस्वकौंतेयनतवास्तिपराजयः। यस्यमंत्रीचगोप्ताच
पार्श्वस्थस्तुजनार्दनः॥ ॥संजयउवाच॥ ॥एवमुक्त्वार्जुनंसंख्येपराशरसुतस्तदा। जगामभरतश्रेष्ठयथागतमरिंदम॥ ॥इति

शातरुद्रीयं समाप्तं ॥१९१॥ संजय उवाच ॥ ॥ पठेदिदं सर्वमहार्थसंयुतं रणेजयं पांडवहर्षसिद्धये ॥ नयं पदार्थः श्रृणुयाश्च संस्मरे
तत्परः सलुच्यते पापकृतैश्च कर्मभिः ॥ यज्ञावाप्तिश्च विपुलास्येह नित्यं नित्यं युद्धे सभिपाणां जयश्च ॥ शोभी वर्णो कामम् इष्टं लभेत पुत्रा
न्यौचानि हलजनेस्तयेक्यं ॥ सवै नरः कालमृत्योर्न भीतो रौद्राः क्रूराने सा विशिष्टा भवंति ॥ ॥इति श्रीमहाभारते शतसाहस्र्यां संहितायां
वैय्यासिक्यां द्रोणपर्व समाप्तिमगमत् ॥ ॥अतः परं कर्णपर्व ॥ तस्याद्यनाद्यः श्लोकः ॥ ॥वैशंपायन उवाच ॥ ॥ततो द्रोणे हते राज
न्दुःशासनपुरोगमाः ॥ भृशमुद्विग्नमनसो दुर्योधनमुपासते ॥१॥ ॥श्रीरामकृष्णाभ्यां नमः ॥ ॥श्रीवेदव्यासाय नमः ॥ ॥
वंशी विभूषितकरान्नवनीरदाभात् पीतांबरादरुणबिंबफलाधरोष्ठात् ॥ पूर्णेंदुसुंदरमुखादरविंदनेत्रात् कृष्णात्परं किमपि तत्वमहं न जाने ॥

सप्तम ७ द्रोणपर्व ७ १ इदं द्रोणपर्व इदं शंकर पंडितस्य पत्रे २२३

पर्व सप्तम ७

[OrderDescription]
,CREATED=11.12.19 13:27
,TRANSFERRED=2019/12/11 at 14:38:53
,PAGES=448
,TYPE=STD
,NAME=S0002326
,Book Name=M-2042-DRONPRAV MAHABHARAT
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF

FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF

FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF

FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF

FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF

FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF

FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF

FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF

FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF

FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF

FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF

FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF

FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
,FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF

FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF
,FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF
,FILE304=00000304.TIF
,FILE305=00000305.TIF
,FILE306=00000306.TIF
,FILE307=00000307.TIF
,FILE308=00000308.TIF
,FILE309=00000309.TIF
,FILE310=00000310.TIF
,FILE311=00000311.TIF

FILE312=00000312.TIF
,FILE313=00000313.TIF
,FILE314=00000314.TIF
,FILE315=00000315.TIF
,FILE316=00000316.TIF
,FILE317=00000317.TIF
,FILE318=00000318.TIF
,FILE319=00000319.TIF
,FILE320=00000320.TIF
,FILE321=00000321.TIF
,FILE322=00000322.TIF
,FILE323=00000323.TIF
,FILE324=00000324.TIF
,FILE325=00000325.TIF
,FILE326=00000326.TIF
,FILE327=00000327.TIF
,FILE328=00000328.TIF
,FILE329=00000329.TIF
,FILE330=00000330.TIF
,FILE331=00000331.TIF

FILE332=00000332.TIF
,FILE333=00000333.TIF
,FILE334=00000334.TIF
,FILE335=00000335.TIF
,FILE336=00000336.TIF
,FILE337=00000337.TIF
,FILE338=00000338.TIF
,FILE339=00000339.TIF
,FILE340=00000340.TIF
,FILE341=00000341.TIF
,FILE342=00000342.TIF
,FILE343=00000343.TIF
,FILE344=00000344.TIF
,FILE345=00000345.TIF
,FILE346=00000346.TIF
,FILE347=00000347.TIF
,FILE348=00000348.TIF
,FILE349=00000349.TIF
,FILE350=00000350.TIF
,FILE351=00000351.TIF

FILE352=00000352.TIF
,FILE353=00000353.TIF
,FILE354=00000354.TIF
,FILE355=00000355.TIF
,FILE356=00000356.TIF
,FILE357=00000357.TIF
,FILE358=00000358.TIF
,FILE359=00000359.TIF
,FILE360=00000360.TIF
,FILE361=00000361.TIF
,FILE362=00000362.TIF
,FILE363=00000363.TIF
,FILE364=00000364.TIF
,FILE365=00000365.TIF
,FILE366=00000366.TIF
,FILE367=00000367.TIF
,FILE368=00000368.TIF
,FILE369=00000369.TIF
,FILE370=00000370.TIF
,FILE371=00000371.TIF

FILE372=00000372.TIF
,FILE373=00000373.TIF
,FILE374=00000374.TIF
,FILE375=00000375.TIF
,FILE376=00000376.TIF
,FILE377=00000377.TIF
,FILE378=00000378.TIF
,FILE379=00000379.TIF
,FILE380=00000380.TIF
,FILE381=00000381.TIF
,FILE382=00000382.TIF
,FILE383=00000383.TIF
,FILE384=00000384.TIF
,FILE385=00000385.TIF
,FILE386=00000386.TIF
,FILE387=00000387.TIF
,FILE388=00000388.TIF
,FILE389=00000389.TIF
,FILE390=00000390.TIF
,FILE391=00000391.TIF

FILE392=00000392.TIF
,FILE393=00000393.TIF
,FILE394=00000394.TIF
,FILE395=00000395.TIF
,FILE396=00000396.TIF
,FILE397=00000397.TIF
,FILE398=00000398.TIF
,FILE399=00000399.TIF
,FILE400=00000400.TIF
,FILE401=00000401.TIF
,FILE402=00000402.TIF
,FILE403=00000403.TIF
,FILE404=00000404.TIF
,FILE405=00000405.TIF
,FILE406=00000406.TIF
,FILE407=00000407.TIF
,FILE408=00000408.TIF
,FILE409=00000409.TIF
,FILE410=00000410.TIF
,FILE411=00000411.TIF

FILE412=00000412.TIF
,FILE413=00000413.TIF
,FILE414=00000414.TIF
,FILE415=00000415.TIF
,FILE416=00000416.TIF
,FILE417=00000417.TIF
,FILE418=00000418.TIF
,FILE419=00000419.TIF
,FILE420=00000420.TIF
,FILE421=00000421.TIF
,FILE422=00000422.TIF
,FILE423=00000423.TIF
,FILE424=00000424.TIF
,FILE425=00000425.TIF
,FILE426=00000426.TIF
,FILE427=00000427.TIF
,FILE428=00000428.TIF
,FILE429=00000429.TIF
,FILE430=00000430.TIF
,FILE431=00000431.TIF

FILE432=00000432.TIF
,FILE433=00000433.TIF
,FILE434=00000434.TIF
,FILE435=00000435.TIF
,FILE436=00000436.TIF
,FILE437=00000437.TIF
,FILE438=00000438.TIF
,FILE439=00000439.TIF
,FILE440=00000440.TIF
,FILE441=00000441.TIF
,FILE442=00000442.TIF
,FILE443=00000443.TIF
,FILE444=00000444.TIF
,FILE445=00000445.TIF
,FILE446=00000446.TIF
,FILE447=00000447.TIF
,FILE448=00000448.TIF
,